मालतीमाधवम्

प्रकरणम् ।

महाकवि भवभूति-प्रणीतम् ।

काव्यप्रभासम्पादकेन काव्यतीर्थतर्कतीर्थोपनामकेन

श्रीकुञ्जविहारि-तर्कसिद्धान्तभट्टाचार्य्येण

स्वप्रणीतया तत्त्वबोधिनीसमाख्यटीकया बङ्गानुवादेन च

समलङ्कृत्य प्रकाशितम् ।

बङ्गाब्दाः १३२६ ।

मूल्यं [illegible] सार्द्धरूप्यकद्वयम् ।

वस्त्रमुखसम्बद्धस्य मूल्यं ३) रूप्यकत्रयम् ।

प्रकाशकः—
श्रीकुञ्जविहारितर्कसिद्धान्तः
पो:—बैद्योबेलतोरा, मानभूम।

कलिकातानगर्य्यां
५नं किदामसुदीनमिस्त्रितमास्त्रप्रचारयन्त्रे—
श्रीकुञ्जनचन्द्र दे द्वारा मुद्रितम्।

भूमिका।

परम कारुणिकपरमेश्वरस्यापारकरुणया सटीकानुवादमालती-माधवस्य मुद्रणं सम्प्रति समाप्तिमगमत्। मालतीमाधवस्य टीका-विरचनं समाप्य १८३५ पञ्चत्रिंशदधिकाष्टादशशततमशकाब्दीयवैशाख-मासात् पञ्चमवर्षीयार्य्यप्रभायां पुस्तकमिदं प्रकाशयितुमारब्धमपि नानाविधान्तरायादर्द्धद्वयेनार्य्यप्रभायां पञ्चमाङ्कं यावत् प्रकाश्यैव पृथग्-भावेन तन्मुद्रापणं सङ्कल्प्य सप्तमवर्षीयार्य्यप्रभायां सटीकानुवादं सांख्यसूत्रं प्रकाशयितुं प्रारब्धम्। किन्तु हन्त!! सुबृहदाकारं तत्-सांख्यसूत्रं परिसमाप्तमपि न जानामि केन दैवप्रातिकूल्येन तन्मालती-माधवावशिष्टांशस्य पृथग्भावेन मुद्रापणमारब्धुमपि नालमभुवम्। अतएवागत्या सांख्यसूत्रसमाप्त्यनन्तरं नवमवर्षीयार्य्यप्रभायामेव क्रमशस्तन्मुद्रणं समाप्य सम्प्रति पृथक् पुस्तकाकारेण सम्पूर्णं मालतीमाधवं प्रकाश्यत इति सर्व्वे विदाङ्कुर्व्वन्तु।

एतत्टीकाप्रणयनकाले च विभिन्नदेशीयानि चत्वारि पुस्तकानि संगृह्य तेभ्यः समीचीनतया विवेचितः पाठः एव मूले सन्निवेशितो व्याख्यातश्च। पाठान्तराणि च दुरूहाणि टीकायामेव समुल्लिख्य व्याख्यातानि। टीकायां तथा विषयसन्निवेशः कृतः, यथा परीक्षार्थिनां किञ्चिदपि ज्ञातव्यं नावशिष्येत। टीकायामसन्निविष्टा अपि रस-गुणनायकादिविचाराः समालोचनावसर एव प्रतिपादिताः। बङ्गानु-वादेन च दुरूहमपि पुस्तकांशं विशदयितुं प्रयत्नः कृतः। तथाच यद्यनया टीकया वङ्गानुवादेन च मालतीमाधवपाठार्थिनां कथञ्चि-दप्युपकारः स्यात्तदैव प्रचुरतरार्थव्ययः परिश्रमश्च मम सफलो भवेत्।

[illegible]

स्थाने स्थाने स्थितान्यप्यशुद्धानि वाचकमहोदयैरेव संशोध्य पठितुं शक्यानीति शुद्धिपत्रं न प्रकाशितम्।

परिशेषे च वक्तव्यं, कलिकाताप्रवासिना परमस्नेहास्पदेन श्रीमता नगीन्द्रनाथसिद्धान्तरत्नेनास्य मुद्रापणादिविधौ परमं साहाय्यं कृतमिति स सर्व्वान्तःकरणेनाशीर्व्वादार्हं इति शम्॥ -

श्रीकुञ्जविहारिदेवशर्म्मणः।

नाट्योल्लिखितपात्राणाम् ।

पुरुषगणः ।

सूत्रधारः ··· प्रस्तावसूचयिता मुख्यतमो नटः ।
नटः ··· पारिपार्श्विकापरपर्यायः कश्चिद्गुणज्ञानभिनेता ।
माधवः ··· विदर्भराजमन्त्रिदेवरातस्य नन्दनः (नायकः)
मकरन्दः ··· माधवस्य प्रियवयस्यः ।
कलहंसः ··· माधवस्य कार्यदक्षो भृत्यः ।
अघोरघण्टः··· तान्त्रिकानुष्ठानलब्धमाहात्म्यः कश्चिद्घोरयोगी ।
पुरुषः ··· नन्दनस्य कश्चिदनुचरः ।

स्त्रीगणः ।

मालती ··· पद्मावतीश्वरमन्त्रिभूरिवसोः कन्यका (नायिका) ।
मदयन्तिका ··· पद्मावतीश्वरनर्मसुहृन्नन्दनस्य भगिनी ।
कामन्दकी ··· काचिद्बौद्धपरिव्राजिका ।
सौदामिनी ··· मन्त्रसिद्धिलब्धमाहात्म्या कामन्दक्याः प्रथमशिष्या ।
अवलोकिता ... कामन्दक्याः अपरा शिष्या ।
बुद्धरचिता ... कामन्दक्याः शिष्या सखी च ।
कपालकुण्डला... तान्त्रिकानुष्ठानलब्धमाहात्म्या अघोरघण्टशिष्या ।
लवङ्गिका ··· मालत्याः प्रियसखी ।
मन्दारिका ··· अद्वैधभावेन कलहंसानुरक्ता काचिद्बौद्धमठ-
परिचारिका ।
चेटीद्वयम् ··· भूरिवसोः परिचारिकाद्वयम् ।
प्रतीहारी ... भूरिवसोरन्तःपुरद्वारपालिका ।

मालतीमाधवस्य संक्षिप्तसमालोचनम् ।

इदञ्च मालतीमाधवं नाम दृश्यकाव्यं कविकल्पितेतिवृत्तत्वादिभिः "प्रकरणम्"। तत्तुटीकायामेव प्रतिपादितं, प्रकरणादिलक्षणमपि तत्रैव प्रदर्शितमनुसन्धेयम् ।

अस्य "नायको" माधवः। स च "ब्राह्मणकुमारः" 'अमात्यः" मालतीमात्रनिरतत्वा"दनुकूलः," त्यागादिसामान्यगुणपूर्णत्वात् "धीरप्रशान्तश्च"। नायकादिलक्षणानि यथा दर्पणे—

"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोविदग्धशीलवान्नेता ॥"
"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च ।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः ॥"
"अनुकूल एकनिरतः",
"सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् ।"

अस्य ब्राह्मणत्वन्तु—पञ्चमाङ्के "रे रे ब्राह्मणडिम्भ !" इत्यघोरघण्टकृतमाधवसम्बोधनात्, अमात्यत्वं पुनरमात्यपुत्रत्वेन "भाविनि भूतवदुपचारा"दवगन्तव्यम् । अत एव "अमात्यनायकं मालतीमाधव"मिति दर्पणोक्तिरपि सङ्गच्छते। एवञ्च भूरिवसोरपि ब्राह्मणत्वमनुमातुं शक्यते, अन्यथा ब्राह्मणमाधवपितृत्वेन ब्राह्मणस्य देवरातस्य भूरिवसोरपत्येन सह निजापत्यस्य सम्बन्धकरणप्रतिज्ञाया विरोधापत्तेः। न चासवर्णाविवाहस्य प्रचलितत्वे नायं विरोध इति शङ्कनीयं, तथात्वेऽपि प्रतिलोमविवाहस्य सर्व्वदैव निषिद्धत्वेन "कस्य किमपत्यं भवे"दित्यनिश्चितावस्थायां तत्प्रतिज्ञाया असम्भवस्य दुष्परिहरत्वात्। अनया च युक्त्या ब्राह्मणकन्यया 'मालत्या सह

विवाहे समुद्यतस्य नन्दनस्य, तद्भगिन्या मदयन्तिकायाः पाणिं गृहीतवतो मकरन्दस्य च ब्राह्मणत्वं निर्बाधमवधारयितुं शक्यत इति विभावनीयम्।

अस्य "नायिका" मालती। सापि "ब्राह्मणवंशजा" "परकीया" "कन्यका" चेति। नायिकादिलक्षणानि यथा दर्पणे—

"अथ नायिका स्वाऽन्या साधारणस्त्रीति।
नायकसामान्यगुणैर्भवति यथासम्भवंयुक्ता॥"
"परकीया द्विधाप्रोक्ता परोढ़ा कन्यका तथा।
"कन्यात्वजातोपयमा सलज्जा नवयौवना।"

मदनोद्याने साक्षादेव परस्परसन्दर्शनेन मालतीमाधवयोः परस्परानुरागोत्पत्तेः तदप्राप्तेश्च दशाविशेषोत्पादादत्र पूर्वरागलक्षणो विप्रलम्भशृङ्गार एव प्रधानतमो रसः। तल्लक्षणं यथा दर्पणे—

"श्रवणाद्दर्शनाद्वापि मिथः संरूढ़रागयोः।
दशाविशेषो योऽप्राप्तौ पूर्व्वरागः स उच्यते॥"

एवमन्यान्येऽपि वीरादयः सर्व्व एव रसा हास्यरसविवर्जितास्तदङ्गरूपेण सन्तीति यथास्थानमूहनीयम्।

प्रधानतोऽत्र माधुर्य्याख्यो गुणः। तल्लक्षणं यथा तत्रैव—

"चित्तद्रवी भावमयो ह्लादो माधुर्य्यमुच्यते।"
एवमोजःप्रसादगुणावप्यत्र स्थाने स्थाने स्त इत्यवगन्तव्यम्।
प्राधान्येनात्र वैदर्भी नाम रीतिः। तल्लक्षणमपि तत्रैव
"माधुर्य्यव्यञ्जकैर्व्वर्णैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्व्वा वैदर्भी रीतिरिष्यते॥

अन्या अपि रीतयोऽन्तरान्तरात्र सन्तीत्यनुसन्धेयम्।

अस्य प्रकरणस्य रचयिता महाकविर्भवभूतिः कं देशं कं वा वंशं जन्मनालमकार्षीदिति पर्य्यनुयोगं कविः स्वयमेव "अस्ति दक्षिणापथे पद्मपुरं नाम नगरं। तत्र केचित्तैत्तिरीयिणः पंक्तिपावनाः पञ्चाग्नयो

धृतव्रताः सोमपीथिनो ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायनस्य तत्रभवतो वाजपेययाजिनो "महाकवेः पञ्चमः, सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवः, श्रीकण्ठपदलाञ्छनः, भवभूतिर्नाम जातुकर्णीपुत्रः"। इति वीरचरितसन्दर्भेण निवारयामास! उत्तररामचरितेऽपि प्रस्तावनायामेतदनुकूलसन्दर्भो वर्त्तते। तथाच दाक्षिणात्यदेशे "पद्मपुरं" नाम नगरं भवभूतेर्जन्मस्थानम्, तत्रत्यः श्रौतकर्म्मादिनिरतः सुगृहीतनामा "भट्टगोपाल"स्तस्य पितामहः, । पवित्रकीर्त्तिः "नीलकण्ठः" पिता, जातुकर्णी च मातेति सुस्पष्टमवगम्यते।

"श्रीकण्ठपदलाञ्छनो भवभूतिर्नामे"त्यनेन च दर्शनादिनानाशास्त्रपारावारपारदर्शिनस्तस्य "श्रीकण्ठ" इति सान्वर्यां गुरुदत्तोपाधिः "भवभूति" रिति च पितृकृतं नामेत्यवधारणीयम्। यत्तु—अनन्तपण्डितेनार्य्यासप्तशतीटीकायां वीरराघवेण च महावीरचरितटीकायामभिहितं "श्रीकण्ठ" इति भवभूतेः पितृकृतं नाम, परन्तु—

"तपस्वी कां गतोऽवस्थामिति स्मेराननाविव।
गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ॥"
"साऽम्बा पुनातु भवभूतिपवित्रमूर्त्तिः।"

इत्यादि श्लोकविरचनाद्"भवभूति"रिति नाम समुत्पन्नमिति, तन्न समीचिनं विविचयामः "श्रीकण्ठपदलाञ्छनो भवभूतिर्नामे"ति वाक्यात् "श्रीकण्ठ" इत्यस्योपाधित्वेन "भवभूति" रित्यस्याभिधानत्वेन च प्रतीतेरेव सर्व्वजनसिद्धत्वात्।

"गुणैः सतां न मम को गुणः प्रख्यापितो भवेत्।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥"

इत्यं तत्प्रकरणश्लोकेन—

"श्रेष्ठः परमहंसानां महर्षीणामिवाङ्गिराः।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥"

इति महावीरचरितश्लोकेन च परमज्ञानशाली ज्ञाननिधिनामा सर्व्वश्रेष्ठः परमहंसो भवभूतेर्गुरुरिति सुस्पष्टमवगम्यते। एवमयं महाकविर्व्वेदवेदान्तादीनि बहून्येव शास्त्राण्यधीतवानिति "यद्वेदाध्ययनं तथोपनिषदां सांख्यस्य योगस्य च" इत्यादि श्लोकेन स्वयमेव स्पष्टमाचष्टे। परन्तु तद्विरचितप्रकरणादावपि प्रसङ्गतोऽन्तरान्तरा वेदवेदान्तशास्त्रज्ञानविकाशनदर्शनात्तदनुमानमपि कर्त्तुं शक्यते।

असामान्यपाण्डित्यादिगुणसम्पन्नोऽयं महाकविः कान्यकुब्जेश्वरस्य यशोवर्म्मणः सभापण्डित आसीत्। तत्र च—

"कविवाक्पतिराजश्रीभवभूत्यादिसेवितः।
जितो ययौ यशोवर्म्मा तद्गुणस्तुतिवन्दिताम्॥"

इति राजतरङ्गिणीश्लोकः प्रमाणम्।

यशोवर्म्मणो राजत्वकालश्च सप्तमख्रृष्टाब्दस्य शेषभागादष्टमख्रृष्टाब्दस्य प्रथमभाग इति प्रत्नतत्त्वविदः। तथाच तत्सभापण्डितस्यास्य महाकवेरपि समयः प्रायस्तथैवेति निर्द्धारणं नायुक्तमिति सन्तो विवेचयन्तु।

महावीरचरितोत्तररामचरितमालतीमाधवाख्यानि त्रीण्यि दृश्यकाव्यानि ऋते महाकवेरस्य नान्यः कोऽपि ग्रन्थोऽस्तीति श्रूयते। तत्रेदं मालतीमाधवं नाम प्रकरणमेव कवेः शेषकाव्यमिति प्रसिद्धिः। परन्त्वस्य प्रस्तावनायां "ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः" इत्यादि श्लोकप्रदर्शनेनैतत्पूर्व्वप्रणीतनत्काव्यं प्रति जनानामनादरप्रतीतेरपि प्रकरणस्यास्य तत्प्रणीतकाव्यान्तरापेक्षया पराचीनत्वमनुमातुं शक्यत इत्यवधेयम्।

इदञ्च मालतीमाधवं नामप्रकरणं वृत्तान्तकल्पनाकौशलेन पदलालित्येन, छन्दःसन्निवेशनैपुण्येन, अलङ्कारवैभवेन, कवित्वमहिम्ना च सहृदयहृदयानामतिमहतीं चमत्कृतिमातनोति। किं बहुना यदि चान्तरान्तरा दुरूहपदसंयोजनदोषसमास-सन्नि-

वैशद्यादिदोषोऽत्र नास्यास्यत्तदा प्रकरणेषु सर्व्वोत्कृष्टस्थानमिदमधि-
कर्त्तुमलमभविष्यत्।

अस्य महाकवेरसामान्यकवित्वं प्रति नास्ति कस्यापि वैमत्यम्।
तच्चोल्लिखितदृश्यकाव्यत्रयमेव समर्थयितुं पर्य्याप्तम्। विशेषतस्तु—

"निरवद्यानि पद्यानि यदि नाट्यस्य का क्षतिः।
भिक्षुकक्षाविनिक्षिप्तः किमिक्षुर्नीरसो भवेत्॥"

"अलिपटलैरनुयातां सहृदयहृदयज्वरं विलुम्पन्तीं।
मृगमदपरिमललहरीं समीर किं पामरेषु रे किरसि?॥"

"किं चन्द्रमाः प्रत्युपकारलिप्सया करोति गोभिः कुमुदावबोधनम्।
स्वभाव एवोन्नतचेतसां सतां परोपकारव्यसनं हि जीवितम्॥"

इत्यादीनि सुभाषितान्यपि एतन्महाकविविरचितत्वेन प्रसिद्धानि
समतीव महतीं कवित्वशक्तिमस्य प्रथयन्तीत्यलमनल्पजल्पितेन॥



मालतीमाधवं

नाम

प्रकरणम् । *

सानन्दं नन्दिहस्ताहतमुरजरवाहूतकौमारबर्हि-

त्रासान्नासाग्ररन्ध्रं विशति फणिपतौ भोगसङ्कोचभाजि ।

गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणे-

र्वैनायक्यश्चिरं वो वदनविधुतयः पान्तु चीत्कारवत्यः ॥ (१)

माधवं माधवे मासि प्रणम्याभीष्टसाधकं ।

मालतीमाधवव्याख्या क्रियते तत्त्वबोधिनी ॥

व्याख्या यस्य च पूर्वसूरिरचिताः प्राचीनरीतिश्रिताः

ताः सन्तीह न ता नवीननियमात् शिक्षापरीक्षाविधौ ।

श्रीयज्ञामकृतर्कमालजरितस्याथ विद्यार्थिना

साहाय्यन्तु यथोचितं वितरितुं यत्नो मयोऽयं श्रमः ॥

भवभूतेर्निगूढार्थवचसोऽर्थविकाशने ।

किञ्चित् साहाय्यमनया यदि स्यात् सफलः श्रमः ॥

---

* । दृश्यश्रव्यत्वभेदेन काव्यं द्विविधं, तत्राभिनेयरूपं दृश्यं, "रूपक"मिति दृश्यकाव्यस्यैव नामान्तरं ।

मालतीमाधवे

तदुक्तं दर्पणे—"दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।

दृश्यं तत्राभिनेयं स्यात् रूपारोपात्तु रूपकम्॥"

तद् दशधा अपि उक्ता: तत्रैव—

"नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।

ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥"

इदञ्च दृश्यकाव्यं लौकिकवृत्तत्वात् कविकल्पितत्वात् अमात्यनायकत्वाच्च प्रकरणं। प्रकरणलक्षणमुक्तं दर्पणे—

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितं

शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।

सापायधर्मकामार्थपरो धीरप्रशान्तकः॥

भरतकृतनाट्यशास्त्रेऽपि—यत्र कविरात्मशक्त्या वस्तुशरीरञ्च नायकञ्चैव।

औत्पत्तिकं प्रकुरुते तज्ज्ञेयं प्रकरणं नाम॥

दशरूपकेऽपि—अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।

अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्॥

धीरप्रशान्तं सापायं धर्मकामार्थतत्परं।

शेषं नाटकवत् सन्धिप्रवेशकरसादिकम्॥

कुलजादिनायिकाभेदात् प्रकरणस्य त्रैविध्यमुक्तं दर्पणे—

नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।

तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।

कितवद्यूतकारादिविटचेटकसङ्कुलः॥"(१)

(१) अथ वनभवानसोमवाग्विभूतिर्भवभूतिर्नाम महाकविः स्वकाव्यनिर्माणस्य यशआद्यनेकश्रेयःसाधनफलकत्वमाकलयन् मालतीमाधवं नाम रूपकं प्रणिनीषुः "सम पूं

पूर्वरङ्गः सभापूजा ततः परं। कथनं कविसञ्ज्ञादेर्नाटकस्याप्यथामुख"मिति नाट्यक्रमानुसारेण "यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते" इत्युक्तलक्षणपूर्वरङ्गस्य प्रथमकर्त्तव्यतया, तत्र च "प्रत्याहारादिकान्यङ्गान्यस्य भूयांसि यद्यपि। तथाप्यवश्यं कर्त्तव्या नान्दी विघ्नोपशान्तये॥" इत्यनेनावश्यकर्त्तव्यतयोपदिष्टां पूर्वरङ्गाङ्गभूतां नान्दीं प्रथमं निर्दिशति—सानन्दमित्यादि। गण्डपाली: महादेवस्य ताण्डवे नृत्ये नन्दिनः शङ्करकिङ्करस्य करेण ताड्यमानस्य वाद्यमानस्य मुरजस्य (मुराद्वेष्टनाज्जातो मुरजः, मुर + जन + ड) मृदङ्गस्य रवेण ध्वनिना आह्वान कौमारबर्हिणः कार्त्तिकेयवाहनमयूरात् यस्माद् भयं तस्मादिति प्रवेशहेतूक्तिः। भोगस्य फणायाः कायस्य वा ("भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययो"रिति विश्वः) सङ्कोचं समसारणं भजन् इति भोगसङ्कोचभाक् तस्मिन्। (बिलप्रवेश-काले फणादिसङ्कोचः सर्पाणां नैसर्गिको नियमः, अन्यथा महाकायस्य दुष्करत्वं प्रवेशा-सम्भवात्) फणिपतौ सर्पराजे नासारन्ध्रं नासिकाविवरं (अर्थाद्विनायकस्य) सानन्दं यथा तथा विशति सति (अत्र यत्र प्रवेशे भयप्रवेशस्यार्थसिद्धत्वादपदं उक्तिदोषालङ्कार-सूचनाय, यथोक्तं दण्डिना—"उक्तिदोषः क्वचिद्दोषप्रसङ्गस्य साक्षात् शब्देन कीर्त्तना"दिति।) (झटिति प्रवेशस्य भयनिवारकतया सानन्दमिति विशेषणं तत्र युक्तं। सानन्दमित्यस्य पान्त-क्रियाविशेषणत्वमपि केचिदाचक्षते।) गण्डयोः कपोलयोः उड्डीनाभिः (उत्+डी+क्त) ऊर्द्धं गताभिः अलिमालाभिः मधुकरपङ्क्तिभिः मुखरिताः प्रशब्दीकृताः ककुभो दिशो याभि-स्तास्तथोक्ताः। चीत्कारः अव्यक्तः शब्दः तदत्यन्तपुञ्जिताः विधुनने चीत्कारविरुद्धात् साहित्यमाश्रमय मतुबर्थो वाच्यः, तदाच भयेन वदने युगपदेव विधूननचीत्कारी

১। অনুবাদ। মহাদেবের নৃত্যকালে নন্দীকর্তৃক বাদ্যমান মৃদঙ্গশব্দে সমাকৃষ্ট কার্ত্তিকেয়বাহন ময়ূরের ভয়ে সর্পরাজ বাসুকি ফণা সঙ্কোচ করিয়া (গণেশের) নাসারন্ধ্রে সানন্দে প্রবিষ্ট হইলে গণেশ চীৎকার করিয়া যে বদন কম্প করিয়াছিলেন, যে কম্পনকালে অলিকুল গণেশের কপোলদেশ হইতে উড়িয়া দশদিক্ মুখরিত করিয়াছিল, গণেশের সেই বদনকম্প চিরকাল তোমাদিগকে রক্ষা করুক।

अपि च—चूडापीडकपालसङ्कुलगलन्मन्दाकिनीवारयो
विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रत्विषः ।
पान्तु त्वामकठोरकेतकशिखासंदिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटा जटाः ॥ (२)

यतुरू तादिति भाव) यथा सवाः सामाजाधिकरण्यसम्बन्धेन सहितिकाः सदर्थः । विनायक-स्तेना वैनायकः (तद्देवभिन्नम्) वदनस्य विपुलत्वसूचनानि गजाननस्य कम्पनानीति यावत्, चिरं बहुकालं वो युष्मान् पान्तु रक्षन्तु । विपुलगण्डावेतनतेऽपि देवसम्बन्धितान् रक्षककर्तृत्व-सुपचरितम् । विनायकस्य विघ्नराजत्वात् तत्कम्पनानि विघ्नवारकाणीत्याशयः । अत्र काव्यलिङ्गमलङ्कारः । "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते" इति दर्पणवचनात् । स्रग्धरा-वृत्तं, तदुक्तं छन्दोमञ्जर्या—"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।" अत्र च महाकालेन कार्यं समरकुहेडिंका तुण्डीकरणेन सौभं मदनविघ्नमनेन सत्यत्र सूचयता मैत्री-निर्वृ दर्शितम् ॥ १ ॥

(२) प्रचुरतरमङ्गलमेव प्रचुरतरविघ्नापसारकतया शिष्टाचिरणं मङ्गलम्, पुनर्मङ्गल-माचरति—चूडापीडेत्यादि । चूडाया शिरसि (यद्यपि "शिखा चूडा केशपाशः" इत्यमरानुसारेण केशपाश एव चूडाशब्दवाच्यस्तथापि तदाश्रयीभूते शिर एव लक्षणे, आपीडस्य शिरोभूषण-त्वात्) य आपीडः शिरोभूषणं माला (यद्यत्र अवतंसादिपदस्य कर्णभूषणार्थकत्वेऽपि कर्णाद्यनवाप्ती तत्सन्निधानप्रतिपादकतया कर्णादिपदं सार्थकं, तथैवात्रापि "आपीडशेखरोत्तं-सावतंसाः शिरसि स्रजः" इति कोशानुसारादापीडशब्देनैव शिरःस्थत्वावगतावपि चूडाशब्दस्तत्-सन्निधानप्रतिपादकतया सार्थकः) तस्य कपालैः मुण्डखण्डैरस्थिविशेषैः (शिवस्य कपालमालायाः कपालगर्भितत्वात् कपालैः सकलान्वितत्वमितिबोध्यं) सङ्कुलं व्याप्तं गलत् स्रवत् मन्दाकिन्या अर्थात् स्वर्गलोकस्थिताया गङ्गाया वारि जलं याभ्य ताः सचोक्ताः । विद्युत्प्रायं स्फुरितप्रभं

अपिच—पद्मालीपिङ्गलिम्नः कण इव तडितां यस्य कृत्स्नः समूहो
यस्मिन् ब्रह्माण्डमौपद्विघटितमुकुले कालयज्वा जुहाव।
अर्चिर्निष्टप्तचूडाशशिगलितसुधाघोरझाङ्कारिकोपम्
त्वार्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः॥ (२)

यच्च ललाटलोचनपुटं भालस्थाक्षिसम्पुटं तस्य ज्योतिषा तेजसा विमिश्रा सम्बन्धविशेषेण मिलिता त्विट् प्रभा यासां ताः (पुटमध्यस्थस्य समस्तनेत्रभागस्य तेजोमयत्वद्योतनार्थमत्र पुटपदं) अकठोरया कोमलया केतकशिखया केतकीकुसुमाग्रेण सह सन्दिग्धः संशयितः "किमियं केतकशिखा चन्द्रलेखा वा" इत्येवं संशयविषय इति यावत्। मुग्धो मनोरमः इन्दुश्चन्द्रो यासु ताः। तथा भुजगाः सर्पा एव वल्ल्यो लतास्ता एव वलया मण्डलाकारेण स्थिताः स्रजः ताभिर्बद्धः जूटः समूहो यासां तास्तथोक्ताः भूतेशस्य शिवस्य जटाः त्वां पान्तु रक्षन्तु। अचेतनानां जटानां रक्षकत्वमपि पूर्ववद्देवतासम्बन्धित्वात्।

अत्र केतकशिखेत्यादिना उपमानोपमेययोः संशयप्रदर्शनात् "सन्देहः" भुजगादौ वल्ली-लताद्यारोपात् "रूपक" इन्दुकार्यादिवर्णनात् "समासोक्ति" श्चालङ्काराः, तेषां लक्षणानि च दर्पणोक्तानि यथा—"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।" "रूपकं रूपितारोपाद्विषये

২। যেই জটাতে মস্তকস্থিত বক্রিমশালীর কপালব্যাপ্ত মন্দাকিনীর জল বিগলিত হইতেছে, যেই জটার দীপ্তি বিদ্যুৎসদৃশ ললাটলোচনের জ্যোতিঃদ্বারা বিমিশ্রিত, যেই জটাতে কোমল কেতকীশিখাগ্রের সহিত সন্দিগ্ধ মনোহর চন্দ্র বিরাজমান, যেই জটার সমূহ সর্পরূপ যে লতা সেই লতারূপ মণ্ডলাকারাবস্থিত মালাদ্বারা বদ্ধ, মহাদেবের সেই জটা তোমাদিগকে রক্ষা করুক।

निरपत्रपे"। "स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्"। शार्दूलविक्रीडितं वृत्तम्, "सूर्याश्वै-र्मसजस्तताः सगुरवः शार्दूलविक्रीडित"मिति लक्षणात्।

अत्र च ईश्वरस्य जटाजूटावबद्धस्य प्रमाणाकारप्रतीतेर्धीमान्: कथानायकः सूचितः, जटा इति कर्तृत्वेन नायकमाधिकावद्धत्वं, भूमिप्रक्षेपोपसर्जनेन जटा इति स्त्रीत्वेन च नायकस्य सत्कार्यनिर्वाहे प्राप्तव्यं, कामन्दकादितपस्विनीगणस्य तत्कार्यनिर्वाहोद्योगि-त्वञ्च सूचितमिति केचिदाचक्षिरे। केचित्तु "धाराक्लिन्नवपुर्भरामृतमय"इति निर्वर्ण्य-मुखी मालतीमाधवादिनाम्ना श्रीकाव्ये जलधरसमयप्रारम्भः सूचित इत्यूचिरे। तथाहि—सुरत-ध्वानेन गर्जितशब्दं, नीलाम्बरदीप्त्यनेन मयूररवं, भुजङ्गमण्डलया तिरोहितचन्द्रत्वात् कवि-रस्यापि जटाजूटस्य श्यामलप्रतिपादनेन मेघोदयः, एवं सर्पविस्फारं, गङ्गाजलगलनेन वर्षणं, कपालमालया बलाकावलिं, ललाटनेत्रशिखा विद्युद्द्योतनं, कैतकदिग्धित्वेन केतकोद्गम इति। एवं मदनोद्दीपनघनसमयसूचनेन शृङ्गाररसप्राधान्यस्य प्रकरणस्य कटाक्षितत्वमपि केचिदाच-क्षते। तेषामिताहृशमूलाननुसरणं अस्माकमप्रकाशनं सहृदयहृदयानन्दसंवादकतया कौतुकं-कार्यसाधकमिति त एव जानन्ति।

(२) यद्यपि प्राचीनव्याख्यातृभिरव्याख्याततया "पक्ष्माली"त्यादि श्लोकः प्रक्षिप्त इति प्रति-भाति, तथापि बहुपुस्तकेषु दृष्टत्वादस्माभिर्व्याख्यायते। यस्य लोचनस्य पक्ष्मालीपिङ्गलिम्नः पीतरक्तिमपिङ्गलतायाः समूहो तडितां विद्युतां कृत्स्नः सकलः कण इव स्फुलिङ्ग-मात्र इति यावत्। तथा कालः मृत्युरेव यज्वा याजकः कालरूपो याजक इत्यर्थः, यस्मिन् लोचने (आहवनीयस्थानीये) ईषद्विघटितमुकुले किञ्चिदुन्मीलिते सति ब्रह्माण्डं जगत् जुहाव हुतवान्। अर्चिर्भिः स्फुलिङ्गैः, निष्टप्तः सन्तापितः, यः, चूडाशशी भालचन्द्रस्तस्मात्, ...

৩। যেই লোচনের রোমরাজির পিঙ্গলতাসমূহ সমস্ত বিদ্যুৎস্ফুলিঙ্গ-প্রায়, যেই লোচন কিঞ্চিদুন্মীলিত হইলে কালরূপ যাজক তাহাতে ব্রহ্মাণ্ড আহুতি দিয়াছিলেন, যেই লোচনের অপাঙ্গদেশ স্ফুলিঙ্গনতপ্ত কপালস্থিত চন্দ্র হইতে ক্ষরিত অমৃতপ্রবাহধারা শব্দায়মান, মদনদহনকারক মহাদেবের সেই তৃতীয় লোচন তোমাদিগকে রক্ষা করুক।

[नान्द्यन्ते सूत्रधारः। (४)]

अलमतिविस्तरेण (५)। [पुरतोऽवलोक्य]

सत्वादभ्यासनिगदितेन चरितेन सुधासारेण धवलप्रवाहेण भङ्गारी प्रस्त्रायमानः कोपः कपालदेशो यस्य तमयोर्ल, मदनक्रोधयं अरदाक्ष पुरारेर्महादेवस्य तार्तीयीकं (तृतीय-शब्दात् स्वार्थे ईकम्) तृतीयं लोचनं कपालस्थितनेत्रमिति यावत्, वो युष्मान् अवतु रक्षतु। अत्र लोकातिशयसम्पत्तिवर्णनेनोदात्तालङ्कारः "लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते। यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" इति दर्पणलक्षणात्। अत्र धराङ्गं, वसन्ततिलकमिव।

क्वचित् पुस्तके प्रथमपरोऽपि नान्दीश्लोको दृश्यते—

"दन्ताग्रेषु संगलत्कनककलशव्यावर्तनव्याकुला
नासाभोगनकर्णकुहरेषूद्गद्गदध्वानिनः।
गण्डस्थल्यभिघातशीर्णकणिकाश्चास्वत्पूर्णेन्दवः
शम्भोर्भ्रमकपालकन्दरपरिस्पन्दोल्लसाः पान्तु वः॥"

अस्यार्थः—शम्भोः शिवः सः कपालकन्दरः कपोटिः शिरोस्थिमयः प्रदेशः पात्रविशेष इति यावत्, तत्परिस्पन्दोल्लासात्परिस्रवनस्यताः, दन्ताग्रेषु तत्कपोटिस्थितदन्तपङ्क्ति-ष्वित्यर्थः, संगलत्यः स्रवन्त्यः अत एव कनककलशहितेन व्यावर्तनेन परिभ्रमणेन व्याकुलाः नासाभोगनकुहरेषु नासादिसुषिरप्रदेशेषु उद्गद्गदध्वानिनः गुडगुडाकारशब्दवत्यः गण्डस्थलाभिघाताविशीर्णाः विदीर्णाः कणिका यासां ताः, शम्भोः शिवस्य चूडाश्चन्द्रस्य मूर्धन्यः शिरोमण्डलरूपः वो युष्मान् पान्तु रक्षन्तु। अत्र धराङ्गम्।

(४) आशीर्वादादिसूचकं नाटकाद्यं पद्यं नान्दी, तल्लक्षणमुक्तं दर्पणे—

"आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥

भग्नध्वस्तचन्द्राममोकविरोजिनी ।

पदेर्गुप्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥" इति ।

अत्र पदसङ्ख्येन केचिदिमन्यमाचक्षते, केचित्तु पदस्य चतुर्थांशैकभागमूचिरे। तदि-
द्वितीयपक्षनिर्देशेन पदाष्टकेनाष्टपदा नान्दी, श्लोकद्वयात्मकत्वे तु श्लोकद्वयेन द्वादश-
पदा नान्दी। वस्तुतो विविधाद्विश्लोकत्वादपि सम्पूर्णकत्वे पदनियमाभ्युपगम एव कविरलिने न।
पदानियमोऽपि—"आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचितः । नान्दीति कथ्यते तस्याः पदादि-
नियमोऽपि वि"-ति लक्षणान्तरे "कथिता" इत्यनेन सूचितः । अत एव "या सृष्टिः स्रष्टुराद्या" इत्यादि
शाकुन्तलादिनान्दीषु पदानियमो दृश्यते । "सन्दिग्धमुग्धेन्दव" इत्यनेन च नान्दीयं चन्द्रनामा-
ङ्किता, चन्द्रनामाङ्कितनान्द्याः प्रयुक्तापि प्रोक्ता—"चन्द्रनामाङ्किता प्रोक्ता श्लोका च यती
निधिः । प्रीते चन्द्रमसि श्लोका रसश्लोकेति वाग्मिभिः" ॥ नन्दयतीति नन्द , पचाद्यच् , नन्द एव
नान्द प्रज्ञादिभ्यश्च, ततस्त्रियां ङीपि नान्दीति पदं निष्पन्नम् । नान्द्यन्ते—नान्दीपाठान्ते इत्यर्थः,
सूत्रधार. "नान्द्यस्य वस्तुतत्त्वं नगन्धर्व स्यात् समीजनम् । रङ्गदैवतपूजाकृत् सूत्रधार उदीरित"
इति भरतोक्तलक्षणो नटविशेषः । आहेत्यादि क्रियाध्याहारेणान्वयः । ननु नान्द्यन्ते सूत्रधार
इत्ययुक्तं "नान्दीं प्रयुज्य निष्क्रामेत् सूत्रधारः सहानुगः । स्थापकः प्रविशेत् पश्चात् सूत्रधार-
गुणाकृति ॥ पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥
इति भरतानुशासनेन सूत्रधारगुणाकृतिनटान्तरेणैव काव्यार्थस्य स्थापनीयत्वादिति चेत्स
केचित् सूत्रधार इति सूत्रधारसाम्यात् स्थापके प्रयोग इत्याहुः । केचित्तु नान्द्यन्ते स्थापक इत्येव
पठन्ति । वस्तुतस्तु "प्रत्याहारादिसर्वाङ्गकस्य पूर्वरङ्गप्रयोगस्यनातिविस्तरेणैव नान्दीं प्रयुक्ते"-
त्यादि प्राचीनभरतानुशासनमिति युक्ततरमस्माकम् । अत एव दर्पणकृतापि "पूर्वरङ्गं विधायैव
सूत्रधारो निवर्तते । प्रविश्य स्थापकस्तद्वत् काव्यमास्थापयेत्ततः" ॥ इत्यस्य व्याख्यानावसरे
इदानीं पूर्वरङ्गस्य सम्यक्प्रयोगाभावादेक एव सूत्रधारः सर्वं प्रयोजयतीति व्यवहार,
इत्यभिहितम् । ॥

(१) अतिविस्तरेण नान्दीश्लोकपाठादिर्नाट्ये च अत्र अर्थेन, अन्यथा नवनाटकविलो-
कनीत्सुकानां परिषदो रसविच्छेदो भवेदित्याशयः ।

अये! उदितभूयिष्ठ एष भगवानशेषभुवनदीपदीपकस्तपन-स्तमुपतिष्ठे (६)। [प्रणम्य]।

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते!
धुर्य्यां लक्ष्मीमथ मयि भृशं धेहि देव! प्रसीद।
यद्यत्पापं प्रतिजहि जगन्नाथ! नम्रस्य तन्मे
भद्रं भद्रं वितर भगवन्! भूयसे मङ्गलाय॥ (७)

---

(६) "ततः श्लोकं पठेदेकं गम्भीरस्वरसंयुतम्। देवतोद्देशकं यत्र पूजा प्रवर्त्तते॥" इति भरतानुशासनानुसारेण माङ्गलिकतया रङ्गद्वारपाठ्यस्य श्लोकस्यावतरणिकामुत्थापयति— अये इत्यादिना। "अये" इति सम्भ्रमसूचको निपातः। उदितं भूयिष्ठं बहुलं यस्य सः, किञ्चिदूनपूर्णोदय इत्यर्थः। "नेष्टादावियसुमन्त"मिति निषेधादुदितभूयिष्ठम् इत्युक्तम्। अशेषाणां भुवनदीपानां दीपकः प्रकाशकः, भगवान् षडैश्वर्यशाली, तपनः सूर्य्यः, स सूर्य्यं उपतिष्ठे आराधयामि, प्रणामाञ्जलिकेनेति शेषः। "पथ्याराधनयोर्वे"रात्मनेपदम्।

(७) आराधनश्लोकमाह—कल्याणानामिति। हे विश्वमूर्त्ते! सर्वात्मन्! "सूर्य्य आत्मा जगतस्तस्थुषश्चे"ति श्रुतेः। त्वं कल्याणानां माङ्गलिकानां महसां तेजसां भाजनं पात्रमसि। हे देव। (दीव्यतीति देवः पचाद्यच्) अभिव्यक्तमङ्गल त्वम्। "एकवाक्यिनन्दार्थस्यान्यस्यान्यसार्थ-मनुसंरणमनुवादः।" मयि मद्विषये धुर्य्यां धुरन्धरां लक्ष्मीं सम्पत्तिञ्च, अथाथशब्दः समुच्चयार्थं, भृशं अतिशयेन धेहि प्रतिपादय। प्रसीद प्रसन्नो भव। हे जगन्नाथ! भुवनस्वामिन्। नम्रस्य मे यद्यत् पापं (अस्तीति शेषः) तत् प्रतिजहि निवर्त्तय। अत्र यद्यदिति वीप्सया कायिकवाचनिकादिप्रकारकात्वं अभिप्रेतम्, अत एव तच्छब्दे वीप्सा न कृता, वीप्सितस्यैव प्रकृतपरामर्शिना तच्छब्देन परामर्शाद्द्वितीयतच्छब्दापेक्षाविरहात्। हे भगवन्। भूयसे प्रभूताय मङ्गलाय शुभाय (तादर्थ्ये चतुर्थी) भद्रं भद्रं प्रसीद भद्रं वितर देहि। अत्र अविच्छिन्नपाठस्य सूर्य्याराधनेन प्रकरणनायकस्य माहात्म्यं सूचितम्। यद्यदिति वीप्सया धीरप्रत्याद्भूतसमस्तनादिकृतोपद्रवसूचनं भापनायासनार भद्रं भद्रमित्यनेन

৬। শুত্র। নান্দীপাঠাদির বাহুল্যে প্রয়োজন নাই। অয়ে! সমস্ত ভুবন-দীপের প্রকাশক ভগবান্ সূর্য্যদেব প্রায় সম্পূর্ণরূপেই উদিত হইয়াছেন, তাঁহার আরাধনা করি (প্রণাম করিয়া।)

৭। হে বিশ্বমূর্ত্তে! তুমিই মঙ্গলজনক তেজের আধার। হে দেব! তুমি

[नेपथ्या-(८) भिमुखमवलोक्य] मारिष ! (९) सुविहितानि रङ्गमङ्गलानि, (१०) सन्निपतितश्च भगवतः कालप्रियनाथस्य यात्राप्रसङ्गेन नानादिगन्तवास्तव्यो महाजनसमाजः (११)। आदिष्टश्चास्मि विद्वज्जनपरिषदा, यथा, केनचिदपूर्वप्रकरणेन वयं विनोदयितव्या इति। तत्किमित्युदासते (१२) भरताः।

मालतीमदयन्तिकामाधवस्य मङ्गलाय, मृगयो मङ्गलादिमर्दनं च कपालकुण्डलादीतमालती विपत्त्रिस्तारादिक सूचितम्। मन्दाक्रान्तावृत्तम्,—"मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्म"मिति लक्षणात्।

(८) नेपथ्यो नाम रङ्गस्थलस्य पश्चाद्यवनिकान्तरितो वेशरचनादिस्थानविशेषः, "कुशीलवकुटुम्बस्य स्थली नेपथ्य उच्यते" इत्युक्तेः।

(९) मारिष इति नटस्य सम्बोधनम्। "सूत्री वदेन्मार्षेति नेपथ्ये मारिषेति च" इति वचनात्। "मान्यो भावेति वक्तव्यः किञ्चिदूनस्तु मारिष" इत्यमरः।

(१०) सुविहितानि साधुसम्पादितानि, रङ्गे नृत्य सभाङ्गनानि मङ्गलनिर्वाहकाणि नीराजनपूजादीनि। ("रङ्गो नृत्ये रणक्षितौ" इति विश्वः)।

(११) कालप्रियनाथस्य महेश्वरदेवविशेषस्य, यात्रा उत्सवस्तस्य प्रसङ्गेन (अनेन वसन्तकालसूचनम्) नानादिगन्तवास्तव्यः नानादेशनिवासी, अनेन च सर्वकलाभिज्ञत्वं परिषदो दर्शयति, विद्वत्परिषन्मन्त्रिधाविव प्रयोगकौशल्यप्रदर्शनौचित्यं स्वभावसिद्धत्वात्। (महत्त्व इति वर्णविकारतिरपी दीर्घश्च इत्युक्तत्वात्) महाजनसमाजः विद्वद्गोष्ठी, सन्निपतितः उपस्थितः।

(१२) उदासते उदासीना तिष्ठन्ति। भरताः नाट्याचार्याः नटाः।

আমাকে বিশেষরূপে সুভাসম্পাদক লক্ষ্মী ও সম্পত্তি দান কর, তুমি প্রসন্ন হও। হে জগন্নাথ। নটভাবাপন্ন আমার যে যে পাপ থাকে, তুমি সেই সেই পাপ বিনাশ কর। হে ভগবন্! প্রকৃত নরলোকের জন্য তুমি নির্দোষ অভীষ্ট বিতরণ কর।

৮-১২। (নেপথ্যের দিকে অবলোকন করিয়া) মারিষ! রঙ্গের মঙ্গলজনক কার্যসকল সম্পাদিত হইয়াছে। ভগবান কালপ্রিয়নাথের যাত্রাপ্রসঙ্গে নানাদেশবাসী মহাজনগণ উপস্থিত হইয়াছেন, আমিও বিদ্বজ্জন কর্তৃক আদিষ্ট হইয়াছি,

[प्रविश्य पारिपार्श्विकः (१३)] भाव! (१४) परिषन्निर्दिष्टगुणं प्रबन्धं नाधिगच्छामः।

सूत्र। मारिष! कतमे ते गुणास्तत्र यानुदाहरन्त्यार्या विदग्धा मिश्रा भगवन्तो भूमिदेवाः (१५)।

नटः।—

भूम्ना रसानां गहनाः प्रयोगाः सौहार्दहृद्यानि विचेष्टितानि।
औद्धत्यमायोजितकामसूत्रं चित्रा कथा वाचि विदग्धता च॥ (१६)

---

(१३) पारिपार्श्विकलक्षणं यथा भरते—"सूत्रधारस्य पार्श्वे यः प्रभवन् कुरुतेऽर्थनम्। काव्यार्थसूचनात्पार्श्वे स भवेत् पारिपार्श्विकः॥"

(१४) भाव इति सूत्रधारस्य सम्बोधनम्, यत् पूर्वोक्तप्रमाणानुसारेण सूत्रधारो नटेन भावेत्येव वाच्यः। परिषदा प्रेक्षकैः निर्दिष्टा गुणा यत्र तम्, प्रबन्धं प्रकरणम्।

(१५) "शीलं ज्ञानं च बध्नीयात् पूज्यानामस्य मर्षणम्" इति भरतानुशासनात् पूज्यवाक्यमर्षं प्रश्नमाह—कतम इति। कतमे कियन्तः, आराद्याता दूरं गता पापादिदोषेभ्य इत्यार्याः, "क्षमा शौचं दया दानं धर्मः सत्यं कृतज्ञता। अद्रोह इति येष्वेतत्तानार्यान् सम्प्रचक्षते॥" इत्येवं लक्षणाः। विदग्धाः चतुःषष्टिकलावेदिनः, पण्डिताः, मिश्राः पूज्याः, भगवन्तः षडैश्वर्यशालिनः, भूमिदेवा ब्राह्मणाः। सभायामन्येषां सत्त्वेऽपि भूमिदेवा इति कथनं तत्प्रधानत्वाद्गुणदोषविचारस्य तदधीनत्वात् देवतास्वरूपत्वेन सेवाराधनीयत्वाच्चेति मन्तव्यम्।

(१६) प्रबन्धे गुणान् दर्शयति—भूम्नेति। रसानां अङ्गाङ्गीभावेन स्थितानां शृङ्गारादीनां भूम्ना प्राचुर्येण गहनाः गभीराः सूक्ष्मदर्शिमात्रबोध्या इति यावत्। प्रयोगाः अभिनयाः, अनेन रसैकप्रधानत्वं प्रबन्धस्य दर्शितम्। तथा सौहार्देन मित्राधिकरणेन हृद्यानि मनोज्ञानि विचेष्टितानि नायकनायिकयोर्व्यापारविशेषाः, अनेन धीरप्रशान्तनायकोपेतत्वं दर्शितम्।

যে "কোনও অপূর্ব প্রকরণের অভিনয়দ্বারা আমাদের আনন্দ-সম্পাদন কর।" সুতরাং নটগণ উদাসীন কেন?

১৩-১৪। পারিপার্শ্বিক। (প্রবেশ করিয়া) ভাব! পরিষৎকর্তৃক যে সমস্ত গুণ নির্দিষ্ট হইয়াছে, তাদৃশ গুণসম্পন্ন প্রকরণ দেখিতেছি না।

১৫। সূত্র। মারিষ! কুলশীলাদিসম্পন্ন সমস্ত শাস্ত্রাভিজ্ঞ পূজ্য ষড়ৈশ্বর্য-শালী ব্রাহ্মণগণ কি কি গুণের নির্দেশ করিয়াছেন?

सूत्र। स्मृतं तर्हि। (१७)

नटः। भाव। किमिव? (१८)।

सूत्र। अस्ति दक्षिणापथे विदर्भेषु पद्मपुरं नाम नगरम्। तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः सोमपीथिनो उदुम्बरनामानो ब्राह्मणा ब्रह्मवादिनः प्रतिवसन्ति स्म। (१९)

तथा आरोपितम् उत्कटितं कामस्य अनुरागस्य सूत्रं (भावोत्पादकनायिकयोः) येन तादृशं चौदार्यं नायकनायिकासखीप्रभृतीनां गुणमाहात्म्यं, तथा चित्रा आश्चर्यजनिका कथा, तथा वाचि वचने विदग्धता नैपुण्यम्। एतानि यत्र प्रबन्धे सन्ति, तादृशं नाट्यं प्रदर्शयितुम् आदिशन्ति सूरिवर्या इति शेषः। "स्यादिन्दुवक्त्रा यदि तौ भगौ गः" इति लक्षणात् इन्द्रवज्राछन्दः।

(१८) किं स्मृतमित्यर्थः।

(१९) "यावद्धि पीयूषीभवति तावत् कीर्तिरक्षयी। तावत् किलायमध्यास्ते सुकृती वैबुधं पदम्" इति महाभारतवचनात् सकलस्यादिशेषण. परिचयमाचष्टे—अस्तीत्यादिना। दक्षिणदिक्स्थ महाराष्ट्रप्रदेशप्रसिद्धे दक्षिणापथ प्रदेशेन महाराष्ट्रप्रदेशसमीपस्थितवाचिना। विदर्भेष्विति विदर्भी नीति. प्रख्याविता। पद्मपुरं नाम पद्मपुरमिति प्रसिद्धं नाम्ना पद्मपुरमिति वा, अभेदार्थकतृतीयाया लोपात्। तैत्तिरीयशाखाध्यायिनः, काश्यपाः काश्यपगोत्राः, चरणगुरवः शाखाविशेषाध्ययनप्रवर्तकाः, गुरवः, तदध्यापयितारः,

---

১৬। নট। যে প্রকরণে শৃঙ্গারাদি রসের চাতুর্যদ্বারা অভিনয় অতি ভাব-গম্ভীর হয়, অকপট সেবাদ্বারা নায়কনায়িকার ব্যবহার অতি মনোরম হয়, যাহাতে নায়কনায়িকা-সখী-প্রভৃতির গুণমাহাত্ম্য অনুরাগবর্দ্ধক হয় এবং হর্ষজনক কথা ও বাক্যে পাণ্ডিত্য থাকে, এরূপ প্রকরণ অভিনয় করিবার জন্য ব্রাহ্মণগণ আদেশ করিয়াছেন।

১৭। সূত্র। তবে আমার স্মরণ হইয়াছে।

১৮। নট। ভাব! কি স্মরণ হইয়াছে।

১৯। সূত্র। দক্ষিণাপথে বিদর্ভদেশে পদ্মপুরনামে এক নগর আছে, সেই নগরে তৈত্তিরীয়শাখাধ্যায়ী কাশ্যপগোত্র বেদাধ্যায়ীদিগের গুরু অগ্নিহোত্রী

ते श्रोत्रियास्तत्त्वविनिश्चयाय भूरि श्रुतं शाश्वतमाद्रियन्ते।
इष्टाय पूर्त्ताय च कर्मणेऽर्थान् दारानपत्याय तपोऽर्थमायुः ॥(२०)

तदामुष्यायणस्य तत्रभवतः सुगृहीतनाम्नो भट्टगोपालस्य पौत्रः पवित्रकीर्त्तेर्नीलकण्ठस्यात्मसम्भवो भट्टश्रीकण्ठपदलाञ्छनो भवभूति-

---

पंक्तिपावनाः पङ्क्तौ भोजनादिसभायां पावनाः पवित्राः, अग्रभोजिन इति यावत्। पङ्क्ति-पावनलक्षणमयुक्तं, यथा—"यजुषां पारगो यस्तु साम्नां यश्चापि पारगः। अथर्वशिरसोऽध्येता ब्राह्मणः पङ्क्तिपावनः ॥" इति। पञ्चाग्नयः दक्षिणगार्हपत्याहवनीयसभ्यावसथ्यरूपाग्निपञ्चक-परिचरणशीलाः आहिताग्नय इति यावत्। धृतव्रताः चान्द्रायणादिव्रतपरायणाः, उदुम्बर-नामानः उदुम्बरं प्रसिद्धं ("प्रसिद्धौ उम्बर विट्"रिति विश्वः) नाम येषां ते तथोक्ताः, ब्रह्मवादिनः वेदविदः।

(२०) तेषां सर्वगुणशीलित्वं वर्णयति—त इत्यादिना। ("श्रोत्रियश्छन्दोऽधीते" इति निपातनात् साधुः) 'जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥' इति लक्षणलक्षिताः ते पूर्वोक्ता ब्राह्मणाः, तत्त्वस्य पारमार्थिक-ब्रह्मस्वरूपस्य विनिश्चयाय विशेषतो निर्धारणाय न तु प्रतिवादिपराजयादिनिराकरणेन यशो-लाभाय, भूरि प्रचुरं शाश्वतं सार्वकालिकं श्रुतं अध्ययनं आद्रियन्ते अनुतिष्ठन्ति। तथा इष्टाय-कर्मणे यागादिक्रियार्थं पूर्ताय कर्मणे खातादिक्रियार्थं न तु भोगाय अर्थान् धनानि आद्रियन्ते यागादीनामर्थसाध्यत्वादिति भावः। एवं अपत्याय सन्तत्यर्थं न तु मन्मथं प्रसादयितुम्, दारान् भार्या आद्रियन्ते, तथा तपोऽर्थं तपस्यार्थं न तु व्यसनार्थं आयुः जीवनं आद्रियन्ते। सर्वत्र तादर्थ्ये चतुर्थी। अत्र यशोलाभादीनामर्थानां निराकरणात् "परिसंख्या"-लङ्कारः "पृष्टमपृष्टं वापि कथितादवसीयते भवेत्। तादृगन्यव्यपोहाय शाब्द-आर्थोऽथवा तदा ॥ परिसंख्ये"ति दर्पणलक्षणात्। इन्द्रवज्रावृत्तम्॥

শ্রোত্রিয়, চান্দ্রায়ণাদিব্রতচারী উডুম্বর প্রসিদ্ধনামা বেদপারগ ব্রাহ্মণগণ বাস করিতেন।

২০। সেই শ্রোত্রিয় ব্রাহ্মণগণ কেবল তত্ত্বনিশ্চয়ের জন্যই সার্বকালিক প্রচুর বেদাধ্যয়ন করিতেন (যশোলাভাদির জন্য নহে), যজ্ঞ ও দীর্ঘিকা খননাদির জন্যই অর্থ সংগ্রহ করিতেন (ভোগের জন্য নহে) কেবল সন্তানের জন্যই দার-পরিগ্রহ করিতেন (ইন্দ্রিয়তৃপ্তির জন্য নহে), এবং তপস্যার জন্যই দীর্ঘজীবন প্রার্থনা করিতেন। (ব্যসনের জন্য নহে)।

नाम्नः जातूकर्णीपुत्रः कविर्निसर्गसौहृदेन भरतेषु स्वकृतिमेवंप्रायगुणभूयसीमस्माकमर्पितवान्, यत्र खल्वियं वाचो युक्तिः। (२१)

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।

---

(२१) तदामुष्यायणस्य अमुष्यप्रसिद्धस्यापत्यम् विग्रहेणान्वक्, सुगृहीतनाम्नः सुगृहीतं शुभनामकीर्तनं नाम यस्य तथाभूतस्य मन्वादिवत् पुण्यश्लोकस्येति यावत्, भट्टगोपालस्य भट्टः, गोपालो नाम्ना, तस्य पौत्रः, पवित्रा कीर्तिर्यस्य तस्य पवित्रकीर्तेः नीलकण्ठस्य तन्नामकस्य आत्मसम्भवः पुत्रः, यो सरस्वती "श्रीकण्ठपदलाञ्छनः" इति भैरवी। कण्ठे यस्य स श्रीकण्ठः तत्रायकं पदं लाञ्छनं चिह्नं यस्य स श्रीकण्ठोपाधिक इत्यर्थः, यद्वा श्रीकण्ठ इत्यपि तस्य नामान्तरं, भवभूतिनाम्ना भवभूतिरिति प्रसिद्ध, जातूकर्णीनाम्नी माता जातूकर्णी, तस्याः पुत्रः, भरतेषु नटेषु निसर्गसौहृदेन स्वाभाविकसौहार्देन। (तथा पूर्वोक्ते विशेषणैव इति वचनात् सौहृदेनैव सौभाग्यपदमहिम्) एवंप्रायगुणभूयसीं "भूम्ना रसानाम्" इत्याद्युक्तगुणैरुपचिता प्रकृतिं स्वप्रबन्धं अस्माकं अर्पितवान् अस्मासु प्रयोगेण प्रख्यापयन्त्विति अस्माकं स्वामी समर्पितवानित्यर्थः। यत्र प्रबन्धे, खलु प्रसिद्धे वाक्यालङ्कारे वा, इयं वक्ष्यमाणा वाचो युक्तिर्वचनभङ्गिः।

(२२) निजवचनरचनचातुर्यं च तत्प्रयोगान् प्रति सावहेलपरिहारं चाह्रात् प्रति च [illegible]—ये नामेति। नाम प्रसिद्धौ, ये केचित् प्रसिद्धाः पारमार्थिकतत्त्वबुद्धयः नोऽस्माकं इह प्रबन्धे अवज्ञां अवधीरणां प्रथयन्ति प्रकटीकुर्वन्ति, ते किमपि अनिर्वचनीयं ब्रह्म जानन्ति, तान् प्रति तान् उद्दिश्य एष अस्मत्कर्तृकोऽयमुद्यमः यत्नो न, विवेकशालिजनबाहुल्यमाशङ्क्य समाधान-

---

২১। প্রসিদ্ধ শ্রেষ্ঠ কুলোৎপন্ন পূজ্য বিশাউম্বরা ভট্ট গোপালের পৌত্র, পবিত্রকীর্তি নীলকণ্ঠ ও জাতুকর্ণীর পুত্র, শ্রীকণ্ঠোপাধিক (অথবা শ্রীকণ্ঠনামা) প্রসিদ্ধ কবি ভবভূতি ভরতদিগের প্রতি সৌহাদ্যবশতঃ পূর্বোক্তগুণসম্পন্ন স্বকৃত প্রকরণ (সভায় অভিনয় করিবার জন্য) আমাদিগকে অর্পণ করিয়াছেন। সেই প্রকরণে এবম্বিধ বাক্যের যুক্তি আছে।

২২। যে সকল মহাত্মগণ আমার এই প্রকরণে অবজ্ঞা-প্রদর্শন করিবেন, তাঁহারা অনির্বচনীয় ব্রহ্ম বুঝুন, সুতরাং তাঁহাদের জন্য আমার এই উদ্যম নহে, অথবা যে সমস্ত অজ্ঞ লোক আমার এই প্রকরণে অবজ্ঞা প্রদর্শন করিবেন,

उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा,
कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥ (२२) *

वासनापट्टाना काव्यरसास्वादनपराङ्मुखमानसाना तेषां कस्यनैकमूले प्रकरणे धृतैकाग्र-धीरयेति विनयोक्तिः । यद्वा नाम सुभावनाया, केचित्स्वा स्वयं ख्यापयन्ति, ते किमपि अल्पस्य जानन्ति, यद्वा किमार्थेन, अविज्ञातो भिन्नार्थं, तथाहि ते किं जानन्ति ? न किञ्चिदपि, अत, तान् प्रत्यपि एष यत्नो नेष्यते । न हि बधिरार्थं केनचिद्गीयत इति भाव. । पामराणां तेषां मदीयप्रकरणार्थावधारणाधिकार एव नास्तीति कुतस्तान् प्रति यत्न इत्युक्तम् । तर्हि कथं क्रियते यत्न इत्याह—उत्पत्स्यत इति । मम समानधर्मा मत्सदृश कोऽपि यदि उत्पत्स्यते अनिष्यते, अथवा अस्ति विद्यते, तदा तं प्रति एष यत्न इति शेषः । (मदृशानामभावेनोता नाममेन प्रकरणेन प्रयोजनविरहात्मकीर्त्तनम्, इदानीमनुत्पादेऽपि मदृशस्योत्पाद सम्भावना दर्शयति—काल इति । हि यस्मादयं काल निरवधि निरवसान , तथाच इदानी-मनुत्पादेऽपि कालान्तरे तदुत्पादसम्भव इति भावः । मदृशस्य विज्ञात्वेऽप्यनुपलब्धि-सम्भावना दर्शयति—विपुलेति । पृथ्वी पृथिवी विपुला महती, तथाच एतद्देशे मदनुपलब्धावपि देशान्तरे मदस्तित्वसम्भव इति भाव । इह प्रथमार्द्धे "न" इति बहुत्वेन प्रयोगेऽपि द्वितीयार्द्धे "मम" इत्येकत्वेन प्रयोगो न दोषावह , एकवाक्यार्थत्व एव तादृशप्रयोगस्यायोग्यतया दुष्टत्वात्, , इह तु भिन्नवाक्यार्थत्वात् । वसन्ततिलक वृत्तं "उक्ता वसन्ततिलकं तभजाजगौगः" इति लक्षणात् ।

তাঁহারা অতি অল্পাভিজ্ঞ, তাঁহাদের জন্যও আমার এ উদ্যম নহে। তবে মৎ-সদৃশ কেহ যদি উৎপন্ন হয়, অথবা কোথাও থাকে, তাহাদের জন্যই আমার এই যত্ন। যেহেতু এই কালের অবধি নাই, পৃথিবীও অতি বিপুল, (সুতরাং কোন্ কালে আমার সদৃশব্যক্তির উৎপত্তি বা কোনও দেশে বিদ্যমানতা অসম্ভব নহে)।

---

* । तदुक्तम् तत्पद्यख्यापनाय सर्वे कुर्वीध्वरः यथा—स्वसमीतकवयोने कविताषरिग्रहे च त्यर्थतामिति । कविवर्णना प्रति तेनैवोक्तं ।

"गुणैः सता न मम को गुणः प्रख्यापितो भवेत् ।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः ॥" इत्यधिकपाठः क्वचित् ।

अपिच,—यद्वेदाध्ययनं, तथोपनिषदां सांख्यस्य, योगस्य च
ज्ञानं तत्कथनेन किं ? न हि ततः कश्चिद्गुणो नाटके ।
यत्प्रौढ़त्वमुदारता च वचसां यच्चार्थतो गौरवम्,
तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः ॥ (२१)

ततो यदस्माकमर्पितं प्रियसुहृदाऽस्मभवता भवभूतिनाम्ना प्रकरणं स्वकृतं मालतीमाधवं नाम, तदेव तत्रभवतः कालप्रियनाथस्य

---

(२१) पाण्डित्यविचिकित्सया एव पण्डितानां समादर इति निजपाण्डित्यं प्रकटयति— यद्वेत्यादिना। अत्रापि पद्य मत्स्यिवं कान्ते दुर्विनिन्दनुमध्यमे। यद्वेदानां ऋगादीनां अध्ययनं तथा उपनिषदां ब्रह्मार्थतत्त्वप्रतिपादकवेदांशविशेषाणां, सांख्यस्य कपिलप्रणीतस्य, योगस्य पातञ्जलस्य च यज्ज्ञानं तत् कथनेन तयोरध्ययनज्ञानयोरभिधानेन किं ? न किं-मपीत्यर्थः। हि यस्मात् ततः वेदाध्ययनादेः नाटके कश्चिद्गुणः उपकारित्वं न भवतीति शेषः। नाटके वेदाध्ययनादीनामनुपयोगादिति भावः। यच्च यस्य नाटकोपयोगित्वं तदाह— यत्प्रौढत्वमिति। वचसां यत् प्रौढत्वं गभीरार्थत्वं, यथा "पदार्थे वाक्यरचनं वाक्यार्थे च पदाभिधा। प्रौढिर्व्याससमासौ च साभिप्रायत्वमस्य च॥" इत्युक्तलक्षणमिति उदारतागुण-विशेषः। यथोक्तं दण्डिना,—"उत्कर्षवान् गुणः कश्चित् यस्मिन्नुक्ते प्रतीयते। तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः॥" इति। अर्थतो गौरवं अनेकार्थप्रतिपादनसामर्थ्यं नाटके तच्चेदस्ति तर्हि तदेव पाण्डित्यं शास्त्रानुशीलनं, वैदग्ध्यं कवित्वशक्तिः तयोर्गमकं बोधकम्। तथाच मदीयप्रकरणस्य प्रौढ़त्वादिके दृष्टे मम पाण्डित्यं कवित्वञ्च मे ज्ञास्यन्ति विद्वांसः, अप्रकटनमप्यौचि-त्येनाप्रमिति भावः। ननु नाटक इति कथमुक्तं नाटकप्रकरणयोर्भेदादिति चेत्, नटकर्माभिनि नटधातोरर्थः इत्यर्थे ण्वुल् कथमत्र नाटकमिति पदं निष्पन्नं, तत्प्रकाश नाटके नाट्ये इत्यर्थतो दोषाभावात्। शार्दूलविक्रीडितं वृत्तं, तल्लक्षणमुक्तमेव।

২০। বেদাধ্যয়ন, উপনিষৎ, সাংখ্য ও যোগশাস্ত্রের যে জ্ঞান তাহাদের কীর্তনদ্বারা কোনও ফল নাই, যে হেতু নাটকে তাহার কোনই উপযোগিতা নাই। বাক্যের যে গাম্ভীর্য্য, উদারতা, ও গূঢ়ার্থতা তাহা যদি থাকে, তবে তাহাই পাণ্ডিত্য ও কবিত্বশক্তির বিজ্ঞাপক হইবে।

पुरतः प्रयोगेण प्रख्यापयितुमुद्यताः तत् सर्व्वे कुशीलवाः सङ्गीत-प्रयोगेण मत्सनोहितसम्पादनाय प्रवर्त्तन्ताम्। (२४)

नटः। [सूत्वा] एवं क्रियते युष्मदादेशः, किन्तु या यस्य युज्यते भूमिका, तां खलु तथैव भावेन सर्वे वर्ण्याः पाठिताः, सौगत-जरत्परिव्राजिकायास्तु कामन्दक्याः प्रथमभूमिकां भाव एवाधीते, तदन्तेवासिन्यास्त्वहमवलोकितायाः। (२५)

सूत्र। ततः किम्। २६

---

(२५) भूमिका व्याकरणीया, यदीक्तं भरतेन—"अन्यवेषपरिवर्त्तो यस्तु भूमिके"ति। तां भूमिकां, वर्णे भवा वर्ण्याः स्वपरिजनान्तर्गता नटा इत्यर्थं, पाठिता शिक्षिता, सौगतजरत्परि-व्राजिकाया बौद्धवृद्धसन्न्यासिन्याः, एताहृश्याश्च दौत्ये प्रशस्तीक्ता भरतेन। यथा—"लिङ्गिनी सखी पिशा दासी भिक्षुकी शिल्पकारिका। प्रविश्य चाशु विश्वासं दूतीकार्येषु विन्दति॥" "लिङ्गिनं सार्थवन्तं सपिण वा तदानुगम्। दूत वाक्येषु दूतीं न तु कुर्यात् यथावत्॥" इति भरतनिषेधात्। इत्तलयनं कपादिसम्पत्संपादनार्थं। तदन्तेवासिन्या कामन्दकीशिष्यायाः, भूमिकामहमधीये इत्यन्वयः।

(२६) एतावदुक्ता किं विरतोऽसीति शेष।

२४। অতএব প্রিয় সুহৃৎ পূজ্য ভবভূতিনামক কবি স্বকৃত মালতীমাধবনামক যে প্রকরণ আমাদিগকে অর্পণ করিয়াছেন, পূজ্য কালপ্রিয়নাথের সম্মুখে অভিনয়দ্বারা তাহারই প্রখ্যাপনে আমরা উদ্যত হইলাম, অতএব নটগণ সঙ্গীত-প্রয়োগদ্বারা আমার অভীষ্ট-সম্পাদনে প্রবর্ত্তিত হউক (এরূপ আদেশ-কর)।

২৫। নট। (স্মরণ করিয়া) আপনার আদেশ প্রতিপালন করিতেছি, কিন্তু যাহার যে বেশধারণ উপযুক্ত, সেরূপ ভাবেই আপনি পরিজনবর্গকে শিক্ষা দিয়াছেন। বৌদ্ধ বৃদ্ধ সন্ন্যাসিনী কামন্দকীর বেশেই প্রথম প্রবেশ করিতে হইবে, তাহা আপনি নিজেই শিক্ষা করিয়াছেন এবং কামন্দকীর শিষ্যা অবলোকিতার বেশধারণাদি আমি অভ্যাস করিয়াছি।

২৬। সূত্র। ইহা বলিয়াই বিরত হইলে কেন?

नटः। ततः प्रकरणनायकस्य मालतीवल्लभस्य माधवस्य वर्णिकापरिग्रहः कायम्? (२७)

---

(२७) तत इति। प्रकरणं रूपकभेदः, तन्नायकस्य तदाख्यानीभूतप्रधानपुरुषस्य। नायकलक्षणं यथा दर्पणे—

"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता॥"

नायकभेदा अपि तत्रैव—

"धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥"

अयञ्च नायको माधवः धीरप्रशान्तः, दर्पणोक्तं लक्षणं यथा—
"सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्"।

अमात्यत्वादयं धीरोदात्त इति भरतमतानुवर्तिनः, तथाचोक्तं भरतेन—"सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ" इति। मालती तदाख्या प्रकरणनायिका। नायिका च नायकसामान्यगुणैस्त्यागादिभिर्यथासम्भवैर्युक्ता प्रधानतो सन्याख्यानीभूता स्त्री। यथोक्तं, दर्पणे—

"अथ नायिका त्रिविधा स्वान्या साधारणस्त्रीति।
नायकसामान्यगुणैर्यथासम्भवैर्युक्ता"॥

मालती च नायिका असौ कुलस्त्रीत्वात् उदात्तनिभृता, यथाह भरतः—"उदात्तनिभृता चैव भवेत्तु कुलजाङ्गना" इति। कुलस्त्रीघटितत्वात् प्रकरणमेवेदं शुद्धं, तदुक्तं भरतेन—

"द्विधा प्रकरणं तत्तु शुद्धं सङ्कीर्णमेव च।
कुलस्त्रीरचितं शुद्धं सङ्कीर्णं वेश्यया कृतं॥"

अत्र मालतीवल्लभत्वं माधवस्योक्तं, माधवेन वसन्तेन समं वर्षाकालीनाया मालत्या भातिः सम्बन्धाभावादिति चेन्न, योगिनीप्रभावादसम्भवसम्भवं सम्पादयता कविना सहृदयहृदयचमत्कारकारिण्या विदग्धतया एवोपनिबद्धत्वात्। माधव इति नाम्ना च शृङ्गाररसमयनीता वसन्तस्य शृङ्गाररसमयत्वात्। शृङ्गाररसप्रधानत्वेन च विष्णुदैवतत्वमुपपद्यते, "शृङ्गारो विष्णुदैवतः" इति भरतोक्तत्वात्। वर्णिकापरिग्रहः भूमिकाग्रहणं माधवस्याभिनयादिकार्यमिति यावत्। कार्यं चात्राद्यां कामन्दक्या अवलोकितायाश्च भूमिकाद्वयस्य प्रथममेव ग्रहीतत्वात् प्रधाननायकभूमिकापरिग्रहस्तु केन सम्पाद्य इति प्रश्नार्थः। २७

सूत्र। मकरन्दकलहंसप्रवेशावसरे तत्सुविहितम्। (२८)

नटः। तेन हि तत्प्रसिद्धप्रयोगादेवात्रभवतः सामाजिका-नुपास्महे। (२९)

सूत्र। वाढ़, एषोऽस्मि कामन्दकी संवृत्तः। (३०)

नटः। अहमप्यवलोकिता। (३१) [इति परिक्रम्य निष्क्रान्तौ](३२)

---

(२८) सूत्रेति। उत्तरमाह—कलहंसेति। कलहंसो माधवस्य चेटः, मकरन्दो मित्रं, तयोः प्रवेशावसरे तत् माधवभूमिकापरिग्रहणं सुविहितं निर्द्धारितं करिष्येति शेषः। तथाच एतस्य प्रवेशावसरेऽत्राभावादिदानीं तच्चिन्तनीयमिति भावः।

(२९) नट इति। तेन सामाजिकनिर्द्दिष्टगुणग्रन्थाभिनयेन कुशीलवैरधीतत्वं न च, तत्-प्रसिद्धप्रयोगात् तस्य प्रसिद्धस्य प्रकरणस्याभिनयात्। अत्रभवतः पूज्यान् सामाजिकान् समाजे समवेतान्, उपास्महे आराधयामः।

(३०) सूत्रेति। वाढं तथा कुर्म्म इत्यर्थः। एषोऽस्मीति—सूत्रधाररूपपरित्यागेन कामन्दकी-भूतोऽस्मीत्यर्थः। कामन्दकी नीतिशास्त्रभेदः, तं वेत्तीति कामन्दकी। (तद्वेत्त्यधीते, तत ईप्रत्ययः) अनया च नामव्युत्पत्त्या नीतिविद्‌त्वख्यापनेन प्रकृतसिद्धिहेतुता सूचिता।

(३१) संवृत्तास्मीत्यनुषङ्गेणान्वयः। अवलोकिता दृष्टिः, अनेन च नाम्ना कार्य्यसिद्धि-दृष्टेरपि कार्य्यसिद्धिहेतुता सूचिता। एतैश्च वाक्यैः कामन्दक्यवलोकितयोः प्रथमप्रवेशकप्र सूत्रं सूचितम्।

---

(২৭) নট। তবে প্রকরণনায়ক মালতীবল্লভ মাধবের বেশপরিগ্রহ কি প্রকারে হইবে?

(২৮) সূত্র। মকরন্দ ও কলহংসের প্রবেশাবসরে মাধবের বেশধারণ বিহিত হইয়াছে। (সুতরাং এখন সেই চিন্তার প্রয়োজন নাই)

(২৯) নট। তবে সেই প্রসিদ্ধ মালতীমাধবের অভিনয়দ্বারাই পূজ্য সামা-জিকবর্গের সংবর্দ্ধনা করি।

(৩০) সূত্র। তাহাই হউক, এই আমি কামন্দকীর বেশ ধারণ করিতেছি।

(৩১) নট। আমিও অবলোকিতার বেশ ধারণ করিতেছি।

[प्रस्तावना । (३३)]

[ततः परिक्रम्य रक्तपट्टिकानेपथ्ये कामन्दक्यवलोकिते प्रविशतः] (३४)

कामन्दकी । वत्से ! अवलोकिते ! (३५)

अवलोकिदा । आणवेदु भअवदी । (३६)

---

(३६) आज्ञापयतु भगवती इति छाया।

---

(३२) इतीति । परिक्रम्य पादविक्षेपं नाटयित्वा । निष्क्रान्तौ रङ्गभूमित्यागिनौ, सूत्रधारनटाविति शेषः ।

(३३) प्रस्तावना प्रस्तुतोद्घातकं, समाप्तेति शेषः । प्रस्तावनालक्षणं यथा दर्पणे—

"नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥" इति ।

अत्र तावत् "एषोऽयमित्युपक्षेपात् सूत्रधारप्रयोगतः । पात्रप्रवेशो यत्रायं प्रयोगातिशयो मतः ॥" इति लक्षणे अत्र पदवीप्रकरकत्वात् प्रयोगातिशयाख्या । दर्पणोक्तं प्रयोगातिशयलक्षणं यथा—

"यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते ।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥" इति

(३४) तत इति । परिक्रम्य पुनरागत्य रक्तपट्टिका नेपथ्यं ययोस्ते रक्तपट्टिकानेपथ्ये काषायवस्त्रपरिधाने इत्यर्थः । कामन्दक्यवलोकिते तद्वेषधारिणौ सूत्रधारनटी, प्रविशतः रङ्गभूमिमिति शेषः ।

(३५) कामन्दकीति । आहेति शेषः । एवमग्रेऽपि सर्वत्र वक्तृपदमध्याहृत्य आहेत्यादिक्रियया योजनीयम् । एवं प्रस्तावनां परिसमाप्य कथावस्तुप्रस्तावार्थं विष्कम्भकमारभते— वत्से ! इत्यादिना ।

---

(৩২) (নটী ও সূত্রধার) পরিক্রমণ করিয়া (ঘুরিয়া) নিষ্ক্রান্ত হইল।

(৩৩) (রক্তপট্টপরিধানে কামন্দকী ও অবলোকিতা বেশে নটী ও সূত্রধারের পুনঃ প্রবেশ)

(৩৪) কামন্দকী। বৎসে অবলোকিতে !

कामः। अपि नाम तयोः कल्याणिनोर्भूरिवसुदेवरातापत्ययो-र्मालतीमाधवयोरभिमतः पाणिग्रहः स्यात्?। (२७) [वामाक्षि-स्पन्दनं सूचयित्वा सहर्षम्।] (२८)

विद्रवतेव कल्याणमान्तरज्ञेन चक्षुषा।
स्फुरता वामकेनापि दाक्षिण्यमवलम्ब्यते ॥ (२८)

---

(२७) सम्प्रति कविः कामन्दकीमुखेन प्रकरणार्थं कथयति—अपि नामेत्यादिना। इह हि मालतीमाधवयोर्विवाहनिर्वाह एव समग्रप्रकरणार्थः। नाम सम्भावनायां निश्चये वा। कल्याणं शुभमस्ति ययोस्तौ कल्याणिनौ तयोः कल्याणिनोः, सन्निहितानुरूपविवाहरूपकल्याण-सूचकमेतद्विशेषणम्। भूरीणि प्रचुराणि वसूनि धनानि यस्य स भूरिवसुः मालतीपिता। अनेन सार्थकनाम्ना महाधनिककन्याया मालत्या वराकाङ्क्षाया अवश्यम्भावित्वं सूचितम्। देवरात् ददातीति (रा + कर्त्तरि क.) देवरातो माधवपिता, अनेन च सार्थकनाम्ना दातृवंशसम्भूतया माधवस्यात्यनुरूपवरत्वं सूचितं। पाणिग्रहो विवाहः निश्चितमेव अभिमतः सम्मतः स्यात् भवेत् सर्वेषामिति शेषः। विधेरपि तादृशः प्रयासः परस्परं योग्यसमागमायेति भावः।

(२८) हर्षनिष्पादकस्यायाः आहक्रियाया विशेषणं। स्त्रीणां वामाक्षिस्फुरणस्य शुभ-सूचकत्वात् हर्षो युक्तः।

(२९) विद्रवेति। आन्तरज्ञेनैव भावमर्मज्ञः सिध्यति नवेति सन्देहदोलायितं ममान्त-र्वर्तिभावं जानतैव चक्षुषा "मन्दे गते श्रुते प्रायो भूतमित्येवमादिभिः। चक्षुषेव स्फुरते स्पन्दैरिवमन्योऽपि गाहते ॥" इत्यनेनैवमादिष्वपि पुरुषाणामपाङ्गकलस्य दक्षिणाभिहितत्वात्। स्फुरता स्पन्दता अत एव कल्याणं भावि मङ्गलं विह्वलता सूचयता नैमित्तिकैः स्त्रीणां वामाक्षिस्पन्दनस्य शुभसूचकत्वकथनात्. वामकेन सव्येन चक्षुषा दाक्षिण्यं आनुकूल्यं अवलम्ब्यते अङ्गीक्रियते।

---

(২৬) অবলোকিতা। আপনি আজ্ঞা করুন।

(২৭) কাম। কল্যাণভাজন ভূরিবসুর কন্যা মালতী ও দেবরাতের পুত্র মাধবের অভিলষিত বিবাহ হইবে ত?

(২৮-২৯) (বামাক্ষিস্পন্দন সূচনা করিয়া সহর্ষে) সন্দেহ দোলায়িত আমার অন্তরের ভাব বুঝিয়াই যেন (তাহা নিবারণের জন্য) বাম চক্ষু স্পন্দিত হইয়া সূচনা করতঃ আনুকূল্য দেখাইতেছে।

अव। महन्तो क्खु भअवदीए एसो चित्तविक्खेवो। अण्णहा, जं दाणिं चीरचीवरमेत्तपरिच्छदं पिण्डपादमेत्तपाणवुत्तिं भअवदीं ईदिसे आआसे अमच्चभूरिवसू णिओएदि। तहिं उज्झिदसंसारावग्गहो अप्पा तुम्हेहिं वि णिउज्जिअदि (क)।

(क) महान् खलु भगवत्या एष चित्तविक्षेपः। अन्यथा, यदिदानीं चीरचीवरमात्र-परिच्छदां पिण्डपातमात्रप्राणवृत्तिं भगवतीं ईदृशे आयासे अमात्यभूरिवसुर्नियोजयति। तस्मिन् उज्झितसंसारावग्रह आत्मा युष्माभिरपि नियुज्यते।

अपि च विरोधे, तथापि नायकेन सर्थ्यं नापि यता दाक्षिण्यं समीकरणं अवलम्ब्यत इति, एवं नायकेन प्रतिकूलेनापि यता दाक्षिण्यमानुकूल्यं अवलम्ब्यते इति च विरोधः, इत्थं व्याख्यया च तत्परिहार इति विरोधालङ्कारः। तल्लक्षणं यथा दर्पणे—"जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः। क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः। विरुद्धमिव भासेत विरोधोऽसौ दशाकृति"रिति॥ अनुष्टुप्छन्दः, तल्लक्षणं यथा—"पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। गुरु षष्ठं च पादानां शेषेष्वनियमो मतः॥" इति

(ख) महानिति। अव खलु निश्चये। चित्तविक्षेपः ज्ञानशून्यविषयाभिनिवेशः। चीरैः वल्कलखण्डैरिति यावत्, निर्मितं मध्यपदलोपी समासः। यत् चीवरं मुनिवासः तन्मात्र-मित्युभावरणमिति समूहितः, तन्मात्रपरिच्छदो ह्यवादिसम्बन्धो यस्यास्ताम्। पिण्डपातो नाम भिक्षूणां भिक्षालब्धेन भोजनं, अथवा पिण्डस्य ग्रासधारणोचितभक्ष्यद्रव्यस्य पातः उदरकुहरे निक्षेपः, तन्मात्रेण प्राणानां जीवनधारणं यस्याः तां भगवतीं ईदृशे आयासे दुःखजनकसम्बन्ध-सम्पादकदूत्यादिकार्ये। इदन्तु रागिजनोचितकार्यं पुरन्ध्रीणामेव शोभते, न तु भवादृशीनां विरक्तविरतानामित्याशयः। तत्र तस्मिन्नायासजनके कर्मणि, उज्झितः सम्यक्त्यक्तः संसार एव अवग्रहः मोक्षाप्रतिबन्धो यस्य, स एवम्भूत आत्मा युष्माभिरपि नियुज्यते नियोज्यत इति चाश्चर्यमिति भीतता। अमात्यभूरिवसोरविचार्य कार्यकारित्वात् अन्येनाप्य दुःखसंवादसूचितेऽपि कार्ये भगवतीं नियोजयतु नाम, भगवत्यापि तदङ्गीकृतमिति महदाश्चर्यमिति तात्पर्यम्।

(क) অব। ইহা আপনার চিত্তের নিতান্তই অসদভিনিবেশ। অমাত্য ভূরিবসু যে বস্ত্রখণ্ডবিনির্মিত ভিক্ষুজনোচিত বস্ত্রমাত্র পরিধায়িনী ভিক্ষালব্ধ মাত্রোপজীবিনী আপনাকে এরূপ আয়াসজনক কার্য্যে নিযুক্ত করিয়াছেন,

कामं । वत्से ! मा मैवं ब्रूहि ।

यन्मां विधेयविषये स भवान्नियुङ्क्ते,
स्नेहस्य तत् फलमसौ प्रणयस्य सारः ।
प्राणैस्तपोभिरथवाभिमतं मदीयैः,
कृत्यं घटेत सुहृदो, यदि तत् कृतं स्यात् ॥ (४०)

अयि, किं न वेत्सि यदेकत्र नो विद्यापरिग्रहाय नानादिगन्त-वासिनां साहचर्य्यमासीत्, तदैव चास्मत्सौदामिनीसमक्षमनयोर्भूरि-वसुदेवरातयोरियं प्रतिज्ञा, अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य

---

(४०) कामेति। मा मैति वीप्सा अत्यन्तनिषेधसूचनाय। यन्मामिति। स भवान् पूज्यः भूरिवसुः विधेयविषये नियोज्यगोचरे कार्य्येऽपि यन्मां नियुङ्क्ते प्रेरयति, तत् स्नेहस्य प्रीतेः फलं। असौ नियोगः प्रणयस्य प्रश्रयस्य प्रणयः प्रेम्णि विश्वासे याच्ञाप्रश्रययोरपी"ति विश्वः। सारः तत्त्वकर्षः स्थिरांशो वा। स्नेहाधिक्याद्विधेयेऽपि कार्य्येऽपि तस्य नियोजनं ममात्मीयीकरणमात्रमिति भावः। यदि मदीयैः प्राणैः अथवा तपोभिः प्राणेभ्योऽपि श्लाघ्यै-रित्यर्थः। सुहृदो मित्रस्य अभिमतं अभिलषितं कृत्यं कार्य्यं घटेत निष्पद्येत, तदा तत् कृत्यं कृतं स्यात् प्राणादिभिरपि तदवश्यं कर्त्तव्यमित्यर्थः। यद्वा तत् यदा मदीयैः प्राणैः तपोभिश्च कृत्यं करणीयं कृतं सम्पन्नं स्यादित्याकाङ्क्षया योजनीयं। प्राणैस्तपोभिरपि सुहृत्कार्य्यसम्पादनाद-धिकं करणीयं नास्तीत्याशयः। वसन्ततिलकं वृत्तम् ॥

(४१) माधवाय मालतीदानार्थं भूरिवसोः तत्सम्पादनार्थं भगवत्याश्च कथमेवमाग्रह इत्यत आह—किं न वेत्सीति। विद्यापरिग्रहाय विद्याभ्यासार्थं नानादिगन्तवासिना बहुदेश-प्रवासिनां नः अस्माकं भूरिवसुदेवरातयोर्मम च इत्यर्थः। एकत्र साहचर्य्यं सहचरभावः

আপনিও আবার সাংসারিক ভাবোচ্ছেদে অগ্রসর আমাকে সেই কার্য্যে নিযুক্ত করিতেছেন, ইহা নিতান্তই আশ্চর্য্যজনক।

(৪০) কাম। বৎসে! এরূপ বলিও না; পূজ্য ভূরিবসু যে আমাকে দূতী-জনোচিত কার্য্যে নিযুক্ত করিতেছেন, ইহা স্নেহের ফল, এবং এই নিয়োগ প্রণ-য়ের স্থিরাংশস্বরূপ। অতএব যদি আমার প্রাণ অথবা (প্রাণাপেক্ষাও প্রিয়) তপস্যাদ্বারাও সুহৃদের এই কার্য্য সম্পন্ন হইতে পারে, তবে অবশ্য কর্ত্তব্য।

इति। तदिदानीं विदर्भराजमन्त्रिणा सता देवरातेन माधवं पुत्र-मान्वीक्षिकीश्रवणाय, कुण्डिनपुरादिमां पद्मावतीं प्रहिण्वता सुविहितम्। (४१)

अपत्यसम्बन्धविधिप्रतिज्ञा प्रियस्य नीता सुहृदः स्मृतिञ्च।
अलोकसामान्यगुणस्तनूजः प्ररोचनार्थं प्रकटीकृतश्च ॥ (४२)

यदाश्रौषम् किं न वेत्सि? नानान्तेवासिनीनामस्माकमेव नानाशीतार्थः। तदा एकत्रा-ध्ययननिमित्तसमागमकाले, भवतः सौदामिनीसमक्षं भवत्याः सौदामिन्याश्च समक्षं (सौदा-मिनी नामान्यतमा सवर्णाया) सौदामिनीसमक्षमित्यनेन च तस्या अपि तत् प्रतीतमस्या इदानीं प्रतिज्ञातवत्योः देवरातभूरिवस्वोः अवश्यमेव माधवमालत्योः परिणयः इति सूचितं "नाप्तुमिव विधेयः शास्त्रम्" इति भवतामुपायैश्चानुष्ठितपात्रमवश्यमनुसन्धान्। अपत्य-सम्बन्ध अपत्ययोर्विवाहसम्बन्धः कर्त्तव्य इति प्रतिज्ञा कृतेति योजना, तथाच पूर्वप्रतिज्ञातत्वात् भूरिवसोः प्रतिज्ञाया मनुष्ठीतत्वाच्च अनुसन्धानाय निर्बन्धातिशयो युक्त इति भावः। आन्वीक्षिकी न्यायशास्त्रं, तच्छ्रवणाय तत्पाठाधिगत्यर्थं, एतेन च न्यायशास्त्रे तर्कशास्त्रादि-प्रसंगात् तत्पाठेन माधवस्य चौरिकाविवाहे कौशलसम्भव सूचितः। कुण्डिनपुर विदर्भ-राजधानी, तस्मात् प्रहिण्वता प्रस्थापयता सुविहितं शोभनं कृतम्।

(४२) अमुं माधवं प्रहिण्वता सुविहितमिति तदेव समर्थयति—अपत्येत्यादिना। अपत्ययोः कन्यापुत्रयोः सम्बन्धविधेर्विवाहविधेः प्रतिज्ञा प्रियस्य सुहृदः नीता, निजस्य (भूरिवसोः) स्मृतिं

---

(४১) অয়ি! তুমি কি জান না যে, বিদ্যাধ্যয়নের জন্য নানাদিগন্তপ্রবাসী আমাদের একত্র সম্মিলন হইয়াছিল, তখন আমার ও সৌদামিনীর সমক্ষে এই ভূরিবসু ও দেবরাতের এইরূপ প্রতিজ্ঞা হইয়াছিল যে, "অবশ্যই আমরা সন্তানের (পরস্পর) সম্বন্ধ করিব"। সেই হেতু সম্প্রতি বিদর্ভরাজমন্ত্রী দেবরাত নিজ পুত্র মাধবকে ন্যায়শাস্ত্র শ্রবণের জন্য কুণ্ডিনপুর হইতে এই পদ্মাবতীনগরে পাঠাইয়া ভালই করিয়াছেন।

(৪২) (যে হেতু এই পুত্রপ্রেরণদ্বারা) সন্তানবিবাহবিষয়ের প্রতিজ্ঞা প্রিয় সুহৃৎকে স্মরণ করাইয়া দেওয়া হইল, এবং (সম্বন্ধবিষয়ে) প্ররোচনার্থ পুত্র যে অনন্যসাধারণ গুণসম্পন্ন তাহাও খ্যাপিত হইল।

भव । तदो, किंति मालदीं अमच्चो अप्पणा माहवस्स ण पडिवादेदि, जेण चोरिअविवाहे भअवदीं तुवरावेदि ? (ख)

काम । तां याचते नरपतेर्नर्मसुहृद्यन्दनो नृपमुखेन ।
तस्मात्साक्षात्प्रतिषेधः कोपाय शिवस्त्वयमुपायः ॥ (४२)

(ख) तत किमिति मालतीममात्यो माधवस्य आत्मना न प्रतिपादयति। येन चौर्य्यविवाहे भगवतीं त्वरयति ।

अरण्यञ्च नीता प्रापिता, माधव प्रदिष्यता दैवगोनेनेति यथास्थितेन सम्बन्धः । पुनरपि दर्शनाभावात् कालातिपाताच्च प्रतिज्ञा विस्मर्त्तुमपि शक्यतेत्याशयः । अनीत्यसामान्यगुण अनितरसाधारणगुणः भूतपञ्चकमगुण इति यावत्, तमुज एव परोक्षणार्थं सन्यस्येच्छोत्पादनार्थं प्रकटीकृतः प्रकाशितः भौतिकचन्द्रगुणतया स्फुटीकृत इत्यर्थं, अन्यथा ज्ञातप्रतिज्ञो नापि निर्गुणाय वरायानन्यरूपलावण्यसम्पन्ना कन्या दातुं यदि समर्थतेत्याशयः । "उपेन्द्रवज्रा" वृत्तम् । लक्षणन्तु—"उपेन्द्रवज्रा प्रथमे लघौ सा" इति ॥

(ग) तत इति । अमात्यो भूरिवसुः, आत्मना स्वयं माधवस्येति चतुर्थ्यर्थे षष्ठी, अथवा कृत इति शेषः । प्रतिपादयति ददाति ।

(४२) स्वयमप्रदाने हेतुं दर्शयति—तामिति । नन्दनः नन्दननामा, नन्दयतीति व्युत्पत्त्या आनन्दजनकत्वादन्तःपुरसचिवता तस्य युक्तेति सूचितम् । नरपतेः राज्ञः नर्मसुहृदस्य पुरःकौतुकसचिवः, "स्यान्नर्मसचिवः सोऽयं कुपितः स्त्रीप्रसादकः" इत्युक्तलक्षणक इति यावत्, नृपमुखेन नृपद्वारा तां मालतीं याचते "नन्दनाय मालतीं देहीति" नृपेण याचयतीत्यर्थः । तस्मात् राजप्रार्थनायाः साक्षात् प्रतिषेधः "न प्रयच्छामीति" मुखतः कथनं कोपाय राज्ञो भविष्यतीति शेषः । अयन्तु महाप्रगुप्तचौर्य्यविवाहरूप उपायः शिवः परिणामशुभजनकः । आर्य्याच्छन्दः ।

(খ) অব। তবে অমাত্য নিজেই কেন মাধবকে মালতী সমর্পণ করেন না ? আপনাকে যে চৌর্য্য বিবাহ-সম্পাদনের জন্য ত্বরান্বিত করিতেছেন ?

(৪২) কাম। নন্দননামক নৃপতির অন্তঃপুর-সচিব নৃপতিদ্বারা মালতীকে প্রার্থনা করিয়াছেন, তাহার সাক্ষাৎ প্রতিষেধ (রাজার ও নন্দনের) কোপের কারণ হইবে, সুতরাং এই চৌর্য্য বিবাহ-সম্পাদনই মঙ্গলজনক উপায়।

अव। अच्चरीअं! अच्चरीअं! ण क्खु अमच्चो माहवस्स णामम्पि जाणादित्ति णिरवेक्खदा लक्खीअदि (ग)।

काम। संवरणं हि तत्। (४४)

विशेषतस्तु बालत्वात्तयोर्विकृतभावयोः।
तेन माधवमालत्योः कार्य्यः स्वमतिनिह्नवः॥ (४५)

(ग) आश्चर्य्यमाश्चर्य्यम्। न खल्वमात्यो माधवस्य नामापि जानातीति निरपेक्षता लक्ष्यते।

(ग) आश्चर्य्यमित्यादि। निरपेक्षता अनवधानिता औदासीन्यमिति यावत्, लक्ष्यते प्रतीयते। अमात्यः खलु माधवाय सुतां दातुमभिलषति, अथच तस्य नामाप्यजानन्निव व्यवहरतीत्याश्चर्य्यमित्यर्थः।

(४४) कामेति। संवरणं आकारगोपनं तन्मयेन तदौदासीन्यख्यापनमित्यर्थः।

(४५) तेन भूरिवसुना बालत्वात् बाल्यवशात् प्रथमयौवनं बोद्धव्यं, अन्यथाऽन्योऽन्यानुरागा-सम्भवात्। विशेषात् प्रथमयौवने वर्त्तमानत्वादित्यर्थः। विकृतभावयोः प्रकाशितनिर्भावयोः, आकारगोपना-नभिज्ञयोरिति यावत्, माधवमालत्योः, स्वमतेः तयोरन्योऽन्यानुरागविषयिण्याः स्वबुद्धेः निह्नवः गोपनम्। विशेषतः कार्य्यः करणीयः। मदनात्र बलवत्तया तयोरभिप्राये सर्व्वानुभवगम्येऽपि गुरुजनपरिज्ञानं यथा तौ न जानीतस्तथावश्यं कर्त्तव्यमित्यर्थः। अन्यथा गुरुजनेनावयोर्भावस्य विदितमिति लज्जया तयोरन्योऽन्यसमागमे वाञ्छितयोर्व्विवाहो न निष्पद्येत इति भावः। अत्र मालतीमाधवयोरन्योऽन्यानुरागस्य बीजस्योपन्यासादुपक्षेपो नाम मुखसन्ध्यङ्गमुक्तं। यथोक्तम्—"बीजन्यास उपक्षेप" इति। "अनुष्टुप्" छन्दः॥

(গ) অব। কি আশ্চর্য্য! অমাত্য যেন মাধবের নামও জানেন না, এইরূপ ঔদাসীন্য দেখা যাইতেছে।

(৪৪) কাম। তাহা গোপন করা মাত্র।

(৪৫) বাল্যনিবন্ধন সেই মালতী ও মাধবের অভিপ্রায় ব্যক্ত হইলেও অমাত্য যে বুঝিতে পারিয়াছেন, তাহা মালতী ও মাধবের নিকট গোপন করা অবশ্যই একান্ত কর্ত্তব্য।

अपिच,—अनुरागप्रवादस्तु वत्सयोः सार्वलौकिकः ।
श्रेयोऽप्यस्माकमेवं हि प्रतार्यौ राजनन्दनौ ॥ (४६)

यतः,—बहिः सर्वाकारप्रगुणरमणीयं व्यवहरन्
पराभ्यूहस्थानान्यपि तनुतराणि स्थगयति ।
जनं विद्वानेकः सकलमभिसन्धाय कपटै-
स्तटस्थः स्वानर्थान् घटयति च, मौनञ्च भजते ॥ (४७)

---

(४६) अनुरागेति। वत्सयो मालतीमाधवयोः, उभयोरेव प्रियपुत्रकल्पतया वत्सयोरिति निर्देशः कामन्दक्या बोध्यः। अनुरागप्रवादः गुणख्यातिः किं वदन्ती, सार्वलौकिकः सर्वलोकविदितः "लोकसर्वलोकाट्ठञ्"इति ठञ् (इकण्) अनुशतिकादित्वा-दुभयपदवृद्धिः। श्लोकस्य बहुलीकरणादनेन "परिकरो"नाम सन्ध्यङ्गं प्रदर्शितं। यथा— "तद्बाहुल्यं परिकर" इति। एवं अनुरागप्रवादस्य सार्वलौकिकत्वे अस्माकमपि श्रेयो मङ्गलं भवतीति शेषः। हि यस्मात् राजा भूपतिः नन्दनः तन्नामा तस्य नर्मसुहृच्च तौ प्रतार्यौ वञ्चनीयौ। यदि राजा नन्दनो वा तयोर्विवाहे कृते प्रार्थनावधारणावमानितः क्रुध्येत् तदा "तयोरन्योऽन्यानुरागेणैव परिणयो कृतो न मया कारित" इत्युक्त्वैव क्रोधो मर्षयितव्यः, अयञ्च प्रवादः सार्वलौकिकत्वेन वचसः सत्यताप्रतिपादकतया तत्रानुकूलो भवेदिति भावः। "अनुष्टुप्" वृत्तम् ॥

(४७) विद्वत्स्वभावविहतया दर्शितकपटव्यवहारस्यादोषत्वं प्रकटयति—बहिरिति। एकः अद्वितीयः श्रेष्ठो वा। "एकान्यकेवलेष्वेक" इति भरतः। विद्वान् सांसारिकज्ञानवान् चतुर इति यावत्। पारमार्थिकज्ञानस्य लिप्सोरपि एतादृशाचरणस्य वर्जितत्वात्। बहिर्बाह्ये सर्वाकारैव इङ्गितादिना प्रगुणेन प्रकृष्टगुणेन च। "सर्वाकारमथ परमेव"मिति पाठे तु प्रवर्धित भावप्रधानो निर्देशः, सर्वाकारप्रावण्येनेत्यर्थः। रमणीयं यथा तथा व्यवहरन् वास्तवमनोगतभाव-माच्छाद्य कृत्रिमहास्यादिभिर्बहिरतिमधुरं भावं प्रदर्शयन्नित्यर्थः। अत्यन्तराणि अतिसूक्ष्माणि अपि परेषां वस्तुतत्त्वविषया ऊहा वा अभ्यूहस्य तर्कस्य स्थानानि स्थलानि स्थगयति पिधत्ते। एवं सकलं जनं कपटैश्छलैः अभिसन्धाय वञ्चयित्वा "अभिसन्धिर्वञ्चनार्थे"इति धातुरत्नाकरः।

---

(৪৬) আর দেখ—মালতী ও মাধবের অনুরাগবৃত্তান্তও প্রায় সকলেই জানিয়াছে। ইহাতেও আমাদের মঙ্গলই হইবে, যেহেতু (ইহাদ্বারাই) রাজা ও নন্দনকে প্রতারিত করিতে হইবে।

अव। मए वि गुरुवअणादो, तेण तेण वअणोवण्णासेण भूरि-वसुमन्दिरासण्णराअमग्गेण माहवो सञ्चारीअदि। (घ)

काम। कथितमेव नो मालतीधात्रेय्या लवङ्गिकया। (४८)

(घ) मयापि गुरुवचनात् तेन तेन वचनोपन्यासेन भूरिवसुमन्दिरासन्नराजमार्गेण माधवः सञ्चार्यते।

तटस्थ उदासीन इव स्यात् यथार्थं घटयति सम्पादयति, मौनमवलम्बनञ्च भजते। अभिमत-विषये आलापमपि न वदतीत्यर्थः। अत्र चतुराणां स्वभाववर्णनात् "स्वभावोक्ति"रलङ्कारः। सा च तटस्थ इवेत्युत्प्रेक्षया सङ्कीर्यते। स्वभावोक्तिलक्षणं यथा दर्पणे—"स्वभावोक्तिरसौ चारु-यथावद्वस्तुवर्णन"मिति। शिखरिणीवृत्तम्, तल्लक्षणं यथा—"रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी"ति॥

(घ) मयेति। मयापि माधवः गुरुवचनात् गुर्व्वाः आदेशात् तेन तेन गुरुवाक्योक्त-वर्णितेन वचनोपन्यासेन नानाप्रकारवाक्यरचनाविशेषेण, भूरिवसुमन्दिरस्य अमात्यभवनस्य आसन्नः अतिसन्निहितः यो राजमार्गः राजपथः तेन, सञ्चार्यते सञ्चाल्यते। मद्वचना-नुरोधादेव सम्प्रति अमात्यभवनसन्निहितराजपथेनैव सर्वदा गमनागमनं करोतीत्यर्थः। तादृशाच्च पुनः पुनः कन्दर्पोद्यानगमनानुरागदर्शनात्, राजमार्गीयदर्शने पुनः पुनर्गमनेऽप्यसम्भाव-नीयत्वात्, अतिदीर्घकालविलम्बे सर्वत्रैवाप्यदर्शनशीलत्वमनुभवति। "माधवो यथा भ्रमरोन्यासभवनसन्निहितमार्गेण सर्वदा गच्छति, तथा कर्तुमवलोकितया आमन्त्रणानुज्ञाता चरितार्थतया च सम्पादन"मित्यवलोकितया वाक्यान्तरेण सूचितम्। अत एव "आमन्त्र-णादवलोकितायामितिकर्त्तव्यस्य गुरुवचनादिति कथं सङ्गच्छते" इति कश्चिद् यथावकाशोऽपि निरस्त इति सम्प्रदायः।

(४८) कामेति। अवलोकितानुष्ठितकार्यस्य कर्मसिद्धिं दर्शयितुमुपक्रमते—कथितमेवेति।

---

(৫৭) অদ্বিতীয় বিদ্বান্ ব্যক্তি আকার, ইঙ্গিত ও উৎকৃষ্ট গুণদ্বারা বাহিরে অতিমধুর ব্যবহার করিয়া ছিদ্রান্বেষী ব্যক্তিদিগের অতিসূক্ষ্ম তর্কস্থানগুলি আচ্ছাদিত করেন এবং ছলনাদ্বারা সকলকে বঞ্চিত করিয়া উদাসীনভাবে নিজের প্রয়োজন সাধন করেন ও (অভিমত কার্য্যবিষয়ে) মৌনাবলম্বন করিয়া থাকেন।

(ঘ) অব। আমিও আপনার আদেশ অনুসারে নানাবিধ সত্যাসত্য বাক্য বলিয়া ভূরিবসু-ভবনের সন্নিহিত রাজপথে মাধবকে সঞ্চালিত করিতেছি।

भूयोभूयः सविधनगरीरथ्यया पर्य्यटन्तं
दृष्ट्वा, दृष्ट्वा, भवनवलभीतुङ्गवातायनस्था।
साक्षात्कामं नवमिव रतिर्मालतीमाधवं यत्
गाढोत्कण्ठाललितलुलितैरङ्गकैस्ताम्यतीति॥ (४८)

धात्री उपमातुः सुता धात्रेयी (धात्री ढक् (एयन्) ई) तया धात्रेय्या, एतेन विश्रम्भेण सर्वरहस्यकथनं मालत्याः सखीत्वमुक्तं। यदाह भरत—"कारुदासी च धात्रेयी प्रतिवेश्या च शिल्पिका। बाला प्रव्रजिता चेति नायिकानां सखीजनः" इति। सखीत्वेन च विस्रम्भस्थानतया मालत्याः सकलमनोभाववेदित्वसूचनात् लवङ्गिका मालतीमन यत् कथयति तत् सर्वथा विश्वसनीयमिति सूचितम्।

(४८) भूयोभूय इति। भवनस्य या वलभी प्रासादोर्द्ध्ववेश्म, तत्र तुङ्गं उन्नतं यद्वातायनं वातस्य अयनं गमनं येन तत्, सूक्ष्मविवरसम्पादनयाकाशदर्शनं सूचितम्। गवाक्ष, तत्र तिष्ठतीति तथोक्ता। यद्वा भवनरूपा मालत्याः वासस्थानत्वेन निर्द्दिष्टा या वलभीत्यर्थं चन्द्रशालान्तर्गता समाग। एवञ्च—"कूटागारं तु वलभी चन्द्रशाला शिरोगृहम्" इति वचनानुसारेण वलभीपदेनैव गतार्थतया भवनपदं व्यर्थमित्याशङ्कापि निरस्ता, भवनपदेन यशस्या तदावासस्थानत्वप्रतिपादनात् तत्प्रतिपादनेन च "स्वगृहात् कथं पुनः पुनर्लभो लक्षणो" इत्यदीयाशङ्काया निरासात्। मालत्याः सविधनगरी-रथ्यया तत्सन्निहितराजपथेन, अत्र नगरीपदेन रथ्याया अनेककौतुकोद्दीपकविषयसमावेश उक्तः, एवञ्च माधवस्य तत्र पुनः पुनर्गमनं न दोषावहं, मालत्याश्च पुनः पुनस्तदालोकनेऽपि मालतीयशरहस्योदय इति सूचितम्। भूयो भूयः पुनः पुनः, वीप्सया दर्शनं प्रति दृढता दर्शिता। पर्य्यटन्तं गतागतानि कुर्वन्तं माधवं साक्षात्प्रत्यक्षं नव नूतनं दाहानन्तरोत्-पन्नमिति यावत्, कामं कन्दर्पं रतिः कामकान्तेव दृष्ट्वा दृष्ट्वा, वीप्सया तत्कण्ठातिशयः सूचितः। पुनः पुनरवलोकनजन्यगाढोत्कण्ठया दृढाकाङ्क्षया तत्कण्ठादर्शनादनुभावाश्च उक्ता भावप्रकाशिकायां यथा—"सर्वेन्द्रियसुखास्वादो यत्रास्तीति मनः स्थितिः। तत्प्राप्तीच्छा स-सङ्कल्पानुतर्कश्च कथ्यते बिदुः॥ अत्र. गाढोत्कण्ठयाऽन्यत्सदास्मावलोकन। अङ्गम्लानिर्दीनत्वत्रि-,

---

(৪৮-৪৯) কাম। মালতীর ধাত্রীসুতা লবঙ্গিকা আমার নিকট বলিয়াছে যে, নিজ ভবনাস্থিত সর্ব্বোচ্চ প্রাসাদের উন্নত গবাক্ষে বসিয়া মালতী সন্নিহিত রাজপথে বারবার পর্য্যটনকারী মাধবকে পুনঃ পুনঃ অবলোকন করতঃ দাহানন্তরোৎপন্ন কন্দর্পদর্শনে রতির ন্যায় কামজ সন্তাপ-কলুষিতাঙ্গে অত্যন্ত গ্লানি অনুভব করিতেছে।

अथ। आढं, जदो ताए वि उक्कण्ठाविणोदणणिमित्तं माहव-पडिच्छन्दअं आलिहिदं, तं लवङ्गिआए अज्ज मन्दारिआए हत्थे णिहिदं दाव (ङ)।

काम। [विचिन्त्य।] सुविहितं लवङ्गिकया, यतो माधवा-नुचरः कलहंसकस्तां विहारदासीं मन्दारिकां कामयते, तदनेन तीर्थेन तत्प्रतिच्छन्दकं उपोद्घातेन माधवान्तिकमुपेयादित्यभि-प्रायः। (५०)

(ङ) आढं, यतस्तयाऽप्युत्कण्ठाविनोदननिमित्तं माधवप्रतिच्छन्दकमालिखितं तल्लवङ्गिकया अद्य मन्दारिकाया हस्ते निहितं तावत्।

मांसोदयविच्छिन्नं ॥ अधिज्यानुश्रुतालम्बि कपोलतलमानतं। ससद्गुणरागेण छेदोधा गद्गदा च वाक् ॥ उत्कण्ठानुभवा भावा जायन्ते भावकोविदैः." इति। कुशितलुलितैः अति-म्लानिमापन्नैः मनोभवम्लापिनाम्यन्त कलुषितैरिति यावत्। अविरतलुलितैरिति पाठे पूर्वं लुलितैः रथ्यैः इदानीं लुलितैः म्लानिमापन्नैरित्यर्थः। अङ्गैः अङ्गैः (कार्ये कः) लाघ्यति अतितरां सायतीत्यस्य कथितं लवङ्गिकयेति यथाभिमान्यः। यथा रतिः दाक्षायणानुपमं कामं साघात् कमोल्याहरत्यथ्य मालतीमाधवयोरमयाद्भाव्यतीति सम्यग्मनेन वाक्येन प्रतिपादनाद्दशीपमालङ्कारः स्फुट एव। यदि च कामस्यानन्तरम् साथास्याद्युपसर्गं विवक्षितमिति पुरुषमीत्यति तदोपमैवाप्यालिस्यन्दः। अनेन श्लोकेन मालत्याः अभिलाषाख्या प्रथमा कामदशा दर्शिता, तदुक्तं यथा दर्पणे—"अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च। उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः ॥ अभिलाषः स्पृहे"ति। मन्दाक्रान्ता वृत्तम्—"मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भनौ ततौ गयुग्म"मिति तल्लक्षणम्।

(ङ) अथेति। आढम् लवङ्गिकया यत् कथितं तत् सर्वं अतितरामनुरक्ता मालतीत्यर्थः। अत्र युक्तमवधारय—यत इति। तयापि मालत्यापि उत्कण्ठाविनोदनार्थं उत्कण्ठापनयनार्थं, माधवप्रतिच्छन्दकं माधवस्य प्रतिकृतिः। तत्प्रतिच्छन्दकं लिखितं निहितं। अनयो माधव-हस्तगतं भविष्यतीति कार्योपक्रमस्तावच्छन्देन सूचितः।

(ঙ) অব। ইহা ঠিক, যেহেতু মালতী উৎকণ্ঠা-প্রশমনের নিমিত্ত মাধবের প্রতিকৃতি অঙ্কিত করিয়াছে এবং সেই প্রতিকৃতি আজ লবঙ্গিকা মন্দারিকার হস্তে সমর্পণ করিয়াছে।

अव। अज्ज, माहवोवि कोदूहलमुप्पादिअ, मए अउत्तम-अणमहूसवं मअरंदुज्जाणं पभादे अणुप्पेसिदो, तहिं किल मालदी गमिस्सदि, तदो अण्णोण्णदंसणं भोदुत्ति (च)।

काम। साधु वत्से, साधु! अनेन मत्प्रियाभियोगेन स्मारयसि मे पूर्व्वशिष्यां सौदामिनीम्। (५१)

(च) अद्य माधवोऽपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मकरन्दोद्यानं प्रभातेऽनुप्रेषितः, तत्र किल मालती गमिष्यति, ततोऽन्योऽन्यदर्शनं भवत्विति।

---

(५०) कामेति। (विचिन्त्य मन्दारिकाहस्ते चित्रफलकनिधानस्य तात्पर्यं विभाव्य, विहस्येति शेषः) सुविहितं साधु अनुष्ठितम्। विहारः सौगतप्रव्राजिकानामालयः, तत्र व्यापृता दासी परिचारिका विहारदासी तां मन्दारिकां कामयते अभिलषति। एतेन मन्दारिका-कलहंसकयोः सम्बन्धप्रत्ययः सूचितः, तथाच कलहंसकहस्तेनैव प्रतिच्छन्दकं मन्दारिका माधवं प्रापयिष्यतीत्याशयः। तत् तस्मात्, अनेन निदानरूपेण तीर्थेन उपायेन, "तीर्थं शास्त्राध्वर-क्षेत्रोपायनारीरजःसु च। अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु"इति मेदिनी। उपोद्घातेन ...ेन अथवा उपोद्घातेन प्रकृतोपपादकेनेति तीर्थविशेषणम्। उपोद्घातायेति पाठे तु प्रकृतोपपादकार्यसिद्धार्थमित्यर्थः, इति अभिप्रायः। एतदेव मन्दारिकाहस्ते चित्रफलकार्पणस्य तात्पर्यमित्यर्थः।

(च) अद्येति। स्वानुष्ठितकार्यान्तरं कथयति—अद्येत्यादि। प्रवृत्तो मदनमहोत्सवो यस्मिन् तत् प्रवृत्तमदनमहोत्सवं, अनेन विशेषणेन विवाहप्रसाधकवसन्तकालः सूचितः। अनुप्रेषणे हेतुमाह—तत्र किलेति।

(५१) कामेति। मत्प्रिये मम प्रीतिविषये, अभियोगेन आयत्नाभिनिवेशेन। मे इति सम्बन्धे षष्ठी।

---

(৫০) কাম। (চিন্তা করিয়া) লবঙ্গিকা ভালই করিয়াছে, যেহেতু মাধবের অনুচর কলহংস বৌদ্ধ পরিব্রাজিকালয়ে ব্যাপৃত পরিচারিকা সেই মন্দারিকাকে কামনা করিতেছে, সুতরাং এই উপায়ে প্রসঙ্গতঃ সেই প্রতিকৃতি মাধবের নিকট পহুঁছিবে।

(চ) অব। অদ্য প্রাতঃকালে নানাবিধ কৌতূহল উৎপাদন করিয়া

अव। भअवदि ! सा सोदामिणी अहुणा समासादिदपरोक्ख-मन्तसिद्धिप्पहावा, सिरिपव्वदे कावालिअव्वदं धारेदि। (छ)

काम। कुतः पुनरियं वार्त्ता ? (५२)

अव। अत्थि, एत्थ णअरे, महामसाणप्पदेसे कराला णाम चामुण्डा। (ज)

काम। अस्ति, या किल विविधजीवोपहारप्रियेति नागरि-काणां प्रवादः। (५३)

(छ) भगवति। सा सौदामिनी अधुना समासादितपरोक्षमन्त्रसिद्धिप्रभावा श्रीपर्वते कापालिकव्रतं धारयति।

(ज) अस्त्यत्र नगरे महाश्मशानप्रदेशे कराला नाम चामुण्डा।

(छ) भगवतीति। समासादित, प्राप्त, परोक्षमन्त्रसिद्धिः प्रभावो यया सा। सर्वथा परित्यक्त-[illegible] [illegible] कापालिक, [illegible]।

(५२) कामेति। लब्धेति शेषः।

(५३) कामेति। अस्तीति आत्मन इति शेषः। सा चामुण्डा, किल प्रसिद्धौ, विविधा नानाप्रकारा जीवा मनुष्यादय एव उपहारा बलयः प्रिया यस्या सा। अनेन वक्ष्यमाणं मालत्युपहार-सूचितः। नागरिकाणां नगरवासीनां प्रवादः प्रसिद्धिः।

মাধবকেও আমি মদনমহোৎসব উপলক্ষে মদনোদ্যানে প্রেরণ করিয়াছি, মালতীও তথায় যাইবে, সুতরাং পরস্পরের সন্দর্শন ঘটিবে।

(৫১) কাম। সাধু! তুমি ভাল অনুষ্ঠান করিয়াছ, আমার প্রিয়বিষয়ে তোমার এই অভিনিবেশ আমার পূর্ব্ব শিষ্যা সৌদামিনীকে স্মরণ করাইতেছে।

(ছ) অব। সেই সৌদামিনী সম্প্রতি আশ্চর্য্য মন্ত্রসিদ্ধির প্রভাব লাভ করিয়া শ্রীপর্ব্বতে কাপালিকব্রত ধারণ করিয়াছে।

(৫২) এই বৃত্তান্ত কাহার নিকট হইতে শুনিলেন ?

(জ) অব। এই নগরে মহাশ্মশানপ্রদেশে করালা নামে এক চামুণ্ডা আছে।

(৫৩) কাম। আছে, সেই চামুণ্ডা নানাবিধ নরপশু প্রভৃতি বলিপ্রিয়া বলিয়া নাগরিকদিগের প্রবাদ আছে।

अव। तहिं क्खु, सिरिपव्वदादो आअदस्स, रत्तिविहारिणो णादिदूरारण्णवासिणो साधअस्स, मुण्डधारिणोऽघोरघण्टणामधेअस्स, अन्तेवासिणी महाप्पभावा कवालकुण्डला णाम, अणुसञ्झं समागच्छदि, तदो इअं पउत्ती (भ)

काम। सर्वं सौदामिन्यां सम्भाव्यते। (५४)

अव। अलं दाव एदिणा। भअवदि! एसोवि सहअरो माहवस्स, बालमित्तो मअरंदो णाम, मंदणस्स बहिणिं मदअंतिअं जइ समुव्वहदि, तंपि णाम माहवस्स दुदीअं पिअं किदं भोदि। (ञ)

(भ) तत्र खलु श्रीपर्वतादागतस्य रात्रिविहारिणो नातिदूरारण्यवासिनः साधकस्य मुण्डधारिणोऽघोरघण्टनामधेयस्य, अन्तेवासिनी महाप्रभावा कपालकुण्डला नाम, अनुसन्ध्यं समागच्छति, ततः इयं प्रवृत्तिः।

(ञ) अलं तावदेतेन। भगवति! एषोऽपि सहचरो माधवस्य बालमित्रं मकरन्दो नाम, मदनस्य भगिनीं मदयन्तिकां यदि समुद्वहति, तदपि नाम माधवस्य द्वितीयं प्रियं कृतं भवति।

(भ) अवेति। नातिदूर अर्थात् कपालकुण्डलायाः सन्निहितं यदरण्यं तत्र वस्तुं शीलं यस्य तस्य, साधकस्य मन्त्रसाधनोद्यतस्य, मुण्डधारिणः नरशिरः कपालधारिणः कापालिकस्येति यावत्। अनुसन्ध्यं सन्ध्यायां। प्रवृत्तिर्वार्त्ता, मया श्रुतेति शेषः। "कापालिकास्तु घण्टान्त-नामानः समुदाहृता" इति भरतानुसारेण कविनास्य अघोरघण्टेति घण्टान्तनाम विहितम्।

(५४) कामेति। एतेन सौदामिन्या असाध्यं साधनीयमिति सूचितम्।

(ভ) অব। অঘোরঘণ্টনামক রাত্রিবিহারী এক কাপালিক সন্ন্যাসী শ্রীপর্ব্বত হইতে আসিয়া চামুণ্ডার সন্নিহিত অরণ্যে বাস করিতেছেন, তাঁহার শিষ্যা মহাপ্রভাবা কপালকুণ্ডলা সন্ধ্যাকালে সেই চামুণ্ডামন্দিরে আসিয়া থাকেন, তাঁহার নিকট হইতে সৌদামিনীর বৃত্তান্ত শুনিয়াছি।

(৫৪) কাম। সৌদামিনীর পক্ষে সমস্তই সম্ভবপর।

काम। नियुक्तैव मया मत्प्रियसखी तत्र बुद्धरक्षिता। (५५)

अव। सुविहितं भगवत्या। (अ २)।

काम। [विचिन्त्य।] तदुत्तिष्ठ, माधवप्रवृत्तिमुपलभ्य, मालतीमेव पश्यावः। (५६) [इत्युभे उत्तिष्ठतः।]

काम। [विचिन्त्य।] अत्युदारप्रकृतिर्मालती, तन्निपुणं निसृष्टार्थदूतीकल्पस्तन्त्रयितव्यः। (५७) सर्वथा—

(अ २) सुविहितं भगवत्या।

(अ) अवेति। एतेन अद्भुतानुपयुक्तेन कापालिकवृत्तान्तकथनेन, अलं व्यर्थमित्यर्थः। भगवतीति आमन्त्रणाको निर्देशः, तेन वात्सल्यातिशय इत्यर्थः, भिक्षुशब्दस्यावधिवाचकत्वात् पुंस्त्वं। यदा मालतीविवाहे माधवस्य प्रियसखा नन्दनभगिन्या मदयन्तिकया सह मकरन्दस्य विवाहोऽपि प्रियः, तदाभ्यामपि प्रतिसम्पन्नमित्याशयः। अनेनोपनायकस्य मकरन्दस्य मदयन्त्या सह सम्बन्धः सूच्यते।

(५५) कामेति। नियुक्तैवाद्यैव मयापि तत्पूर्वमेव चिन्तितमित्यर्थः सूचितः। बुद्धरक्षितेत्यनेन भिक्षुकीत्वं सूचितं, ततश्च तस्या बौद्धे नियोगो युक्त इत्याशयः।

(५६) कामेति। माधवप्रवृत्तिं मदनोद्याने तयोरन्योऽन्यावलोकनं वार्तां, अवेति वार्तां उपलभ्य ज्ञात्वा।

(५७) कामेति। विचिन्त्य "निसृष्टार्थो मितार्थश्च तथा सन्देशहारकः। कार्यप्रेष्याश्च दूत्यो दूत्यश्चापि तथा विधा" इति दर्पणादौ दूतीनां त्रैविध्यदर्शनात् कीदृशं दौत्यमावयोरिति विभाव्य, निश्चिनोतीति शेषः। अत्युदारा अति गाम्भीर्ययुक्ता प्रकृतिर्यस्याः सा। गाम्भीर्यञ्च— "यत्र प्रभावादाकारा हर्षक्रोधभयादिषु। भावेषु नोपलभ्यन्ते तद्गाम्भीर्यं प्रकीर्तितं"।

(এ) অব। এই কাপালিকবৃত্তান্ত-কথনে এখন প্রয়োজন নাই। ভগবতি! মাধবের সহচর বাল্যমিত্র এই মকরন্দ যদি নন্দনের ভগিনী মদয়ন্তিকাকে বিবাহ করিতে পারে (তবে) তাহাও মাধবের দ্বিতীয় প্রিয়কার্য্য করা হইবে।

(৫৫) কাম। আমার প্রিয়সখী বুদ্ধরক্ষিতাকে পূর্ব্বেই আমি সে বিষয়ে নিযুক্ত করিয়াছি।

(এ ২) অব। আপনি ভালই ব্যবস্থা করিয়াছেন।

(৫৬) কাম। (চিন্তা করিয়া) তবে উঠ মাধবের বৃত্তান্ত জানিয়া মালতীকেই (যাইয়া) দেখি। (উভয়ের উত্থান)।

शरज्ज्योत्स्ना कान्तं कुमुदमिव तं नन्दयतु सा,
सुजातं कल्याणीभवतु कृतकृत्यः स च युवा ।
वरीयानन्योऽन्यप्रगुणगुणनिर्माणनिपुणो,
विधातुर्व्यापारः फलतु च मनोज्ञश्च भवतु ॥ (५८) ॥

निपुणत्वञ्च । तत् तस्मात् अतिगम्भीरप्रकृतित्वात् अतिमाधुर्य्यशालिनी मालती प्रायात्स्वयेऽपि स्वाभिप्रायं न स्वयं निवेदयतीत्यस्मादिति यावत्, निसृष्टः समर्पितः अर्थः कार्य्यभारो यस्यामिति निसृष्टार्था या दूती तस्याः क्रमः व्यापारपद्धतिः निपुणं यथा स्यात्तथा तन्त्रयितव्यः अवलम्बितव्यः प्रायार्थे नाट्येऽकर्तव्य इत्यर्थः । "उभयोर्भावमुन्नीय स्वयं वदति चोत्तरम् । सुश्लिष्टं कुरुते कार्य्यं निसृष्टार्थस्तु स स्मृतः ॥" इति निसृष्टार्थदूतलक्षणोक्तधर्म्माणां दूत्यामपि दर्पण-कृतातिदिष्टत्वात् "नायिकाया नायकस्य वा मनोरथं ज्ञात्वा तदनुमतेन या कार्य्यं साधयति, सा निसृष्टार्था दूती" उच्यते ।

(५८) आशास्ते शरदिति । कल्याणी मनोहराकारगुणशालिनी सा मालती शरज्ज्योत्स्ना शारदीया चन्द्रिका कान्तं रम्यं कुमुदमिव सुजातं शोभनजन्मानं कान्तं रम्यं "अन्यस्त्रीभोगसम्भूतं चिह्नं यस्य न विद्यते । देहे कामशरे नापि स कान्त इति कीर्त्तितः ॥" इति भरतोक्तलक्षण-सम्पन्नं वा तं माधवं नन्दयतु सन्तोषयतु । स च युवा कल्याणी विवाहकल्याणयोगी सन् कृतकृत्यः कृतार्थो भवतु । (उभयोस्तुल्यानुरागित्वेन स तां नन्दयतु, सा च कृतकृत्या भवतु इत्यर्थोऽपि चकारेण द्योत्यते । युवेत्यनेन माधवस्यानुरागाधिक्यसम्भवः सूचितः) एवं सति अन्योऽन्यस्य परस्परस्य प्रगुणाः अनुरूपा ये गुणास्तेषां निर्म्माणे निपुणः कुशलः अत एव वरीयान् श्रेष्ठः विधातुर्व्यापारः प्रयत्नः फलतु सफलो भवतु, मनोज्ञः सर्व्वजनश्लाघ्यश्च भवतु । अन्योऽन्यानुरूपनिर्म्माणस्य तादृशयोरन्योऽन्यसंघटनमेव फलं, तदभावे तद्विफलमेव भवेदिति भावः । यथा शरच्चन्द्रिका कुमुदं नन्दयति, तथा मालती तं नन्दयतु इति साम्यस्याविवक्षितत्वेन वाक्येन प्रतिपादनादत्रोपमालङ्कारः । तल्लक्षणं यथा दर्पणे—"साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयो"रिति शिखरिणीवृत्तम् ।

---

(৫৭) তাই। (চিন্তা করিয়া) মালতীর স্বভাব অতীব উদার,(অর্থাৎ কিছুতেই সে তাহার মনের ভাব ব্যক্ত করিবে না) সুতরাং নিপুণভাবে নিসৃষ্টার্থ-দূতীর পদ্ধতি অনুসারেই (অর্থাৎ নিজের বিবেচনানুসারেই) কার্য্য করিতে হইবে।

[इति निष्क्रान्ते (५८) विष्कम्भकः] (६०)

[ततः प्रविशति गृहीतचित्रोपकरणः कलहंसः ।] (६१)

कल। कहिं दाणिं तुलिदमअरद्धअरूवावलेवविब्भमाअलि-स्समाअदोहिअपमाहप्पं आदस्सअं पेक्खिस्सं। [परिक्रम्य।]

---

(५८) कामन्दकावलोकिते इति शेषः।

(६०) विष्कम्भकः तल्लक्षणं यथा दर्पणे—"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥ मध्येन मध्यमाभ्यां वा पात्राभ्यां सम्प्रयोजितः। शुद्धः स्यात् स तु सङ्कीर्णो नीचमध्यमकल्पितः॥" इति। अयञ्च विष्कम्भकः नीचमध्यमपात्रप्रयोजितत्वात् "सङ्कीर्णः"। अनेन विष्कम्भकेन राजसुतां नन्दनेन याचमानां मालतीं तत्प्रतिविधानं भूरिवसुना मालतीमाधवयोः परिणयसम्पादनाय कामन्दक्या नियोजनाय कामन्दक्या च तन्मातृकाया करणीयावलोकिताया नियोजनं कामन्दकी-भूरिवसुदेवराताना विद्याभ्यासकालसाहचर्यम् अथ भूरिवसुदेवरातयोः परस्परापत्यसम्बन्ध-मनोरथस्य सौदामिन्या देशान्तरभ्रमणस्य पद्मावत्यां माधवागमनस्य, परस्परसन्दर्शनेन मालतीमाधवयोरनुरागोत्पादस्य कामन्दक्या मन्दारिकानुरागादेश्चातीतस्य, भाविनश्च मालतीमाधवयो-र्मदनोद्यानसन्दर्शनस्य सौदामिन्या चाघोरघण्टनीयस्य विवक्षितस्येन कामन्दकप्रयत्नादेः सूचनमित्यनुसन्धेयम्॥

(६१) तत इति। गृहीतं चित्रं चित्रफलकमेव उपकरणं उपकरणमं येन स तथोक्तः, कलहंसकः तदाख्यो माधवानुचरः, (कलहंसो राजहंसः तस्य स्वरस्तुल्यकान्तित्वात् प्रसिद्धत्वेऽपि यौगिनीप्रभावात् वक्ष्यो मिलित इति नामाभिप्रायो बोध्यः) अयं पूर्वस्मिन् अङ्के, "माधवानुचरः कलहंसक" इत्यादि कामन्दकीवचनेन सूचितः।

---

(৫৮) শরৎকালের জ্যোৎস্না যেমন মনোজ্ঞ কুমুদকে প্রফুল্লিত করে, কল্যাণ-ভাজন মালতীও সেইরূপ সৎকুলজাত সেই মাধবকে আনন্দিত করুক, যুবক মাধবও (তাহাতে) কৃতার্থ হউক, এবং পরস্পরের তুল্যগুণগরিমা নির্মাণ-শীল বিধাতার উৎকৃষ্ট চেষ্টা ও (তুল্যসমাগমবাসনা) মনোজ্ঞ ও সফল হউক। (মালবিকা ও অবলোকিতার প্রস্থান।)

(৬১) (চিত্রফলক উপকরণহস্তে কলহংসের প্রবেশ)

परिश्रान्तोम्हि. जाव इमस्सिं उज्जाणे मुहुत्तं विसमिअ, मअरंदसह-अरं णाहमाहवं पेक्खिस्सं (ट) [इति प्रविश्योपविशति।]

[ततः प्रविशति मकरन्दः]

मक। कथितमवलोकितया मदनोद्यानं गतो माधव इति, भवतु, तत्रैव गच्छामि। [परिक्रम्य दृष्ट्वा च।] दिष्ट्या अयं वयस्य इत एवाभिवर्त्तते। [निरूप्य।] अस्य तु (१२)

गमनमलसं, शून्या दृष्टिः, शरीरमसौष्ठवम्,
श्वसितमधिकं, किं न्वेतत् स्यात्किमन्यदितोऽथवा।

(ट) कुत्रेदानीं तुलितमकरध्वजरूपावलेपविषमावक्षिप्तमालतीहृदयमाहात्म्यं नाथमाधवं प्रेक्षिष्ये। परिश्रान्तोऽस्मि यावदिहोद्याने मुहूर्त्तं विश्रम्य मकरन्दसहचरं नाथमाधवं प्रेक्षिष्ये।

(ट) कुत्रेति। तुलित। तुलितः खर्व्वीकृतः मकरध्वजस्य कन्दर्पस्य रूपावलेपः सौन्दर्यगर्व्वो "अवलेपः स्मृतो गर्व्वे" इति याादवः। येन तादृशेन रूपविभवेन सौन्दर्यविलासेन अवक्षिप्तं तिरस्कृतं मालतीहृदयस्य माहात्म्यं गाम्भीर्यं येन तं, मालतीहस्तलिखितमाधवप्रतिकृति-सन्दर्शनेनावधारितो माधवमालत्योरनुरागो माधवस्याप्यनेन मालतीधैर्य्यच्युतिरनेन विशेषणेन सूचिता। मकरन्दः सहचरो यस्य तं, अनेन मकरन्दप्रवेशः सूचितः। क्वचित् पुस्तके मकरन्दनन्दनमिति पाठः, मकरन्दस्य नन्दनं आनन्दजनकमिति तदर्थः। मकरन्दः पुष्परसः, तस्य माधवस्य वसन्तस्य सहचरत्वं युक्तमेवेति अत्र माधवसहचरस्य मकरन्देति नाम युक्तम्। नाथं प्रभुं माधवं प्रेक्षिष्ये द्रक्ष्यामीत्यर्थः।

(१२) कथितमित्यादि। कन्दर्पनिकेतनोपलक्षितमुद्यानं मदनोद्यानं। एतेन शृङ्गारो-द्दीपनविभावत्वं दर्शितं। दिष्ट्या भाग्येन, अतीवानन्दप्रतिरूपकमव्ययमेतत्। वयस्यः, वयसा तुल्यः समवयस्क इत्यर्थः (वयस् शब्दात् तुल्यार्थे य.), इतः अस्मिन् अभिवर्त्तते आगच्छति। (निरूप्य निर्वर्ण्य) अस्येत्यस्य श्लोकस्थितेन गमनमित्यादिना अन्वयः।

(ট) কর্ম। যিনি কন্দর্পের রূপগর্ব্ব-খর্ব্বকারী স্বীয় সৌন্দর্য্যচ্ছটায় মালতীর ধৈর্য্য বিলোপ করিয়াছেন, সেই প্রভু মাধবকে কোথায় দেখিতে পাইব? (নিরূপণ করিয়া) বড়ই পরিশ্রান্ত হইয়াছি, এই উদ্যানে মুহূর্ত্তকাল বিশ্রাম করিয়া মকরন্দসহচর প্রভু মাধবকে দেখিব (প্রবেশানন্তর উপবেশন)।

(মকরন্দের প্রবেশ)।

भ्रमति भुवने कन्दर्पाज्ञा, विकारि च यौवनम्,
ललितमधुरास्ते ते भावाः क्षिपन्ति च धीरताम् ॥ (१२)

(१२) भ्रमतीति । अत्र भ्रमणं चलनं मन्दं कार्यमिति मन्दगमनमिति यावत् । एतेनालस्याख्यो व्यभिचारी सूचितः । तल्लक्षणं यथा दर्पणे—"आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" इति । शून्या बाह्यार्थग्रहणासमर्था । तथाचोक्तं—"चिन्ता ममतारा च ध्यानाद्यानमसङ्गता । तथा समपुटोपेता शून्या दृष्टिरुदाहृता ॥ शून्या दृष्टिः कृता चिन्ता शन्योऽयमभिधीयते"इति च । एतेन चिन्ताख्यो व्यभिचारी सूचितः, तल्लक्षणं यथा दर्पणे—"ध्यानं चिन्ता हितानाप्तेः शून्यता श्वासतापकृत्" इति, तथा शरीरं यत्नोद्वर्तं विकलं ग्लानियुक्तमिति यावत् । एतेन ग्लान्याख्यो व्यभिचारी सूचितः, तल्लक्षणं यथा दर्पणे—"रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा । ग्लानिर्निष्प्राणताकम्पकार्श्यानुत्साहतादिकृत्" इति । एवं चत्वारि व्यभावविशेषणं चरितं निःश्वासः, एतेन कर्मविपाकमोहादयो व्यञ्जिताः निश्वासस्य तत् कार्यत्वात् । एभिश्च चिन्तौत्सुक्यजन्या तृतीया कामदशा सूचिता । तदुक्तं—"दृङ्मनःसङ्गसङ्कल्पा जागरः कृशतारतिः । ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश" इति । अत्र वितर्कपूर्वकमिदमाह—किं नु खल्विदमिति । नु वितर्के एतत् अलसगमनत्वादिकं किं किं निमित्तं स्यात्, रोगादि निमित्तं कामनिमित्तं वेति वितर्कार्थः । अथवा पक्षान्तरे इतः कामादन्यत् किं नाम निमित्तमित्यर्थः । किं अन्यो निषेधे । एतादृशनिश्चये हेतुं दर्शयति—भ्रमतीति । भुवने जगति कन्दर्पाज्ञा मदनानुशासनं आज्ञैव इति यावत्, भ्रमति अप्रतिहता विचरति । यौवनं—"रतिव्यापारसहनो मन्मथस्य मधुव्रता । विलासे कुसुमायो मदरूपौवनमुदाहृत"मिति लक्षणलक्षितं विकारि विकारजननशीलं । ललिताः सुन्दराः मधुरा मनोज्ञाश्च (मदकलमधुरा इति पाठे मदकला अभावेन मधुरा इत्यर्थः) ते ते भावाः स्वाभिनीत्नयनमनोहारनविभ्रमादयः धीरतां धैर्यं क्षिपन्ति अपसारयन्ति । धैर्यलक्षणं यथा—"चापलेनानुपहता सर्वार्थ-चरितस्थिरता । आस्वादितकी विषमशिर्ष्टैर्धीरमिर्धैर्यमीयते ।" अत्र भ्रमतीत्यनेनाप्रतिहतत्वं भुवनपदेन सर्वदेशव्यापिता, आज्ञापदेनापरिहार्यत्वं, यौवनपदेन माधवादिविकारस्य ध्वनितः ।

(৩২-৩৩) মক। অবলোকিতা বলিয়াছেন, মাধব মদনোদ্যানে গমন করিয়াছেন, তবে আমিও সেইখানেই যাই। (চিন্তন ও অবলোকন করিয়া) ক্রমে ক্রমে এই ■ দিকেই আসিতেছেন। (বিশেষরূপে নিরীক্ষণ করিয়া) ইঁহার গমন অলসতাপূর্ণ, দৃষ্টি বাহ্যার্থগ্রহণে অসমর্থ,—অত্যধিক দীর্ঘ নিশ্বাস বহিতেছে, ইঁহার কারণ কি? অথবা কামদেব ভিন্ন আর কি কারণ হইতে পারে?

[ततः प्रविशति यथानिर्दिष्टो माधवः।] (६४)

माधवः। [स्वगतं]। (६५)

तामिन्दुसुन्दरमुखीं सुचिरं विभाव्य
चेतः कथं कथमपि व्यपवर्त्तते मे।
लज्जां विजित्य, विनयं विनिवार्य्य, धैर्य्य-
मुन्मथ्य, मन्थरविवेकमकाण्ड एव ॥ (६६)

तथाच कामशतमेवैतदन्मत्तादिकमिति स्थितम्। अत्र प्रतिभोत्थितस्य कामरोगादि-निमित्तत्वमन्देहस्य निश्चयान्तत्वा निश्चयान्त-सन्देह कामावस्था द्योतकं प्रति अन्मत्तमन्मादीनां चह्णां चैतुर्वर्णोपन्यासात् समुच्चयालङ्कारः। तल्लक्षणं यथा दर्पणे—"सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः। शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा"॥ "समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके। खले कपोतिकान्यायात्तत्करः स्यात् परोऽपि चेत"॥ इति। हरिणी-वृत्तम्। तल्लक्षणं यथा छन्दोमञ्जर्य्याम्—"न स म र स ला गः षड्वेदैर्हयैर्हरिणी मते"ति॥

६४। यथानिर्दिष्टः—गमनमित्यादिनावर्णितमदनविकारलक्षणः।

६५। स्वगतलक्षणं यथा भरतशास्त्रे—"अश्राव्यं न सर्व्वस्य स्वगतं तदिहोच्यते"॥

६६। अन्मत्तत्वादिकं दर्शयति—तामिति। इन्दुवत् इन्दोरधिकं वा सुन्दरं मुखं यस्याः तथाभूतां तां अचिरदृष्टां मालतीं सुचिरं बहुकालं विभाव्य विषयान्तरपरिहारेण चिन्तयित्वा अधं अकाण्ड एव असमय एव (स्वप्नसकाल एव तत्प्रावर्त्तनस्यौचित्यादित्याशयः;) मन्थरः मन्दीभूतः विवेकः कर्त्तव्याकर्त्तव्यज्ञानं यस्य तादृशं (मन्थरविवेकं यथास्यात्तथेति क्रियाविशेषणं) मे मम चेतः (कर्त्तृ) लज्जां त्रपां "मनः सङ्कोचनं लज्जा रतानौचित्यप्रवर्त्तना"दित्युक्तलक्षणामिति यावत्। विजित्य निरस्य विनयं प्रश्रयं विनिवार्य्य परित्यज्य धैर्य्यं सहजधीरत्वं उन्मथ्य उन्मूल्य कथमपि अतिकष्टेन व्यपवर्त्तते निवर्त्तते तदेकाग्रध्यानतिशयतया केवलं तामेवानुध्यातुमीहत इत्यर्थः। इह तामित्यनेनानुस्मृतिः, इन्दुसुन्दरेत्यनेन गुणकीर्त्तनं विभाव्येत्यनेन चक्षुःप्रीतिः, कथमपीत्यनेनोद्वेगः,

---

কামদেবের আজ্ঞা জগতের সর্ব্বত্র (অপ্রতিহত ভাবে) বিচরণ করিতেছে। যৌবনও স্বভাবতঃই বিকার জন্মাইয়া থাকে, রমণীগণের রমণীয় সৌন্দর্য্যাদি মধুরভাবেও ধৈর্য্যচ্যুতি জন্মায় (সুতরাং ইহার এইরূপ অবস্থা [illegible] কামপীড়ন-জন্য তাহাতে সন্দেহ নাই)।

(৬৪) (মদনবিকারভাবাপন্ন মাধবের প্রবেশ।)

आश्चर्यम्—यद्विस्मयस्तिमितमस्तमितान्यभाव-
मानन्दमन्दममृतप्लवनादिवाभूत्।
तत्सन्निधौ तदधुना हृदयं मदीय-
मङ्गारचुम्बितमिव व्यथमानमास्ते ॥ (५७)

मक। सखे! माधव! इत इतः। (५८)

लज्जा विजितोन्मेषोन्माद', मन्मथविवेकजितमित्यनेन अङ्गनिष्पन्नैकविधा अवस्था दर्शिता, लज्जायागोन्मादयो. ममभाष्मावस्थायोपादायिवोत्कीर्तनमपुरामत्वातिहृदयप्रतिपादनार्थमिति मन्तव्यम्। समस्तालिङ्गकं छलम्।

५७। यदिति। यन्मदीयं मम हृदयं मन, तस्याः सन्निधौ विस्मयेन तदीयाश्चर्यलावण्य-सन्दर्शनजनिताद्भुतरसेन स्तिमितं निश्चलं', इतीव अन्योक्तिः। अस्तमितान्यभावं' विगलितः अन्य-विषयातिरिक्तः भावो धर्मो यस्य तत्, अनेन तन्मयोक्तिः। तथा अमृतप्लवनादिव सुधासिञ्चनादिव आनन्देन अनिर्वचनीयसुखेन मन्दं मन्थरं अभूत्, अनेनाद्भुतरसाधिकारसन्दर्शनजनितभावविशेष-मन्थरता दर्शिता। तदेव हृदयं अधुना तत्सन्निधौ अङ्गारैरिव प्रज्वलदङ्गारेण चुम्बितं संस्पृष्टमिव व्यथमानं दुःखार्तं आस्ते इत्याश्चर्यं', अयमाशयेनैव तत्सन्निधानाभावजनितविरहवेदनया वैलक्षण्य-मिति तद्दाहार्थमित्यर्थः। न च विस्मयः सन्दर्शनानन्दसन्दर्भयोः सुखदुःखे स्वभावसिद्धे इतीति आश्चर्यमात, तत्कथम् इति वचनीयं' समाधानविरहे अननुभूतताहशवेदनाप्रदर्शितमपञ्चर माधवस्य "कथमिदमत्रापतितम्"मित्याश्चर्यभावव्याभिचारित्वादिति मन्तव्यम्। अत्रापि समस्तालिङ्गकमिव छलम्।

५८। आश्चर्यमिति मित्रः। अनेनाङ्गेन मालतीमलभितया बाह्यार्थपरामर्शेन माधवो मकरन्दं न सन्दर्शेति सूचितम्।

(৬৫-৬৬) মাধব। (স্বগত) সেই চন্দ্রমুখীকে বহু সময় চিন্তা করিয়া কিংকর্তব্যবিমূঢ় আমার চিত্ত কেন অসময়েই লজ্জার জলাঞ্জলি দিয়া ও বিনয় পরিত্যাগ করিয়া ধৈর্য্য উন্মূলিত করত অতি কষ্টে নির্বাহিত হইতেছে?

(৬৭) কি আশ্চর্য্য !! আমার সেই চিত্ত তাহার দর্শনে বিস্ময়াভিভূত হইয়া অন্য সমস্ত ভাব পরিত্যাগ করিয়াছিল এবং অমৃতসেকের ন্যায় (অমৃতসেকে আনন্দাভিভূতের ন্যায়) আনন্দাভিভূত হইয়াছিল, আমার সেই চিত্ত সম্প্রতি (তাহার অসন্নিধানে) অঙ্গারকাষ্ঠ সংযুক্তের ন্যায় ব্যথিত আছে।

(৬৮) মক। সখে। মাধব। এদিকে এদিকে।

माध। [परिक्रम्य]। कथं, प्रियवयस्यो मम मकरन्दः। (६८)

मक। [उपसृत्य।] सखे! ललाटन्तपस्तपति घर्मांशुस्तदस्मिन् उद्याने मुहूर्त्तमुपविशावः। (७०)

माध। यथा प्रियवयस्याय रोचते (७१)। [इत्युभावुपविशतः]।

कल। [दृष्ट्वा।] कधं, मअरंदसहअरो इदं ज्जेव बालबउलुज्जाणं अलङ्करेदि माहवो, ता दंसेमि, मअणवेअणाखिज्जमाणमालदीलोअणसुहावहं अत्तणो से पडिच्छंदअं। अहवा मुहुत्तं विस्सामसोक्खं दाव अणुभोदु। (ठ)

(ठ) कथं मकरन्दसहचर इदमेव बालबकुलोद्यानमलङ्करोति माधवस्तद्दर्शयामि मदनवेदनाखिद्यमानमालतीलोचनसुखावहम् आत्मनोऽस्य प्रतिच्छन्दकम्। अथवा मुहूर्त्तं विश्रामसौख्यं तावदनुभवतु।

७०। ललाटं तपतीति ललाटन्तपः (ललाट+तप+खश्, "असूर्य्यललाटयोर्दृशितपो"रिति सूत्रम्) मस्तकतापकः नभोमध्यवर्त्तीति यावत्। घर्म्मांशुः सूर्य्यः तपति सन्तापयति।

७१। प्रियवयस्यायेति "रुच्यर्थानां प्रीयमाणः" इति सम्प्रदाने चतुर्थी।

(ठ) कथमित्यादि। मकरन्दः सहचरः सहगामी यस्य तादृशो माधवः, बालबकुलानां अपरिपक्वकेशराणां उद्यानं उपवनं अलङ्करोति भूषयति। तत् तस्मात् मदनवेदनया अरसक्लान्तेन खिद्यमानायाः खिद्यमानायाः मालत्याः लोचनसुखावहं नेत्रप्रीतिकरं अस्य माधवस्य आत्मनः स्वस्य प्रतिच्छन्दकं प्रतिकृतिं, मन्दारिकया दत्तमित्यर्थः, दर्शयामि माधवमिति शेषः। अत्र मकरन्देन पुष्परसेन सहचरो माधवो वसन्तः बालबकुलमलङ्करोतीति अन्यार्थोऽप्यनुसन्धेयः। अनुभवतु इति पश्चाद्दर्शयिष्यामीति शेषः, चित्ते सुस्थित एव दर्शनं युक्तमित्याशयः।

---

(৬৯) মাধ। (পরিভ্রমণ করিয়া) এ কি আমার প্রিয় বয়স্য মকরন্দ?

(৭০) মক। (সমীপে যাইয়া) সখে! সূর্য্যদেব নভোমধ্যবর্ত্তী হইয়া সন্তাপ দিতেছে, এই উদ্যানে কিছুকাল উপবেশন করি।

(৭১) মাধ। প্রিয় বয়স্যের যেরূপ অভিরুচি। (উভয়ের উপবেশন)

मक। तदस्यैव तावत् उच्छ्वसितकुसुमकेसरकषायशीतलामोदवासितोद्यानस्य काञ्चनपादपस्याधस्तादुपविशावः। (৭২)

[तथा कुरुतः।] (৭৩)

मक। वयस्य! माधव! अद्यैव तावत्सकलनगराङ्गनाजनप्रवर्त्तितमहोत्सवाभिराममदनोद्यानयात्राप्रतिनिवृत्तमन्याहृशं भवन्तमवधारयामि, अपि नाम मनागवतीर्णोऽसि रतिरमणबाणगोचरम्? (৭৪)

৭২। उच्छ्वसितानां विकसितानां कुसुमानां पुष्पाणां केसरैः किञ्जल्कैः कषायः सौरभः (कषायः सुरभौ लोहितेऽव्यक्तेऽपि इति मेदिनी) शीतलः शैत्यगुणसम्पन्नश्च यः आमोदः गन्धः तेन वासितं सुरभीकृतं उद्यानं येन तस्य। यद्यपि गन्धे कषायत्वसम्बन्धेन सौरभ्यादिर्हि न वर्त्तते गुणे गुणविरहात्तथापि लक्षणयाऽर्थबोधनाय सामानाधिकरण्यादिसम्बन्धेन तस्य विवक्षितमिति सुधीभिर्बोध्यम्। यद्वा किञ्जल्कानां यः कषायो निर्यासः (निर्यासेऽपि कषायोऽस्त्रीत्यमरः) तस्य शीतलः अनुत्कटः यः आमोदः तेन वासितं उद्यानं येन तस्येत्यर्थः। काञ्चनपादपस्य चम्पकतरोः।

৭৩। तथा कुरुतः—तादृशतरोरधस्तादुपविशत इत्यर्थः।

৭৪। वयस्येति। "समानवयस्कयोरेकस्यान्यस्मिन् सम्बोधनम्"। "विपत्प्रतिक्रियादक्षो वयस्यः परिकीर्त्तित" इति वयस्यलक्षणम्। सकलेन नगराङ्गनाजनेन प्रवर्त्तितः कृतः यो महोत्सवः

ঠ। কল। (দেখিয়া) এ কি মকরন্দসহচর মাধব এই বাল-বকুলোপবনই অলঙ্কৃত করিতেছেন। তবে মদনবেদনাক্লিষ্ট মালতীর নেত্রপ্রীতিকর ইহার নিজ প্রতিকৃতি দর্শন করাই। অথবা ক্ষণকাল বিশ্রামসুখ অনুভব করুন। (পরে দেখাইব।)

(৭২), মক.। ওহে, বিকশিত কুসুমকিঞ্জল্কনির্যাসের অনুৎকট গন্ধ দ্বারা যে উদ্যান আমোদিত করিতেছে, তাদৃশ এই চম্পকতরুর অধোদেশে উপবেশন করি।

(৭৩) (সেই তরুর অধোদেশে উপবেশন করিল।)

[माधवो लज्जया अधोमुखस्तिष्ठति।] (७५)

मक। [विहस्य।] तत्किमवनतमुग्धमुखपुण्डरीकस्तिष्ठसि ? (७६)

पश्य—

अन्येषु जन्तुषु रजस्तमसावृतेषु,
विश्वस्य धातरि समः परमेश्वरे च।
सोऽयं प्रसिद्धविभवः खलु चित्तजन्मा
मा लज्जया तव कथञ्चिदपह्नुतिर्भूत्॥ (७७)

तैव अभिरामा मनोज्ञा या मदनोद्यानयात्रा ततः प्रतिनिवृत्तं प्रत्यागतं भवन्तं अन्याहं विलक्षणावस्थं अवधारयामि। अपि: प्रश्ने मानसव्यापन्नतायां, रतिरमणस्य कामदेवस्य बाणगोचरं बाणलक्ष्यतां, गोचर इति भावप्रधानो निर्देशः, समागतं अवतीर्णोऽसि प्राप्तोऽसि

७६। अवनतं विदितभावोऽस्मीति लज्जयाऽधोमुखं अतएव मुग्धं किं कर्त्तव्यताविमूढं मुखपुण्डरीकं यस्य तादृशः, अत्र विरहपाण्डुत्वात् मुखस्य पुण्डरीकसाम्यं बोध्यम्।

७७। लज्जायाः शिथिलीकरणाय कामपरवशतायाः सार्वविकत्वं दर्शयति—अन्येष्विति। यः रजस्तमोभ्यां आवृतेषु रजस्तमोबहुलेष्वित्यर्थः, अन्येषु जन्तुषु, तथा विश्वस्य संसारस्य धातरि स्रष्टरि ब्रह्मणि परमेश्वरे महादेवे च समस्तुल्यव्यापारः सर्वेष्वन्येषामतिहतप्रभाव इति यावत्, सोऽयं चित्तजन्मा चित्तादुद्गमो यस्य स मनोभवः खलु निश्चितमेव प्रसिद्धविभवः, अत्र विधेयस्य प्रसिद्धविभवस्य समासे गुणीभूतत्वादविमृष्टविधेयांशाख्यो दोषः। विख्यातविक्रमः, स ब्रह्मादीनामप्यजेयः का कथा अन्येषामित्याशयः। तस्मात् लज्जया कथञ्चिदपि तव अपह्नुति-

---

(৭৪) মক। বয়স্য মাধব! অদ্যই নগরবাসী প্রমত্ত স্ত্রীজনপ্রবর্ত্তিত মহোৎসব দ্বারা অতি মনোহর মদনোদ্যানযাত্রা হইতে প্রতিনিবৃত্ত (হইয়াছ পর) তোমাকে অন্যরূপ দেখিতেছি, তবে কি তুমি অল্প পরিমাণে মদনবাণের লক্ষ্য হইয়াছ?

(৭৫) (মাধব লজ্জায় অধোমুখ হইয়া রহিলেন।)

(৭৬) মক। (হাস্য করিয়া) তবে মুখপদ্ম অবনত করিয়া রহিলে কেন?

माध। वयस्य! किं न कथयामि श्रूयतां। गतोऽहमवलोकिताजनितकौतुकः कामदेवायतनं, तत्र च इतस्ततः परिक्रम्यावलोक्य च परिसरमादूर्म्मितमदिरामोदमधुरपरिमलाकृष्टमधुकरमिलद्दलितपटलसङ्कुलाकुलितवकुलमुकुलावलीमनोहराभरणरमणीयस्याङ्गनभुवो बालवकुलस्य आलवालपरिसरे स्थितः। तत्र च यदृच्छया निरन्तरनिपतितानि कुसुमानि आदाय विदग्धरचनामनोहरां स्रजमभिनिर्म्मातुमारब्धवानस्मि। अनन्तरञ्च सञ्चारिणीव देवता मकरकेतोर्जगद्विजयवैजयन्तिका, निर्गत्य गर्भभवनादुज्ज्वलविदग्धमुग्धनेपथ्यविरचनाविभाविकुमारीभावा महानुभावप्रकृतिः अत्युदारपरिजना कापि तत्र एव आगतवती। (७८)

एवञ्च: यौवनमिति यावत्, मामुग् मैव भवतु अन्यदा दत्तोत्तरास्तत्र इति भावः। दुर्दैवं भवतु सम्मा न कार्य्येति तस्मा परित्यज्य स्वयं कदर्थनमिदाय:।

७८। वयस्येत्यादि। किं न कथयामि? सर्व्वं विश्वासभाजने त्वयि कथयाम्यहमित्यभिप्रायः। अवलोकितया जनित कौतुक कमनीयताद्ये यस्य तादृशः अहं कामदेवायतनं मदनोद्यानं गत. अगच्छमिति शेष। परिक्रम्य परिक्रमणजनितादिव्यर्थ, स्थित इत्यन्वयः, इतो यतनी, परिक्रमादेः स्थित. गन्धाकृष्टमलयाद्यादित्यादाय. उर्म्मित: प्रसृतः यः मदिरामोदस्तत् तेन वा मधुरः मनोज्ञः (दोहदकालादवयोत्तौ विकसति बकुल योषित्कुल्लगण्डूषसिक्त: बकुलोद्गमः प्रति मदिरामोदस्य हेतुत्वादनकस्मात्मनोज्ञत्वहेतुतापि दुर्दैवानुसन्धेया) यः परिमल: सुगन्धः (सुगन्धः परिमल इति विश्व.) तेन आकृष्टं यत् मधुकराणां मिलता अन्योन्य पटल समूहं तेन सङ्कुला व्याप्ता अतएव आकुलिता या बकुलमुकुलावली विकसनोन्मुख कैसरकलिकाश्रेणी, सैव मनोहराभरणं तेन रमणीयस्य मनोहरस्य अङ्गनभुवः कामदेवायतनप्राङ्गणस्थल, एतेनोत्कण्ठावलोकनयोग्यदेशत्वं सूचितं। बकुलवृक्षस्य मूर्द्धापातालं स्थितहस्ते मधु भान्तिविजृम्भितदिदेशसुत्तमे च। बालबकुलस्येति बालत्वविशेषणं कुसुमानामुत्कर्षं

---

(११) ब्रह्म-स्वरूपदेव সাধারণ প্রাণী বিশ্বের সৃষ্টিকর্ত্তা ব্রহ্মা এবং মহেশ্বরের যিনি সমভাবে বিচরণ করেন, সেই কামদেবের প্রভাব অতি সুপ্রসিদ্ধ। (অত এব) লজ্জাবশতঃ (সেই কামভাবের) গোপন তোমার সঙ্গত নহে।

सा रामणीयकनिधेरधिदेवता वा
सौन्दर्य्यसारसमुदायनिकेतनं वा।

मूचनार्थं। आलवालं मृण्मयतपरिखा तत्परिसरे तत्सन्निहितभूमौ। "स्यादालवालमावाल-मावापो यत्र वारयं" "पर्यन्तभू परिसर" इति चामर। तत्र उपवेशनस्थाने निरन्तरपतितानि अजस्रविगलितानि कुसुमानि यदृच्छया स्वच्छन्दतः आदाय स्वैरीला विदग्धा निपुणा या रचना तया मनोहरां रचनानैपुण्येन मनोमोहनकारीमित्यर्थः। स्रजं मालां अभिनिर्म्मातुं ग्रथितुं आरब्धवान् अस्मि। मालानिर्म्माणं कामशास्त्रज्ञानख्यापनायेत्यनुसन्धेयम्। देवस्य मकर-केतोः मकरध्वजस्य कामदेवस्येति यावत्। सञ्चारिणी गमनशीला जगद्विजयवैजयन्तिका त्रिभुवन विजयपताका उज्ज्वलं प्रकाशमानं विदग्धं अग्राम्यं मुग्धं मनोरमं यन्नेपथ्य वेशः तस्य रचनया विभावित. प्रकाशितः कुमारीभाव कुमारीत्वं यस्या, यौवनसम्पत्ति वर्त्तमानत्वा-दयस्या कुमारीत्वं न ज्ञायते परन्तु तद्गुम्फनाद्यभाववैयग्र्यादित्याशयः। महानुभावप्रकृतिः अति-धीरस्वभावा, अत्युदारो महान् दक्षिणो वा परिजन यस्याः सा, उदारो महति दक्षिणे इति माधवः। कापि अज्ञातनामधेया गर्भभवनात् मध्यावासान्निर्गत्य तत्र यत्राहं स्थित इत्यर्थः। तत इति पाठेऽपि समञ्जसम् इति स एव अर्थः। आगतवती उपस्थिता।

১৮। মাধব। বয়স্য! তোমার নিকট কি অবক্তব্য আছে? শ্রবণ কর। অবলোকিতা কর্ত্তৃক উৎসাহিত হইয়া কামদেবায়তনে গমন করিয়াছিলাম। সেই স্থানে ইতস্ততঃ পরিভ্রমণ ও অবলোকন করিয়া পরিশ্রমবশতঃ উল্লসিত মদিরামোদে মনোজ্ঞ যে শুভগন্ধ তদ্দ্বারা সমাকৃষ্ট সম্মিলিত সকল অলিকুল কর্ত্তৃক ব্যাপ্ত ও আকুলিত বকুলকলিকাশ্রেণীরূপ মনোহর আভরণ দ্বারা রমণীয় প্রাঙ্গণ-ভূমিস্থিত বকুল বৃক্ষের আলবালসন্নিহিত ভূমিতে অবস্থান করিয়াছিলাম। সেই স্থানে অজস্র নিপতিত কুসুমসকল যদৃচ্ছাক্রমে গ্রহণ করিয়া অতি নিপুণভাবে মনোহর মালা গাঁথিতে আরম্ভ করিয়াছিলাম। অনন্তর সঞ্চরণশীল কামদেবের ত্রিভুবন-বিজয়পতাকাস্বরূপ অতি ধীরস্বভাবা অজ্ঞাতনামধেয়া একটী স্ত্রী অতি দাক্ষিণ্যসম্পন্ন পরিজনবর্গসহকারে মধ্যাবাস হইতে নির্গত হইয়া সেই স্থানেই উপস্থিত হইল। অতি উজ্জ্বল অগ্রাম্য ও মনোহর (অবগুণ্ঠনাদিশূন্য) বেশ রচনা তাহার কুমারী ভাবের পরিচয় দিতেছিল।

तस्याः, सखे! नियतमिन्दुसुधामृणाल-

ज्योत्स्नादि कारणमभून्मदनश्च वेधाः ॥ (७८)

अथ सा प्रणयिनीभिः प्रभुवरीभिः अविरलकुसुमसञ्चयावचय-लीलादोहदिनीभिः अभ्यर्थ्यमाना, तमेव बालवकुलपादपोद्देशमागतवती, तस्याश्च कमपि चिरादपि महाभागधेयजन्मनि कस्मिंश्चिदुपचीयमानमिव मन्मथव्यथाविकारमुपलक्षयामस्मि। (८०)

७८। तस्याः गुणान् वर्णयति पीति। सा कुमारी रामणीयकस्य रमणीयताया निधिरायतनं यद्वा रामणीयकमेव निधिर्निधेयः तस्य अधिदैवता अधिष्ठात्री देवता वा? सौन्दर्यस्य सौन्दर्यस्य सारसमुदाय, शिल्पं निर्माणं तस्य निकेतनं गृहं वा? (निकेतनमन्दस्यात्र ... ...) इति संशयः। अथवा वाशब्दोऽत्र इवार्थे, तदा च रामणीयकनिधेरधिदेवतेवेत्यादिरर्थः। वाक्यानिमयोरुपमायोरेवार्थेऽपि समुच्चये इति विश्वः। अनेन ... विलोभनं नाम मुखसन्ध्यङ्गमुक्तं यथाह—"गुणाख्यानं विलोभनम्" इति। गुणसमुदायनिरूपणात् ... ... माधवस्य व्यक्तिता। ... तस्याः समोत्पत्तिमुपदर्शयन् तस्याः इत्यादि। हे सखे! नियतं नूनं इन्दुसुधा-मृणालज्योत्स्नादि तस्याः कारणं समवायिकारणं अभूत्, तथाहि—इन्दुरास्यस्य मुखस्य, सुधा अधरस्य, मृणालं भुजयोः, ज्योत्स्ना कान्त्यादीनां उपादानकारणं। आदिपदेन पद्मे पादयोः विद्रुमौ अधरयोरित्यनुसन्धेयम्। ... मदनश्च मदन एव वेधाः सृष्टिकारकः, चन्द्रादिसकलोपमाद्युपादानकत्वं मदनकर्तृकत्वञ्च विना ... ... उपमालङ्कारः। अत्र ... ... वसन्ततिलकं वृत्तम् ॥

१२। সেই রমণী কি রমণীয়তারত্নের অধিষ্ঠাত্রী দেবতাস্বরূপ? অথবা সৌন্দর্য্যের সারাংশসকলের নিকেতনস্বরূপ? হে সখে! আমার মনে হয় চন্দ্র, সুধা, (পদ্মের) মৃণাল ও জ্যোৎস্নাই তাহার উপাদানকারণ এবং মদনই তাহার সৃষ্টিকর্তা। (নচেৎ সেই প্রাচীন ব্রহ্মা কর্তৃক কেবল শুকতুল্যমাত্রা এরূপ রূপ কখনও সম্ভবপর হইত না।)

यतः तस्याः—

परिम्लदितमृणालीम्लानमङ्गं, प्रवृत्तिः,
कथमपि परिवारप्रार्थनाभिः क्रियासु।
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मी-
मभिनवकरिदन्तच्छेदपाण्डुः कपोलः॥ (८१)

८०। अथेति। प्रणयिनीभिः प्रेमास्पदाभिः अविरलं यथा स्यात्तथा यः कुसुमस्तबकस्य पुष्पगुच्छस्य अवचयः चयनं स एव लीला तस्यां दोहदिनीभिः अभिलाषशालिनीभिः अनुचरीभिः आकृष्यमाणा आहूयमानेति यावत् सा बाला तमेव यत्राहमुपविष्ट इत्यर्थः, तस्याश्च बालायाः महता भागधेयेन शुभादृष्टेन अस्य यस्य तादृशी, अनुलनीय-सुन्दरिमालिलविरहिषि तादृशस्त्रिया अभिलाषास्पदत्वात्। कस्मिंश्चित् अस्मत्सनाम्ये युवके बहुदिवसोपचीयमानं बहुदिनात् प्रवर्धमानं मन्मथव्यथया कामवेदनया जनितं विकारं उपलक्षणात् अनुमितवान् अस्मि।

८१। कामविकारानुमाने हेतुं दर्शयति—यत इति। परिम्लदितेति। यतस्तस्या अङ्गं परिम्लदिता मर्दनविशीर्णीकृता या मृणाली बिसतन्तुः तद्वत् म्लानं म्लानिमापन्नं, एतेन क्षमतानाम कामदशा सूचिता। तथा क्रियासु स्नानपानादिषु परिजनानां सखीपरिचारिकादिजनानां प्रार्थनाभिः आग्रहातिशयैः कथमपि अनिच्छयापि प्रवृत्तिः, एतेन विषयविरागः सूचितः। रोगादि-वशादपि क्षमत्वादि सम्भवादव्यभिचारि हेतुं दर्शयति—कलयतीत्यादिना। अभिनवः नूतनः यः करिदन्तच्छेदः हस्तिदन्तखण्डः तद्वत् पाण्डुः गौरः कपोलः निष्कलङ्कस्य कलङ्करहितस्य हिमांशोश्चन्द्रस्य लक्ष्मीं शोभां कलयति। अनेन पाण्डुता प्रदर्शिता, एतादृशी पाण्डुता च

৮০। অনন্তর সেই কুমারী অবিরল কুসুমচয়নে অভিলাষবতী ও অতি-প্রণয়িনী অনুচরী কর্ত্তৃক আহূত হইয়া, যে স্থানে আমি অবস্থান করিতেছিলাম সেই বকুলপাদপের সন্নিকট ভূমিতেই আসিয়া উপস্থিত হইল। কোনও সৌভাগ্য-শালী পুরুষে বহুদিবসাবধি বর্দ্ধমান তাহার মদনবেদনাবিকার উপলব্ধি করিয়াছি।

सा पुनः मम प्रथमदर्शनदिवसात्प्रभृति अमृतवर्त्तिरिव चक्षुषोः अतिशयानन्दमुत्पादयन्ती, अयस्कान्तमणिशलाकेव लोहधातुमन्तः-करणमाकृष्टवती, किं बहुना—(८२)

सन्तापसन्ततिमहाव्यसनाय तस्या-
मासक्तमेतदनपेक्षितहेतु चेतः ।

विमर्दश्च एव सम्भवतीत्यत्र मिथ्याविरतो हेतुः । स तथाच आमदशामधिकृत्योक्तं "नाभ्यावीदं ताप, पाण्डुता क्षमतारोति" इति । नातिनीरूपम्, सम्बन्धे यथा—"न मम मम पुनिर्द भाविनी भीतिमिश्रोक्तिः ।"

(८२) सा पुनरिति । अमृतवर्त्तिः, अमृतमयनेत्राञ्जनशलाका, सा इव सा कुमारी प्रथम-दर्शनात् प्रभृति दर्शनमारभ्यैवेत्यर्थः । चक्षुषोः नेत्रयोः अतिशयानन्दं परमानन्दं समुत्पादयन्ती जनयन्ती अयस्कान्तमणिशलाका चौम्बकमणिशलाकेव लोहधातुमिव लौहदण्डं द्रव्यमिव मम अन्तःकरणं चित्तं आकृष्टवती तद्दर्शनात्प्रभृति तामेव मे चित्तमनुसरतीत्यर्थः । किं बहुना कथनेनेति शेष, उच्यमानं किञ्चित् कथयामीत्यर्थः ।

৮১। যে হেতু তাহার অঙ্গ মর্দিত-বিসতন্তুর ন্যায় ম্লানিযুক্ত, পরিজনবর্গের অনুরোধে অতিকষ্টে তাহার ক্রিয়ায় প্রবৃত্তি, নূতন হস্তিদন্তখণ্ডের ন্যায় পাণ্ডুবর্ণ তাহার কপোল নিষ্কলঙ্ক শশাঙ্কের শোভা ধারণ করিয়াছে। (কামভাবেই এই সকল লক্ষণ পরিলক্ষিত হয়।)

৮২। সেই বালিকা প্রথম দর্শনাবধিই অমৃতময় অঞ্জনলেখার ন্যায় আমার নেত্রের অতিশয় আনন্দ উৎপাদন করত অয়স্কান্তমণি (চুম্বক লোহা) যেমন লোহা আকর্ষণ করে, সেইরূপ আমার চিত্তকে আকর্ষণ করিয়াছে। অধিক আর কি বলিব।

प्रायः शुभञ्च विदधात्यशुभञ्च जन्तोः
सर्वङ्कषा भगवती भवितव्यतैव ॥ (८३)

मक। वयस्य माधव! स्नेहश्च निमित्तसव्यपेक्ष इति विप्रतिषिद्धमेतत्। (८४) यतः—

८३। कथितं समर्थयति—प्राय इति। एतत् मदीयं चेतः महाव्यसनमिति परि-तापपरम्परा सेयं महाव्यसनपरमा विपत्तिः तस्यै, तदर्थमेव तादर्थ्ये चतुर्थी। न कश्चित् हेतुः निमित्तं बाह्यसाधनमिति यावत्, येन तादृशं सत् निमित्तमपेक्ष्यैवेत्यर्थं, तथा व्यसनं सन्नं। तत्सम्भावितदुर्लभत्वेन अप्रत्याशितमनिर्दिष्टेन केवलं भगवत्यादिकैव तदावसितमिति भावः। ननु चञ्चलमपि जय तत्कामकृतं न निवारयितुमशक्यमित्याह—प्राय इति। प्रायो बाहुल्येन भगवती दाक्षायणी, सर्वङ्कषा (सर्व+कष्+खच्) निखिलतया सर्वार्थव्यापिनी, भवितव्यता एव प्राक्तनकर्मजन्यादृष्टमेव जन्तोः जीवस्य, शुभं अशुभञ्च विदधाति सम्पादयति, विधातापि जीवादृष्टसापेक्ष एव सर्वं प्रवर्त्तयतीति नास्ति मे तत्र स्वातन्त्र्यमिति भावः। अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः। तदुक्तं सहित्यदर्पणे—"सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते, साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥" वसन्ततिलकं वृत्तम्।

८४। अपेक्षया सह वर्त्तते इति सव्यपेक्षः निमित्तस्य बाह्यसाधनस्य सव्यपेक्षः निमित्तसव्यपेक्ष, कं इव स्नेहोपाधिकानि इति विप्रतिषिद्धं विरुद्धं अप्रामाणिकमिति यावत्। यो हि स्वाभाविकस्नेहो निर्हेतुकत्वादय. बाह्यनिमित्तापेक्षः स स्नेह एव नेत्यर्थः। यत्तु "द्विधा भवेत् स च स्नेहः कृत्रिमाकृत्रिमात्मकः। सोपाधि कृत्रिमः स्नेहो निरुपाधिरकृत्रिम" इति सोपाधिकेऽपि स्नेहशब्दप्रयोग इति तत् सोपाधिकेऽपि स्नेहत्वोपचारेण भाक्तमिति मन्तव्यम्।

---

(৮৩) মহাপদ্মস্বরূপ মহাবিপদ্‌নাশের জন্যই আমার চিত্ত কোনরূপ নিমিত্তের অপেক্ষা না করিয়া তাহাতে অনাসক্ত হইয়াছে। সর্ব্বদাহিনী ভগবতী ভবিতব্যতাই প্রায় প্রাণিদিগের শুভাশুভ বিধান করিয়া থাকে (অতএব এবিষয়ে আমার কোন স্বাধীনতা নাই)।

(৮৪) মকর। বয়স্য মাধব! স্নেহ যে বাহ্য নিমিত্তকে অপেক্ষা করে, ইহা সম্পূর্ণ বিরুদ্ধ কথা। দেখ—

व्यतिषजति पदार्थानान्तरः (अनिर्वचनीय) कोऽपि हेतु-

र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।

विकसति हि पतङ्गस्योदये पुण्डरीकम्

द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः॥ (८५)

ततस्ततः ? (८६)

माध। ततश्च तत्र, (८७)

८५। व्यतीत' इत्यादि—व्यतिषजतीति। अन्वयः आन्तरः (अन्तर्+अण्) अन्तर्वर्ती कोऽपि अनिर्वचनीयो हेतुः पदार्थान् वस्तूनि व्यतिषजति संश्लेषेण परस्परं सम्बध्नाति। प्रीतयः स्नेहाः न खलु नैव बहिरुपाधीन् बाह्यहेतून् संश्रयन्ते अपेक्षन्ते, बाह्यकारणापेक्षया न प्रवर्तन्ते इत्यर्थः। हि यस्मात् पुण्डरीकं पद्मं पतङ्गस्य (पत्+अङ्गच्) "पतङ्गौ पक्षिसूर्यौ च" इत्यमरः। सूर्यस्य उदये आविर्भावे सति विकसति प्रस्फुटति, तथा चन्द्रकान्तः तन्नामा मणिविशेषः हिमरश्मौ चन्द्रे उद्गते उदयमासेदुषि सति द्रवति स्यन्दते। अत्र तीव्रतरदिनकर-करनिकरसम्पर्के सति कोमलतरकमलप्रस्फुटने, शीतलतरनिशाकरकिरणनिकरसंस्पर्शे सति कठिनचन्द्रकान्तमणिद्रवीभावे च बाह्यहेतुर्न कोऽपि परिलक्ष्यते इत्यतः पदार्थसंश्लेषहेतुः आन्तरः कश्चित् कल्पनीय इत्याशयः। अत्र विशेषेण सामान्यसमर्थनरूपः "अर्थान्तरन्यासोऽलङ्कारः। मालिनीवृत्तम्।

८६। यद्वृत्तं तत् कथयेति शेषः।

८७। ततस्तदनन्तरं, तत्र—तस्मिन्नवसरे।

---

(৮৫) অন্তরস্থ কোন অনির্বচনীয় কারণই পদার্থকে পরস্পর স্নেহসূত্রে আবদ্ধ করে। স্নেহ কখনও বাহ্য হেতুর অপেক্ষা করে না। যেহেতু সূর্য্যের উদয় হইলেই পদ্ম প্রকাশিত হয় এবং চন্দ্র উদিত হইলেই চন্দ্রকান্তমণি বিগলিত হয়। (এস্থলে কোনই বাহ্য হেতু পরিলক্ষিত হয় না।)

(৮৬) তারপর (যাহা হইয়াছিল, তাহা বল)।

(৮৭) মাধ। তারপর, সেই অবসরে।

सभ्रूविलासमथ सोऽयमितीरयित्वा,
सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।
अन्योऽन्यभावचतुरेण सखीजनेन,
मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः (८८)

मक । [स्वगतम् ।] कथं प्रत्यभिज्ञापि नाम ? (८९)

माध । अथ ताः सलीलमुत्तालकरकमलललितमालिकातर लवलयावलोकम् उच्चलमत्तकलहंसविभ्रमाभिरामचरणसञ्चरण-झणझणाय-मानमञ्जीरमञ्जुशिञ्जितानुविद्धमेखलाकलापकिङ्किणी-

८८। सभ्रूविलासमिति। अन्योऽन्यभावचतुरेण परस्पराशयाभिज्ञेन तस्याः मालत्याः सखीजनेन "अयं सः" यः चित्रफलकेऽदर्शि इत्यर्थः। इति वचनं सभ्रूविलासं सभ्रूभङ्गं यथा स्यात्तथा ईरयित्वा कथयित्वा, अथ कथनानन्तरं ज्ञातस्यैवानभिज्ञतामिव पुनरप्यदीपादानमतिसाभिप्रायोक्तमर्थं यथा स्यात्तथा ईरयित्वा कथयित्वा सप्रत्यभिज्ञमिव "पूर्वानुभूतस्य सन्निकर्षेण तदैक्यावगाहिनी बुद्धिः प्रत्यभिज्ञा" तया सहितं यथा स्यात्तथैव मामवलोक्य तदा तत्काले स्मितं ईषद्धसितमेव सुधा अमृतं तया मधुराः मनोहराः कटाक्षाः अभिप्रायव्यञ्जका दृष्टिविशेषाः मुक्ताः क्षिप्ताः। मामालोक्य हास्यपूर्वकं ता, परस्परावलोकनं कृतवत्य इत्यर्थः। अत्रातीतानामनुभवकटाक्षाणां प्रत्यक्षायमाणत्वाद्भाविकाख्योऽलङ्कारः। लक्षणं यथा दर्पणे—"अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः। यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥" वसन्ततिलकं वृत्तम्।

८९। नाम सम्भावनायां। पूर्वानुभूत एव प्रत्यभिज्ञासम्भवात् "मालत्यादिभिर्माधवो दृष्ट" इत्यस्यापि मकरन्दाविदितत्वात् कथं प्रत्यभिज्ञेति वितर्को युक्तः।

९०। अथेति। अथ मद्दर्शनानन्तरं ताः मन्मथविहितावस्थाः सख्यः, प्रतिनिवृत्येति क्रिया विशिनष्टि—सलीलमित्यादिविशेषणत्रयेण। लीलया आकुञ्चितादिभिरभीष्टार्थानुकरणेन सह वर्तमानं यथा स्यात्तथा "अङ्गैर्मधुरवाग्भिश्चेष्टितैः प्रीतिचोदितैः। प्रियानुकरणं लीला सा स्यात् सोपि मतोऽपि॥" उत्ताला उन्नताः याः करकमलयोः ललिताः मनोज्ञाः मालिकाः

(৮৮) পরস্পরের আশয়বোধে সমর্থ তাহার সখীসকল ভ্রূবিলাসের সহিত "এই সে" এই কথা বলিয়া পূর্ব্ব পরিচিতের ন্যায় আমাকে অবলোকন-করতঃ হাস্যামৃতমনোহর কটাক্ষ নিক্ষেপ করিল।

(৮৯) মক। (স্বগত) প্রত্যভিজ্ঞার কিরূপে সম্ভব হইল ?

रणत्कारमुखरं प्रतिनिहत्य भर्तृदारिके ! दिष्ट्या वर्धामहे, यदत्रैव कोऽपि कस्यापि तिष्ठतीति माम् अङ्गुलीदलविन्यासेन आख्यातवत्यः । (८०)

मक । [स्वगतम्] । हन्त, गाढतरः प्रागनुरागस्योद्भेदः । (८१)

कटीतटमणिताङ्गुलीजतापी परस्परमन्योन्याश्रुतानि तानि [illegible] तथा चलत्पार्श्वी, कटकवेदिर्दंत [illegible] । तत उद्धता उद्विग्ना मत्ताश्च ये कलहंसाः तेषां विभ्रमो विलासः [illegible] मनोज्ञ यत् चरणक्षेपणं पदन्यास, तेन [illegible] इति शब्दायमान यत् मञ्जीर नूपुरं तस्य मञ्जुशिञ्जितेन मनोज्ञशब्देन [illegible] मेखलाकलापस्य गुच्छस्य [illegible], किङ्किणीना क्षुद्रघण्टिकानां रणत्कार तेन मुखर यथा स्यात्तथा "मेखला चन्द्रहारः [illegible] एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका । रसना षोडश ज्ञेया कलापः पञ्चविंशति"-रिति अमरः । प्रतिनिहत्य परावृत्य गत्वा भर्तृदारिके । सम्बुद्धिः । दिष्ट्या भाग्येन वर्धामहे, यद्यस्मात् अत्रैव कोऽपि कस्यापि तिष्ठतीत्युक्त्वा अङ्गुल्या एव दलानि [illegible] विन्यासेन लीलया मां [illegible] ज्ञापितवत्य । [illegible] उत्कर्षेण [illegible] । "राज्ञा भट्टारको देवस्तत्सुता भर्तृदारिके"त्यत्र राजवदस्य [illegible] अपि भर्तृदारिकेति सम्बोधनं साधुत्वम् । [illegible] इति [illegible] कोऽपि [illegible], अत एव कस्यापीति [illegible], कोऽपीति पुंसा निर्देशः निःसन्देहार्थः [illegible] । [illegible] अपि [illegible] इति [illegible] इति मन्तव्यम् ।

८१ । हन्त हर्षे "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयो"रित्यमरः । [illegible] मकरन्दस्य प्रागनुरागस्य पूर्वानुरागस्य [illegible] प्रकाश, प्रतीयत इति शेषः ।

---

(৮০) মাধ। তখন তাহারা উন্নত করকমলের মনোজ্ঞ করতালীদ্বারা কঙ্কণশ্রেণী সঞ্চালিত করিয়া উদ্বিগ্ন ও মত্ত কলহংসের গমনের ন্যায় মনোজ্ঞ পদক্ষেপদ্বারা রণ্ রণ্ ইত্যাকার শব্দায়মান যে নূপুর, তাহার মনোজ্ঞ শব্দবিমিশ্রিত মেখলাকলাপস্থিত ঘণ্টিকাশব্দদ্বারা মুখরিত করিয়া লীলাসহকারে ফিরিয়া "ভর্তৃদারিকে ভাগ্যক্রমে আমরা বৃদ্ধিলাভ করিতেছি, যেহেতু এখানেই কাহারও কোন ব্যক্তি অবস্থান করিতেছে" এইকথা বলিয়া অঙ্গুলীদলবিন্যাসদ্বারা আমাকে লক্ষ্য করিল।

(৮১) মক। (স্বগত) অহো অতিদৃঢ় পূর্ব্বানুরাগের বিকাশ(উপলব্ধ হইতেছে)

कल । [आकर्ण्य]। कथं सरसरमणीआणुबन्धिणी इत्थीअ-कधा ? (ङ)।

मक। ततस्ततः—(८२)

माध। अत्रान्तरे किमपि वाग्विभवातिवृत्त-
वैचित्र्यमुल्लसितविभ्रममुत्पलाक्ष्याः।
तद्भूरिसात्त्विकविकारमपास्तधैर्य्य-
माचार्य्यकं विजयि मान्मथमाविरासीत् ॥ (८३)

(ङ) कथं सरसरमणीयानुबन्धिनी स्त्रीजनकथा ?

ङ। सरसरमणीयम् अनुबध्नाति व्याप्नोतीति सरसरमणीयानुबन्धिनी। स्त्रीजनस्य कथा, कथं अविच्छेदेन प्रवर्तत इति शेषः।

८३। अत्रान्तर इति। अत्रान्तरे एतस्मिन्नवसरे उत्पलाक्ष्याः पद्मपलाशनयनायाः तस्याः इति शेषः। किमपि अनिर्वचनीयं अत एव वाग्विभवातिवृत्तवैचित्र्यं वाक्यप्रपञ्चातीतविचित्रभावं उल्लसित उत्थितः विभ्रमः "वागङ्गसत्त्वाभिनयमूलास्थानविपर्य्ययः त्वरया कल्पितोऽभीष्टदर्शने यः स विभ्रम" इत्येवंलक्षणकः शृङ्गारचेष्टाविशेषो यत्र तादृशं, तत्प्रसिद्धं भूरि प्रचुरतरः 'सात्त्विकविकारः स्तम्भादिसात्त्विकभावो यस्मिन् तत्। सात्त्विकभावलक्षणं यथा— "सत्त्वोद्भूताद्गे मनसि ये प्रभवन्ति भावास्ते सात्त्विका निगदिताः कविभिः पुराणै"रिति। तद्भेदाश्च "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदश्च वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मताः॥" तथा अपास्तं निराकृतं धैर्य्यं धीरत्वं येन, तत विजयि जयशीलं सर्व्वसामविजयिति यावत्। मान्मथं मन्मथसम्बन्धि आचार्य्यकं आचार्य्यस्य भावः योपधाद्गुरूपधत्त्वाद्वुञ्। शृङ्गारचेष्टा शिक्षाचातुर्य्यमित्यर्थः; आविरासीत् प्रादुरभूत्। अत्र उत्पलाक्ष्या इत्यनेन नानाप्रकारनेत्रविक्षेपप्रीतिर्गम्य भाव उक्तः। यथोक्तं—"भ्रूनेत्रादिविकारादयः शृङ्गाराकारसूचकः। स्थायिभावः स्थितो ह्यत्र ध्वनितः प्रीतिरेव वा॥" वाग्विभवातिवृत्तवैचित्र्यत्वादिसाभिप्रायविशेषणैर्निबन्धनात् परिकरालङ्कारः। तल्लक्षणं यथा दर्पणे—"उक्तिर्विशेषणैः साभिप्रायैः परिकरो मत" इति। वसन्ततिलकं वृत्तम्॥

(ङ) কল। (শ্রবণ করিয়া) এ কি, সরস রমণীয় রমণীসম্বন্ধীয় কথা (অবিচ্ছেদে চলিতেছে কেন ?)

(৮২) মক ! তারপর ?

(৮৩) মাধব। এই অবসরে সেই উৎপলাক্ষীর অনির্বচনীয় বাক্যাতীত

ततश्च—स्मितसितधिषामिलितानामुल्लसद्भ्रूलतानां,
मदनमुकुलितानां प्रान्तविस्तारभाजाम्।
प्रतिनयननिपाते किञ्चिदाकुञ्चितानाम्,
विविधमहमभूवं पात्रमालोकितानाम्॥ (৫৪)

৫৪। "हेला हावात् समुल्लिसे"ति भरतानुसारेण हावकल्पेनया हावप्रसङ्गेन "नारीणां विलासोल्लासभावबद्धोत्सुकैः। समभावाभिव्यक्तौ हेलौ हेलेति परिकीर्तिता" इत्युज्ज्वलमणौ हेला भवति मदनदृष्टिविकारविशेषात् कथयति—स्मितेत्यादिना। स्मितसितानि हर्षस्मितेन पुरोवर्तिनि मयि निक्षिप्तानि अनेन स्मितसितत्वदृष्टिविकार उक्तः। यथोक्तं—"सस्मेरवदनं नाम्नैव पश्यन् स्मितसुन्दर"मिति। मनो विकसितानि हर्षेण मिलितानि विशेषतः ललितानि, अनेन विकसितत्वाख्या दृष्टिरुक्ता, विकसिते सहर्षिते निरीक्षणक्षमत्वात् तेषां, यतः स्मितं शब्द्यं यथा भासते विकसितत्वं सर्वाङ्गिकमपि प्रसरणात् दर्शनेन लक्ष्यते शनैः शनैः प्रवाहितानामित्यर्थः। एवं उल्लसन्ती किञ्चिदुत्क्षिप्यन्ती भ्रूलता येषां तेषां, अनेन चतुरं नाम भ्रूभङ्गे प्रसन्नाक्षेप इव विकार उक्तः। यथाहि—"भ्रूं किञ्चिदुत्क्षिप्य वारमनुचरत् प्रसन्नं" "प्रथम मदनमेव मम विकासं सचितम्रक" इति। तथा मदनादि मदनाद्भुतानि, अनेन मदनाक्षो इव विकार उक्तः। यथा—"मदन मम विमं मदनरागसमाधितं।" मुकुलितानि उन्मीलितानि च तेषां, अनेन मुकुलिताख्या दृष्टिरुक्ता। तल्लक्षणं यथा—"मुकुलितार्धनिमीलिता मुकुलोत्पुटीभिता। मुकुलोन्मीलितनाया च मुकुलिता दृष्टिरियम्"इति। तथा प्रान्ते अपाङ्गदेशे विस्तारभाजां पुनःपुनः संप्रसारणाय विस्तारयन्ती, अनेन विकासी नामपूर्वैति विकारयमुक्तं। तल्लक्षणं यथा—"हेलाभिसरो हि विस्तारविकासीति कथ्यते। मुहुर्मुहुः स्पृष्टा यत्र हृदयेशम् सम्मुखे भवेत्॥" एवं प्रतिनयननिपाते तद्दर्शनाभिलाषेण मम्मुखितनेत्रपाते सति किञ्चिदाकुञ्चितानां लज्जया ईषन्मुद्रितानां, अनेन साहचिन्ताकुञ्चितविकार उक्तः। तल्लक्षणं यथा—"कदाचारभावपङ्क्तिषु यत्र तत् कुञ्चितं भवेत्" आलोकितानां पश्यतः दर्शनानां। "सहसा दर्शनं यत् तदालोकितमुच्यते"

হৈতিতা ও মধুহিত মৃদৃপুরচেষ্টাপরী প্রভুবনের কৃষ্ণরূপ সাঙ্কেতবান্ বৈদ্য-লোপকারী এবং অশ্লীল মননের মৃদৃপুরচেষ্টা-নিবাপ্রার্থীনা আবির্ভূত হইল।

(৫৪) অনন্তর তাহার সেই অবলোকন (আমারে) নিক্ষিপ্ত ও প্রবাহিত এবং সেই অবলোকনে ভ্রূলতাসকল উল্লসিত ও আকাশ বিস্তৃত হইয়াছিল,

ततश्च—चलतरलितमुग्धस्निग्धनिष्पन्दमन्दै-
रधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षै-
रपहृतमपविद्धं पीतमुन्मूलितञ्च ॥ (८५)

[illegible]ति भरतः। भद्रं विविधं नानाप्रकारं पात्रं योग्यः "योग्यभाजनयोः पात्र"मित्यमरः।
[illegible]भूवम्। आलोकितानामिति बहुवचनेन वारावाहिकप्रवर्तितैर्नेत्राभ्यां दृष्टिविकार
[illegible]नकः। यथोक्तं—"धारावाहिकसञ्चारो यस्य तन्नीलमुच्यते"। अत्रापि पूर्ववत् परिकरा-
[illegible]लङ्कारः। मालिनीवृत्तं ॥

[illegible] ८५। चलेति। चलतरलितमुग्धस्निग्धनिष्पन्दमन्दैः चलसादिकलक्षणान्वितैः। तेषां
[illegible]लक्षणानि यथा—"चलन तदभीष्टार्थाद्भीतार्थेषु विघनते"। तरलितं तद्विकासस्य भूयस्त्वा-
[illegible]त्पुनरालोकनम्"। मुग्धं किञ्चिदुद्वर्तितमिति बह्ववचनम्। "सभरसालोकितं मुग्धं भाव-
[illegible]गर्भमपि स्फुटात्"। "स्निग्धं यदतिभावेन सं हमायेण संयुतम्"। "निष्पन्दं तद्दद्यत्र
[illegible]त्र स्पन्दते क्वचित्"। "मन्थरा मन्दसञ्चारा"। इति। तथा अधिकं विकसता आश्चर्य-
[illegible]दर्शनसमुद्दीपनादतिशयप्रकाशेन युक्तं, उपगच्छता अन्तर्विस्मयेन अन्तर्गतेन विस्मयेन
[illegible]स्मेराः उत्फुल्लाः तारा येषां तैः। अनेन विस्मिताख्या दृष्टिरुक्ता। यथा—"विस्मयोत्फुल्लतारा
[illegible] उद्भिन्नपुटाञ्चिता। समा विकसिता दृष्टिर्विस्मिता विस्मये स्मृता" अत्रेति प्रथमाक्षप्रमुखे
[illegible]र्वाचिनी यस्मात्तस्याः पक्ष्मलाक्ष्याः कटाक्षैः "अपाङ्गे तारविक्षेपः कटाक्ष इति कथ्यते" इति लक्षण-
[illegible]लक्षितदृष्टिविशेषैः मे मम हृदयं अशरणं तदधीनतया रक्षकविहीनं सत् अपहृतं बलादपहरीतं,
[illegible]तदा अपविद्धं निरस्तत्वेन मथितं तथा मथितत्वेन द्रवत्वात् पीतं, यथा पीतमुदकादिकं पान-
[illegible]कर्तुरभ्यन्तरं लीयते, तथा कटाक्षेषु मग्नमेव विलीनमित्यर्थः। अत उन्मूलितं पुनरुद्धाराशया
[illegible]त्यक्तमूलं कृतम्। सर्वथैव मन्मनस्तदधीनमित्यर्थः। ततश्चेत्यत्र तैश्चेति पाठे तु तैः
[illegible]पूर्वोक्तैरेव कटाक्षैः कटाक्षतापन्नैरित्यर्थः। आलोकितावस्थाकटाक्षावस्थयोर्भेदात् नायक-

---

[illegible]এবং আমার প্রত্যেক নেত্রসঞ্চালনে সেই অবলোকন লজ্জাবশতঃ কিঞ্চিৎ
সঙ্কুচিত হইতেছিল, নানাপ্রকারে আমি অনুরাগকষায়িত ও মুকুলিত সেই
অবলোকনের যোগ্য হইলাম।

(৮৫) তারপরে প্রশস্ত পক্ষযুক্তনেত্রা সেই মালতীর যেই কটাক্ষে তাহাগুলি

एवमहन्तु तस्याः सर्वाकारहृदयङ्गमायाः सम्भाव्यमानस्नेहरसैरभि-सन्धिना विधेयीकृतोऽपि पारिप्लवत्वमात्मनोऽपनिह्नोतुकामः, प्राक्-प्रस्तुतस्य बकुलदाम्नो यथा कथञ्चिदवशेषं ग्रथितवानेव, ततो मिलितवेत्रग्रहशस्त्रपाणिवर्षवरप्रायपुरुषपरिवारा, गजवधूमारूढा, नगर-गामिनं मार्गम् इन्दुवदना अलङ्कृतवती। (८६) तदा च—

व्यतिरेकार्थविवक्षितत्वात् पूर्वोक्तैतदाख्य न पौनरुक्त्यम्। एवं सत्यपि अपरिहार्यादिदमधिकमपि तत्प्रकारभिधानादवस्थ्यं रसान्तरपातित्वोक्तिरलङ्कारः। तल्लक्षणं मेदाय यथा दर्पणे— "निहतं स्थवतायस्मातिप्रधीकिर्गिगयणे"। "मैऽस्यमिद समर्थेऽवस्थसाविषयी। पौर्वा-पौर्यान्वयः आर्थक्वेदी सा मनवा मत" इति। मालिनीवृत्तम्।

८६। एवमहमित्यादि। सर्वाकारैः हृष्टिकाराहमत्यादिभिः हृदयङ्गमायाः मनोहरायाः, सम्भाव्यमानः पूर्वोक्तकटाक्षादिभिरनुमीयमानः, स्नेहरसो यस्य, तादृशेन अभिसन्धिना अभि-प्रायेण, विधेयीकृतः वशीकृतः, आत्मनः स्वस्य पारिप्लवत्वं चाञ्चल्यं च निह्नोतुं परतोऽपाकर्तुं कामो यस्य सः। तुम काममनसोरिति मलोपः। प्राक्प्रस्तुतस्य पूर्वारब्धस्य, बकुलपुष्प-दाम्नः केसरकुसुममालाया शेषं अवशिष्टं, कथञ्चित् तन्मनस्कतादविहितं च। वैवर्णलादि पार्थिव शैथा ताहमा, वर्षवराः षण्ढा मुखचारिणः क्लीबाः "विनीताः सर्वसत्त्वाः क्लीबार्थ स्वभावतः। जात्या न दोषिणश्चैव ते वै वर्षवरा मता॥" इति परिभाषाविषया इति यावत्। तत्प्रायाः तत्प्रधानाः, मिलिता, सम्प्राप्ता, पुरुषा परिवारा यस्याः सेति विग्रहः। अत गजवधूमारोहणादिना अन्तर्गतभावतो न मालत्या उत्तमकौलं पत्युर्वयालक्षया दूरदर्शिता सूचिता। तथापि मधुरस्वभावतिसाहसेतिसूचनाय अनेकापि क्रिया एव अन्यरतातिप्रसिद्धे-रित्यनुसन्धेयम्।

মদনভাবপ্রকাশক অন্তর্গত বিষয়ে উৎফুল্ল হইতে ছিল, অনঙ্গবলিত মুগ্ধ, স্নিগ্ধ, নিষ্পন্ন ও মন্দ লক্ষণাক্রান্ত সেই সকল কটাক্ষকর্তৃক ধন্যবিহীন আমার হৃদয় অপহৃত, মথিত, পীত ও উন্মূলিত হইল।

(৮৬) এবং আমি সর্বাকারে মনোহরা সেই মালতীর সম্ভাব্যমান স্নেহরসপ্রবণ অভিপ্রায়দ্বারা বশীভূত হইলেও নিজের ধৈর্য্যভ্রংশ অন্যের নিকট গোপন করিবার জন্য অতিকষ্টে পূর্ব্বারব্ধ সেই বকুলপুষ্পমালার শেষাংশ গাঁথিতে লাগিলাম। তৎপরে সেই চন্দ্রমুখী গজবধূ আরোহণ করিয়া নগরে যাওয়ার পথ অলঙ্কৃত করিল। তাহার পুরুষপরিবার শস্ত্র ও বেত্রপাণি ক্লীবপ্রধান ছিল।

यान्त्या मुहुर्वलितकन्धरमाननं तत्
आवृत्तवृन्तशतपत्रनिभं वहन्त्या ।
दिग्धोऽमृतेन च, विषेण च, पक्ष्मलाक्ष्या,
गाढं निखात इव मे हृदये कटाक्षः ॥ (८७)

ततः प्रभृति—

परिच्छेदातीतः सकलवचनानामविषयः,
पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान् ।
विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापञ्च कुरुते ॥ (८८)

८७। यात्रानिबन्धनं तस्या अनुरागचिह्नं दर्शयति—यान्त्येति। मुहुर्वारं वारं वलितकन्धरं यथास्यात्तथा मां द्रष्टुं ग्रीवोत्तानवीक्षं यथा स्यात्तथा यान्त्या गच्छन्त्या, अतएव वलितकन्धरमित्याननविशेषणं। आवृत्तवृन्तं आवर्त्तितवृन्तं कृतावृत्तमिति यावत्। यत् शतपत्रं पद्मं तन्निभं तत्सदृशं तत् आननं वहन्त्या तथा पक्ष्मलाक्ष्या अमृतेन विषेण च दिग्ध उपचितः सम्भवकाले आनन्दानन्दकत्वोत्पादकत्वादमृततुल्यः पश्चाद्दर्शनाभावविषयो दुःखदत्वाद्विषेण च बहुल इत्यर्थः। कटाक्षः दृष्टिविशेषः, मे मम हृदये गाढं दृढं यथा स्यात्तथा निखातः विदार्य्यान्तःप्रवेशित इव। गाढनिखननेन पुनरुद्धरणाशक्यत्वं सूचितम्। अत्र तीक्ष्णतया कटाक्षस्य नाराचवदन्तःप्रवेशसम्भावनोत्प्रेक्षा अलङ्कारः। "भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मने"ति तल्लक्षणम्। वसन्ततिलकं वृत्तम् ॥

८८। परिच्छेदेति। ततः प्रभृति कटाक्षवेधनारभ्य। परिच्छेदं इयत्तां अतीतः अतिक्रान्तः, अथवा इयानेतावानित्याकारकनिश्चयः परिच्छेदः तदतीतस्तदविषयः, तथा सकलवचनानां प्रकाशकशब्दविषयवचसां अविषयः अगोचरः, तथा यो विकारः अस्मिन् जन्मनि अनुभवपथं

---

(৮৭) তখন বৃন্তচ্যুত পদ্মতুল্যবদনা সেই পক্ষ্মলাক্ষী (তোমাকে দেখিবার তাড়ায়) বারবার স্কন্ধদেশ ফিরাইয়া যাইতে যাইতে অমৃত ও বিষ তুল্য কটাক্ষ যেন দৃঢ়ভাবে আমার হৃদয়ে সন্নিবেশিত করিল।

(৮৮) তদবধি জ্ঞানের অতীত, সকল বাক্যের অবিষয় এবং ইহ জন্মে

[illegible]

[illegible]
[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

कल। दिढ़ं क्खु एसो एक्कवि अवहरिदो, अवि णाम मालदी जेव्व सा भवे ? (ङ)

मक। [स्वगतम्]। अहो! अभिषङ्गः, तत्किं निषेधयामि सुहृदम्। (१००)

अथवा—मामूमुहत् खलु भवन्तमनन्यजन्मा,
मा ते मलीमसविकारघना मतिर्भूत्।
इत्यादि मद्विध निरर्थकमेव यस्मात्
कामश्च जृम्भितगुणो, नवयौवनञ्च ॥ (१)

(ङ) दृढं खल्वेष कयाऽप्यपहृतः, अपि नाम मालत्येव सा भवेत् ?।

(ङ) कलेति। दृढं अतिशयितं यथा स्यात्तथेति अपहरणक्रियाविशेषणम्। कयापि निरुपतितया अपहृतः वशीकृतः। अपि इत्यदि, नाम सम्भावनाया। इति यया अपहृतः सा किमालत्येवेत्यर्थः।

(१००) मकेति। अभिषङ्गः आकस्मिकपरिभवाभिभवविशेषः। 'अकस्मात्पराभिभवेऽभिषङ्ग-पदं विदु'रिति मालत, एवमभिषङ्गे आत्मिनदयापि सम्भवितव्यस्मानि तर्कयति—तत् किमिति। निषेधयामि एतदभिषङ्गाद्विमारयामि।

(१) तदेव निवारणासामर्थ्यमवधारयति—अथवेति। न अन्यस्मात् पित्रादितिरिक्तात् जन्म यस्य सः अनन्यजन्मा मनोजः काम इति यावत्। भवन्तं मामूमुहत् मोहं न प्रापयतु इत्यर्थः। (माङ्योगे आशिषि लुङ्) एवं ते तव मतिः मलीमसेन कालिमोज्ज्वलाधीनत्वाच्छिद्रितेन विकारेण कामाभिलाषेण घना निविडा मितान्तमलक्केति यावत्। माभूत् न भवतु, इत्यादि निषेधवाक्यं इह अस्मिन् माधवे निरर्थकं निष्फलमेव। अत्रावधारणार्थकयोर्न्वं यथयोः प्रयोगः

(ङ) কল। ইনি কাহারও কর্ত্তৃক দৃঢ়ভাবেই বশীভূত হইয়াছেন। সম্ভবতঃ সে মালতীই হইবে।

(১০০) মক। (স্বগত) অহো আসক্তি! তবে কি প্রিয় সুহৃৎকে নিষেধ করিব?

(১) অথবা "কামদেব যেন তোমাকে মোহিত করে না" "তোমার মতি

प्रथमोऽङ्कः

[प्रकाशम् ।] अपि वयस्येन विदितौ तदन्वयनामनी ? (२)

माध । सखे ! श्रूयताम्, अथ तस्याः करेणुकारोहणसमय एव सहसा सखीकदम्बकादन्यतमा वारयोषित् विलम्ब्य, बालबकुल-कुसुमावचयक्रमेण नेदीयसी भूत्वा, प्रणम्य, कुसुमापीडव्याजेन मामेवमुक्तवती, महाभाग ! यदिदमुपलब्धवता रत्नमीव एव वः कुसुमदाम

अवधारयसीतिहताशवनार्थः । अथवा ननु सखीवकार्यं अवलम्बितवान् पूर्वं योजनीयं । आलम्बने पीतुमुद्याच्छ्यति—अथादिति । वक्षिविति पाठे माधवी शब्दः । बाल: मदन मुषिता उपचिता गुणा: किञ्चिज्जगत्कारिणो व्यापारा यस्य तथाभूतः, यौवनं वाल्यस्य कुचितपुष्पं विवेकविनाशकत्वमिति विज्ञप्यर्थेनाशः । अथवा स्ववाचनवतीत्यर्थोऽयं नीच-ईशार्थं इति भावः । अतान्तिलक इष्टम् ।

(२) हवग्रामिति । "वग्नु मर्दजननाम प्रकाश मदिहोषव" इति वचन । निरुक्तिम् निपेधावचनं विरह तदाशुरूपं समिपादसिषु गच्छति—अपीति । तस्या अन्वयनामनी वंशनामधेये ।

(३) माधवैत्यादि । करेणुका हस्तिनी, सखीकदम्बकात् विच्छियेति शेषः । अन्यतमा एका वारयोषित् वेश्या । अत्र वारयोषिन्पदं तस्याः माधवं प्रति तत्कालोचितव्यवहारपरिज्ञानाय । बालबकुल-पर्यङ्कसौरभात् वकुल, विलम्ब्य विच्छिद्य बालबकुलकुसुमानां अवचयक्रमेण सखीजनपर्यायेण पुष्पचयनव्याजेनेत्यर्थः । नेदीयसी अतिशयेनान्तिकवर्तिनी "अन्तिकबाढयोर्नेदसाधौ" इति नेदा-देशः । समीपवर्तिनी, कुसुमापीडव्याजेन पुष्पमालाच्छलेन एवं वक्ष्यमाणरूपं उक्तवती । निरा-लम्बालापादन्यथाविरचनाशङ्कानिरासार्थमेव सा माम् उदितवतीत्यर्थः । महाभाग भावी भाग्य

যেন নিন্দিত কামবিকারাসক্ত না হয়" ইত্যাদি নিষেধবাক্য (এখন) ইহার পক্ষে নিরর্থক, যেহেতু কামব্যাপার-বিজৃম্ভিত ও বিবেক-বিনাশক নব যৌবন বর্ত্তমান।

(২) (প্রকাশে) বয়স্য! তাহার বংশ ও নাম জানিতে পারিয়াছ কি?

(৩) মাধ। সখে! শ্রবণ কর, তৎপরে তাহার হস্তিনী-আরোহণকালেই একজন বারযোষিৎ অসংখ্য সখীসমূহ হইতে বিচ্ছিন্ন হইয়া পুষ্পচয়নব্যাজে বিলম্ব করিতে লাগিল এবং পুষ্পচয়নব্যাজেই ক্রমে আমার নিকটবর্ত্তিনী হইয়া প্রণাম করতঃ পুষ্পমালা উপনয় করিয়া আমাকে বলিল,—মহাভাগ হস্তের

सन्निवेशः, कुतूहलिनो च नो भर्त्तृदारिका वर्त्तते, तस्यामभिनवो विचित्रः कुसुमेषुव्यापारस्तद्भवतु कृतार्थता वैदग्ध्यस्य, फलतु निर्माणरमणीयता, आसादयतु सरस एष भर्त्तृदारिकायां कण्ठा-वलम्बनमहार्घ्यतामिति। (३)

मकरन्दः। अहो। वैदग्ध्यम्। (४)

तस्य च महात्मनः "आत्मो माध्वार्द्धयोरयो"ति शिवः। सुश्लिष्टगुणतया सुसम्बद्धतया, सुमनसां पुष्पाणां सन्निवेशो रचनाप्रकारविशेषः, कुतूहलिनी पुष्पदामनि कौतुकवती, भर्त्तृदारिका प्रभुकन्या, कथाप्रसङ्गदारिकाप्यन्यशोभः अनूढायां मानुरागवर्द्धनाय, तस्यां मम भर्त्तृदारिकायां अभिनवो लोकोत्तरः, विचित्रचमत्कारकारी, कुसुमेषुव्यापारः माल्यरचनाप्रकारः अस्तीति शेषः। एतेन माल्यरचनातिनैपुण्यप्रकाशित्वा तवैव ते रचनामाधौर्य्यं परीक्षणीयमित्याशयः सूचितः। वैदग्ध्यस्य रचनापाटवस्य, कृतार्थता विदग्धजनप्रशंसया चरितार्थता, निर्माणरमणीयता रचना-मनोज्ञता फलतु अभिमतनार्थेन सफला भवतु। सरसः अम्लानः एष सन्निवेशः, कण्ठालम्बनेन कण्ठाभरणतया धारणेन महार्घ्यतां महामूल्यतां आसादयतु प्राप्नोतु। अन्य पक्षे "सुश्लिष्टगुण-तया सद्गुणसम्पर्केण सुमनसां शोभनमानसानां नः युवयोः, युवयोरित्यर्थे गौरवादबहुवचनम्॥ सन्निवेशः संयोगरमणीयः आनुकम्प्येऽत्यादरणीयः। कुतूहलिनी कातरहृत्, अभिनवः अनन्यसाधि-साधारणः विचित्रः चारुः कुसुमेषोः कामस्य व्यापारः प्रकारः, वैदग्ध्यस्य सकल-कलादिपरिशीलनस्य "लौकिके वैदिके चार्थे तथा शास्त्रविशेषेऽपि च। सम्यक् परिचयप्रौढिर्वैदग्ध्य-मिति गीयते॥" इति लक्षणलक्षितस्येति यावत्। चरितार्थता उभयोरपि तुल्यतया कृतार्थता, निर्माणस्य अभवत्सृष्टिनिपुणविधातृव्यापारस्य रमणीयता मनोज्ञता फलतु अनुरूपयोजनेन कृतार्थी भवतु। सरसः सानुरागः एष भवान् कण्ठालम्बनेन कण्ठालिङ्गनेन महार्घ्यतां प्राप्नोतु। इत्येवंविधार्थध्वनिना मालतीमाधवयोः समीचीनयोगत्वं सम्यक् सम्पादितमिति मन्तव्यम्।

(४) शिष्टपदर्थघटनेति शेषः।

সুসংলগ্নতানিবন্ধন আপনার কুসুম-সন্নিবেশ (মালাগাঁথা) (বড়ই) রমণীয়। আমার প্রভুকন্যা বিশেষ কুতূহলিনী আছেন। তাঁহাতেও লোকাতীত আশ্চর্য্যজনক মাল্যরচনাশক্তি আছে, সুতরাং (তদর্পণে) আপনার নৈপুণ্যচরিতার্থতা ও রচনা-মনোহারিত্ব সফল হউক, এবং এই মালা ভর্ত্তৃদারিকার কণ্ঠসম্বন্ধ হইয়া অমূল্যতা লাভ করুক।"

(৪) মক। অহো (বাক্যরচনার) কৌশল॥

माध। मया च भदन्तमुखात् अमात्यभूरिवसोः प्रसूतिर्मालती नाम, अस्याश्च प्रसादभूमिर्भर्तृदारिकायाः धात्रेयिका लवङ्गिका नामेति (५)

कल। [सहर्षम् ।] किं णाम मालदि त्ति? दिट्ठिआ विलम्बिदं क्खु भअवदा देव्वेण कुसुमाउहेण, ता जिदं अम्हेहिं। (८)

मक। अमात्यभूरिवसोरात्मजेत्यपर्याप्तिर्बहुमानस्य। (ड)

अपि च। मालती मालतीति मोदते भगवती कामन्दकी, तां च किल राजा नन्दनाय प्रार्थयते इति किंवदन्ती श्रूयते। (७)

---

(८) किं नाम मालतीति? दिष्ट्या विलम्बितं खलु भगवता दैवेन कुसुमायुधेन, तज्जितमस्माभिः।

---

(५) मयेत्यादि। भदन्तमुखात् मया श्रुतम्, इत्यन्वयः। प्रसूतिपदोपादानं [illegible] [illegible]। [illegible]। एतेन यदि मया न [illegible] सूचितम्। धात्रेयिकेत्युपादानम् [illegible]।

(८) दिष्ट्या भाग्येन, विलम्बितं विलम्बितो [illegible] भावः। जितमिति [illegible] [illegible] मवेदित्याशयः।

(ड) [illegible] [illegible], [illegible], [illegible] [illegible] [illegible]।

(७) [illegible]—अपि चेति। मालती मालतीति [illegible] [illegible], [illegible] [illegible]। [illegible] [illegible] भवति, [illegible] [illegible] [illegible] इति [illegible]। [illegible] नन्दननिर्बन्धेन राज्ञः प्रार्थनया [illegible] दुर्लभत्वम् प्रतिपादितम्।

---

(৫) মাধ। আমি জিজ্ঞাসা করিলে সে বলিল, তিনি অমাত্য ভূরিবসুর কন্যা,—নাম মালতী, আমি প্রভুকন্যার বিশ্বস্ত ধাত্রেয়ী, নাম লবঙ্গিকা।

(৮) কল। (হর্ষের সহিত) কি মালতী? ভাগ্যক্রমেই কামদেবকর্তৃক বিলম্বিত হইয়াছেন, তবে আমরাই জয়লাভ করিলাম।

(ড-৭) মক। অমাত্য ভূরিবসুর কন্যা,—ইহা তাহার গৌরবের সীমা নহে। আরও দেখ, মালতী মালতী উচ্চারণ করিয়াই ভগবতী কামন্দকী হর্ষলাভ

माध। तया चाहमभ्यर्थ्यमानस्तां बकुलमालामात्मन: कण्ठादवतार्य्य दत्तवान्, असौ पुनरभिनिविष्टया दृशा मालतीमुखावलोकनविह्वलतया विषमविरचितैकभागामपीव बहु मन्यमाना महानयं प्रसाद इति व्याहृत्य गृहीतवती, अनन्तरञ्च यात्राभङ्गप्रचलितस्य महत: पौरजनस्य सङ्क्षोभेन विघटितायां तस्यामागतोऽस्मि। (८)

मक। वयस्य! मालत्या अपि स्नेहदर्शनात् सुश्लिष्टमेतत्, योऽपि हि कपोलपाण्डुतादिचिह्नसूचित: प्राक् प्रवृत्तस्तस्या: कामाभिष्वङ्ग:,

---

(८) माधवेत्यादि। तया लवङ्गिकया अभ्यर्थ्यमान: प्रियवचनैर्याच्यमान:, "अनुबध्यमान:" इति क्वचित् पाठ:। सोऽप्य तदर्थक एव। आत्मन: कण्ठादवतार्य्यनेन प्रियोपभुक्तसुखतया मालाया मालत्या: समधिकादरसम्भावना सूचिता। असौ लवङ्गिका अभिनिविष्टया सादरमभिवेशितया दृशा मालतीमुखावलोकनविह्वलतया मालतीवदनदर्शनव्याकुलतया तद्ग्रथनाकाले चित्तचाञ्चल्येन विकलहस्ततया वा विषमं पूर्वभागविसदृशं यथा तथा, विरचित: ग्रथित एकभागो यस्यास्तां तथाभूतां तामिव मालां बहु मन्यमाना श्लाघमाना, महाप्रसादोऽयमिति व्याहृत्य। प्रसाद: अनुग्रह:। यात्राया उत्सवस्य भङ्गेन समाप्त्या प्रचलितस्य आवेगचलितया धावितस्य पौरजनस्य, पौरैर्गतजनस्येति पाठे "चातुर्वर्ण्यसमेतं सर्वजनावासरहीतं। बहुजनसंकुलयुक्तं यत्तन्निगम"मिति नगरजनस्येत्यर्थ:। सङ्क्षोभेन समावेशेन विघटितायां नैवपथमतिपातितायां तस्यां लवङ्गिकायाम्।

(९) माधवोक्तकथाविनोदनाय मकरन्दस्तस्मिन् मालत्या अनुरागं ज्ञातमपि पुनरिदं वदति—

করেন। নন্দনের জন্য (স্বয়ং) রাজা তাহাকে প্রার্থনা করিতেছেন এরূপ কিংবদন্তী শুনা যায়।

(৮) মাধ। তৎকর্তৃক প্রার্থিত হইয়া আমি নিজের কণ্ঠ হইতে বকুলমালা খুলিয়া দিলাম। মালতী মুখাবলোকনব্যাকুলতানিবন্ধন মালার শেষ ভাগ পূর্বভাগের ন্যায় সুন্দর না হইলেও তাহাকেই সে অতিনিবিষ্ট দৃষ্টিতে প্রশংসা করিতে করিতে "ইহা মহা-অনুগ্রহ" এইকথা বলিয়া গ্রহণ করিল। অনন্তর উৎসবসমাপ্তিনিবন্ধন (সবেগে) ধাবিত পৌরজনসন্নিবেশদ্বারা সে অদৃশ্য হইলে আমিও চলিয়া আসিলাম।

(৯) মক। বয়স্য! তোমাদের উভয়েরই পরস্পর স্নেহ দেখা যায়, বলিয়া

कोऽपि त्वद्विषयक हृदयाभिव्यक्तमेवैतत्. एतत्तु न ज्ञायते, क्व दृष्ट-पूर्वस्तयाऽयमिति; न खलु तादृश्यो महाभागधेयाः कुमार्यो-ऽन्यथाप्रसन्नमनसो भूत्वा यत्र तत्र पद्मरागिण्यो भवन्ति ।(९) यदपि च—

यन्मोऽन्यमभिमहर्या सखीनाम् तस्यास्त्वयि प्रागनुरागलिङ्गम् ।
तस्यापि कोऽपीति निवेदितञ्च धात्रेयिकायाश्चतुरं वचश्च ॥ १० ॥

कर्णोत्सादिना । आत्मनाऽवलोक्यविषयेऽपि न यदि आत्मना आत्मत्वाच तत उद्दर्शनादिभिः । एतत् परस्परानुरागभावदर्शनादिकं दृष्टिं मनुष्यिकं, ननु प्रत्यक्षदर्शनदैवादिव यस्याः कपोलपाण्डिमादिकामभावनोऽत्र तत्र सर्वथा जानामि यद्यपि प्रिय भावनामेवानुमानदृष्टमात् यत्र तत्र अनुरागी युक्त ज्ञायते—कोऽपीत्यादि । तत्त्वमन्वय इति तदेव निवेदन पूर्वदर्शनेति विवक्षः । यत्र तत्रैव तस्याः आत्मीया हेतुं दर्शयति—न खलु तादृश्यः । तादृश्यः प्रयत्नमतिप्रसूताः, महाभागधेयाः स्वकीयाभ्यन्तरमिव, पद्मरागिण्यः यत्रपीतिशालिन्यः न खलु भवन्ति । तादृक्कुलशीलसम्पत्त्यादिसम्पन्नानां यत्र तत्रानुरागोऽदृष्टविषयकत्वमियमादिति भावः ।

(१०) पाणिग्रहादिकालकारण तावदभिव्यक्तावै वैलक्षण्यमुपपादयति—यदपि च यन्मोऽन्यमित्यादि । सखिमहर्या परस्परालोकनतत्परयोर्या तस्याः सखीनां "तस्यापि कोऽपीति" निवेदितं यदेव तत्र सद्भावनिर्णयतीति तात्पर्यं पूर्वोक्तं तस्यापि कोऽपीत्यादि वचनमित्यर्थः । यदि प्रागनुरागस्य पूर्वानुरागस्य लिङ्गं ज्ञापकं यदि पूर्वानुरागभावे एवं विज्ञापकं सर्वमेवानुमानं ज्ञापितमिति भावः । धात्रेयिकाया धात्रिकायाः चतुरं कुशलवितीर्णमपि लिङ्गं वचश्च ज्ञापकं प्रागनुरागलिङ्गमित्यर्थः, कथमन्यथा कार्ये यं वचसा वाक्यः । इत्यन्वयापन् ।

এই অনুরাগ প্রদর্শনাদি জাতই হইয়াছে। তাহার দেই কামভাব অপোগণ্ডেদের পাণ্ডুবর্ণাদি চিহ্নদ্বারা পূর্ব্বোৎপন্ন বলিয়া সূচিত হইতেছে, সেই কামভাবেরও যে তুমিই নিমিত্ত ইহাই অভিব্যক্ত হইতেছে, তবে কোথায় যে সে পূর্ব্বে প্রিয় মহতকে দেখিল, তাহা জানি না। কখনও তাদৃশ সৌভাগ্যশালিনী কুমারীগণ একেতে অনুরক্তা হইয়া অন্যেতে চক্ষুঃপ্রীতিশালিনী হয় না।

(১০) আরও দেখ, অন্যোন্যাবলোকনতৎপর তাহার সখীদিগের "কদাপি কোঽপি" ইত্যাদি নিবেদন এবং ধাত্রিকার চাতুর্য্যপূর্ণ বাক্যও তোমাতেই পূর্ব্বানুরাগের বিজ্ঞাপক।

कल। [उपसृत्य ।] एदं चित्तफलअं । (ण)

(इति चित्रफलकं दर्शयति । उभौ पश्यतः ।)

मक। कलहंसक ! केनैतन्माधवस्य प्रतिबिम्बमभिलिखितम् ?(११)

कल। जेण जेव्व से हिअअं अवहरिदम् (त)।

मक। अपि मालत्या ? (१२)

कल। अध इं। (थ)

माध। वयस्य मकरन्द ! प्रमाणप्रायस्ते वितर्कः। (१३)

(ण) एतच्चित्रफलकम्।

(त) येनैवास्य हृदयमपहृतम्।

(थ) अथ किम्।

(ण) "त्वयि प्रागनुरागज्ञ"मिति मकरन्दोक्तसमर्थने लब्धावसरस्य कलहंसस्य तत्कार्ये चित्रदर्शनं सर्वथा समुचितम्।

(११) पूर्वापरपर्यालोचनेन मालत्यैव लिखितमित्यनुमितत्वेऽपि सर्वथा सन्देहनिराकरणाय सामान्यतः पृच्छति—केनेति।

(त) मकरन्दस्य हृद्गतं भावं ज्ञात्वा कथयति—येनेति। यन्निमित्तकोऽस्य कामविकार-संज्ञैव लिखितमित्यर्थः।

(१२) अपि प्रश्ने। मालत्येति लिखितमिति शेषः।

(थ) अथकिमित्यभ्युपगमे, बाढं मालत्यैव लिखितमित्यर्थः।

(१३) प्रमाणप्रायः संशयलक्षणमालिन्यरहितेन निश्चितः, तर्कः "त्वय्येव सा पूर्वमनुरक्ता"इति तवैव।

(ণ) কল। (উপস্থিত হইয়া) এই চিত্রফলক।

(চিত্রফলক দেখাইল ও উভয়ে অবলোকন করিতে লাগিল)

(১১) মক। কলহংসক ! মাধবের এই প্রতিবিম্ব কে অঙ্কিত করিয়াছে ?

(ত) কল। যৎকর্তৃক ইহার হৃদয় অপহৃত হইয়াছে।

(১২) মক। তবে কি মালতীকর্তৃক অঙ্কিত হইয়াছে ?

(থ) কল। তাহাই (মালতীই অঙ্কিত করিয়াছে)।

(১৩) মাধ। বয়স্য মকরন্দ ! তোমার তর্ক একপ্রকার সন্দেহ-রহিত।

मक। कलहंसक! कुतोऽस्याधिगमः? (१४)

कल। मए दाव मन्दारिआए हत्थादो, ताए वि लवङ्गि-आहत्थादो (ट)।

मक। अथ किमाह मन्दारिका माधवालेख्यप्रयोजनं मालत्याः? (१५)

कल। उक्कण्ठाविणोदोत्ति (घ)

मक। वयस्य माधव! सर्वथा समाश्वसिहि।

या कौमुदी नयनयोर्भवतः सुजन्मा,
तस्या भवानपि मनोरथलब्धबन्धुः।
तत्सङ्गमं प्रति सखे! न हि संशयोऽस्ति,
यस्मिन् विधिश्च मदनश्च कृताभियोगः॥ (१६)

(ट) मया तावत् मन्दारिकाया हस्तात् तयापि लवङ्गिकाहस्तात्।

(घ) उत्कण्ठाविनोद इति।

---

(१४) कुतः कस्मात्, अस्य चित्रफलकस्य, अधिगमः प्राप्तिः लब्धेति शेषः।

(ट) "अस्याधिगम" इति पूर्वेण सम्बन्धः।

(घ) उत्कण्ठाविनोद इति प्रयोजनमित्यनेन सम्बन्धः। माधवासक्ता मालती तद्दर्शना-[illegible] [illegible] इत्यभिप्रायः।

(१६) येति। हे सखे! या मालती भवतः नयनयोर्नेत्रयोः, कौमुदी ज्योत्स्ना अतिशयाह्लादकत्वादिति भावः। सुजन्मा शोभनजन्मा महाकुलप्रसूता, तस्याः मनोरथस्य अभिलाषस्य लब्धः प्राप्तः बन्धुः प्रियः, भवानपि तस्याः मनोरथबन्धुरित्यर्थः। तत् तस्मात् उभयोरप्यनुरागात् तत्सङ्गमं प्रति संशयः सन्देहः न हि नास्ति। ननु परस्परानुरागसत्त्वेऽपि दैवप्रतिकूल्यादनर्थ इत्याशङ्कायामाह—यस्मिन्निति। यस्मिन् सङ्गमे विधिः दैवं, मदनः कामश्च

---

(১৪) মক। কলহংসক! কাহার নিকট ইহা পাইলে?

(ট) কল। আমি মন্দারিকার হস্ত হইতে (পাইয়াছি) ও মন্দারিকা লবঙ্গিকার হস্ত হইতে (পাইয়াছে)।

(১৫) মক। মন্দারিকা মাধবালেখ্যে মালতীর কি প্রয়োজন বলিয়াছে?

(ঘ) কল। উৎকণ্ঠাবিনোদনই প্রয়োজন।

(১৬) মক। বয়স্য মাধব! সর্বথা আশ্বস্ত হও। হে সখে! যেই

दृष्टयथारूपा च भवतो विकारहेतुः तदत्रैव लिख्यतां मालती। (१७)

माध। यदभिरुचितं वयस्याय, तदुपनय चित्रफलकं चित्रवर्त्तिकाश्च (१८)। [मकरन्द उपनयति]।

माध। [लिखन्]। सखे मकरन्द!

वारंवारं तिरयति दृशोरुद्गमं वाष्पपूर-
स्तत्सङ्कल्पोपहितजडिमा स्तम्भमभ्येति गात्रम्।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः,
पाणिर्लेखाविधिषु नितरां वर्त्तते किं करोमि॥ (१९)

कलानियोग॰ कलायत्नः। एकस्य मदन उभयोरनुरूपनिर्म्माणैकदेशप्रापणादिभिः अपरस्य च भक्तिप्रमुखाराधनसम्पादनादिभिः सुयत्नः। वसन्तनिभर्वा इत्थम्।

(१७) भवतो विकारस्य कामभावस्य हेतुः उत्पादयित्री मालती दृष्टव्यं यथाप्रत्यक्षीकृतं स्वरूपं आकृतिर्यस्याः तथाभूता, ममापि मालतीप्रतिकृतिदर्शनौत्सुक्यं वर्त्तते इत्यर्थः। तत् तस्मात् अत्रैव चित्रफलके।

(१८) वयस्यायेति क्रियार्थधातुयोगे सम्प्रदाने चतुर्थी। तदभिधीयत इति शेषः। चित्रवर्त्तिकाः तुलिकादिचित्रोपकरणानि।

(१९) वारं वारमिति। वाष्पपूरः तदनुध्यानसमुत्पन्नाश्रुप्रवाहः वारं वारं पुनः पुनः

মালতী তোমার নয়নের (আহ্লাদজনিকা) কৌমুদীস্বরূপ, শোভনজন্মা তুমিও তাহার মনোরঞ্জনের জন্য প্রিয়, সুতরাং তোমাদের সম্মিলনে (কোনও) সন্দেহ নাই। যাহাতে বিধাতা এবং মদনও যত্নবান্ বলিয়া মনে হয়।

(১৭) আপনার বিকারহেতু মালতীর প্রতিকৃতি আমারও দ্রষ্টব্য, অতএব এই চিত্রফলকেই মালতীকে অঙ্কিত করুন।

(১৮) মাধ। বয়স্যের যেরূপ অভিরুচি, তবে চিত্রফলক ও তুলিকাদি চিত্রোপকরণ আনয়ন কর। (মকরন্দ আনয়ন করিল।)

(১৯) মাধ। [illegible]

तथापि व्यवसितोऽस्मि (२०)। [चित्रपटमभिलिख्य प्रदर्शयति]।

मक। [विलोक्य]। उपपन्नस्तावदत्र भवतोऽभिष्वङ्गः।
[सकौतुकम्]। कथमचिरेणैव निर्माय लिखितः श्लोकः (२१)।
[वाचयति]।

मत्प्रमाणोद्गतेत्यर्थः। दृशोः चक्षुषो, वाष्पः प्रचारं निरुणद्धि (निरुणद्धीत्यर्थे निरुध् + इन् + ति) आच्छादयति। "दृशावृद्गत" इति पाठे उद्गतो बाष्पपूरः दृशौ निरुणद्धीत्यर्थः। तथा, सहर्षेण निरन्तरानुचिन्तनेन उपचित, प्राप्तः आंडमा क्रियाव्यपाटवं येन तादृशं प्राप्तं स्वेदं कार्याज्ञताऽ प्रचुरयेति प्राप्नोति। यत मम पाणि, करः मया लतावेष्टान् वेपथुप्रयोजनावश एवेत्यर्थः, क्रियाम् स्वे दृश्यमानाऽर्हीभवन् लेखाविधिषु निष्पन्नक्रियासु नितरां कातिमत् यथा तथा अविरतोत्कम्पेन अविच्छिन्नवेपथुना लीलावलम्बना अङ्गुली यत्र तादृशी वर्तते, अङ्गुलीनामेव लेखनीसदा सम्बालनात् क्रियां नाहनीत्यर्थः। "सततं"मिति पाठे मम तादृशः पाणिः सततं नैव लेखाविधिषु वर्तते इत्यर्थः। अत किं करोमि? यथावर्थ तदालेखितुमशक्त सम्प्रति दृष्टेह-मित्याशयः। धनेनाश्रुसात्त्विकभावोदकम्पाः सात्त्विकभावा उक्ता। तेषां लक्षणानि यथा— "अश्रुनेत्रोद्भवं वारि दुःखक्रोधप्रहर्षजम्।" "क्रियास्वपाटवं जाड्यं चिन्तोत्कण्ठाभयादिभिः। स्वेदो जाताऽतिकायोष्णरागामयादिभिः॥" "वपुःकम्पोऽत्र वेपथुः रतिवर्षोत्कण्ठाभिः। रागरोग-भयादिभ्यः कम्पो गात्रस्य वेपथुः"॥ मन्दाक्रान्ता छन्दः।

(२०) व्यवसितः चालेख्यनिर्माणे उद्युक्तः।

(२१) तावत्या मेत्रपथमप्रयमिष्यतीत्याश्येनेति भाव।

अश्रुप্রবাহ (উদ্গত হইয়া) বার বার আমার নেত্রবৃত্তি আচ্ছাদিত করিতেছে। নিরন্তর মালতীর অপ্রতিহতবলে জড়তাপ্রাপ্ত করিয়া শরীর স্বেদে আক্রান্ত হইতেছে। ক্রিয়াপ্রারম্ভেই আমার হস্ত ঘর্মাক্ত ও অতিশয় অবিচ্ছিন্ন কম্পনবশতঃ চঞ্চলাঙ্গুলি হইতেছে, আমি কি করিব?

(২০) তথাপিও আমি আলেখ্যলেখনে উদ্যুক্ত আছি। (বস্ত্রখণ্ডে অঙ্কিত করিয়া দেখাইলেন।)

(২১) মক। (অবলোকন করিয়া) এই মালতীতে তোমার আসক্তি যুক্তই হইয়াছে। (কৌতুকের সহিত) আঃ! অচির কালমধ্যে একটি শ্লোকও নির্মাণ করিয়া লিখিয়াছ। (পড়িতে লাগিলেন)।

जगति जयिनस्ते ते भावा नवेन्दुकलादयः,
प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये।
मम तु यदियं याता लोके विलोचनचन्द्रिका,
नयनविषयं जन्मन्येकः स एव महोत्सवः॥ (२२)

---

(२१) जगतीति। जगति भुवने जयिनः पुष्पसायकसहायत्वसम्पादनेन विराजितमद-शीलाः प्रकृतिमधुराः स्वभावसुन्दराः अन्ये मालतीव्यतिरिक्ताः ये प्रसिद्धाः ते नवेन्दुकलादयः मान्यविकासहेतवः। नवपल्लवदलानि नवनवकुसुमस्तबकाधिकहर्षोत्पादकत्वप्रसिद्धेः नवेति। आदिना कुमुदकह्लारादिपरिग्रहः। भावाः पदार्थाः यद्वा भाव्यन्त इति भावाः सुन्दरतया भावनार्हाः. मन्येऽहं, ये मनः विवेकरहितत्वात् मालतीदर्शनलालसत्वाद्वा चित्तं मदयन्ति हर्षयन्ति। तु किन्तु लोके भुवने विलोचनचन्द्रिका सन्ततीवाह्लादकत्वेन नेत्रज्योत्स्ना इयं मालती मम नयनविषयं सादरमवलोकनात् नेत्रगोचरत्वं यदियं मम सद्यः दृष्टिपथं यातमित्यर्थः। स एव जन्मनि जन्मेति शेषः। एकः अद्वितीयः महोत्सवः आनन्दहेतुः। मालतीव्यतिरिक्ताः आह्लादकत्वेन प्रसिद्धा ये चन्द्रादयः सन्ति तेषु मालतीवदनावलोकनात् निर्विषयित्वात्(?) अन्येषामाह्लादकत्वमपि भवतु मम तु तद्दर्शनमिव मदनातुरस्यादिकं भवतु नामाभूत्। यावज्जीवं महान् उत्सव इत्याशयः। एतेन माधवस्य मालत्यामनुरागः प्रदर्शितः। अत्र प्रसंगस्य मालत्याः स्त्रीत्वात् "स" इति पुंस्त्वम्। अथ चन्द्रादौ स्त्रीत्वाह्लादजनकत्वं नास्तीति वचनानन्तरमाह्लादकत्वं लोकप्रसिद्धमिति मालत्या विलोचनचन्द्रिकेति चन्द्रिकात्वारोपेण माधवस्य नयनयोः आह्लादकत्वमिति चेत्तत्र यथा चन्द्रिकाऽऽह्लादकत्वं लोचनानन्ददायिनीति प्रसिद्धि, तथा मम मालत्येवेति इति विधाय केवलं लोकप्रसिद्धा चन्द्रिकात्वारोपेण आह्लादकत्वस्य परिहृतत्वात्। व्यतिरेकोऽयं च। यदुक्तं— "रसानुभवैरत्याद्यैः श्लोकैरेकोऽपि देशया। नानालङ्कारसंसृष्टैर्वाचिको रस उच्यते॥" अत्र प्रकृतिमधुरत्वसाम्येऽपि मालत्या एव हर्षजनकत्वेनाधिक्यातिरेकः, विलोचनचन्द्रिकेति रूपकं चिरात्सम्भवात् व्यतिरेकालङ्कारः। हरिणीवृत्तम्। तल्लक्षणं यथा—"नसमरसलागः षड्वेदैर्हयै-र्हरिणी मता।"

---

(২২) জগতে বিজয়ী নূতন চন্দ্রকলা প্রভৃতি স্বভাবসুন্দর অন্য যে পদার্থ ই প্রসিদ্ধ আছে, যাহারা (অন্তর) মনস্তুষ্টিবিধান করে। কিন্তু ভুবনে লোচন-চন্দ্রিকাস্বরূপ এই মালতী যে আমার নেত্রপথবর্তিনী হইয়াছে, তাহাই আমার ইহ জন্মে একমাত্র মহোৎসবস্বরূপ।

[प्रविश्य (२३) सत्वरं मन्दारिका]। कलहंसअ ! पदाणुसारेण उवलद्धोसि। [माधवमकरन्दौ दृष्ट्वा सलज्जम्]। कधं, तेवि महाणुभावा एत्थेव्व ? (न)। [उपसृत्य प्रणमति।]

उभौ। मन्दारिके ! इहास्यताम्। (२४)

मन्दा। [उपविश्य।] कलहंसअ ! उवणेहि मे चित्तफलअं। (प)

कल। [गृहीत्वा।] गेह्न एदम्। (फ)

मन्दा। [विलोक्य]। कलहंसअ ! केण उण, किंणिमित्तं वा, एत्थ मालदी आलिहिदा ?। (ब)

(न) कलहंसक ! पदानुसारेण उपलब्धोऽसि। कथं तेऽपि महानुभावा अत्रैव ?

(प) कलहंसक ! उपनय मे चित्रफलकम्।

(फ) गृहाणेदम्।

(ब) कलहंसक ! केन पुनः किं निमित्तं वा अत्र मालती आलिखिता ?

---

(२३) अत्र पटीक्षेपेण प्रवेशस्यैव प्रविश्येत्यत्र कथने।

(न) कचित् कलहंस इत्यनन्तरं "कलहंस ! चोर चोर" इत्यधिकः पाठः। तत्र चित्रफल-कस्य अनुपलम्भात्। चौर इति सम्बोधनस्य तथा चौरेण मदीयहृदयस्य चित्रफलकमालतीविषय-कानुरागस्य अपहृतत्वात् चौरेत्यनेन द्वयोरुक्तिः। उभयमिति सम्भावितमिति ध्वनि माधवमकरन्दावभिलक्ष्य उक्ता। तेऽपीति द्वौ चित्रफलके लिखिता इत्यर्थः। चौरस्येति तथा गृहस्थानम्। अथवा त्विति बहुवचन—द्वौ पूर्व्वदृष्टौ वा इत्यर्थः।

(२४) इहास्यतामित्यादरोक्तिर्मकरन्दस्य माधवस्य वा।

(ন) মন্দারিকা। (সত্বর প্রবিষ্ট হইয়া) কলহংসক ! তোমার পদচিহ্নানুসারে আসিয়া তোমাকে প্রাপ্ত হইলাম। (মাধব ও মকরন্দকে দেখিয়া সলজ্জ ভাবে) একি সেই মহাপুরুষগণও (দেখি) এখানেই ? (নিকটে আসিয়া প্রণাম)।

(২৪) উভয়ে। মন্দারিকে ! এখানে উপবেশন কর।

(প) মন্দা। (উপবেশন করিয়া) কলহংসক ! আমার চিত্রফলক আনয়ন কর।

(ফ) কল। (গ্রহণ করিয়া) এই গ্রহণ কর।

(ব) মন্দা। (বিলোকন করিয়া) কলহংসক ! কে আবার কি নিমিত্ত ইহাতে মালতীর প্রতিকৃতি লিখিল ?

कल। जो जेण णिमित्तेण मालदीए (भ)।

मन्दा। [सहर्षं]। दिट्ठिआ दंसिदफलं दाणिं विण्णाणं पआवदिणो (म)।

मक। मन्दारिके! यदेव वस्तुनि एष ते वल्लभः कथयति, अपि तथा तत्? (२५)

मन्दा। महाभाअ! अध इम्। (य)

मक। क्व पुनर्मालती माधवं प्राग् दृष्टवती? (२६)

(भ) यः येन निमित्तेन मालत्या।

(म) दिष्ट्या दर्शितफलमिदानीं विज्ञानं प्रजापतेः।

(य) महाभाग! अथ किम्?

(भ) अभिलिखितः इति शेषः। यथाच मालत्या विनोदनिमित्तं माधवो लिखितः, माधवेनापि विनोदनिमित्तं मालती लिखितेत्यर्थः।

(म) सहर्षमित्यादि, दृष्ट्याधारस्य फलोत्पत्त्यर्थं हर्षहेतुः। प्रजापतेः स्रष्टुः विज्ञानं शिल्पकौशलं इदानीं उपदर्शितफलं सञ्जातमिति शेषः। ईदृशयुवकयुवत्योरनयोरादिसन्दर्शन-विभ्रमोऽयं परस्परानुराग एव फलमिति तद्विषयक्या सफलं विधातुः शिल्पकौशलमिति भावः।

(२५) अथ इतिहासविषये वस्तुनि एष ते वल्लभः स्वामी कलहंसः यत् कथयति, उत्कण्ठा-विनोदनाय मालत्या लिखितमिति यद् ब्रवीति, अपि तत्, तथा? तत् किं सत्यम्?

(य) अथ किमित्यनुमतौ तदवितथमेवेत्यर्थः।

(२६) पूर्वमनवलोकने मालत्या उत्कण्ठाविनोदनाय माधवालेख्यलेखनासम्भवादवलोकनस्य आवश्यकत्वात् पृच्छति—क्वेति।

(ভ) কল। মালতী যে নিমিত্ত যাহাকে লিখিয়াছিল।

(ম) মন্দা। (হর্ষের সহিত) ভাগ্যক্রমে ইদানীং প্রজাপতির শিল্পকৌশল সফল হইল।

(২৫) মক। মন্দারিকে? এ বিষয়ে তোমার ভর্তা কলহংস যাহা বলিতেছে, তাহা কি ঠিক?

(য) মন্দা। মহাভাগ! অবশ্যই ঠিক।

(২৬) মক। (তবে) মালতী পূর্ব্বে কোথায় মাধবকে দেখিয়াছিল?

मन्दा। लवङ्गिआ भणादि, वादाअणगदेत्ति। (र)

मक। वयस्य! ननु अमात्यभवनाभ्यर्णरथ्ययैव बहुशः सञ्चरावहे, तदुपपन्नमेतत्। (२७)

मन्दा। अणुमण्णन्तु मं महाणुभावा, जाव एदं भअवदो देवस्स मअणस्स सुघडिदं पिअसहीए लवङ्गिआए णिवेदेमि (ल)

मक। प्राप्तावसरमेतद्भवत्याः। (२८)

[मन्दारिका चित्रफलकं गृहीत्वा निष्क्रान्ता]।

(र) लवङ्गिका भणति वातायनगतेति।

(ल) अनुमन्येतां मां महानुभावौ, यावदिदं भगवतो देवस्य मदनस्य सुघटितं प्रियसख्यै लवङ्गिकायै निवेदयामि।

---

(२) वातायनगता गवाक्षवर्त्तिनी (सती) इत्यवलोक्येति सम्बन्धः।

(२७) तत् तस्मात् अमात्यभवनसन्निहितवर्त्मनि बहुशो भ्रमणात्, एतत् वातायनवर्त्तिन्या मालत्या माधवस्य सन्दर्शनं उपपन्नं युक्तिसिद्धं विश्वसनीयमित्यर्थः।

(ल) महान् अनुभावः प्रभावो ययोस्तथाभूतौ भवन्ताविति यावत्। देवस्य भगवतोऽस्यानुरागसम्बन्धिनः कीडाप्रियस्य मदनस्य कामस्य सुघटितं एतदनुरागवर्द्धनरूपं सुसमाचारम्। लवङ्गिकायाः इति सम्बन्धे षष्ठी। "लवङ्गिकायै" इति उचित पाठः। लवङ्गिकयैवाहमत्र नियुक्तेति तस्यै आदौ निवेदयामि पश्चात् सा यथोचितकार्य्यं विधास्यतीति भावः।

(२८) एतत् माधवानुरागनिवेदनादिकं प्राप्तावसरं प्राप्तावकाशम्।

(র) মন্দা। লবঙ্গিকা বলেন, জানালায় থাকিয়া দেখিয়াছিল।

(২৭) অমাত্যভবনের সন্নিহিত পথ দিয়া আমরা বহু বার যাতায়াত করিয়াছি, সুতরাং ইহা (গবাক্ষ হইতে দর্শন) হইতে পারে।

(ল) মন্দা। তবে আপনারা অনুমতি করুণ যে, ভগবান্ কামদেবের (অন্যোন্যের অনুরাগবর্দ্ধনরূপ) এই সুসমাচার যাইয়া প্রিয়সখী লবঙ্গিকার নিকট নিবেদন করি।

(২৮) মক। মাধবের অনুরাগাদি নিবেদন করিবার তোমার এই অবকাশ বটে।

(মন্দারিকা চিত্রফলক গ্রহণ করিয়া নিষ্ক্রান্ত হইল)।

मक। वयस्य! खरतरकिरणोऽयं भगवान् सहस्रदीधितिः अलङ्करोति मध्यमङ्गः, तदेहि संस्त्यायमेव गच्छावः। (२९)[इत्युत्थाय परिक्रामतः]।

माध। एवं हि मन्ये।
घर्माम्भोविसरविसर्पणैरिदानीम् मुग्धाक्ष्याः परिजनवारसुन्दरीणाम्।
तत्प्रातर्विहितविचित्रपत्रलेखावैदग्ध्यं जहति कपोलकुङ्कुमानि ॥ ३०

---

(२९) सहस्रदीधितिः सूर्य्यः। संस्त्यायं सदनं "संस्त्यायः सन्निवेशे च सङ्घातेऽपि च दृश्यते" इति मेदिनी।

(३०) घर्म्मेति। इदानीं मध्याह्ने मुग्धे अक्षिणी यस्या तस्या मालत्याः परिजनवारसुन्दरीणां परिचारिकाणां वारविलासिनीनां कपोलगोलकस्थलवर्त्तीनि कुङ्कुमानि (कर्त्तृणि), पत्रैः कुङ्कुमविशेषः कथितः। यथोक्तं—"वैदग्ध्ये रागोपचारितं [illegible] कपोलयोः। [illegible] मदनयोर्मनः [illegible]॥" घर्म्माम्भसां स्वेदजलानां विसरस्य समूहस्य "समूहे निवह-व्यूहसन्दोहविसरव्रजाः" इत्यमरः। विसर्पणैः प्रसरणैः करणैः तत् पूर्व्वं प्रातः प्रभाते विहितानां माङ्गलिकतया प्रभातसमये विरचितानां विचित्राणां चमत्कारकारिणीनां पत्रलेखानां पत्रावलीनां वैदग्ध्यं सौन्दर्य्यं (कर्म्म) जहति त्यजन्ति। पत्राकारविरचितविचित्रविभूषणानि स्वेदवशात् विनष्टसौन्दर्य्याणीदानीं जातानीति भावः। मालत्याः कन्यात्वेन पत्रावल्यभावात् परिजनेष्वुक्तं। कन्यादावस्थतया कदाचिदपत्रलेखयाश्च एव स्वभावसिद्धत्वं न तत्परिजनवर्णनमपि न विरुद्धं। यथोक्तं—"ललनाम्बरकथा युक्ता सर्व्वावस्थागतामिव" इति। प्रहर्षिणीवृत्तम्। "म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" इति तल्लक्षणम्।

---

(২৯) মক। হে বয়স্য! প্রখরকিরণ ভগবান্ সূর্য্যদেব মধ্যাহ্নকাল অলঙ্কৃত করিতেছেন; সুতরাং এস, আমরা গৃহেই গমন করি। (উঠিয়া পরিক্রমণ)।

(৩০) মাধ। আমারও এইরূপ মনে হয় যে, এই মধ্যাহ্ন কালে সুনয়নী মালতীর পরিচারিকা বারবিলাসিনীদিগের কপোলস্থিত কুঙ্কুমসকল স্বেদজলসমূহের সঞ্চারবশতঃ সেই প্রাতঃকালবিহিত বিচিত্র পত্রাবলীর সৌন্দর্য্য পরিত্যাগ করিয়াছে।

अपि च—उन्मीलन्मुकुलकरालकुन्दकोश-
प्रश्च्योतद्घनमकरन्दगन्धबन्धो!
तामीषत्प्रचलविलोचनां नताङ्गी-
मालिङ्ग्य पवन! मम स्पृशाङ्गमङ्गम्॥ ३१

मक। (स्वगतम्) अभिभवति, हन्त कायमेव माधवम्
सुकुमारकायमनवद्यः स्मरः।
अचिरेण वैकृतविवर्तदारुणः
कलभं कठोर इव कूटपाककः॥ ३२

---

(३१) उन्मीलन्त्यः [illegible] मुकुलानि [illegible] तं प्रार्थयते—उन्मीलदिति। उन्मीलितानि ईषद्विकसितानि यानि मुकुलानि कुड्मलानि तैः करालस्य दन्तुरस्य "करालो दन्तुरे तुङ्गे" इत्यमरः। कुन्दस्य कोशात् कुड्मलात् "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः। प्रश्च्योतन् क्षरन् घनः निविडो यो मकरन्दः पुष्परसः तद्गन्धस्य बन्धुः सहचरः, हे तादृश पवन! तां ईषत्प्रचले किञ्चिच्चञ्चले लोचने यस्याः ताम् [illegible] नताङ्गीं [illegible] [illegible] आलिङ्ग्य [illegible] मम अङ्गं अङ्गं प्रत्यङ्गं स्पृश। अत्र कुन्दकोशप्रश्च्योतन मकरन्दगन्धबन्धुत्वात् शीतत्वं, मन्दत्वं, सौगन्ध्यं प्रतिपादितम्, [illegible] [illegible] [illegible] मुहुः [illegible] [illegible]। अत्रापि प्रहर्षिणीवृत्तम्। [illegible] श्लोकः— [illegible] [illegible] [illegible] स्पृश मामपि स्पृश। त्वयि मे गात्रसमागमे [illegible]॥

३२। अभिभवतीति। अनवद्यः प्रतिबन्धरहितं [illegible] इति यावत्। एष स्मरः [illegible] सुकुमारकायं कोमलशरीरं माधवं [illegible] [illegible] (बालपित्तकफात्मकः) [illegible] वैकृत, स [illegible] विवर्तं परिणामम् इति वैकृतविवर्तं तेन दारुणो भयङ्करः

---

(৩১) সেই কুন্দলতা ঈষদ্বিকসিত মুকুলদ্বারা দন্তুর হইয়া প্রতীয়মান [illegible], তাহার কুট্মলক্ষরিত নিবিড় পুষ্পরসের গন্ধসহচর হে পবন! তুমি কিঞ্চিৎ চঞ্চলনেত্রা অবনতাঙ্গী সেই মালতীকে আলিঙ্গন করিয়া আমার প্রতি অঙ্গে অঙ্গে স্পর্শ কর।

(৩২) মক। (স্বগত) হায়! বায়ুপিত্তকফ-সন্নিপাত-নিবন্ধন ভীষণ জ্বর

तदत्र भगवती कामन्दकी नः शरणम् (३३)

माध। [स्वगतम्] आश्चर्य्यम् !

पश्यामि तामित इतः पुरतश्च पश्चा-
दन्तर्बहिः परित एव विवर्त्तमानाम् ।
उद्‌बुद्धमुग्धकनकाब्जनिभं वहन्ती-
मासक्तितिर्य्यगपवर्त्तितदृष्टि वक्त्रम् ॥ (३४)

वातपित्तकफसन्निपातभीषण्य स्यर्थं, अत एव कठोरः अतितीव्रः दुश्चिकित्स इति यावत् । कूटेन कपटेनाकस्मादागत्य पातयतीति कूटपाकलः, पृषोदरादित्वात् साधुः, सन्निपातज्वरविशेषः । यथोक्तं वैद्यके—"यथाभिहन्यात् कूटेन मृगयुश्च वनेचरः । तथा पातात्मको नाम हन्ति वै कूटपाकलः ॥" अन्यच्च—"सन्निपातज्वरो हन्ति तथा वै कूटपाकलः" इति । कलभं करियावकमिव अचिरेण अल्पेनैव समयेनैव एवेत्यर्थः । कथं अभिहन्ति अतीव प्रहरति पीडयतीति यावत् । अत्र कठोरेऽपि वेकृतविवर्त्तदारुणः अविकारपरिणामभीषणः, कठोरत्वोक्त्यर्थः । हन्तेति विषादे—"हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयो"रिति कोषः । अत्र हन्ति हन्तेति छेकानुप्रासः । कूटपाकलः कलभमिव स्मरः माधवं हन्तीति पूर्णोपमा अनयोश्च द्वयोः संसृष्टिः । मञ्जुभाषिणीवृत्तम् तल्लक्षणं यथा—"सजसा जगौ च यदि मञ्जुभाषिणी"ति ॥

३२ । तदत्रेति । अत्र अस्यां माधवस्यावस्थायां, भगवती ज्ञानसम्पन्ना, शरणं रक्षिका, नान्यो भाग्यावतिरस्तीत्यर्थः । द्वितीयाङ्कवर्णनीयस्य मकरन्देन कामन्दकी मदनोद्यान-वृत्तान्ताभिवेदनस्य सूचनादङ्कावतारोऽयम् । तदुक्तं—"अङ्कावसाने यत्रैव भाविनोऽङ्कस्य सूचने । वस्तुनो मुखपोद्‌घाते सोऽङ्कावतार उच्यते ॥" दर्पणोक्तलक्षणं यथा—"अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः । यत्राङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥"

३३ । उन्मादावस्थानुरूपं तत्स्वरूपमाह—पश्यामीति । उद्‌बुद्धं विकसितं मुग्धं मनोज्ञं यत् कनकाब्जं सुवर्णपद्मं तन्निभं तत्सदृशं तथा आसक्त्या मध्यनुरागेण तिर्य्यगपवर्त्तिता

ক্ষয়জ্বর যেমন অচিরেই করিশাবককে পীড়া দেয়, সেইরূপ এই অনিবার্য্য কামদেব মুকোমলদেহের মাধবকে অচিরকালমধ্যেই পীড়া দিতেছে কেন ?

(৩৩) অতএব মাধবের এই অবস্থাতে ভগবতী কামন্দকীই আমাদের রক্ষয়িত্রী ।

(৩৪) মাধ। (স্বগতঃ) কি আশ্চর্য্য ! ! অনুরাগবশতঃ (আমাকে দেখিবার

[प्रकाशं] वयस्य ! मम हि सम्प्रति,—

प्रसरति परिणामी कोऽप्ययं देहदाहः
स्थगयति करणानां पाटवं प्रमोहः ।
रणरणकविवृद्धिं बिभ्रदावर्त्तमानम्,
ज्वलति हृदयमन्तस्तन्मयत्वञ्च धत्ते ॥ (३५)

पश्चात् स्थितस्य मम दर्शनाय ईषद्वक्रीकृता दृष्टिर्यत्र तादृशं वक्रं वदनं वहन्तीं धारयन्तीं ता मदनोद्यानप्रस्थानोद्यता मालतीं इत, वामपार्श्वे, पुरतः सम्मुखप्रदेशे, पश्चात् पृष्ठदेशे, अभ्यन्तरे, बहिः, बहिर्देशेषु च किं वा विशेषनिर्देशेन परितः सर्वत एव विवर्त्तमाना स्फुरन्ती विद्यमाना अथवा विवर्त्तमाना एकामपि बहुधा प्रतिभासमाना पश्यामि अवलोकयामि ।
यत्रैव नेत्रे नयामि, तत्रैव तामवलोकयामीति तस्याः सर्वत्रैव स्फुरणं जातमित्याशयमित्यर्थः ।
"यो येन भावेनाविष्टः कुर्वत्संसर्गं वा । स तदाहितसंस्कारः सर्वं पश्यति तन्मयं" मित्युक्तेन मालतीभावाविष्टचित्तस्य माधवस्य तदानीं तथाविधदर्शनं युक्तमेव । अत्रोत्प्रेक्षानुप्रासानां समाहारः । वसन्ततिलका वृत्तम् ।

३५ । आत्मनोऽनुभूतामवस्थां वयस्याय निवेदयति—प्रसरतीति । परिणामी परिणमनशीलः परिपीडनस्वभाव इति यावत् । कोऽपि अनिर्वचनीयः अविदितनिमित्त इत्यर्थः । अयं अनुभूयमानः देहदाहः शरीरतापः कामज्वर इति यावत्, प्रसरति सर्वतो व्याप्नोति । प्रमोहः, मालत्यनुरागभरात् ज्ञाननिवर्त्तकश्चित्तविकारः करणानां इन्द्रियाणां "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपी"त्यमरः । पाटवं स्वस्वविषयग्रहणशक्तिं स्थगयति—आच्छादयति । आवर्त्तमानं कामाग्निना क्वथ्यमानं "आवर्त्तनं क्वाथनं स्या"दिति हैमः । मम हृदयं रणरणकस्य उत्कण्ठायाः "रणरणक उत्कण्ठा" इति हैमः । तस्य विवृद्धिं उपचयं बिभ्रत् दधानं सत् अन्तर्मध्ये ज्वलति सन्तापमनुभवति । तन्मयत्वं विरहातिशयेन मालतीमयत्वञ्च धत्ते प्राप्नोति । मालतीमयत्वमित्यत्र नैयायिकमतानुसारं सुखदुःखाद्यनुभवस्य जीवन-

---

জন্য) পশ্চাদ্দিকে ঈষৎ বক্রীকৃতদৃষ্টি বিকাসিত মনোহর সুবর্ণসরোজবদনা সেই মালতীকে বামপার্শ্বে, দক্ষিণপার্শ্বে, সম্মুখে, পৃষ্ঠদেশে, অভ্যন্তরে ও বাহিরে (অথবা অধিক আর কি বলিব) সর্ব্বত্রই বিশেষরূপে বর্ত্তমান দেখিতেছি ।

(৩৫) (প্রকাশ্যে) বয়স্য ! সম্প্রতি পরিপীড়নস্বভাব অনির্ব্বচনীয় কামজ্বর আমার সর্ব্বত্র ব্যাপ্ত হইতেছে। মোহ ইন্দ্রিয়গণের স্ব স্ব বিষয়গ্রহণশক্তি

इति निष्क्रान्ताः सर्वे। (३६)

इति बकुलवीथो नाम प्रथमोऽङ्कः। (३७)

धारयमेवास्मत्प्रभृतिरित्यर्थः। अत्रैकस्य हृदयस्य ज्वलति अत्र इत्यनेकक्रियाकर्तृत्वाद्दीपका-लङ्कारः। तल्लक्षणं यथा दर्पणे—"अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते। अथ कारकमेकं स्याद्बह्वीषु क्रियासु चेत्॥" इति। प्रसरति तिरयति ज्वलतीति त्रीणि पदानि पदान्याभिधाय अत्र इत्यानन्दस्याभिधानात् अप्रकृततादोषो दोष इति सुधियामाग्रहः "ज्वलति हृदयमेवं तन्मयत्वं दधानो" इत्येव पाठो युक्तः। मालिनीवृत्तम्।

(क्वचित् पुस्तके "आवर्तमान"मित्यत्र "आवर्तिभाव"मिति पाठः, तयात्वे च इत्यस्य भावः ततः स्वार्थे कः, "भावो रत्यस्य. काम" इत्युत्पलिनी। तत्र विकृतिं औत्सुक्यं विभ्रत् आवर्ति भावकं भावं ज्वलतीत्यर्थः कार्यः) अत्रावर्तीत्यनेन व्याधिः, ज्वलतीत्यनेनोद्वेगः, तन्मयत्वमित्यनेनोन्मादः, दुःखदशात्रयमपि जीवनाशा च प्रदर्शिता।

३६। इति एवमभिधाय सर्वे रङ्गवर्तिनः पुरुषाः निष्क्रान्ताः निर्गताः रङ्गभूमेरिति शेषः। तथाच द्वयोरिदानीं निर्गमात् कथं बहुवचनमिति वाच्यं, पूर्वं निष्क्रान्तानामन्येषामपि सम्बन्धस्य विवक्षिततया बहुत्वस्याविरुद्धत्वात्। वस्तुतस्तु सर्वमेवाङ्कशेषे रङ्गभूमेरभि-नेतृशून्यत्वद्योतनाय "इति निष्क्रान्ताः सर्वे" इति लेखनस्य कविसमयसिद्धतया नास्ति तदेकत्वद्वित्वयोरनुसन्धानमपेक्षितम्।

३७। इति अङ्कपरिसमाप्तौ, बकुलवीथीनाम तदाख्यः प्रसिद्धः प्रथम आद्यः अङ्कः परिच्छेदः समाप्त इति शेषः। द्वितीयाद्यङ्केष्वप्येवं व्याख्येयम्। वीथी श्रेणी बकुलानां वीथी बकुलवीथिरित्यर्थः। अत्राङ्के बकुलमालाप्रसङ्गेनैव प्रधानं बकुलावलिप्रसङ्गादस्याङ्कस्य बकुल-वीथीति नाम परिकल्पितम्। क्वचित् पुस्तके "बकुलवीथीनामा"ऽयं पाठः। अङ्कलक्षणम्— "प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः" इत्यादि "अन्तनिष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्तितः" इत्यन्तं दर्पणषष्ठपरिच्छेदे द्रष्टव्यम्।

इति काव्यतर्कतीर्थोपनामक-श्रीकृष्णबिहारि तर्कसिद्धान्तभट्टाचार्यकृतायां तत्त्वार्थविनोदिन्याख्यायां मालतीमाधवव्याख्यायां प्रथमाङ्कविवृतिः समाप्ता।

আচ্ছাদিত করিতেছে। কামাগ্নিদ্বারা দীপ্যমান আমার হৃদয় অতিশয় উদ্বেগ ধারণ করিয়া সন্তাপ অনুভব করিতেছে ও তন্ময় হইতেছে।

(৩৬) (এইকথা বলিয়া সকলে নিষ্ক্রান্ত হইল)।

(৩৭) বকুলবীথীনামক প্রথম অঙ্ক সমাপ্ত।

द्वितीयोऽङ्कः । (१)

ततः प्रविशतश्चेट्यौ । (२)

एका । हला ! सङ्गीदसालापरिसरे अवलोइदादुदीआ तुमं* किं मन्तअन्ती आसि ? (क)

द्वितीया । सहि ! तेण किल माहवप्पिअवअस्सेण मअरन्देण सअलो ज्जेव मअणुज्जाणवुत्तन्तो भअवदोए णिवेदिदो (ख)

(क) हला । सङ्गीतशालापरिसरे अवलोकिताद्वितीया त्वं किं मन्त्रयन्ती आसीः ।

(ख) सखि ! तेन किल माधवप्रियवयस्येन मकरन्देन सकल एव मदनोद्यानवृत्तान्तो भगवत्यै निवेदितः ।

---

१ । नन्विदमुक्तं नायकप्रवेशाभावेन "प्रख्यातोदात्तचरित" इति दर्शनलक्षणस्य "नाटक-प्रकरणयोरङ्कः, कार्य्यः, प्रख्यातनायकः" इति भरतलक्षणस्य चाव्याप्त्या कथमङ्कत्वमिति चेन्न "गूढ, पुरोहितोऽमात्यो नायको नायिकापि च । सार्थवाह इति प्रोक्ताः सर्वे ते नायका बुधैः" इत्यनेन नायिकाया अपि प्रतिपादकनायकलक्षणेन मालतीप्रवेशसद्भावेनैकत्वलक्षणसङ्गतत्वात् ।

२ । इदानीमङ्गान्तरमारभमाणः कविरमात्यवृत्तविषयकाणाम् आदिवृत्तान्तान् सर्वेषेव सभ्यान् बोधयितुं प्रवेशकमारचयति—तत इत्यादिना । चेट्यौ दास्यौ ।

(क) एकेति, तयोरेका चेट्योरर्थः । हलेति सख्यासम्बोधनार्थमव्ययं । हले हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रतीति भारतीभाववरः । सङ्गीतशालायाः नाट्यशालाया प्राङ्गणस्य परिसरे पर्यन्तभूमौ अवलोकिताद्वितीया अवलोकितासहितेत्यर्थः । मन्त्रयन्ती भाषमाणा ।

ख । द्वितीयेति, चेट्यर्थः । मदनोद्यानवृत्तान्तः परस्परसन्दर्शनवकुलमालार्पणादिकः ।

দ্বিতীয় অঙ্ক ।

দাসীদ্বয়ের প্রবেশ ।

(ক) একা । হলা ! সঙ্গীতশালার প্রান্তভাগে কেবল অবলোকিতার সহিত কি মন্ত্রণা করিতেছিলে ?

(খ) দ্বিতীয়া । সখী, মাধবের প্রিয় বয়স্য সেই মকরন্দ মদনোদ্যানবৃত্তান্ত

---

* "भअवदी कामन्दई" इति पाठभेदः, तथात्वे भगवती कामन्दकी किं मन्त्रयन्ती आसीदित्यनुवादः करणीयः ।

प्रथमा। तदो किं ? (ग)

द्विती। तदो भट्टिदारिअं दट्ठुकामाए भअवदीए एतण्णिमित्तं अवलोइदा अणुप्पेसिदा। मएवि ताए कधिदं, जधा लवङ्गिआदुदीआ विवित्ते भट्टिदारिआ वट्टदित्ति (घ)।

प्रथ। हला ! लवङ्गिआ क्खु केसरकुसुमाइं अवचिणोमित्ति, मअणुज्जाणादो जेव्व आगदा ता किं सम्पदं सम्पत्ता ? (ङ)

(ग) ततः किम् ?

(घ) ततो भर्तृदारिकां द्रष्टुकामया भगवत्या एतन्निमित्तं अवलोकिता अनुप्रेषिता, मयापि तस्यै कथितं, यथा लवङ्गिकाद्वितीया विविक्ते भर्तृदारिका वर्त्तते।

(ङ) हला ! लवङ्गिका खलु केसरकुसुमान्यवचिनोमीति, मदनोद्यानादेव नागता, तत् किं साम्प्रतं समागता ?

भगवत्यै कामन्दक्यै निवेदितः प्रतीहारायं कथितः। इत्यवलोकितामुखात् श्रुतमिति शेषः।

(ग) अनन्तरार्थं ततोऽव्ययस्य प्रयोगे द्वितीयापि प्रत्येतुं शक्येति एतेष्वव्ययेष्वीशं—प्रथमेति।

(घ) द्वितीयेति। भर्तृदारिका मालती। तन्निमित्तं तन्निमित्तं "मालती कुत्र तिष्ठति वर्त्तते" इत्येतद्परिज्ञानार्थमित्यर्थः। तस्यै अवलोकितायै। विविक्ते विजने "विविक्तौ पूतविजनौ" इत्यमरः।

(ङ) केसरकुसुमानि बकुलपुष्पाणि, अवचिनोमि त्रोटयामि, इति हेतौ, नागता आयाताभिः इति शेषः। सम्प्रति आगता।

মদনই ভগবতী কামন্দকীর নিকট নিবেদন করিয়াছে (তাহা অবলোকিতার মুখে শুনিতেছিলাম)।

(গ) প্রথমা তারপরে ? (ভগবতী কি করিয়াছেন ?)

(ঘ) দ্বিতী। পরে ভর্ত্তৃদারিকার দর্শনের নিমিত্ত সংবাদ জানিবার জন্য ভগবতী অবলোকিতাকে পাঠাইয়াছেন, আমিও তাহাকে বলিয়াছি "কেবল লবঙ্গিকাকে লইয়া ভর্ত্তৃদারিকা (মালতী) নির্জ্জন স্থানে আছেন।"

(ঙ) প্রথ। হলা ! লবঙ্গিকাত বকুলফুল চয়ন করিতে বলিয়া মদনোদ্যান হইতে আসিয়াছিল না, তবে কি সে সম্প্রতি আসিয়াছে ?

द्विती। अधइं, तं क्खु, पराबहन्ती जेव्व हत्थे गेह्निय, पडिसिद्धपरिअणा भट्टिदारिआ उअरिमलिन्दअं समारूढा। (च)

प्रथ। णूणं तस्स महाणुभावस्स सङ्घाए पत्ताइं विणोदेदि (छ)।

द्विती। [निश्वस्य] कुदो से आसासो! एदिणा अज्ज अहि-णवदंसणेण भट्टिभूमिं गदुं ताए अहिणिवेसो णमिस्सदि। [illegible] नन्दणाह्म कारणादो महाराओ भट्टिदारिअं पत्थयन्तो अमच्चेण विआसो (ज)।

(च) अथ किं, सा खलु पराचलन्तीमेव हस्ते गृहीत्वा, प्रतिषिद्धपरिजना, भर्तृदारिका उपर्यलिन्दं समारूढा।

(छ) नूनं तस्य महानुभावस्य सङ्कथया आत्मानं विनोदयति।

(ज) कुतस्तस्या आश्वासः। [illegible] अभिनवदर्शनेनातिभूमिं गतुं तस्या अभिनिवेशो नमिष्यति। [illegible], नन्दनस्य कारणात् महाराजो भर्तृदारिकां प्रार्थयमानोऽमात्येन विज्ञप्तः।

(च) [illegible] पराचलन्तीमेव [illegible] [illegible] निषिद्ध [illegible] परिजनाः [illegible] यया सा। उपर्यलिन्दं [illegible] "[illegible]" इत्यमरः।

(छ) [illegible] "नूनं [illegible]" इति [illegible] तस्य महानुभावस्य [illegible], सङ्कथया [illegible] आत्मानं [illegible]।

(ज) [illegible] [illegible] राजा [illegible] [illegible] [illegible] [illegible]।

(চ) দ্বিতী। আসিয়াছে বৈকি? আসিবামাত্রই তাহার হস্ত ধারণ করিয়া অন্ত পরিজনবর্গকে নিষেধ করতঃ ভর্তৃদারিকা উপরিস্থিত বহির্দ্বারপ্রকোষ্ঠে (বারেন্দায়) আরোহণ করিয়াছেন।

(ছ) প্রথমা। নিশ্চয় সেই মহাত্মার বার্তার কথোপকথনদ্বারাই আত্মবিনোদন করিতেছেন।

(জ) দ্বিতী। (নিশ্বাস ত্যাগ করিয়া) ভর্তৃদারিকার আর শান্তি কোথায়?

---

* "कर्णे गृह्य" न्यधिकः पाठः क्वचित् दृश्यते। [illegible] !

प्रथ। किंत्ति ? (झ)।

द्वितो। पहवदि णिअस्स कण्णआजणस्स महाराओत्ति। ता जाद आमरणं क्खु हिअअसल्लं मालदीए माहवाणुराओत्ति तक्केमि (ञ)

प्रथ। अवि णाम, भअवदी किंपि एत्थ भअवदीत्तणं दंसइस्सदि (ट)

(झ) किमिति ?

(ञ) "प्रभवति निजस्य कन्यकाजनस्य महाराज" इति। तस्मात् आमरणं खलु हृदयशल्यं मालत्या माधवानुराग इति तर्कयामि।

(ट) अपि नाम भगवती किमप्यत्र भगवतीत्वं दर्शयिष्यति।

सविशेषदर्शनेन मदनोद्याने विशेषतः परस्परसाक्षात्कारेण, अस्या अभिनिवेशः माधवे अनुराग अतिभूमिं आधिक्यं उपरूढमिति यावत्, लप्स्यति प्राप्स्यति।

झ। किमिति किमुक्तम् इति शेषः।

ञ। प्रभवतीत्यादि। महाराज इदमसमाप्तेन महाराजो विज्ञापित इत्यर्थः। तत्र तस्मात् नन्दनाय मालतीदानस्याङ्गीकृतत्वेन तदवस्थाभावात् मालत्या माधवानुरागः आमरणं मरण-पर्यन्तं हृदयशल्यं हृदयविदारकशरायमाणं जातमित्यर्थः। (विधेयप्राधान्यविवक्षया शल्यविशेषणत्वेन जातमिति क्लीवनिर्देशः।

ट। अपिनामेति सम्भावनायाम्। भगवती कामन्दकी, अत्र मालतीमाधवमिलनकार्य-विषये, किमपि अनिर्वचनीयं भगवतीत्वं माहात्म्यं (भगवतीत्यस्य संज्ञात्वविवक्षया "भव-तीशं बहुलम्" इति न पुंवद्भावः)। मालत्याः मालतीविरहकातरायाः कामन्दक्या माहात्म्ये नैराश्यदशा रामनन्दनयोश्च मतिः परिवर्त्तत कल्याणम्।

(এদিকে) অতএব এই মদনোদ্যানের বিশেষ সাক্ষাৎকারে (ভর্তৃদারিকার) মাধবানুরাগ অতিশয় বৃদ্ধি পাইবে। অন্য দিকে মহারাজ নন্দনের জন্য ভর্তৃদারিকাকে প্রার্থনা করিবেন, অমাত্য মহারাজকে জানাইয়াছেন ?

(ঝ) প্রথ। কি জানাইয়াছেন ?

(ঞ) দ্বিতী। "মহারাজই নিজ-কন্যাজনের প্রভু" ইহা (জানাইয়াছেন) সুতরাং মালতীর এই মাধবানুরাগ মরণকালপর্য্যন্ত হৃদয়শেলস্বরূপ হইল বলিয়া মনে হয়।

(ট) প্রথ। সম্ভব কি, মালতীর এই অশান্তি-নিবারণ বিষয়ে ভগবতী কামন্দকী কোন অনির্বচনীয় মাহাত্ম্য দেখাইবেন।

द्वितीयोऽङ्कः।

द्विती। अइ अणण्णसरिसमणोरहे! एहि, गच्छम्ह। (१)

(इति परिक्रम्य निष्क्रान्ते) (२)

प्रवेशकः। (४)

[ततः प्रविशत्युपविष्टा सोत्कण्ठा मालती लवङ्गिका च] (५)

---

(१) अयि अनन्यसदृशमनोरथे। एहि गच्छाव।

१। अनन्यसदृशमनोरथे। अपूर्वाभिलाषे। [illegible] कामन्दक्या मालतीमाधव-विवाहरूपविषये मनोऽभिनिवेशविशेषवत्यादिभ्यायत। एहि गच्छाव इति [illegible] शेष:।

२। निष्क्रान्ते इति स्पष्टमिति शेष:।

४। प्रवेशक इति प्रवेशक: तदाख्यार्थोपक्षेपकविशेष:। तल्लक्षणं यथा दर्पणे—

"प्रवेशकोऽनुदात्तोक्त्या नीचपात्रप्रयोजित:।
अङ्कद्वयान्तर्विज्ञेय: शेषं विष्कम्भके यथा॥"

"शेषं विष्कम्भके यथा" इत्यनेन [illegible] कामन्दक्या मालतीमाधवयोर्विवाहे [illegible] मालत्या [illegible] मालतीलवङ्गिकयो: प्रवेशस्य [illegible] कामन्दक्या [illegible] निदर्शनमित्युपलभ्यम्।

५। तत इति। तत्र सोत्कण्ठेति मालत्या एव विशेषणम्, [illegible]। उपविष्टेति च द्वयोरेव विशेषणम्। [illegible] दर्शनविरहकातरमानसं [illegible], तत्र प्रविशति [illegible] विपरीतमवलोक्यमिति, पटाक्षेपेणेति शेष:।

---

(१) দ্বিতী। সখি! তোমার এই অভিলাষ অপূর্ব্ব। এস আমরা প্রকোষ্ঠ হইতে বাহির হই।

(৩) (উভয়ে পরিক্রমণ করিয়া নিষ্ক্রান্ত হইল)।

(৫) (উপবিষ্টা ও উৎকণ্ঠিতা মালতী এবং লবঙ্গিকার প্রবেশ)

मालती। हुं सहि! तदो, तदो (ङ)

लवङ्गिका। तदो तेन महाणुभावेण उवणीदा मे इयं उलमाला (ढ)। [इति मालामर्पयति]।

माल। [सहर्षं, सकर्षं निर्वर्ण्य!] सहि! एक्क-पास-सम-पडिबद्धा कऌ इयं विरअणा (ण)

(ङ) हुं सखि! ततस्ततः।

(ढ) ततस्तेन महानुभावेनोपनीता मे इयं बकुलमाला।

(ण) सखि! एकपार्श्वविषमप्रतिबद्धा खल्वियं विरचना।

ङ। मालतीति। हुं प्रश्ने। लवङ्गिकया कथितं बकुलमालार्पणमात्रं वृत्तान्तमाकर्ण्य पश्चात्तनवृत्तान्तोत्कण्ठिता विलम्बमसहमाना पृच्छति—"ततस्तत इति"। वीप्सा चादरार्थे। यदुक्तं तस्य मरणं कथयेदर्थं। मोट्टायितभावोऽयं यदाह—"सुखा कथां प्रियजनस्य तत्सुखेऽपि कर्णोदयस्थितचमत्कृतमनोज्ञम्। मनसाऽनङ्गमिव जृम्भितमङ्गनानां मोट्टायितं कविभिः पुराणैः॥"

ढ। लवङ्गिकेति। तेन माधवेन, मे मम हस्ते इति शेषः। उपनीता दुष्प्रापकरेत्यर्थः।

ण। मालेति। (निर्वर्ण्य सादरं विलोक्य) एकपार्श्वे एकदिशि विषम विपरीतं यथा स्यात्तथा प्रतिबद्धा घटिता, विपरीतमुखैः कुसुमैरस्या एकांशो विरचित इत्यर्थः।

(ঙ) মালতী। সখি! তারপর তারপর?

(ঢ) লবঙ্গিকা। তৎপরে সেই মহানুভব আমার হস্তে এই বকুলমালা উপহার দিয়াছেন। (মালা অর্পণ)

(ণ) মাল। (প্রহর্ষানন্দ হর্ষের সহিত দেখিয়া) সখি! এই মালার বিরচনা একাংশে বিপরীত ভাবে সংঘটিত হইয়াছে।

लव। एत्थ दाव अरमणीअत्तणे तुमं ज्जेव अवरज्झसि (त)

माल। कधं विअ? (थ)

लव। जेण सो मुद्धो दुव्वा-सामलङ्गो तधा विहत्थीकिदो। (द)

माल। पिअसहि लवङ्गिए! सव्वधा आसासणसीलासि। (ध)

(त) अत्र तावदरमणीयत्वे त्वमेवापराध्यसि।

(थ) कथमिव?

(द) येन स मुग्धदूर्वाश्यामलाङ्गस्तथा विहस्तीकृतः।

(ध) प्रियसखि लवङ्गिके, सर्वथा आश्वासनशीलासि।

त। अत्रेति। त्वमित्यत्रैव विवक्षणमेतत्।

थ। अभिप्रायपरिज्ञानोत्कण्ठिता पृच्छति—कथमिवेति। केन प्रकारेणास्मदीयमाधवमा-वैरस्ये समापराधः सम्भवतीति प्रश्नार्थः।

द। येनेति। येन हेतुना मुग्धः सुन्दरोऽभिरामो वा, दूर्वाश्यामलाङ्गः दूर्वादलवत् श्यामल-कलेवरः, ततः पदद्वयस्य विशेषणविशेष्यतया कर्मधारयसमासः। स माधवः तथा तादृक् विहस्तीकृतः कटाक्षनिक्षेपादिना व्याकुलीकृतः, अथवा विहस्तीकृतः गमनक्रियायां निष्कम्पमङ्गं कृत इत्यर्थः। त्वदीयाकारान्वयलावण्यसन्दर्शनेन विकलीकृतस्तेन तस्य माधवस्य तवाधीनैव दैन्यं जानामीति त्वमेव तत्र निमित्तमिति भावः।

ध। आश्वासेति। आश्वासनं शीलं स्वभावो यस्याः सा। मामाश्वासयितुमेव त्वमेवं कथयसि, न तु वस्तुतस्तु माधवो मय्यनुरक्त इत्याशयः।

(ত) লব। এই অরমণীয়তায় তুমিই অপরাধিনী।

(থ) মাল। কিরূপে?

(দ) লব। যেহেতু মুগ্ধ সেই দূর্বাশ্যামাঙ্গ কলেবরকে (অসামান্য স্বীয় রূপলাবণ্য দেখাইয়া) ব্যাকুলিত করিয়াছ।

(ধ) মাল। প্রিয়সখি লবঙ্গিকে! সর্বপ্রকারে আমাকে আশ্বাস দেওয়া তোমার স্বভাব।

लव। सहि! का एत्थ आसासणसीलदा? णं भणामि, सोवि पिअसहीए मन्द-मारुदउव्वेल्लन्तफुल्ल पुण्डरीअविब्भमेहिं पढमावद्ध--बउलावली--विरअणावदेस -संजमिद--वेलामोडि--विअ-ल्लेहिं लोअणेहिं, विजिम्भमाण-विब्भम-त्थिमिद-दीह-पेरन्त-परि-वत्तणा-विलास-तरङ्गिद-भू-लदा--विडम्बिदाणङ्ग-चारङ्ग--विब्भम-विअड्ढं अवलोअअन्तो पच्चक्खीकिदो ज्जेव (न)

(न) सखि! कात्र आश्वासनशीलता? ननु भणामि, सोऽपि प्रियसख्या मन्दमारुतो-द्वेल्लत्प्रफुल्लपुण्डरीकविभ्रमाभ्यां प्रथमाबद्धबकुलावलीविरचनापदेशसंयमितवेलामोटनविचलिताभ्यां लोचनाभ्यां विजृम्भमाणविभ्रमस्तिमितदीर्घपर्यन्तपरिवर्त्तनाविलासतरङ्गितभ्रूलताविडम्बितानङ्ग-शारङ्गविभ्रमविदग्धम् अवलोकयन् प्रत्यक्षीकृत एव।

न। सखीति। अथ तदनुरागविषये, का आश्वासनशीलता आश्वासनस्वभावः? ननु इति खेदः। मदुक्तं सर्वथा सत्यमेव, न केवलं आश्वासनपरमिति भावः। एतदेव समर्थयति— सोऽपीत्यादिना। सोऽपीत्यवधारणे। मन्दमारुतेन धीरसमीरपवनेन उद्वेल्लत् ईषत्कम्पमानं प्रफुल्लं विकसितं यत् पुण्डरीकं पद्मं तस्य विभ्रम, सोऽस्मिन्नस्तीति विभ्रमिणी ताभ्यां, अथवा तस्य विभ्रमः शोभा ययोस्ताभ्यां माधवस्य पुण्डरीकलोचनत्वादित्यर्थः। तथा प्रथमावद्धा प्रथमं विधातुमारब्धा या बकुलावली बकुलमाला तस्या विरचनापदेशेन पुनर्निर्माणव्याजेन संयमिताभ्यां संयमः अपाङ्गदर्शनं तं प्रापिताभ्यां तथापि बलात्कारेण तद्दर्शनव्यापारेण विचलिताभ्यां विक्षिप्ताभ्यां लोचनाभ्यां विजृम्भमाणेन वर्द्धमानेन विभ्रमेण तद्दर्शनजनितहर्षेण स्तिमितौ निश्चलौ दीर्घौ आयतौ यौ पर्यन्तौ अपाङ्गदेशौ तयोः परिवर्त्तनाद् भ्रमावलोकन-व्यापारेण पुनः स्वस्थानमा, सैव विलासः विभ्रमः तेन तरङ्गिताभ्यां वर्त्तिताभ्यां भ्रूलताभ्यां, विडम्बितस्य अनुकृतस्य अनङ्गशारङ्गस्य मारशरासनस्य "शारङ्गं धनुषि स्मृत"मिति शाश्वतः। विभ्रमस्य [illegible] विभ्रमो विलासस्तेन विदग्धं निपुणं यथा स्यात्तथा अवलोकयन् सोऽपि स माधवः

(ন) লব। তাহার অনুরাগবিষয়ে আমি যে কেবল আশ্বাস দিতেছি, ইহা কিরূপে স্থির করিলে? আমি নিশ্চয় বলিতেছি, প্রিয়সখীও [illegible] দেখিয়াছ যে, মন্দবায়ুসঞ্চালনচঞ্চল প্রফুল্ল পুণ্ডরীকসদৃশ প্রথমাবদ্ধ বকুলমালার পুনঃ নির্মাণ-

मालती। [लवङ्गिकां परिष्वज्य]। अम्मो पिअसहि! किं णं दाव महाणुभावस्स साहाविआ ज्जेव्व मुहुत्तसण्णिधाइणो [illegible] विप्पलम्भहेतुआ विआसा, आदु जहा पिअसही संभावेदि? (घ)

(घ) अहो प्रियसखि! किं नाम तस्य महानुभावस्य स्वाभाविका एव मुहूर्त्तसन्निधायिनो जगत्[illegible] विप्रलम्भहेतुका विलासाः, आहोस्वित् यथा प्रियसखी सम्भावयति?

[illegible] विलासाः स्वाभाविका [illegible] इति। [illegible] इत्यन्वयः [illegible] [illegible] [illegible] तथापि [illegible] [illegible] [illegible] [illegible] [illegible] भवभूतेः स्वाभाविकी [illegible]।

(घ) मालतीति। परिष्वज्य [illegible] अम्मो (अहो) इति [illegible] [illegible] वा, 'आमो'ति पाठे [illegible]। मुहूर्त्तसन्निधायिनः [illegible] सन्निहितस्य। विप्रलम्भहेतुका [illegible] विलासाः [illegible]। प्रियसखी लवङ्गिका [illegible]। यथा सम्भावयति [illegible] [illegible] तथा [illegible] इति सम्भावयति। [illegible] [illegible] [illegible] इति भावार्थः।

यदি [illegible] হইলেও তোমার [illegible] বিভুত [illegible] সে [illegible] [illegible] [illegible] [illegible] [illegible] পুনঃ [illegible] [illegible] [illegible] অনুকরণীয় [illegible] বিলাসের ন্যায় বিলাসদ্বারা নিপুণভাবে তোমাকেই দেখিতেছে।

(ঘ) মাল। (লবঙ্গিকাকে আলিঙ্গন করিয়া) অহো প্রিয়সখি! মুহূর্ত্তমাত্র সন্নিহিত [illegible] জনের [illegible] কারণীভূত অক্ষিপাতাদি বিলাস কি সেই মহা-পুরুষের স্বাভাবিক, অথবা প্রিয়সখী যেরূপ সম্ভাবনা করিতেছ? (অর্থাৎ আমার প্রতি অনুরাগ বশতঃই সে সেইরূপ কটাক্ষ-নিক্ষেপাদি করিয়াছে?)

लव। (विहस्य सासूयमिव)। तुमम्मि सहावेण ज्जेव्व तस्मिं अवसरे असङ्गोदग्रं णच्चिदासि (फ)

माल। [सलज्जं]। हुं, तदो, तदो (ब)

लव। तदो पडिणिअत्तमाण-जन्नाजण-सङ्कुलेन अन्तरिदे तस्मिं जणे, मन्दारिआए घरं उपगदह्मि, ताए क्खु चित्तफलअं पभादे पलोकिदं आसि (भ)

(फ) त्वमपि स्वभावेनैव तस्मिन्नवसरेऽसङ्गीतकं नर्त्तितासि।

(ब) हुं ततस्ततः।

(भ) ततः प्रतिनिवर्त्तमानयात्राजनसङ्कुलेन अन्तरिते तस्मिन् जने, मन्दारिकाया गृहमुपगतास्मि, तस्याः खलु चित्रफलकं प्रभाते प्रलोकितमासीत।

फ। विहस्य सासूयमिवेति।—अत्र निषिद्धापि मालत्याः सविलासतावेदनं इति हास्यहेतुः, ममापि सकाशे ? प्रकाशने प्रयास इति नीषहेतुस्त्वसूयमेव च। तीव्र प्रश्नोत्तर माधवस्यानु-रागं समर्थयति—त्वमपीति। तस्मिन्नवसरे मदनोद्याने माधवावलोकनसमये असङ्गीतकं सङ्गीतविहीनं यथा स्यात्तथा नर्त्तितासि नृत्यं कारितासि, नृत्यकाल 'इव चापल्ययुक्तासी'त्यर्थः। यथा तव चापल्यं न स्वाभाविकं तथा माधवस्यापि चापल्यं न स्वाभाविकं परस्परमन्योन्यानुराग-वशादेवान्योन्यचापल्यं जातमिति भावः। अत्र परिभावना नाम मुखसन्ध्यङ्गं "कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावने"ति दर्पणवचनात्।

ब। ततस्ततमिति आकाङ्क्षाति शेषः, अनुराग लवङ्गिका सर्व्वमेव वित्तमतमवगतेति विज्ञानं लज्जाहेतुः। हुमिति प्रश्ने। ततस्तत इति वक्तव्यशेषं कथयेति शेषः।

भ। तस्मिन्निति। अन्तरिते आच्छादिते, तस्मिन् माधवे। तस्या मन्दारिकायाः, प्रलोकितं अवलोकितं मयेति शेषः।

(फ) লব। (হাস্যপূর্ব্বক প্রণয়কুপিতার ন্যায়) তুমিও ত মাধবাবলোকন-সময়ে স্বভাবতঃই সঙ্গীতবিহীন নৃত্য করিয়াছিলে। (অর্থাৎ তুমিও যেমন স্বভাবতঃ চাঞ্চল্য প্রদর্শন কর নাই, সেও তেমন স্বভাবতঃ চাঞ্চল্য প্রদর্শন করে নাই, পরন্তু পরস্পর অনুরাগ বশতঃই উভয়ের চাঞ্চল্য জন্মিয়াছিল)।

(ব) মাল। (লজ্জিতভাবে) তারপর ? তারপর ?

(ভ) লব। তারপর মদনমহোৎসবস্থান হইতে নিবর্ত্তমান জনসমূহদ্বারা

माल। किं णिमित्तं? (क)

लव। तं क्खु माहवाणुचरो कलहंसओ णाम कामेदि, सा तस्स दंसइस्सदि त्ति तदो चित्तणिवेदिआ मे मन्दारिआ समप्पिदा(ख)

माल। [स्वगतम्]। णूणं तेणावि कलहंसएण तं पडिच्छन्दअं अत्तणो णाहस्स दंसिदं हुविस्सदि [प्रकाशं]। सहि! किंदाणिं दे पिअं (ग)

(क) किं निमित्तम्?

(ख) तां खलु माधवानुचरः कलहंसको नाम कामयते, सा तस्य दर्शयिष्यतीति ततो मे चित्रनिवेदिका मन्दारिका समर्पिता।

(ग) नूनं तेनापि कलहंसकेन तत्प्रतिच्छन्दकमात्मनो नाथस्य दर्शितं भविष्यति। सखि किमिदानीं ते प्रियम्।

क। किं निमित्तमिति। मन्दारिकाया हस्ते प्रतिच्छन्दकं त्वया कस्मात् प्रदत्तमिति सम्बन्धः।

ख। तामिति। तां मन्दारिकां, कामयते इच्छति, सा मन्दारिका, तस्य कलहंसस्य समीपे इत्यर्थः, दर्शयिष्यति प्रकाशयिष्यति, इति हेतोः मन्दारिकाया हस्ते प्रतिच्छन्दकं मया समर्पितमिति प्रकरणानुरोधेन बोध्यम्। ... अतः मन्दारिका ...।

ग। नूनमिति। ... चित्रनिवेदिका ...।

সেই মাধব আপনা হইতে আমি মন্দারিকার গৃহে গেলাম। প্রকারান্তেই আমি মন্দারিকার হস্তে চিত্রফলক দিয়াছিলাম।

(ক) মাল। কি নিমিত্ত (দিয়াছিলে?)

(খ) লব। তাহাকে (মন্দারিকাকে) কলহংসনামক মাধবের অনুচর অভিলাষ করিতেছে, সুতরাং সে অবশ্যই তাহাকে (কলহংসকে) দেখাইবে, এই অভিপ্রায়েই আমি দিয়াছিলাম। পরে মন্দারিকা আমাকে প্রিয় কথা শুনাইবে।

(গ) মাল। (স্বগত) নিশ্চয় সেই কলহংসও নিজের প্রভুকে প্রতিমূর্ত্তি দেখাইয়াছে। (প্রকাশে) সখি! তোমাকে কি প্রিয়কথা শুনাইয়াছে?

लव। एदं, क्खु, सन्दाविदस्स सन्दावआरिणो दुल्लह-मणोरहावेस-दुस्सहायास-दज्झन्त-चित्तस्स खणमेत्त-णिव्वावणं तुह पडिच्छन्दं (ल)। [इति चित्रं दर्शयति]।

माल। [सहर्षं सोत्कम्पं चित्रं निर्वर्ण्य]। अम्मो! दाणिं वि मे हिअअस्स अणासङ्गो, जेण एदं वि आस्सासणं विप्पलम्भोत्ति संभावेमि। कधं मअरद्धम्हि? ["जयति जयिमस्ते वे भावा नवेन्दुकलादयः" इत्यादि पूर्वोक्तं पठित्वा सानन्दं]। महाभाअ! सरिसो क्खु दे णिम्माणस्स विरअणाचउरदा, दंसणं उण तक्खण-मणोहरं परिणामदोहसन्दावदारुणम्। अधवा क्खु ताओ

(ल) एतत् खलु सन्तापितस्य सन्तापकारिणो दुर्लभमनोरथावेशदुःसहायासदह्यमान-चित्तस्य क्षणमात्रनिर्वापकं तव प्रतिच्छन्दकम्।

(व) अम्मो! इदानीमपि मे हृदयस्य अनाश्वासो, येनेदमपि आश्वासनं विप्रलम्भ इति सम्भावयामि। कथमस्म्यपि अपि?। महाभाग! सदृशी खलु ते निर्माणस्य विरचनाचतुरता,

मन्दारिका संक्षेपेण माधवसूचितम् प्रियं वस्तु: पृच्छति—किमिदानीं ते प्रियमिति। मन्दारिकाया निवेदनमिति शेषः।

(ल) लवेति। सन्तापितस्य तदनुरागजन्मना कामानलेनोत्तापितस्य, सन्तापकारिणः आत्मानुरागजन्मना कामानलेन तव सन्तापप्रदायिनः, माधवस्येत्यर्थः, दुर्लभे त्वयि यो मनोरथावेशः मन एव रथस्तस्य आवेशः प्रवेशः, अथवा दुर्लभो यो मनोरथः, त्वत्प्राप्त्यभिलाषः तस्य आवेश उपस्थितिः तेन यो दुःसहायासः असहनीयः क्लेशः तेन दह्यमानस्य चित्तस्य क्षणमात्रं न तु बहुकालं यथा स्यात्तथा निर्वापकं शीतलतासम्पादकं, प्रतिच्छन्दकं प्रतिकृतिः। यथा स्वीयोत्कण्ठाविनोदनार्थं त्वया माधवस्य मूर्तिर्लिखिता, तथा माधवेनापि तव मूर्तिरालिखितेति तदनुरागसूचकप्रतिच्छन्दकार्पणरूपं प्रियं मन्दारिकया निवेदितमिति तात्पर्यार्थः।

(व) मालतीति। सहर्षोत्कम्पमिति खलु अन्योन्यानुरागापादनहेतुमूलतद्विलिखितात्मप्रतिकृति-

(ল) লব। তাপানলতপ্ত সন্তপ্ত, সন্তাপকারী এবং দুর্লভ মনোরথ বশতঃ দহ্যমান চিত্ত মাধবের ক্ষণমাত্র সন্তাপহারিণী তোমার এই প্রতিকৃতি। (চিত্র-প্রদর্শন)

কণ্ণআম্পাঅ [illegible] তুমং ণ পেক্খন্তি, পেক্খিঅ যা অণ্ণো [illegible] [illegible]। (ব)

দর্শনে [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible]
[illegible], [illegible] [illegible] [illegible] [illegible]।

দর্শনস্য [illegible]। [illegible] '[illegible]'মিতি পাঠঃ, তত্র [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] ইতি [illegible], [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ইতি [illegible], [illegible] [illegible]। [illegible] [illegible] ইতি [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible], [illegible] [illegible]। "[illegible]"তি ক্বচিৎ পাঠঃ। দর্শনং [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]। [illegible] [illegible] [illegible] ইতি [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ইতি [illegible] [illegible]। "[illegible] [illegible]"মিতি [illegible] [illegible] [illegible] [illegible]।

(ব) হায়। ([illegible] সহিত [illegible] নিরূপণ করিয়া) অহো এখনও আমার হৃদয়ে বিশ্বাস হইতেছে না, যেহেতু এই ([illegible] কর্তৃক আমার প্রতিকৃতি [illegible]) আমাদেরও প্রতারণা বলিয়া তর্ক করিতেছি। এদিক [illegible] দেখা যাইতেছে ("[illegible]" ইত্যাদি পূর্বোক্ত শ্লোক পাঠ করিয়া) মহাভাগ ! তোমার বিরচনামাধুর্যও আকৃতিগত আনন্দের অনুরূপ। কিন্তু তোমার দর্শন [illegible] (হইলেও) অদর্শনকালে ভীষণ [illegible]। সেই সকল কন্যারাই ধন্য, যাহারা তোমাকে দেখে নাই, অথবা দেখিয়াও হৃদয়কে স্ববশে রাখিতে পারিয়াছে।

* "[illegible]" ইতি ক্বচিৎ পাঠঃ, [illegible] [illegible] [illegible] [illegible]।

[इति रोदिति ।] (क)

लव। सहि! किं एव्वं पि दे णत्थि आसासो ? (ख)

माल। सहि! कहं ? (ग)

लव। जस्स कारणादो, उक्कण्ठिअणअणं कण्णेकिसलअं विअ हिअअं धारेन्ती, किलम्मन्त-णोमालिआ-कुसुम-णिस्सहा परिक्खीअसि, सोवि जाणाविदो भअवदा मम्महेण सन्दावस्स, दुस्सहत्तणं त्ति (ङ)।

(ख) सखि! किमेवमपि ते नास्ति आश्वासः ?

(ग) सखि! कथम् ?

(ङ) यस्य कारणादुत्कण्ठितनयनं कर्णेकिसलयमिव हृदयं धारयन्ती क्लाम्यन्नवमालिका-कुसुमनिःसहा परिक्षीयसे, सोऽपि ज्ञापितो भगवता मन्मथेन सन्तापस्य दुःसहत्वमिति।

(क) क्वचित् पुस्तके नायं पाठः।

(ख) लवेति। एवमपि—अनुरागवशादात्ममूर्तिपार्श्वे अस्य मूर्तौ लिखितायामपि आश्वासः तवानुरागः स इति विश्वासः नास्ति न भवति किं किमर्थम्।

(ग) मालेति। श्लोकपाठेन स्वस्मिन्नगतमाश्वासकारणान्तरं निःसन्देहार्थं, तथा माधविन्नं पृच्छति—सखि कथमिति। विश्वासः स्यादिति शेषः।

(ङ) लवेति। उत्कण्ठितं नयनं यस्यास्तादृशी यथा तादृशं कर्णेकिसलयं यथोत्किसलयम्। क्लाम्यत् म्लानिमापद्यमानं यत् नवमालिकाकुसुम नवमल्लिकापुष्पं तद्वत् निःसहा कोमला असीति शेषः। भगवता मन्मथेन सोऽपि माधवोऽपि सन्तापस्य दुःसहत्वं ज्ञापितो ग्राह्यितः, तल्लिखितश्लोकपाठेनैतदवगम्यते इति एतदेव निःसन्दिग्धमाश्वासकारण-मित्यवसेयं तथा विश्वासः कर्त्तव्य इति भावः।

(খ) লব। সখি! এ অবস্থায়ও কেন তোমার বিশ্বাস হইতেছে না ?

(গ) মাল। সখি! কেন হইবে ?

(ঙ) লব। ম্লানিযুক্ত নবমল্লিকা-কুসুমসকুমার তুমি যাহার জন্য উৎকণ্ঠিত

मालं । सहि ! कुसलं दाणिं तस्स महाणुभावस्स भोदु, मह उण दुल्लहो पाणलाहो । [साम्रं]। पिअसहो भअ पिअसहि ! (ख)

[संस्कृतमाश्रित्य ।] (६)

मनोरोगस्तीव्रो विषमिव विसर्पत्यविरतम्,
प्रमाथी निर्धूमं ज्वलति विधुतः पावक इव ।
हिनस्ति प्रत्यङ्गं ज्वर इव गरीयानित इतो
न मां त्रातुं तातः प्रभवति, न चाम्बा, न भवती ॥ (७)

(ख) सखि । कुशलमिदानीं तस्य महानुभावस्य भवतु, मम पुनर्दुर्लभः प्राणलाभः । प्रियसखीऽपि विलपसि ।।

(ख) मालतीति । [illegible] प्रार्थयति— सखि कुशलमिति । [illegible] मा भवतु निष्ठुरमद्दुःखमसीव्यर्थः । पुनः किन्तु मम [illegible] दुर्लभः [illegible] [illegible] परिहरणमाश्रित्य चाह्नाते हेतुः ।

६ । संस्कृतमाश्रित्येति । [illegible] न विरुद्धम् । तथाचोक्तं दर्पणे—

"धीरेषु [illegible] ।
[illegible] संस्कृतम् [illegible]" ॥ इति

७ । मन इति । तीव्र, अतिदुःसहः मन एव प्रमाथी [illegible], मनोरोगः [illegible] [illegible] विषमिव अविरतं [illegible] विसर्पति व्याप्नोति । तथा विधुत, [illegible], मन एव

[illegible] (কম্পিত) [illegible] সন্তাপ ভোগ করিতেছ, সেই মাধবকেও ভগবান্ কামদেব সন্তাপের দুঃসহ [illegible] জানাইয়াছেন।

(ক) মাল। সখি! সেই মহানুভব মাধবের কুশল হউক, কিন্তু তাঁহার সমাগমে মনের শান্তিলাভ আমার অতীব দুরাশা। (অশ্রু বিসর্জ্জন করিতে করিতে) প্রিয়সখি! বিশেষতঃ এখন—

(৭) প্রেমঘনযাতার অতি দুঃসহ কামময় ব্যাধি বিষের ন্যায় (আমার সর্বাঙ্গে ব্যাপ্ত হইতেছে ও ধূমরহিত প্রজ্বলিত বহ্নির ন্যায় প্রজ্বলিত হইতেছে, ১৭৩

सच । एव्वं ज्जेव्व, पच्चक्खसोक्खदाइणो परोक्ख-दुक्ख-दूसहाआस-कारिणो सज्जणसमागमा होन्ति । अवि अ, जधा वादाअणन्तर-

---

(क) एवमेव प्रत्यक्षसौख्यदायिनः परोक्षदुःसहदुःखायासकारिणः सज्जनसमागमा भवन्ति । अपिच यथा वातायनान्तरप्रसारितावयवेन सविशेषसमिद्धचुतवहायमानपूर्णिमाचन्द्रोदया

निर्धूमः धूमरहितः (अनेन विशेषणेन प्रज्वलनातिशयः सूचितः, प्रज्वलनादिका एव धूमाभाव-सामान्यात् । "निर्धूम"मिति पाठे तु क्रियाविशेषणम्, पावकी वह्निरिव ज्वलति ज्वालामाला-शाली भवति । एवं शरीराम् वैकालिकी सान्निपातिक इत्यर्थः, ज्वर एव हरः हरः पचनमिव प्रत्यङ्गं अङ्गं अङ्गं प्रति सर्वावयवावच्छेदेनैत्यर्थः, हिनस्ति पीडयति । अत एव तातः पिता मां त्रातुं अस्मात् ज्वरात् रक्षितुं न प्रभवति न शक्नोति, सम्भावनं प्रभवत्त्वेऽपि नरपति-मनोरक्षणानुरोधेन नन्दनाय मालतीप्रदानस्य माधवाय मदर्पणाय स्विकाराय: । एवं अम्बा माता च न त्रातुं प्रभवतीत्यनेनान्वय: । तथा अपि नागमानिर्णयिका किञ्चित् करणाभावात् । भवती अपि न त्रातुं प्रभवतीत्यर्थः । मद्विषये सर्वथा उपायाभावप्रतिपादनाभिप्रायः । तत्समाधानमेवेदानीं मम शरणमिति भावः । अत्र लवङ्गिकाया अपि मालत्याः समवस्थया प्रथमं यत् पोषु-मोक्षणादिभिः अमनोनिर्णीयमानया आत्मानिवसतोऽपि दुःखदायित्वेन रक्षायां तत्प्रयत्नातिशय-प्रतिसन्धानाद्विरहम् ।

अत्र निर्भीमितिव्याप्तुपमा, निर्दयति ज्वलति हिनस्तीत्यनेकक्रियासु सकलोपेक्षः सर्वेषां कर्तृकारकमिति दीपकं, तथोऽन्य मनतीनां प्रभवतीत्येकक्रियासम्बन्धात्तुल्ययोगिता, तुरीयपादवाक्यार्थं प्रति पूर्वपादत्रयवाक्यार्थानां हेतुत्वात् काव्यलिङ्गमलङ्कारः, तेषामङ्गाङ्गि-भावेन सङ्करः । दर्पणोक्ततुल्ययोगितालक्षणं यथा—"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् । एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता" अन्येषां लक्षणान्युक्तानि । शिखरिणीवृत्तं, तल्लक्षणमुक्तम् ।

(ख) सर्वेति । एवमेव त्वया यदुक्तं तत् सत्यमेव । प्रत्यक्षे दर्शनकाले सौख्यदायिनः आनन्दसम्पादनशीलाः, परोक्षे अदर्शनकाले दुःखेन यो दुःसहश्रमः तत्कारिणः तत्करणं

অতি বেগশালী জ্বরের ন্যায় সর্বাঙ্গে পীড়া জন্মাইতেছে। সুতরাং এই বিপদ্ হইতে পিতা, মাতা বা তুমিও আমাকে রক্ষা করিতে পারিবেন না।

(ক) সত্য। তুমি যাহা বলিলে তাহা ঠিক। দর্শনকালে সুখ ও বিরহকালে

सुट्ठुत्त सिस-दंसणेन, सविसेस-समिद-फुर-सहावसा-पुण्णिमा चन्दो-दया, णिब्बत्तय-काम-व्वावार-संसइद-जीविदा दे सरीरावत्था, तस्स ज्जेव्व संपत्तसविसेसदंसणा पच्च सम्बप्पसि त्ति किं एत्थ भणिदव्वम्। ता, पिअसहि! पच्चाहमस्सप्पसि त्ति किं एत्थ भणिदव्वम्। ता, पिअसहि! सलाहणिज्जं दुल्लह-मणोरहफलं जीअलोअस्स, गुणाणुराअसरिसो महाणुभाअ-जणस-समागमोत्ति, एत्तिअं जाणीमो (क)।

निवर्तककामव्यापारसंशयितजीविता ते शरीरावस्था, तस्य च सम्प्राप्तविशेषदर्शना पच्च समाप्यसि इति किं अत्र भणितव्यम्। 'तत्' प्रियसखि! श्लाघनीयं 'दुर्लभमनोरथफलं' जीवलोकस्य, गुणानुरागसदृशो महानुभावजनसमागम इत्येतावज्जानीमः।

सज्जनाः सज्जनाः, सज्जनाः नितान्तं भवन्ति, यत्र नास्ति संशयविशेषोऽपीत्यर्थः। सज्जनाः। बन्धावधिकं दुःखानि समर्पयन्ति—सखीति। शारदकालेऽपि चन्द्रदर्शनं च सुखजनकतया न दु-ष्प्रापमित्यर्थः। यद्दर्शनमात्रेण, सविशेषं सन्निकर्षं यथा स्यात्तथा समितः प्रदीप्तः यो हुतवहः वह्निः स इव आचरन् वह्न्युपमायमानः, पूर्णिमाचन्द्रोदयो यस्यां सा, (पूर्णचन्द्रोदयोऽपि वह्निवत् सन्तापजनक पूर्णिमाचन्द्रम्) तथा निवर्तकस्य निःसहस्य कामस्य मन्मथस्य व्यापारेण निमित्तेन सविशेषेण संशयितं सन्दिग्धं जीवितं जीवनं यस्यां सा तथाभूता ते तव शरीरावस्था अनुभूतेति शेषः। तस्यैव मानसस्यैव सम्प्रति प्रत्यक्षतया सर्वं विशिष्टदर्शनं अनुरागपरस्पराकिमिदेवादि ... यस्यां सा तथाभूता त्वं, अत्र एतस्मिन् आनन्ददिने इदानीं एतत् किं भणितव्यं कथनीयं, कथायां किमपि वक्तव्यं नास्तीत्यर्थः। यत्सम्प्रत्यर्णेनैव पञ्चबाणविजं जीवनस्य अवस्थाप्तार्थं सम्पादितं, तस्य अवलम्बनेन तद्गुण-प्रकारेण तदासादनं सर्वथा सुखद एवेति भावः। किमत्र वक्तव्यमित्यपीपदिशति—तदिति। हे प्रियसखि! 'गुणानुरूपस्य निरतिशयलाभः' अनुगः गुणदः सः महानुभवजनस्य

দুঃসহ ক্লেশ দেওয়াই সজ্জনসমাগমের স্বভাব। আরও দেখ, সখাকণ্ঠে যাহার রূপমাত্র দর্শনেই তোমার শরীরাবস্থা এরূপ হইয়াছিল, যে পূর্ণিমার চন্দ্রোদয় তোমার নিকট অতিশয় প্রদীপ্ত হুতাশনের ন্যায় বোধ হইত ও নিদারুণ কাম-দেবের আবির্ভাবে তোমার জীবন সংশয়াপন্ন হইয়াছিল, তাহারই স্পষ্ট দর্শন

माल। सहि! दइद-मालदी-जीविदे! साहसोवण्णासिणि! अवेहि। [सास्रं] अहवा, अहं ज्जेव वारंवारं विलोअअन्ति दुक्खावत्थाविद-धीरत्तणा-वट्टम्भे ण अत्तणो हिअएण दूर-विजिम्भमाण दुव्विणअ-लहुई, एत्थ अवरज्झामि, तधावि पिअसहि! (ख)

(ख) सखि! दयितमालतीजीविते! साहसोपन्यासिनि! अपेहि। अथवा, अहमेव वारंवारं लोकयन्ती, दुःखावस्थापितधीरत्वावष्टम्भे न आत्मनो हृदयेन दूरविजृम्भमाणदुर्विनयलघ्वी अत्र अपराध्यामि, तथापि प्रियसखि!।

समागमः तत् श्लाघनीय प्रयत्नात् दुर्लभे प्रिये यो मनोरथस्तस्य फलं श्लेषात् अवगामीन वर्धितमिति भावः। अनुरागानुरूपं वल्लभसमागमं विना दुर्लभमनोरथस्य परं प्रयत्नतरं फलं नास्ति, तस्मात् स्वयमेव त्वया साहसं विधाय येन केनापि प्रकारेण माधवेन समं युज्यतां, यदि त्वमनुमन्यसे, तदाहमपि तद्घटयितुमर्हामीत्याशयः। अत एव साहसोपन्यासिनीत्यादि मालत्याभिहितमपि सङ्गच्छते।

(ख) मालतीति। दयितं प्रियं मालत्या मम जीवितं जीवनं यस्यास्तत्सम्बोधनम्। एतेन मम जीवनमेव तव प्रियं न तु पितृवर्गः कुलं अपरितिष्ठतातगौरवत्वादिति ध्वनितं। साहसोपन्यासिनि! साहसानुष्ठानोपदेशिनि। अपेहि दूरमपसर, नैवं महासङ्कुलकुलकलङ्ककरसाहसकार्योपदेशिनी त्वं मम सखीयोग्येत्याशयः। अहमेव साक्षादपि मनोवारणाय [illegible]—अथवेति। वारं वारं बहुशः विलोकयन्तीति माधवमिति भावः। दुःखेन पुनः पुनरवलोकनाद्यभीप्सितासम्भवादितिशयेन अवस्थापितं यत् धैर्यं तस्य अवष्टम्भ आश्रयेण तथाभूतेन आत्मनः स्वस्य हृदयेन दूरविजृम्भमाणः अतिवर्द्धमानः यो दुर्विनयः विनयविरोधि [illegible] तेन लघ्वी निकृष्टा अहमेव अत्र तव साहसानुष्ठानोपदेशे अपराध्यामीत्यन्वयः। यथाहं लाघवयुक्तलज्जां [illegible], तथा

লাভ করিয়া এখন যে তুমি সন্তাপিত হইবে, তাহাতে আর বলিবার কি আছে? তবে আমি ইহাই জানি যে, জীবলোকের পক্ষে গুরুতর অনুরাগাস্পদ মহাদুর্লভ বল্লভসমাগমই দুর্লভমনোরথের প্রশস্ততর ফল।

(খ) মাল। সখি! একমাত্র মালতীর জীবনই তোমার প্রিয়, (মাতা পিতা বা নিষ্কলঙ্ক কুলের গৌরব প্রিয় নহে) সুতরাং তুমি অতি সাহসের কথা বলিতেছ,

[भूयः संस्कृतमाश्रित्य।]

ज्वलतु गगने रात्रौ रात्रावखण्डकलः शशी,
दहतु मदनः, किंवा मृत्योः परेण विधास्यतः।
मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया,
कुलममलिनं नत्वेवायं जनो, न च जीवितम् ॥ (८)

[illegible] अन्यथा [illegible] इति [illegible] विरहात् [illegible] इति भावः। [illegible]

(८) [illegible] — [illegible] इति। [illegible] — किमिति। [illegible] इति भावः। [illegible] — मनेति। [illegible] इति भावः। [illegible]

তুমি দূর হও। (অশ্রু বিসর্জন করিয়া) অথবা আমিই বার বার তাহাকে অবলোকন করিতে করিতে অতি কষ্টে ক্রমে [illegible] করিয়া অতিশয় হীনবুদ্ধি হইয়াছি, সুতরাং আমিই তোমার এই সাহসোপন্যাসে অপরাধিনী, তথাপি প্রিয় সখি!

(৮) গগনে প্রতিরাত্রে পূর্ণচন্দ্র প্রজ্বলিত হউক; মদনও [illegible] করুক, ইহাতে

लव। [स्वगतम् ।] एत्थ दाणिं को उवाओ ? (ग)

[अथ नेपथ्यार्धप्रविष्टा प्रतीहारी।] एसा भअवदी कामन्दई। (घ)

उभे। किं भअवदी ? (ङ)

(ग) अत्रेदानीं क उपायः ?

(घ) एषा भगवती कामन्दकी।

(ङ) किं भगवती ?

दयितस्य माधवस्य स्वजीवितस्य च रक्षणाय दुष्परिहरं तेषु कान्तदारीदयमपि वरमहीभिमता-मिदाह—नवेति। नु किमु च सर्वानर्थकारणीभूतो जन. माधवः न दयित एव माहस-जनानुभवात्, प्रत्युत केवलं दुःखदत्वाद् व्याजम.। तथा जीवितं मम जीवनञ्च न दयितं माधवं विनावस्थानस्य नितान्तकष्टप्रदकामकत्वाद् स्वरूपतापेति भाव।

अत्र दीर्घविरचक्रवर्तनात् अपगतरूपविरुद्धक्रियायाः तदुपपत्तेर्विभवालङ्कारः। तल्लक्षणं यथा दर्पणे—"गुणक्रिये वा यत् स्यातां विरुद्धे हेतुकार्ययोः। यद्वारभस्य वैफल्यमनर्थस्य च सम्भवः। विरुद्धयोः सङ्घटना या च तद्विषमं मतम्"मिति। हरिणीछन्दम् स्वभावम्॥

(ग) अत्रेति। अत्र उपस्थितापत्प्रशमने क उपायः मयाऽवलम्बनीय इति शेषः। मया सूचितं साहसोपदेशमपि नैवमङ्गीकरोति, सखिरिता चाग्निमदनेति किमिदानीं मया विधेयमित्यर्थः।

(घ) "क उपाय" इति मदयन्तिकावचनमाकर्ण्योपायं कथयितुमिव समागत्य प्रतिहारी कथयति—एषेति।

(ङ) किं भगवतीति। आदिशति आगतेति वा शेषः। भर्तृदारिकां दृष्टुकामा आगतेति प्रतिहारीकथनमश्रुत्वाऽर्धमुक्तवीनकथनया मध्येऽत्र प्रश्न उभाभ्यां कृत इति मन्तव्यम्।

মৃত্যু অতিরিক্ত আর কি করিতে পারিবে? সর্বজনপ্রশংসিত পিতা, নির্মল কুলসম্ভূতা মাতা ও নিষ্কলঙ্ক কুলই আমার অভীষ্ট, এই মাধব বা আমার জীবনই অভীষ্ট নহে।

(গ) লব। (স্বগত) এ বিষয়ে এখন কি উপায়?

(ঘ) প্রতীহারী। (নেপথ্য হইতে অর্দ্ধ প্রবিষ্ট হইয়া) এই ভগবতী কামন্দকী—

(ঙ) উভয়ে। ভগবতী কি (আদেশ করিয়াছেন ?)।

प्रती। भट्टिदारिए दट्‌ठुकामा आअदा। (च)

उभे। तदो किं विलम्बीअदि? (छ)

[प्रतीहारी निष्क्रान्ता। मालती चित्रफलकं आच्छादयति।] (९)

मद। [स्वगतं।] कुसुमोचिदं क्खु जादम्। (ज)

[ततः प्रविशति, कामन्दकी अवलोकिता च।]

काम। साधु सखे भूरिवसो! साधु, "प्रभवति निजस्य कन्यकाजनस्य महाराज" इत्युभयलोकाविरुद्धं वचनमुपन्यस्तम्।

(च) भर्तृदारिके द्रष्टुकामा आगता।

(छ) ततः किं विलम्ब्यते?

(ज) कुसुमोचितं खलु जातं।

(च) प्रती [illegible] इति "[illegible]" इति [illegible] आगते।

(छ) किं विलम्ब्यते इति [illegible]।

(९) आच्छादयति [illegible]। [illegible] इति [illegible]।

(ज) कुसुमोचितं [illegible], [illegible] इति भावः।

(१०) काम [illegible]।

---

(১) প্রতী। ভর্তৃদারিকাকে দেখিবার অভিলাষে আসিয়াছেন।

(২) উভয়ে। তবে (প্রবেশ করাইতে) বিলম্ব করিতেছ কেন?

(৯) (প্রতীহারী নিষ্ক্রান্ত হইল। মালতী চিত্রফলক আচ্ছাদিত করিল।)

(৩) মদ। (স্বগত) কুসুমোচিতই সম্পন্ন হইয়াছে।

(কামন্দকী ও অবলোকিতার প্রবেশ)

(১০) কাম। সাধু সখে ভূরিবসো! সাধু—"মহারাজ নিজ কন্যাজনের প্রভু", এই বাক্যটি ইহ কাল ও পর কাল এই উভয় কালেরই অনুকূল,

अपि च—अद्य मन्मथोद्यानदृष्टान्तेन भगवतो विधेः अनुकूलतामवगच्छामि। बकुलावलीचित्रफलकव्यतिकरस्तु अद्भुतं प्रमोदमुन्नमयति। इतरेतरानुरागो हि दारकर्मणि पराध्यं मङ्गलं, गीतश्चायमर्थोऽङ्गिरसा, यस्यां मनश्चक्षुषोरनुबन्धः तस्यामृद्धिरिति। (१०)

त्वदायत्तार्थीनेव, पुनरा निजस्य स्वकीयस्य कन्यकाजनस्य महाराज, प्रभवति यथेष्टविनियोगे समर्थो भवति, तथापि अभिषिच्य नन्दन एव मालतीं परिणेष्यतीति माभिलषितं राजानुरोध-प्रतिपालनार्थमिष्टमप्यारमणा भयेनैव इदमेतादृशं सम्भवतीत्याशयः। यथान्तरे तु महाराजः निजस्य स्वकीयस्य कन्यकाजनस्य प्रभवति यथेष्टविनियोगे समर्थो भवति, न तु मदीयकन्यायाः इत्यर्थानुसारेण सकलमप्यनुवर्तनात् ईश्वरेण सह वाक्यसम्बन्धस्य-पूर्वप्रतिषिद्धत्वात् समर्थकत्वात् पापाभावेन वक्तोरविरुद्धत्वम्। अत्र उभयत्रोक्तयोः नन्दनविवाहप्रयोजनप्रतिषेधकतयोक्तयोः अविरुद्ध दर्शितार्थयोरनुपरोधावगतिर्न्यायनिर्णयः। यद्यपि "नन्दनाय मालती देहि" इति सदा राज्ञा प्रार्थितं, तत्कालीमिति शेषः। एवं गोपालाय मात्यजनयनम्। यथोक्तं दर्पणे—

> "निर्देशे, यत्र तत्र भणितोऽर्थः प्रकाश्यते।
> श्लिष्टजनयविषयार्थां सा गोष्ठीमिति नीयते॥"

अनेन राजानुरोधेनापि नन्दनाय कन्याऽर्पणं भविष्यतीत्यसङ्गतिं सूचयित्वा दैवानुकूलतामपि दर्शयति—अपि चेति। बकुलावली माधवरचिता बकुलमाला, चित्रफलकं मालतीलिखित माधवस्य प्रतिकृतिः, तयोर्व्यतिकरः विनिमयः, मालत्या बकुलमालाप्राप्तिः माधवस्य च चित्र-फलकप्राप्तिरित्येवं परिवर्तनमित्यर्थः। अद्भुतं प्रकृष्टं हर्षं, उन्नमयति जनयति, किं यस्मात् इतरे-तरानुरागः परस्परासक्तिः दारकर्मणि विवाहकर्मणि, पराध्यं श्रेष्ठं मङ्गलं दम्पत्योः कुशल-सम्पादकमित्यर्थः। चातुर्यं प्रतिपादितम् मङ्गलमस्मात् मङ्गलमन्ते लाभविकल्पात्। अयमर्थः—परस्परानुरागेण मङ्गलप्राप्तिरूपोऽर्थः, अङ्गिरसा तदाख्येन महर्षिणा, गीतः कथितः। तदुक्तिं दर्शयति—यस्यामिति। अनुबन्धः आसक्तिः, तस्यां परिणीतायामित्यर्थः। ऋद्धिः मङ्गलोद्गमः भवतीति शेषः। मालतीमाधवयोरन्योन्यमभिलषणात् तयोर्विवाहिकमङ्गल

বলিয়াছেন, আরও দেখ, অদ্যকার মদনোদ্যানবৃত্তান্তদ্বারা ভগবান্ বিধির আনুকূল্য অবগত হইতেছি। বকুলমালা এবং চিত্রফলকের বিনিময়ও অত্যন্ত আমোদ উৎপাদন করিতেছে। পরস্পর অনুরাগই বিবাহকর্মে শ্রেষ্ঠ

मद। एषा मालती। (अ)

काम। [निर्वर्ण्य।]

> निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा,
> कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी।
> अवस्थामापन्ना मदनदहनोद्दामविधुरा-
> मियं नः कल्याणी रमयति मनः कम्पयति च ॥ ११ ॥

(अ) एषा मालती।

[illegible] यदि [illegible] [illegible]। [illegible] "मदन" इति [illegible]।

(११) निकाममिति। [illegible] ([illegible]) [illegible] मालती [illegible] मूर्त्तिरिव नेत्रोत्सवकरी [illegible] कल्याणी [illegible] मालती [illegible] मनः निकामं [illegible] रमयति आह्लादयति, [illegible] मदन [illegible] कम्पयति [illegible]।

रससम्पादक। (হৃদয়ে) অভিপ্রায় ইহা বলিয়াছেন, যাহাতে মানব চক্ষুর আসক্তি থাকে, সে পরিণীতা হইলেই মদন উৎসব হয়।

(অ) এষা। এই মালতী।

(১১) কাম। (নিরূপণ করিয়া) মদনদহনযুক্তা এই মালতী নিরতিশয় কৃশাঙ্গী এবং সরস কদলীগর্ভের (থোড়ের) ন্যায় পাণ্ডুবর্ণ এবং অতীব সুন্দরী হইয়াও চন্দ্রের কলামাত্রাবশিষ্ট মূর্ত্তির ন্যায় নয়নানন্দবর্দ্ধন করতঃ আমার মন নিরতিশয় আহ্লাদিত করিতেছে এবং উৎকট কামানলসন্তাপদ্বারা শোচনীয় অবস্থা হইয়া কম্পিতও করিতেছে।

अपिच—परिपाण्डुपांसुलकपोलमाननम्
दधती, मनोहरतरत्वमागता।
रमणीयजन्मनि जने परिभ्रमन्
ललितो विधिर्विजयते हि मान्मथः॥ १२॥

अथवा। नियतमनया सङ्कल्पनिर्मितः प्रियसमागमोऽनुभूयते।
तथाहि अस्याः। (१३)

अत्र यमिनी भूर्निरिवेत्युपमा, प्रथमद्वितीयपादपदार्थस्य रमणं प्रति तृतीयपादपदार्थस्य च करणं प्रति हेतुतया यथाक्रमेणाभिधानात् पदार्थहेतुककाव्यलिङ्गानुप्राणितं यथासंख्यं, रमयति कम्पयतीत्यनेकक्रिययोः एकस्मिन्नेककर्तृकारकाभिसम्बन्धाद्दीपकं, आह्लादोद्वेगयोर्विरुद्धयोर्घटनात् विषमचेत्येतेषामलङ्काराणां सङ्करः। तत्र दर्शनीयं यथासंख्यलक्षणं यथा—"यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण च" इति। शिखरिणीवृत्तम्॥

१२। परिपाण्डुरिति। परिपाण्डुभिरल्पं निरतिशयधवलौ पांसुलौ क्रियाविशेषणानुलेपनादिसंस्कारविरहाद्धूसरौ कपोलौ यस्मिन् तत् तादृशं आननं वदनं दधती धारयन्त्यपीति शेष, मनोहरतरत्वं अत्याश्चर्यसौन्दर्यं आगता प्राप्ता। पाण्डुतादिसम्बन्धेऽपि कथमेतादृक्सौन्दर्यमित्याकाङ्क्षायां तत्समर्थनमाह—रमणीयेति। हि यस्मात् रमणीयं सुभादृष्टवशादतिसुन्दरं जन्म यस्य तादृशे जने परिभ्रमन् आविश्यमानः ललितः मनोज्ञः मान्मथो विधिः कामजविकारविशेष, विजयते सर्वोत्कर्षेण वर्तते। सहजसौन्दर्यशालिनां जनानां शोभावर्धककामजविकारोऽपि तादृशो मान्मथः, शोभातिशयसम्पादको जात इति भाव। अत्र सामान्येन विशेषसमर्थनरूपः अर्थान्तरन्यासोऽलङ्कारः। मञ्जुभाषिणीवृत्तम्।

१३। 'अथवे'त्यत्र: क्वचित् पुस्तके नास्ति। नियतं निश्चितं अनया मालत्या सङ्कल्पनिर्मित, काल्पनिकः, न तु वास्तव इति भावः, प्रियसमागमः माधवसमागम, अनुभूयते मनसा माधवध्याने

---

(১২) আরও দেখ, মালতী পাণ্ডুবর্ণ এবং ধূসর কপোলযুক্ত আনন ধারণ করিয়াও অতিশয় সৌন্দর্য্য লাভ করিয়াছে। যে হেতু উচ্চাদৃষ্ট বশতঃ যাহারা সুন্দর জন্মলাভ করিয়াছে, তাদৃশজনে পরিভ্রমমান মনোজ্ঞ কামজ বিকারও উৎকর্ষ সহকারেই বর্ত্তমান থাকে।

(১৩) অথবা, সততই মালতী কল্পনায় প্রিয়সমাগম অনুভব করিয়া থাকে। তাহার প্রমাণ এই যে, ইহার—

नीवीबन्धोच्छ्वसनमधरस्पन्दनं, दोर्विघातः,
स्वेदश्चक्षुर्मसृणमधुरालोकरश्मिप्रतानम् ।
गात्रस्तम्भः, स्तनमुकुलयोरप्रबन्धः प्रकम्पो,
गण्डाभोगे पुलकपटलं, मूर्च्छना, चेतना च ॥ १४ ॥

प्रतिकम्पा गमनस्य कथञ्चिदुपशमन इत्यर्थः। अथ तदा ज्ञायत इत्याकाङ्क्षायां सर्वानुभावान् वर्णयितुमाह—तदाहेति। यथा इति शेषः, नीवीबन्धोच्छ्वसनमित्यादिभिरन्वयः।

१४। नीवीति। नीवीबन्धस्य कटीवसनबन्धनस्य उच्छ्वसनं श्लथीभावः। रतिप्रारम्भ कामोन्मत्तकराकर्षणविशेषेणैव। रतिप्रारम्भाभिप्रायं यथा गीतगोविन्दे—"[illegible] नाभिसरोज पुनरपि पुलकप्रतिबन्धीनृपं [illegible] मुहुः। [illegible] उपनयति हृदयेऽपि, नीवीविमोचय नीवी" मित्यादि। अधरस्पन्दनं चौर्यकम्प, स्फुरिताधरपुष्पविशेषेणैव, स्फुरितमधरं यथा—"वदनं [illegible] [illegible] वा [illegible]। [illegible] स्फुरितं पुष्पं मम" मिति। दोर्विघातः भुजयोः शैथिल्यं, परिश्रमभावसाम्यादिति भावः। स्वेदः घर्मः, रतिजश्रमविशेषेणैव। अत्र चक्षुः नयनं मसृणं कोमलं मधुरं ललितं चाकचक्यं [illegible] इति यावत्, तादृशं कनीनिका तादृशम्। [illegible] दर्शनमात्रेण हृदि विकारा जाता इति भावः। तत्र [illegible] पूर्णेन दर्शिते मधुरालोकरश्मिप्रतानं यथा—

"शीतलीकृतमिव मानो येन मन्मथं सुखम्"
[illegible]।
[illegible] च हरिराकेशराक्षुता" इति ॥

गात्रस्य देहस्य स्तम्भः निश्चेष्टत्वम्, सात्त्विकविकारविशेषः, सुरतश्रान्तितया [illegible] इति भावः, तथा स्तनयोः मुकुलयोः [illegible] येन तादृशं, पुनः सुकृती [illegible] वा सुकृती ([illegible]) तयोः प्रकम्पः वेपथुः, गाढा[illegible] इति भावः। गण्डाभोगे कपोलतले पुलकपटलं रोमाञ्चजालं [illegible] इति भावः। तथा मूर्च्छना मोह निरतिशयतन्मयतायां सर्वेन्द्रियवृत्ति-

---

(১৪) কটিবন্ধনের শ্লথীভাব, ওষ্ঠের কম্পন, বাহুযুগলের শৈথিল্য ও (সর্বাঙ্গে) ঘর্ম পরিলক্ষিত হইতেছে, এবং ইঁহার চক্ষুর তারাযুগল কোমল, সুন্দর সর্বাঙ্গাকুঞ্চিত ও স্নেহাত্মক দেখা যাইতেছে। আরও ইঁহার শরীরে চেষ্টার অভাব, বক্ষঃস্থল পর্যন্ত কাঁপাইয়া স্তনযুগলের কম্পন, গণ্ডদেশে রোমাঞ্চ, (কখনো) মূর্ছা ও (কখনো) চৈতন্য পরিলক্ষিত হইতেছে।

[इत्युपसर्पति ।] (१५)

लव । [मालतीं चालयित्वा ।] (१६) मालदि ! इदो । (अ)

[उभे उत्तिष्ठतः ।] (१७)

(अ) मालति ! इतः ।

विगम इति यावत्। येनैव गतिविभ्रमसङ्ग्येनात्मनः चैतन्यम्। पश्चिमपाद इत्यध्याहृत क्रियया सर्वत्रान्वयो निर्वाह्यः ।

अत्र "स्त्रीकटीवस्त्रबन्धे च नीविपरिपणेऽपि च" इत्यमरानुशासनात् नीवीशब्देनैव कटीवस्त्रग्रन्थिरर्थलाभे पुनर्ग्रन्थिशब्दस्य पदोपादानादापतितं पुनरुक्तताख्यदोषं, राहोः शिर इतिवत् ग्रन्थिग्रन्थ्योरवयवावयविभावविवक्षया कथंचिद् समाधेयः ।

अत्र स्तनमुकुलयोरित्यभेदाध्यवसाये रूपकं तदभावे उपमा, एवं मूर्च्छनाचेतनयोर्निमेषयोः, सन्देहमाद्यलङ्कारः, तथा तत्तदवस्थिरत्या नीवीग्रन्थ्युच्छ्वसनादिसाधनैः मालत्याः कामानिकविभ्रमभावमानुभवरूपसाध्यस्य ज्ञानादनुमानालङ्कारः । अनुमानाकारश्च—मालती कामानिकविभ्रमभावमानुभववती बाह्यविषयसमागमानुभवाभावे सति नीवीग्रन्थ्युच्छ्वसनादिमत्त्वादिति, हेतुतावच्छेदकसम्बन्धस्य साध्यसमानाधिकरणत्वात् हेतुभेदेन यथायथं स्वयमूहनीयः विस्तरभयान्न लिख्यते । अनुमानालङ्कारलक्षणं यथा दर्पणे—"अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात्" इति । मन्दाक्रान्तावृत्तम् ॥

१५ । उपसर्पति समीपं गच्छति कामन्दकीत्यर्थः ।

१६ । मालतीं माधवैकमनस्कतया बाह्यज्ञानशून्यामित्यर्थः । चालयित्वा बोधयित्वा ।

(अ) इतः अस्मिन् कामन्दकी उपस्थितेति शेषः ।

१७ । उभौ मालतीलवङ्गिके । उत्तिष्ठत इति कामन्दक्या अभ्यर्थनायेत्यर्थः ।

---

(১৫) (কামন্দকী নিকটে উপস্থিত হইলেন)

(১৬) লব । (মুগ্ধপ্রায়া) মালতীকে সঞ্চালিত করিয়া) মালতি ! এই যে (দেবী উপস্থিত হইয়াছেন)

১৭ । (উভয়ে উঠিয়া দাঁড়াইল)

माल । भअवदि ! वन्दामि । (ट)

काम । महाभागे ! अभिमतफलभाजनं भूयाः । (१८)

लव । एदं आसणं, एत्थ उवविसदु भअवदी । (ठ)

[सर्वा उपविशन्ति ।] (१९)

माल । कुसलं भअवदीए ? (ड)

काम । [निःश्वस्य ।] कुशलमिव । (२०)

लव । [स्वगतं ।] पत्थावणा क्खु एसा कवडनाडअस्स । [प्रकाशम्] सुहअ-वाड-भत्तस्समण्णविद-कण्ठ पडिलग्ग पीमासं अप्पारिसं जेव्व भअवदीए वअणं, ता किं दाणिं उव्वेअकारणं हुविस्सदि । (ढ)

(ट) भगवति ! वन्दे ।

(ठ) इदमासनं अत्रोपविशतु भगवती ।

(ड) कुशलं भगवत्याः ?

(ढ) प्रस्तावना खलु एषा कपटनाटकस्य । [illegible] भगवत्या वचनम् । तत् किमिदानीमुद्वेगकारणं भविष्यति ।

---

१८ । कामेति । अभिमत [illegible] ।

१९ । कामेति । [illegible] ।

(२) लवेति । [illegible]

(ट) माल । ভগবতি ! প্রণাম করি ।

১৮ । কাম । মহাভাগে ! অভিমত ফলভাজন হও । (অভিমত ফল লাভ কর)

(ঠ) লব । এই আসন, ভগবতি ! উপবেশন করুন ।

(১৯) (সকলে উপবেশন করিল)

(ড) মাল । ভগবতীর কুশল ত ?

(২০) কাম । (দীর্ঘ নিশ্বাস ফেলিয়া) কুশলের মত ।

(ঢ) লব । (স্বগত) ইহাই কপট নাটকের সূচনা । (প্রকাশে) গুরুতর

काम। ननु चयमेव चीरचीवरविरुद्धः परिचयः। (२१)

लव। कथं विय ? (ण)

काम। अयि ! त्वमपि न वेत्सि ? (२२)

इदमिह मदनस्य जैत्रमस्त्रं सहजविलासनिबन्धनं शरीरम्।

अनुचितवरसंप्रदानशोच्यं, विफलगुणातिशयं भविष्यतीति ॥२३॥

(ण) कथमिव ?

कारणं पृच्छति—गुरुकेति। गुरुकस्य महत आयासस्य अनुगमूतस्य अभ्यः चन्द्रनिरोध, तेन मन्त्रसिद्धि गन्धोत्पत्ति कार्ष्ठे प्रतिपद्य ज्वलनात् निश्वासो यत्र तथाभूत आश्वीशारचकास्य निश्वासोद्गमात् ताहकारणत्वात्मासंवेन संजातनिःश्वासमित्यर्थः, भगवत्या वचनं मन्याहतं मूर्तमौ विलक्षणं भूयत इति शेष।

२१। कामेति। नन्विति मर्षाविष्कारमन्वयौ। चीरैः छिन्नवसनैः निर्मितस्य चीवरस्य बौद्धसन्न्यासिवसनस्य छिन्नवस्त्रनिर्मितवस्त्रपरिधानस्य बौद्धसन्न्यासिधर्मत्वात्। बौद्धसन्न्यासिनो हि मूलतस्त्वि वसन खण्डशः विच्छिद्य पुनस्तन्मयोजननिर्मितं वसनं व्यवहरन्ति। विरुद्धः सदानवन्याधी प्रतिकूल इति यावत्। "सत्यं सङ्गपरित्यागः पारिव्राजविधिर्मतः" इत्यादि धर्मशास्त्रैर्निषिद्धत्वादित्यर्थः। अयं—युष्माभिः सह मम्बन्धः, परिचयः समरः, उद्वेगकारणमिति शेष। यदि युष्माभिरेव परिचयो न सम्पत्स्यत, तदा मालतीमाधवमिलनार्थमुद्योगोऽपि मम नाभविष्यदित्याशयः।

(ण) लवेति। उद्वेगकारणं स्पष्टं मौनं पुनः पृच्छति—कथमिवेति। अस्माभिः सह परिचयः कथमुद्वेगकारणमिति सुस्पष्टं ब्रूहीत्यर्थः।

२२। कामेति। त्वमपि न वेत्सीति, मान्यया गुणानुध्यायिन्या भिषजया त्वया इदमभिहितमनुसन्धाय ज्ञातव्यमपि प्रायः सर्वजनविदितमप्यत्र ज्ञातमित्यर्थमित्यर्थः।

२३। स्वयमेवोद्वेगकारणं वक्ति—इदमिति। इह अस्मिन् यौवनप्रारम्भे मदनस्य कामस्य

জপমুহূর্ত অস্তনির্বোধবশতঃ মন্দীভূত কাষ্ঠে নিশ্বাস লাভ করায় ভগবতীর কথা যেন অন্যরূপ প্রতীয়মান হইতেছে, তবে এখন উদ্বেগের কারণ কি ?

(২১) কাম। ছিন্ন বস্ত্রনির্মিত ভিক্ষুবসনের বিরুদ্ধ তোমাদের সহিত এই পরিচয়ই উদ্বেগের কারণ।

(ণ) লব। কি প্রকার ?

(২২) কাম। অয়ি ! তুমিও কি জান না ?

(২৩) কামদেবের অবলীন অস্ত্রস্বরূপ অকৃত্রিম বিলাসাস্পদে এই মালতীর

[मालती वैचित्त्यं नाटयति ।] (२४)

लव । अत्थि एदं. णरेन्दस्स अणुरोहेण * अमच्चेण अप्पणो पडिवण्णा मालदीत्ति सअलो जणो असच्चं ज्जेव गुञ्जेदि । (त)

(त) अस्त्येतत्, नरेन्द्रस्यानुरोधेन अमात्येन आत्मनः प्रतिपन्ना मालतीति, सकलो जनोऽसत्यमेव गुञ्जति ।

णेवं नन्दनेन सह सुखसम्बन्धानुकूलमिच्छन्, तदा तत्कालविनाशनिवन्धनं यद्विनिश्चित्य इदं मालत्या शरीरं अनुचिन्ताय कुसुमकोमलतया तीव्रतापादिकमनुपलभ्य तदीयमाय वराय कन्यायै "वरो वाञ्छन्ति रूपं" इति विज्ञ. । मन्दमतिस्तर्क्य, तत् अंशदानं तेन दीप्त श्रीनार्हं यत एव विक्रमं विस्फोटनं कुसुमा दस्यादचन्द्रादीनां अभिनय आतिश्रयं, सार-प्रधाने निर्देश:, तत तादृशं भविष्यति इति एतदेव (पूर्वाक्षरार्थविशेषेण इति मतं) । कार्त-कालमिति शेष.। तारान्यादसत्यानुसन्धाया अस्या इदानीमहमनर्थनिवारणसाधन-समाचरणीयमहं न जानामीति भाव: ।

अत्र ऐकान्तिकनियमितप्रयोजनेन वृत्तमाहात्म्य । पुष्पिताग्रावृत्तम् । "अयुजि नयुगरेफतो यकारो युजि च न जौ जरगाश्च पुष्पिताग्रा" इति लक्षणम् ।

(२४) वैचित्त्यं चित्तवैकल्यं नाटयति मुखभङ्ग्यादिना अभिनयति ।

(त) अस्तीति । अवितथमिति यथा श्रुतमिति शेष । अमात्यो मालत्याः स्वामिनानुमतपादी अलीकमेवेत्यादि भाव । प्रतिपन्ना दातुमङ्गीकृता, राजानुरोधेन कथमिदमनुमतमर्थेऽपि दानेऽप्यविलम्बात् यावत् अपि दत्तवतीत्यर्थः तदनन्तरं न अंशदानमिति शेषं अस्ति । गुञ्जति निन्दति । सर्वजननिन्दितत्वादामात्यं तादृश: पिता मालत्या नार्हति इति भावः ।

শরীর আরোগ্য হয়ে সর্বলনিবন্ধন শোচনীয় হইবে, সুতরাং উহার অসামাঞ্জ রূপলাবণ্যাদিও নিষ্ফল হইবে।

(২৪) (মূর্চ্ছনা প্রভৃতি দ্বারা মালতী চিত্তের বৈকল্যাভিনয় করিতে লাগিল)।

(ত) লব। আমি পরিজ্ঞাত আছি যে অমাত্য রাজার বাক্যানুরোধে নন্দনকে মালতীদানের অঙ্গীকার করায় সকলে অমাত্যকে নিন্দা করিতেছে।

* "নরেন্দ্র বচনানুরোধিনী"তি কচিৎ পাঠ:। নরেন্দ্রবচনানুরোধিনীতি বদৎ । অত্র চ । ..সম্ভাবনামালতীয়ো বহুবীচিষু তর্কবিষয়িকম"ইত্যনুযায়মমহীয়োজনম্ ।

माल। [स्वगतं।] कधं उवहारीकिदह्मि तादेण राइणो। (थ)

काम। आश्चर्य्यम्।

गुणापेक्षाशून्यं कथमिदमुपक्रान्तमथवा,
कुतोऽपत्यस्नेहः कुटिलनयनिष्णातमनसाम् ?।
इदं त्वैदम्पर्य्यं यदुत नृपतेर्नर्म्मसचिवः,
सुतादानान्मित्रं भवतु स हि मे * नन्दन इति॥२५॥

(थ) कथमुपहारीकृतास्मि तातेन राज्ञः।

(थ) मालेति। राजानुरोधेनैव दानस्वीकरणात् नन्दनस्य प्रधानसचिवाय राज्ञ उपायनम्। उपहारीकृता उपायनीकृता। यथा देवतोपहारीकृतपश्वादीनां मरणमेव फलं भवेत्, तथैवोपहारीकृताया ममापीति भावः। चित्तवृत्त्यैव विशुद्धभावमभिप्राय्य भाषते। इह दयालापनाम नाट्यालङ्कारः। तदुक्तं—"करुणाभाषितैर्वाक्यैः दयालाप उदाहृत" इति।

(२५) गुणेति। गुणापेक्षाशून्यं रूपशीलवयोविद्यादिगुणविचाररहितमेव इदं कन्यादानम् कस्मात् नन्दनाय अदित्वा अनुरूपरूपलावण्यादिसम्पन्नाय माधवाय कन्यारूपं कथमुपक्रान्तं आरब्धं अमात्येनेति शेषः। एतादृशानुचितकर्म्मस्वीकारे प्रति मन्त्रिणामेव भावः आश्चर्य्य मित्यर्थः। एतादृशानुचितकर्म्मस्वीकारे कारणान्तरमपि सम्भावयति—अथवेति। कुटिलनयो कूटनीतौ निष्णातानि निपुणानि "निष्णातो ज्ञाने प्रवीणो"इत्यनेन निष्णातेति षत्वं, मनांसि येषां तादृशानां अपत्यस्नेहः कुतः? अर्थात् नास्तीति भावः। कूटनीतेरभिप्रायमपि स्वयमेव स्फुटीकरोति—इदमिति। इदं वितर्के निश्चये वा "इदं निश्चयतर्कयो"रिति धरणिः। इदं अपत्यस्नेहशून्यस्यास्य एतद्दानस्य ऐदम्पर्य्यं इदम्परं एतदभिप्रायकमिति यावत्। इदम्परशब्दात् चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्। यत् नृपतेः नर्म्मसचिवः विदूषकः स नन्दनः सुतायाः कन्यायाः दानात् हि मम मित्रं सुहृत् भवतु इति। तथा च राजापि कदाचित् ममाहितं न भवेदित्यभिसन्धिरिति भावः।

(থ) মাল। (স্বগত) পিতা কেন রাজাকে আমায় উপহার দিলেন?

(২৫) কাম। কি আশ্চর্য্য! গুণাদির অপেক্ষা না করিয়া কেন অমাত্য এরূপ দানে স্বীকৃত হইলেন? অথবা যাঁহাদের চিত্ত কেবল কূটনীতি বিষয়ে নিপুণ, তাঁহাদের অপত্যস্নেহ কোথায়? এই দানাঙ্গীকারের ইহাই উদ্দেশ্য যে, রাজার নর্ম্মসচিব সেই নন্দন কন্যাদানদ্বারা আমার পরম মিত্র হউক।

---

† "सहि मे" स्थाने "समनापि"ति क्वचित् पाठः, तुल्य इति तदर्थः।

माल। [स्वगतं।] राआराहणं क्खु तादस्स गुरुअं, ण उण मालदी (द)

लव। एव्वं जधा भअवदीए आणत्तं, अण्णधा तस्सिं वरे दुद्दंसणे अदिक्कन्त-जोव्वणे किं ण विआरिदं अमच्चेण?। (ध)

माल। [स्वगतम्।] हा हदम्हि! समुवत्थिदाणत्थ-वज्जपदणा मन्द-भाइणी (न)

(द) राजाराधनं खलु तातस्य गुरुकं न पुनर्मालती।

(ध) एवं यथा भगवत्या आज्ञप्तं, अन्यथा तस्मिन् वरे दुर्दर्शने अतिक्रान्तयौवने, किं न विचारितममात्येन?

(न) हा हतास्मि, समुपस्थितानर्थवज्रपतना मन्दभागिनी।

अत्रार्थ[illegible] अत्र[illegible]विशेषस्य [illegible]। अर्थापत्तिलक्षणं यथा दर्पणे—"[illegible]" इति। [illegible] शिखरिणी छन्दः।

(द) मालतीति। राजाराधनं राज्ञः तुष्टिसाधनं गुरुकं अभूत्। न पुनर्मालती गुरुर्यस्य। कथमन्यथा मालत्या एवमसदृशवरप्रदानाङ्गीकारेण राजाराधनं क्रियेतेति भावः।

(ध) लवेति। भगवत्या यथा आज्ञप्तं मालत्या नन्दनायार्पणस्य कारणं यथा अभिहितम् एवं एवमेव तदर्थसम्भवः। अन्यथा—राजकारणं विना, तस्मिन् वरे नन्दने, दुर्दर्शने कुरूपे, अतिक्रान्तयौवने वृद्धे। किं किमर्थं न विचारितं किं अविमृश्यैव दानमङ्गीकृतमित्यर्थः।

(न) मालतीति। समुपस्थितम् अनर्थं नन्दनार्पणरूपमनिष्टं एव वज्रपतनं वज्रनिपातो यस्याः, तादृशी मन्दभागिनी अहं हतास्मि तातेन दैवेन वेति शेषः। जीवितमरणात्।

(দ) মাল। (স্বগত) রাজার তুষ্টিসাধনই পিতার অধিক হইল, কিন্তু মালতী নহে।

(ধ) লব। আপনি যাহা বলিলেন, তাহাই ঠিক, নচেৎ কেন অমাত্য হীনযৌবন বৃদ্ধ তুল্য সেই বরে দানাঙ্গীকার করিতে বিচার করিলেন না।

(ন) মাল। (স্বগত) হায় আমি নিতান্ত মন্দভাগিনী, তাই এই অনভিলষিত দানাঙ্গীকাররূপ বজ্রনিপাতে হত হইলাম।

लव। ता पसीदटु भअवदी, परित्ताहि इमादो जीविदमरणादो पिअसहीं, तवावि एधा दुहिदा ज्जेव्व। (प)

काम। अयि, सरले! किमत्रभवत्या मया शक्यं कर्तुम्? प्रभवति प्रायः कुमारीणां जनयिता दैवञ्च। यत्र किल कौशिकी शकुन्तला दुष्मन्तं अप्सराः पुरूरवसञ्चकमे, इत्याख्यानविद आचक्षते, वासवदत्ता च राज्ञे सञ्जयाय पित्रा दत्तमात्मानमुदयनाय प्रायच्छत् इत्यादि, तदपि साहसिकमित्यनुपदेष्टव्यकल्पं, (२६) सर्वथा,—

(प) तत प्रसीदतु भगवती, परित्रायस्व अस्माज्जीवितमरणात् प्रियसखीं, तवाप्येषा दुहितैव।

(प) प्रसीदेति। जीवित जीवनमेव मरणं यस्मात्। प्रियसख्युःखदुःखस्याश्च ईदृश-जीवितस्य मरणकल्पत्वादिति भावः। दुहितैव कन्यातुल्यैव। तथाचास्याः निर्विशेषत्वेन करुणया वा यथास्या नन्दनार्पणं न भवेत्तथा यतितव्यमिति भावः।

(२६) कामेति। विवाहमध्ये तद्विषयं भावमवचसीति दर्शयितुमामन्त्रयति—सरले इति। ऋजुप्रकृतिके इत्यर्थः। अत्र अस्मिन् नन्दनार्पणविषये, अनन्यस्याः निरतिशयसौन्दर्य-सद्गुणादिभिः सर्वजनपूज्यायाः मालत्या इति शेषः, किं कर्तुं मया शक्यं न किमपि शक्य-मित्यर्थः। अनकारणमेव मन्मथानुवर्तित्वे किं कर्तुं मया शक्यम्? न किमपीत्यर्थोऽपि ध्वन्यते। अशक्यत्वे हेतुमाह—प्रभवतीति। कुमारीणामिति दानादाविति शेषः। गान्धर्व-विवाहे कन्यावरयोरपि प्रभुत्वमस्तीत्यावेदयितुं प्रायःपदमुपात्तम्। साहसी मतिं निवेदयितुं प्रसङ्गात् पुरावृत्तं कथयन्तः कीर्तयति—यत्रेति। कौशिकस्य विश्वामित्रस्यापत्यं स्त्री कौशिकी। दुष्मन्तमिति चकमे इत्यादावन्वयः। अप्सरा उर्वशी पुरूरवसं तन्नामानं चन्द्रवंशीयराजानं चकमे स्वयमेव कामयते स्म। आख्यानविदः पुरावृत्ताख्यानादिपारदर्शिनः आचक्षते कीर्तयन्ति। दत्तं दातुमङ्गीकृतम्। प्रायच्छदित्यादीति आचक्षते इत्यनेनैवान्वेति। साहसिकं साहसिकस्य कर्म, इति हेतोः अनुपदेष्टव्यकल्पं वाक्यैकदेशायोग्यं आत्महितमिच्छता यदि

(প) লব। অতএব ভগবতী আপনি প্রসন্না হউন, প্রিয় সখীকে এই জীবন্মৃত অবস্থা হইতে রক্ষা করুন। মালতী ত আপনার কন্যার তুল্য।

(২৬) কাম। অয়ি সরলে! সৌন্দর্য্য-সৌরভে সর্বজনপূজ্য মালতীর নন্দনার্পণবিষয়ে আমি কি করিতে পারি? যে হেতু কুমারীদিগের দানাদিবিষয়ে পিতা এবং দৈবই প্রায় কর্ত্তা। তবে বিশ্বামিত্রকন্যা শকুন্তলা দুষ্মন্তকে, ও

द्वितीयोऽङ्कः ।

राज्ञः प्रियाय सुहृदे सचिवाय कार्य्यात्
दत्त्वात्मजां भवतु निर्वृतिमान् अमात्यः ।

स्वयमेव प्रवर्त्तेथां, तदाहमपि साहाय्यं कार्य्यमिति भावः । कल्पपदोपादानादीदृगवस्थायां तदुपदिष्टमसिद्धोऽपि भवती ।

अत्र भद्रा साहसाधीनसाधनप्रदर्शनेन भेदो नाम मुखसन्ध्यङ्गं, "भेदः प्रोत्साहना" इति दर्पणधृतलक्षणात् । आख्यानाख्यो निदर्शनाख्यश्च नाट्यालङ्कारः प्रर्थ । तल्लक्षणं यथा—"आख्यानन्तु तदुद्दिष्टं यत् पुरावृत्तकीर्त्तनं । कथनादन्यचेष्टानां साध्यसिद्धिर्निदर्शनम्" इति ।

"स्त्रियाः बहुष्वपत्येषु" इत्याद्यमरानुशासनैरपत्यशब्दस्य बहुत्वविधानस्य प्रायिकता-द्वात्प्रमा एकवचननिर्देशेऽपि न च्युतसंस्कारतादोषः । अत एव कालिदासपरिगृहीता श्रीपतिना "या च जनीकस्य समा अपत्यम्" विकल्पेनैव बहुत्वं विहितमित्याद्यनुसन्धेयम् ।

पुराकिल कण्वो नाम महर्षिर्विश्वामित्रेण मेनकायामुत्पादितां कन्यां मातापितृभ्यां परित्यक्तां स्वाश्रमे समानीय शकुन्तलानामधेयां प्रतिपालितवान् । तत्र प्राप्तयौवनां तामतिथिसत्कारे नियोज्य तपश्चरणार्थं गते महर्षिकण्वे तमनपेक्ष्यैव सा शकुन्तला तपोवनदर्शनार्थमागताय दुष्मन्ताय आत्मानं स्वयमपि समर्पितवतीति महाभारतादिवर्णना ।

पुरा पुरातनमुनिर्नारायणस्तपोविघ्नार्थमागतानामप्सरसां मदभङ्गं कर्त्तुमूरोरुर्वशीमतिशयसुन्दरीमुत्पादयामास, सा चैकदा दैत्यैरपह्रियमाणा कृतार्त्तस्वरा पथि गच्छन् पुरूरवा नाम चन्द्रवंशीयनरपतिर्हत्वा तानाहरत्, तदानीमेव सोर्वशी जितकन्दर्पं भूपम् अन्यनिरपेक्षैव कामयते स्मेति हरिवंशीयकथा ।

आसीत् पुरा प्रद्योतनामा नरपतिः, स च स्वीयकन्यां वासवदत्तां सञ्जयनाम्ने राज्ञे दातुमभिलषितवान् ; ततश्च सा वासवदत्ता वत्सराजमुदयनं स्वप्ने समालोक्य तत्रानुरक्ता गुरुजनमनपेक्ष्यैव दूतमुखेन तस्मै राज्ञे स्वाभिलाषं विज्ञापितवती । उदयनोऽपि तामपहृत-वानिति कथासरित्सागरकथा चानुसन्धेया ।

অপ্সরা উর্ব্বশী পুরুরবাকে যে (অন্যমুখাপেক্ষিণী না হইয়াই) কামনা করিয়াছিল, ইহা পুরাণশাস্ত্রবিদ্গণ বলিয়া থাকেন, এবং বাসবদত্তা যে সঞ্জয়নামক রাজাকে দেওয়ার জন্য পিতা কর্তৃক অঙ্গীকৃত হইয়াও উদয়নে আত্মসমর্পণ করিয়াছিলেন, তাহাও সাহসিকের কর্ম্ম, সুতরাং উপদেশের অযোগ্য।

दुर्दर्शनेन घटतामियमप्यनेन,
धूमग्रहेण शशिनो विमला कलेव ॥ २७ ॥

मालती । [सास्रं स्वगतं ।] हा ताद ! तुमम्पि मम णाम एव्वंत्ति सव्वधा जिदं भोअतिह्णाए । (फ)

(फ) हा तात ! त्वमपि मम नाम एवमिति सर्वथा जितं भोगतृष्णया ।

२७। साम्प्रतं लोकव्यवहारविशेषज्ञः पितुः स्वार्थान्धत्वं वत्सस्य च दोषं भग्या प्रतिपादयति —राज्ञ इति । अमात्य भूरिवसु:, कार्य्यात् स्वीयाभीष्टसाधनानुरोधात् राज्ञः नरपतेः प्रियाय प्रीतिनिमित्ताय सुहृदि भोक्त्राहं गात्रिकां । विधमुक्तोर्नश्वसि सपुत्रो भावप्रकाशी । यथा—

"अन्यथासमर्थयतिव्यवकुर्वन् प्रियं वदन् ।
भजते यः स्वच प्रीतिं प्रियः स परिकीर्तितः ॥
दुःखे विपदि सम्मोहे कार्य्याकार्य्यार्थेऽपि च ।
हितार्थी यो च हितकृद्यः सुहृत् सोऽभिधीयते" ॥

मदिरावत् मन्मथमालाया नन्दनाय आत्मजा कन्या दत्ता निर्वृतिमान् सुखी राजद्वारि अनिष्टाचरणाद्विरमन्निव विचित्त इति यावत्, भवतु ! तथा इयमपि मालती दुर्दृष्टं दर्शनं यस्य तेन दर्शनादेवानिष्टसूचकेनेत्यर्थः, धूमग्रहेण धूमकेतुनाम्ना ग्रहविशेषेण । धूमकेतुरुदितः, एवाशुभं ददातीति प्रसिद्धिः. विमला मलरहिता शशिनश्चन्द्रस्य कला इव दुर्दर्शनेन कुरूपेण अनेन नन्दनेन सह घटतां सयुज्यताम्, पितुर्निर्दयत्वादिति भावः । धूमकेतुसदृशेन नन्दनेन सह, शशिकलातुल्यायाः मालत्याः सम्मेलनमतीव दुःखजनकमित्यर्थोऽस्य ध्वन्यते । अत्रोपमानुप्रासयोः सङ्करः । वसन्ततिलकं वृत्तम् ।

(फ) मालतीति । एव अनर्थसम्पादकः । इति शेषः. भोगतृष्णया विषयोपभोगाकाङ्क्षया, जितं सर्वोत्कर्षेण वृत्तम् । यथा भोगतृष्णया त्वं परमस्नेहास्पदामपि मामात्मजां कुरूपाय निष्कान्तयौवनाय दातुं न कुण्ठितोऽसि मन्ये नैव सर्वथा वशवर्तीति भावः ।

(২৭) অমাত্য ভূরিবসু স্বকীয়াভীষ্ট সিদ্ধির অনুরোধে রাজার প্রিয়সুহৃৎ অমাত্য নন্দনে আত্মজাকে দান করিয়া সর্ব্বপ্রকারে নিশ্চিন্ত হউন। নির্ম্মল শশিকলা যেমন দুর্দ্দর্শন ধূমকেতুর সহিত সম্মিলিত হয়, সেইরূপ এই মালতীও কুরূপ এই নন্দনের সহিত সম্মিলিত হউক।

(ফ) মাল। (অশ্রুবিসর্জ্জন করিতে করিতে স্বগত) হা তাত! তুমি ও

अव । चिराअदि भअवदीए, णं भणामि, असुत्थसरीरो महाभाओ माहवोत्ति । (च)

काम । गम्यते, वत्से ! अनुजानीहि माम् । (२८)

लव । [जनान्तिकम् ।] सहि ! मालदि ! सम्पदं भअवदीए सआसादो, तस्स महाणुभावस्स उग्गमं जाणीमो । (म)

(च) चिरयति भगवती, ननु भणामि अस्वस्थशरीरः खलु महाभागो माधव इति।

(म) सखि । मालति । साम्प्रतं भगवत्याः सकाशात्, तस्य महानुभावस्य उद्गमं जानीमः ।

(च) अवेति । वाक्छलीकरणकालानुकूलतया स्थितः स्वार्थैकत्वं मदनस्य च सर्वेन्द्रियाणां मालत्यां निवेदितं अथवा माधवसमागमस्यापि प्रत्याहरणमेवेति अवसरानुरोधिनामुक्तिका रचयति— चिरायतीति । चिरायति विलम्बं करोति । अस्वस्थशरीरः पीडाभिभूतदेहः तदानुपूर्व्यं तत्र गमनमित्याशयः ।

(२८) कामेति । गम्यत इत्यवलोकिता प्रत्युक्तिः, मधुरैव गमन इत्यर्थः । मालतीं प्रत्याह— वत्से इति । अनुजानीहि अनुमतिं विधेहि गमनायेति शेषः । अत्र "मैत्री"नाम सुखमुखाङ्गं, "मैत्र्यं संहितमित्यत्र"मिति दर्पणलक्षणात् ।

(म) लवेति । जनान्तिकमित्यस्य त्रिपताकाकरेणान्यानपवार्यान्तरा कथाम् । "अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्"मिति भरतोक्तं लक्षणम् । तस्य माधवस्य ; उद्गमं उत्पत्तिम् ।

আমার এরূপ অনর্থসম্পাদক হইয়াছে ? সুতরাং তোমরাই সর্বপ্রকারে অবধান করিবে।

(চ) অব। ভগবতী অনেক বিলম্ব করিলেন, আমি বলিতেছি যে, মহাভাগ মাধব অসুস্থ।

(২৮) কাম। (অবলোকিতার প্রতি) বৎসে। আমি যাইতেছি। (মালতীর প্রতি) আমাকে (গমনের) অনুমতি কর।

(ম) লব। (জনান্তিকে) সখি মালতি! সম্প্রতি ভগবতীর নিকট হইতে সেই মহানুভাবের (মাধবের) উৎপত্তিকথা পরিজ্ঞাত হই।

माल। [अपवार्य्य] सहि! अत्थि मे कोदूहलं। (म)

लव। [प्रकाशम्।] भअवदि! को एसो माहवो णाम, जस्स भअवदी सिणिद्धगुरुअं अत्ताणं धारेदि? (य)

काम। अप्रस्ताविकी महती एषा कथा। (२८)

लव। तधावि आचक्खदु, मे भअवदी। पसादं करेदु। (र)

(म) सखि। अस्ति मे कौतूहलम्।

(य) भगवति। क एष माधवो नाम, यस्य भगवती स्वं स्निग्धगुरुकमात्मानं धारयति?

(र) तथाप्याचष्टां मे भगवती प्रसादं करोतु।

(म) मालेति। अपवार्य्य अपवारितं कृत्वा, अपवारितलक्षणं, यथा दर्पणे— "...तद्भवेदपवारितम्। रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते। त्रिपताककरेणान्यानपवार्य्यान्तरा कथा"मिति। मे ममापि कौतूहलं औत्सुक्यं अस्ति तत् श्रोतुमिति शेषः। तस्मात् पृच्छेत्यर्थः।

(य) लवेति। प्रकाशं प्रकटे इति शेषः। कश्चिदयमित्यर्थकः पाठः। स्वं स्नेहगुरुकं आत्मस्नेहभाजनम्।

(२८) कामेति। अप्रस्ताविकी अप्रासङ्गिकी, महती विस्तृता च, सुतरां तत्कथनस्य नायमवसर इति भावः। श्रोतृणामतिशयौत्सुक्योत्पादनाय कविनोक्तिरियम्।

(र) लवेति। तथापि यद्यप्रस्ताविक्यपि, आचष्टां कथयतु, मदनुरोधादिति शेषः। अथ तदनुरोधो रक्षितव्य इत्याकाङ्क्षायामाह— प्रसादं करोतु इति। तदभिधानरूपमनुग्रहं विधेहीत्यर्थः।

(ম) মাল। (অন্যের অশ্রুতভাবে প্রকাশকরতঃ) সখি! আমারও (সে কথা শুনিতে) কৌতূহল আছে।

(য) লব। (প্রকাশ্যে) ভগবতি! মাধবনামক এ ব্যক্তি কে? যাহার অন্ত ভগবতীর আত্মা অতি স্নেহপ্রবণ।

(২৯) কাম। একথা অপ্রস্তাবিক ও অতি বিস্তৃত। (সুতরাং এখন বলিবার উপযুক্ত নহে।)

(র) লব। তথাপি ভগবতী অনুগ্রহ করিয়া আমার নিকট বলুন।

कामं। श्रूयतां, अस्ति विदर्भाधिपतेरमात्यः, समस्तधुर्य्यपुरुषप्रकाण्डचक्रचूड़ामणिर्देवरातो नाम, यम् अशेषभुवनसम्भावनीयपुण्यमहिमानम् आत्मनः सतीर्थ्यं पितैव ते जानाति योऽसौ यादृश इति (३०) अपि च—

व्यतिकरितदिगन्ताः श्वेतमानैर्यशोभिः,
सुकृतविलसितानां स्थानमूर्ज्जस्वलानाम्।
अकलितमहिमानः केतनं मङ्गलानाम्,
कथमपि भुवनेऽस्मिन् तादृशाः सम्भवन्ति ॥ ३१ ॥

---

(३०) कामेति। अपि कार्य्यमात्रं कामयो युवां भविष्यतः, समस्तानां सकलानां धुर्य्यपुरुषाणां प्रकाण्डचक्रं श्रेष्ठसमूहः तस्य चूड़ामणिः चूड़ामणिरिव सर्व्वश्रेष्ठ इत्यर्थः। अशेषभुवनैः सर्व्वभुवनवासिलोकैरित्यर्थः, सम्भावनीयौ पूजनीयौ पुण्यमहिमानौ यस्य तं आत्मनः स्वस्य सतीर्थ्यं सहाध्यायिनं (समाने तीर्थे गुरावाश्रमे वसतीति सतीर्थ्यः यत्प्रत्ययः) "सतीर्थ्यास्त्वेकगुरव" इत्यमरः। ते तव जानका इत्यर्थः। सहाध्यायितया बहुकालमेकत्रावस्थानेन तव पितैवास्य सत्यगुणाद्यावादीनि सर्व्वाणि जानातीति सन्नत्वमेनावगमितिर भावः।

(३१) तस्यापि यथावत् किञ्चित् गुणवर्णनमाह—व्यतिकरितेति। श्वेतमानैः (श्वेतवर्णैः इति श्वेतधर्म्मोपमत्वात् इत्यम्) यशोभिः कीर्त्तिभिः, व्यतिकरः सम्बन्धः सञ्जातः एषामिति व्यतिकरिताः तारकादित्वादितच्, दिगन्ता येषां ते व्यतिकरितदिगन्ताः यशोव्याप्तदिगन्ता इत्यर्थः। ऊर्ज्जस्वलानां प्रबलानां सुकृतविलसितानां शुभादृष्टकार्य्याणां अथवा सुकृतानां पुण्यानां विलसितानां विलासानाम् स्थानमास्पदम्। तथा अकलित अपरिच्छिन्नः महिमा प्रभावः येषां ते तथोक्ताः। एवं मङ्गलानां कल्याणानां केतनं निवासः। "केतनम् ध्वजे कार्य्ये निमन्त्रणनिकेतयोः" इति विश्वः। तादृशाः ईदृशमनुष्याः पुरुषाः अस्मिन् भुवने कथमपि केवलं

---

(৩০) কাম। শ্রবণ কর। সমস্ত প্রধান মন্ত্রিপুরুষসমূহের চূড়ামণিস্বরূপ দেবরাতনামে বিদর্ভাধিপতির এক অমাত্য আছে, ত্রিভুবনসমাদৃত পুণ্যপ্রভাবশালী সেই দেবরাতকে তোমার পিতাই নিজের সহাধ্যায়িরূপে জানেন, উনি যেও যাদৃশ।

(৩১) আরও শোন। যাঁহাদের শুভ্র যশঃসমূহে দিগন্ত পরিব্যাপ্ত, যাঁহারা

मालती। [सहर्षं] सहि! तं क्खु भअवदीगहिदणामधेअं सव्वदा तादो सुमरेदि। (ल)

लव। सहि! सम्मं क्खु भअवदीए गुरु स आसादो विज्जाहीगमो किदो त्ति, तक्कालसंवेदिणो मन्तअन्ति। (व)

(ल) सखि! तं खलु भगवतीगृहीतनामधेयं सर्वदा तातः स्मरति।

(व) सखि! सम्यं खलु भगवत्या गुरुसकाशाद्विद्याधिगमः कृत इति तत्कालसंवेदिनो मन्त्रयन्ते।

कथमिव कथञ्चित् शापादिभिः कदाचिदित्यर्थः, सम्भवन्ति उत्पद्यन्ते। सर्वगुणाढ्याः महापुरुषा मर्त्यलोके शापादिभिर्योगभ्रष्टाः कदाचित् सम्भवन्त्यपि विरला इति भावः। अत्र प्रागुक्तमहत्त्वशीलाद्युक्तस्य विशेषणानि इति वेद्यं प्रमाणमिति विधेयप्राधान्यात् नपुंसकत्वमेकत्वञ्च बोध्यम्। ६

अत्र ईश्वरस्य माधवस्य कार्ये सति बहूनां कारणानां प्रदर्शनात् समुच्चयालङ्कारः। तल्लक्षणं यथा दर्पणे—"समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके। खले कपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत्। गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये" इति। मालिनी वृत्तम्।

(ल) मालतीति। भगवत्या कामन्दक्या गृहीतं कथितं नामधेयं नाम यस्य तादृशं देवरातमित्यर्थः। भगवत्या देवरातस्य आपि गुरुकुले सहाध्यायित्वात् तस्यामपि च आत्मवार-विहारतया देवरातमित्यनुमाय "भगवत्या गृहीतनामधेयं च" मिति तत्रोक्तमिति मन्तव्यम्।

(व) लवेति। सम्यगिति देवरातभूरिवसुभ्यामिति शेषः। तत्कालवेदिनः तत्समकालिकाः मन्त्रयन्ते कथयन्ति। तथाच सतीर्थ्यादेवेषां परस्परं सौहार्दं, प्रणयः, तदेतत् सर्वमुपपन्नमिति भावः।

প্রবল পুণ্য বিলাসের আশ্রয়স্বরূপ, যাঁহাদের প্রভাব অপরিচ্ছিন্ন ও যাঁহারা মঙ্গলের নিবাসস্বরূপ দেবতাদের ন্যায় তাদৃশ মহাপুরুষ এ জগতে অল্পই সম্ভূত হইয়া থাকে।

(ল) মাল। সখি! ভগবতী যাঁহার নাম করিলেন, সেই মহাপুরুষকে সর্ব্বদাই আমার পিতা স্মরণ করেন।

(ব) লব। সখি! ভগবতীও তাঁহাদের সহিত গুরুসকাশে বিদ্যাভ্যাস করিয়াছিলেন, ইহা তৎসময়সাময়িক ব্যক্তিগণ বলিয়া থাকেন।

काम। तत उदयगिरेरिवैक एव
स्फुरितगुणद्युतिसुन्दरः कलावान्।
इह जगति महोत्सवस्य हेतु-
र्नयनवतामुदियाय बालचन्द्रः॥ ३२॥

लव। [जनान्तिकम्।] सखि! अवि णाम माहवो भवे? (अ)

(अ) सखि! अपि नाम माधवो भवेत्?

(३२) अहं बालभावमाय माधवस्य पितृगुणानुरूपां कलाविद्यां तदुत्पत्तिं कथयति—तत इति। उदयगिरिः उदयाचलादिव ततस्तस्मात् देवरातात् एक एव द्वितीयरहितः (एतेन द्वितीयैकापत्यतयाऽतीव स्नेहास्पदोऽयमिति सूचितम्) स्फुरिता उल्लसिता उत्कर्षमिता गुणानां रूपादीनां द्युत्या कान्त्या सुन्दरः सुभगः, यद्वा स्फुरिता गुणद्युतिर्यस्य स स्फुरितगुणद्युतिः स चासौ सुन्दरश्चेति कर्मधारयः। कलावान् नृत्यगीतादिचतुःषष्टिकलाभिज्ञः। (भाविन्यपि तादृशविद्याशालित्वे अलौकिकाकृतिदर्शनेन भाविनि भूतवदुपचारादुत्पत्तिकालेऽपि कलावत्त्वाभिधानमविरुद्धम्) इह जगति नयनवतां चक्षुष्मतां दर्शनशक्तिशालिप्राणिमात्राणामित्यर्थः, महोत्सवस्य परमानन्दस्य हेतुः कारणं बालश्चन्द्र इवेति बालचन्द्रः (उपमितसमासः) चन्द्रसदृशः कश्चिद्बालक इत्यर्थः, उदियाय उत्पन्नः। अत्र चन्द्रपक्षेऽपि तुल्यार्थकतयैव सर्वं विशेषणं योज्यं, केवलं कलावानिति षोडशकलः इत्यर्थकम्। तदत्र उदयगिरेरिवेत्युपमानुसारात् श्लेषगर्भो पूर्णोपमालङ्कारः। पूर्णोपमायाः लक्षणं यथा दर्पणे—"सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च। उपमेयञ्चोपमानं भवेद्वाच्य"मिति॥ पुष्पिताग्रा वृत्तम्॥

(अ) लवेति। माधवो भवेदिति मदयन्त्या कथितोऽसौ बालचन्द्र इति शेषः।

(৩২) কাম। উদয়াচল হইতে চন্দ্রের ন্যায় সেই দেবরাত হইতে এক অদ্বিতীয় বালক উৎপন্ন হইয়াছে, যে বালক বিকাশিত রূপাদি কান্তিদ্বারা অতিসুন্দর ও চতুঃষষ্টিকলাভিজ্ঞ, এবং সে এই জগতে নেত্রশালী প্রাণিমাত্রেরই পরমানন্দের কারণ।

(ক) লব। (জনান্তিকে) সখি। সেই বালকই মাধব হইবে?

काम। असौ विद्याधारः शिशुरपि विनिर्गत्य भवनात्
इहायातः सम्प्रत्यविकलशरच्चन्द्रवदनः।
यदालोकस्थाने भवति पुरमुन्मादतरलैः,
कटाक्षैर्नारीणां कुवलयितवातायनमिव॥ २३॥

अत्र बालसुहृदा मकरन्देन सह, विद्यामान्वीक्षिकीमधिगच्छति, स एव माधवो नाम इति। (२४)

---

(२३)। असाविति। अविकलशरच्चन्द्रवदनः पूर्णशरच्चन्द्रवत्सुन्दरास्यः शिशुरपि बालोऽपि "बालो बापूर्णषोडश" इति वचनात् षोडशवर्षवयस्कोऽपि सन्नित्यर्थः। अन्यथा सर्वथा शिशोर्विद्याधारत्वायोग्यतयाऽसङ्गतेः। विद्याधारः आन्वीक्षिकीभिन्नविद्यानामाश्रयः न तु आन्वीक्षिकी अधिगच्छतीत्युत्तरवाक्यासङ्गतेः। असौ देवरातनन्दनः भवनात् स्वगृहात् विनिर्गत्य सम्प्रति इह अस्मिन्नगरे आयातः आगतः। यस्य आलोकस्थाने दर्शनयोग्यप्रदेशे पुरं नगरं (कर्तृ) उन्मादतरलैः कामावेशचपलैः नारीणां स्त्रीणां कटाक्षैः दृष्टिपातविशेषैः (करणैः) कुवलयितानि सञ्जातनीलोत्पलानि वातायनानि गवाक्षजालानि यत्र तत् तथोक्तमिव भवति। येन पथायं गच्छति तत्रत्याः पुरसुन्दर्यो वातायनैरेवं अयमयेन पश्यन्ति, येन तासां नयनैः वातायनानि सञ्जातकुवलयानि इव लक्ष्यन्त इति सरलार्थः। अनेन लोकोत्तरमस्य सौन्दर्यमिति सूचितम्।

अत्र शरच्चन्द्रवदन इति लुप्तोपमा, कुवलयितवातायनमिवेत्युत्प्रेक्षा, अनयोः परस्परनैरपेक्ष्येण संसृष्टिः। शिखरिणी वृत्तम्॥

(२४) अत्रेति। अत्र नगरे ईक्षा अन्वीक्षा पश्चादर्थदर्शनं तेन प्रयोजनमस्या इत्यान्वीक्षिकी तर्कविद्या "आन्वीक्षिकी दण्डनीती तर्कविद्यार्थशास्त्रयोः" इत्यमरः। तां अधिगच्छति अधीते।

---

(৩৩) কাম। যাহার বদন শরৎকালের পূর্ণ শশধরের ন্যায়, এবং যাহার দর্শনযোগ্য স্থানে কামাবেশচপলা নারীদিগের কটাক্ষদ্বারা পুরের বাতায়নগুলিতে নীলোৎপল উৎপন্ন হইয়াছে বলিয়া বোধ হয়, ষোড়শবর্ষবয়স্ক হইয়াও আন্বীক্ষিকী ভিন্ন সমস্ত বিদ্যার আধার এই বালক ভবন হইতে নির্গত হইয়া সম্প্রতি এস্থানে আসিয়াছে।

(৩৪) এস্থানে আসিয়া বাল্যসুহৃৎ মকরন্দের সহিত আন্বীক্ষিকী বিদ্যা অধ্যয়ন করিতেছে। এই দেবরাতাত্মজই মাধব।

माल०। [सानन्दं जनान्तिकम् ।] सहि ! सुदं तुए ? (य)

लव। सहि ! कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्गमोत्ति । (र)

[नेपथ्ये शङ्खध्वनिः ।]

काम। अहो ! कालातिपातः ! (३५) सम्प्रति हि—

(य) सखि ! श्रुतं त्वया ?

(र) सखि ! कुतो वा महोदधिं वर्जयित्वा पारिजातस्य उद्गम इति ।

"स्वभेदे नाम्यतरैवर्था"मिति न्यायादत्र विचालिन्यस्य न वैयर्थ्यम् । वक्ष्यमुपसंहरति—स एवेति । स एव देवरातात्मजः स्वल, स एव माधवो नामेत्यर्थः । अपि विदर्भाधिपतेरित्यादि-सन्दर्भेण माधवं प्रति मालत्यनुरागस्य व्यञ्जितस्य माधवाय बहुकौतूहलात् छिद्रिनोम मान्यप्रश्नयः । तदुक्तं दर्पणे—"बहुना कौतुकं छिद्रितमिय वार्तेविवृते" इति ।

(य) मालतीति । श्रुतमिति माधवस्य सद्वंशोत्पन्नत्वादिकमिति शेषः । एतेन विशेषानुरागोदयो दर्शितः, तेन च अङ्गं धो नाम मुखसन्धेरङ्गमुक्तं । तल्लक्षणं यथा दर्पणे—"बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति ।

(र) लवेति । महोदधिं महार्णवं वर्जयित्वा परित्यज्य स्थितात् कुतः अन्यस्मात्स्थान इत्यर्थः, तदावाप्यास्तत्स्थितिकिम्पैककन्याकस्मात् प्रियं दृष्ट्वा मुखं त्वादित्यादि वर्णयित्वेत्यत्र काकुप्रश्नः ।

अत्र महोदधिभिन्नात् पारिजातोत्पादासम्भवरूपादप्रस्तुतात् अस्मात् देवरातभिन्नात् माधवो-तत्पादासम्भवरूपस्य प्रस्तुतस्य समस्य गम्यमानत्वे न अप्रस्तुतप्रशंसालङ्कारः । तल्लक्षणं यथा दर्पणे—"क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः । कार्यान्निमित्तं कार्यं च हेतोरथ समात् समम् ॥ अप्रस्तुतात् प्रस्तुतश्चेद्गम्यते पञ्चधा ततः । अप्रस्तुतप्रशंसा स्यादिति" ॥

(३५) कामेति । कालातिपातः कालक्षेपः जातवान् इति शेषः । प्रस्ताविततथाथाऽऽकथा-दतिकालोऽपि कालो न परिज्ञात इति भावः । कालातिपातमेव समर्थयति—सम्प्रति हि इति ।

(য) মাল। (আনন্দের সহিত জনান্তিকে) সখি। তুমি শুনিলে ?

(র) লব। সখি ! মহোদধি ভিন্ন আর কোথা হইতে পারিজাতের উৎপত্তি হয় ?

(নেপথ্যে শঙ্খধ্বনি হইতে লাগিল)

৩৫। কাম। আহা (কথাপ্রসঙ্গে) অনেক কালক্ষেপ হইয়াছে ! সম্প্রতি—

क्षिपन्निद्रामुद्रां मदनकलहच्छेदसुलभाम्
अपायोत्कण्ठानां विहगमिथुनानां प्रथमतः ।
दधानः सौधानामलघुषु निकुञ्जेषु घनताम्
असौ सन्ध्याशङ्खध्वनिरनिभृतः खे विचरति ॥ २६ ॥

तदुत्तिष्ठामः * (२७) । [इत्युत्तिष्ठति (२८) ।]

---

(२६) क्षिपन्निति । असौ श्रूयमाणः अनिभृतः अगुप्तः अतिविस्पष्ट इति यावत्, सन्ध्याशङ्खध्वनिः प्रतिदिननियमितः सन्ध्यासूचकः शङ्खशब्दः, अपायात् आसन्नविरहभावनया लब्धा उत्कण्ठा औत्सुक्यविशेषो यैस्तेषां विहगमिथुनानां चक्रवाकदम्पतीनां मदनकलहच्छेदेन सुरतावसानेन सुलभां सुप्राप्यां निद्रामुद्रां स्वापजनितमुद्रितावस्थां प्रथमतः आदौ क्षिपन् *विरहहेतुभूतरात्र्युपस्थितिज्ञापनेनापसारयन्*, ततः अलघुषु विशालेषु सौधानां प्रासादानां निकुञ्जेषु मध्यदेशेषु घनतां गाढतां प्रतिध्वनिना बहुलतामित्यर्थः, दधानः धारयन् खे आकाशे विचरति प्रसरति । तथाच सन्ध्या समागतेति नात्र विलम्बः कर्त्तव्य इति भावः ।

अत्र चक्रवाकमिथुनानामिति विशेषे वक्तव्ये विहगमिथुनानामिति सामान्यप्रयोगात् विशेषेऽविशेषाख्यदोषः । निकुञ्जशब्दस्य लतागृहवाचित्वेऽपि सौधमध्यभागस्य निकुञ्जशब्दमुख्यार्थत्वाभावात् मध्यभागवाचकनिकुञ्जशब्दप्रयोगात् नेयार्थत्वदोषः, अथवा लाक्षणिकत्वमात्र एव तद्दोषप्रसङ्गात् ।

एतस्य शङ्खध्वनेः क्रमेण चक्रवाकवर्गसौधमध्यभागगगनेषु विचरणात् पर्य्यायालङ्कारः । तल्लक्षणं यथा दर्पणे—"क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् । भवति क्रियते वा चेत्तदा पर्य्याय इष्यते ॥" शिखरिणी वृत्तम् ॥

(२७) तत् तस्मात् कालक्षेपादित्यर्थः ।

(२८) अवलोकितया सह कामन्दकीति शेषः ।

---

(২৬) সন্ধ্যাকাল নিয়মিত শ্রূয়মাণ অতি বিস্পষ্ট এই শঙ্খধ্বনি প্রথমতঃ বিরহাশঙ্কায় উৎকণ্ঠিত চক্রবাকমিথুনের সুরতাবসানজনিত নিদ্রাবস্থাকে অপসারিত করিয়া বিশাল সৌধমধ্যভাগে গাঢ়তালাভ করতঃ আকাশে বিচরণ করিতেছে।

(২৭-২৮) তবে আমরা উঠি, (এই কথা বলিয়া অবলোকিতার সহিত কামন্দকী উঠিলেন)।

---

* "भगवति ! सुखं स्थीयता"मिति पाठान्तरम् ।

माल । [अपवार्य्य] कधं उवहारीकिदह्मि ताडेण राअआराहणं क्खु तादस्स गुरुअं ण उण मालदी । [सास्रं ।] हा ताद ! तुमम्पि णाम मम एव्वं त्ति सव्वधा जिदं भोअतिह्नाए । [सानन्दं ।] कधं महाकुलप्पभवो वि सो महाणुभाओ, सुभणिदं पिअसहीए कुदो वा महोदहिं वज्जिअ पारिजादस्स उग्गमोत्ति । अवि णाम तं पुणोवि पेक्खिस्सं (छ)

लव । अवलोइदे ! इदो एहि, एदिणा सोवाणेण † ओदरह्म (ज) ।

(छ) कथमुपहारीकृतास्मि तातेन, राजाराधनं खलु तातस्य गुरुकं, न पुनर्मालती । हा तात ! त्वमपि नाम ममैवमिति, सर्व्वथा जितं भोगतृष्णया । कथं महाकुलप्रभवोऽपि स महानुभावः, सुभणितं प्रियसख्या, "कुतो वा महोदधिं वर्ज्जयित्वा पारिजातस्योद्गम" इति । अपि नाम पुनरपि तं प्रेक्षिष्ये ।

(ज) अवलोकिते । इत एहि एतेन सोपानेनावतराव. ।

(छ) अपवार्य्य वलितग्रीवं पराङ्मुखं निभृतमिति यावत् । "निगूढभाषणं तु स्यादपवारितकं मतं"मिति भरतः । पूर्व्वोक्तमपि तु विन पुनः कथयति—कथमित्यादि । महाकुलप्रभवोऽपि प्रथितवंशसम्भूतोऽपि न केवलमसामान्यरूपलावण्यशालित्वादिमत्त्वात्र वस्तवेरम् । स माधवः, महानुभावः, महाप्रभावः । अपि प्रश्ने, नाम सम्भावनायां, तं माधवं पुनरपि प्रेक्षिष्य इति इतः परमिन्नतदर्शनेऽपि जीवन सार्थकं भवेदिति भावः ।

(ज) एहीति । इत अस्मा दिशि एहि आगच्छ । अत्र केवलावलोकितायाः आह्वानेन सर्व्वं सखिजनायाः किञ्चिदनुगमनमिति सूचितम् ।

(छ) माल। (ग्रीवা ফিরাইয়া নিভৃতে) কেন বাজোদ্দেশে পিতা আমাকে উপহার দিলেন ? রাজার তুষ্টিসাধনই পিতার গুরুতর হইল, মালতী নহে ! (অশ্রু বিসর্জন করিয়া) হা তাত ! তুমিও আমার প্রতি একপ দারুণ হইলে ? সুতরাং ভোগতৃষ্ণাই সর্ব্বথা জয় লাভ করিল। (আনন্দের সহিত) কেন মহাকুলপ্রসূত হইয়াও তিনি মহাপ্রভাবশালী, অতএব প্রিয়সখী ভালই বলিয়াছে, "মহোদধি ভিন্ন কোথা হইতে পারিজাতকুসুমের উৎপত্তি হয়" ? এ দিকে এস, এই সোপানদ্বারা অবতরণ করি।

† "संजमनेणे"ति क्वचित् पाठ, संजमनेन चतुःशालेनेति तदर्थः । "सञ्जवनमिदं । चतुःशाल"मित्यमरः ।

काम [अपवार्य्य।] साधु, सम्प्रति मया तटस्थयैव, मालतीं प्रति निसृष्टार्थदूतीकृत्यस्य लघूकृतो भारः। तथाहि (३८)

वरेऽन्यस्मिन् द्वेषः, पितरि विचिकित्सा च जनिता,
पुरावृत्तोद्गारैरपि च कथिता कार्य्यपदवी।
सुतं तस्याहात्म्यं, यदभिजनतो यच्च गुणतः
प्रसङ्गात् वत्सस्येत्यय खलु विधेयः * परिचयः॥ (४०)

---

(३९) कामेति। तटस्थयैव उदासीनयैव, न तु कृतमाधवपक्षपातयैवेत्यर्थः। निसृष्टार्थदूतीकृत्यस्य "निसृष्टार्थदूतीत्वमस्मभ्यितम्" इति पूर्वप्रतिज्ञाततादृशदूतीकार्य्यस्य, भारः कर्त्तव्यत्वेन गुरुत्वं लघूकृतः कर्त्तव्यस्य प्राय साधिततया स्वल्पीकृत.। निसृष्टार्थदूतीलक्षणम् दर्पणोक्त पूर्वमेव प्रदर्शितं। भरतोक्तं तल्लक्षणं यथा—"स्त्रीपु सयोरा[illegible]धाना स्वयञ्च कार्य्यं प्रतिपादयन्ती। सृष्टार्थिका सा परदारयोगे दूती नियोज्या बहुधा सुधीभि"-रिति। मालतीं प्रतीत्यनेन मदयन्तिका प्रति न लघूकृत इति सूचितम्। कृतार्थं लघुत्वाभिधातुं कर्त्तव्यांशञ्च दर्शयितुमाह—तथाहीति।

(४०) प्रथमं कृतांश दर्शयति—वर इति। अन्यस्मिन् वरे नन्दने द्वेषः कुरूपादिदोषकथनेन मालत्या वैरस्य जनित उत्पादित (जनितेत्यस्यैव लिङ्गव्यत्ययेनान्वयः)। पितरि जनके भूरिवसौ विचिकित्सा [illegible] अनभुवन्नप्रदानेन [illegible] सामर्थ्येन कन्यां [illegible] वा राजकोपभयेन वा माधवाय सामर्थ्येऽपि [illegible] सन्देहश्च जनिता सञ्जीवनवाक्योपन्यासेन मया उत्पादिता। यथाच पितरि वैमुख्यं जायेतेत्याशयः। तथा पुरावृत्तानां शकुन्तलादिवृत्तान्तानामुद्गारैः उद्घाटनैः कार्य्यपदवी कर्त्तव्यपद्धति, पित्रादिनैरपेक्ष्येण स्वाभिलषितवराय आत्मार्पणरूपा सरणिरिति यावत्, कथिता वर्णिता मयेति शेषः। एवं तनुजस्य माधवस्य अभिजनतः सद्वंशत, यन्माहात्म्यं तथा गुणतः रूपलावण्यविद्यादिगुणेभ्यश्च

---

(৩৯) কাম। সম্প্রতি উদাসীন থাকিয়াই আমি মালতীর প্রতি নিসৃষ্টার্থ-দূতীকার্য্যের ভার অনেকরূপে লঘু করিয়াছি। দেখ—

(৪০) অন্য বর নন্দনে দ্বেষ ও পিতৃবিষয়ে সংশয় উৎপাদিত করিয়াছি, পুরাবৃত্তোদ্ঘাটন করিয়া কার্য্যপ্রণালী বলিয়াছি। এবং প্রসঙ্গতঃ বৎসের

---

* "विधिविधेय" इति क्वचित् पाठः, सम्पादनीय इति तदर्थः।

[इति निष्क्रान्ताः सर्वे: । (४१)

इति मालतीमाधवे द्वितीयोऽङ्कः । (४२)

यस्माद्वाक्यं महाभाग्यं यस्य स इति शेषः। तदपि प्रसङ्गात् लवङ्गिकाजिज्ञासाप्रसङ्गेन सूत प्रस्थितम्। प्रसङ्ग विनाऽभिधाने माधवपक्षपातित्वाशङ्कया विश्वासयोग्यं न स्यादिति भावः।

एतेन वात्स्यायनकामशास्त्रानुसारित्वं दूतीकृत्यस्य प्रतिपादितम्। तथाहि वात्स्यायनकाम शास्त्रे—कन्यासम्प्रयुक्तकाधिकरणे निसृष्टार्थदूतीकृत्यनिरूपणप्रकरणे सूत्राणि—"कन्यायदित्युपाय दौत्यमभिप्रायविकटानाम् प्रतिपादयेत्।" "मातापित्रोश्च गुणानभिज्ञतामनपेक्षतां लुब्धतां शठतां चपलतां बान्धवानां"। "याश्चान्या अपि समानजातीयाः कन्याः शकुन्तलाद्याः स्वबुद्ध्या भर्तारं प्राप्य मोदन्ते स्म ताश्चास्याः प्रदर्शयेत्।" तस्याः स्वबुद्ध्या नायकगुणान् भूयिष्ठान् परिवर्णयेदिति।

संलापमभिधायानन्तरं कथयति—यथेति। यथा यत्प्रकार परिणयः समागमो माधवमाल-तीभयोः परस्परविशेषविज्ञानं विषयः कर्त्तव्यः युष्माभिरिति शेषः।

अनेन प्रकृतसमागमोपायकथनात् करणं नाम मुखसन्धेरङ्गम्। तल्लक्षणं यथा दर्पणे— "...करणं पुनः। प्रकृतार्थसमारम्भः" इति। अङ्कावतारोऽपि सूचितः।

अत्र आरब्धकार्यं प्रति अन्यत्र दोषोपन्यासादिष्टतरकारणोपन्यासात् समुच्चयालङ्कारः। शिखरिणी वृत्तम्॥

(४१) जना इति शेषः, तथाच—पुंस्त्वं बहुलत्व न विवक्षितम्। यथा लिखनकारणम् पूर्वमेवोक्तम्।

(४२) क्वचित् पुस्तके "भवभूतेर्नाम्नि" अधिकः पाठः। तथात्वे भवभूतिप्रणीतमालती माधवनाम प्रकरणमित्यनुसन्धेयम्।

इति काव्यतर्कतीर्थोपनामक-श्रीकृष्णविहारिशर्मसिद्धान्तभट्टाचार्यकृतायां सन्दीपिनी-समाख्यायां मालतीमाधवव्याख्यायां द्वितीयाङ्कविवृतिः समाप्ता।

বংশতঃ ও গুণতঃ মাহাত্ম্যের প্রশংসা করিয়াছি, অনন্তর সমাগমদ্বারা উভয়ের পরস্পর পরিচয় করিয়া দেওয়া বাকি রহিয়াছে। (সকলে নিষ্ক্রান্ত হইল)

মালতীমাধবের দ্বিতীয়াঙ্ক সমাপ্ত।

तृतीयोऽङ्कः ।

[ततः प्रविशति बुद्धरक्षिता ।] (१)

बुद्ध । [परिक्रम्याकाशे ।] अवलोइदे ! अवि जाणासि कहिं भअवदीत्ति ? (क)

[प्रविश्य अवलोकिता] बुद्धरक्खिदे ! किं पमुज्झसि ? कोवि अआलो भअवदीए पिण्डवादवेलं वज्जिअ मालदीं अणुवत्त-माणाए (ख) ।

(क) अवलोकिते । अपि नाम जानासि कुत्र भगवतीति ?

(ख) बुद्धरक्षिते । किं प्रमुह्यसि ? कोऽपि अकालो भगवत्याः, पिण्डपातवेलां वर्जयित्वा मालतीमनुवर्तमानायाः ।

---

(१) सम्प्रति कविरङ्कावतारापरपर्यायं प्रवेशकं प्रस्तौति—तत इत्यादिना । "निपुणेव मया बुद्धरक्षिते"ति प्रथमाङ्कवाक्येन बुद्धरक्षितायाः प्रवेशः स्पष्टं सूचितः ।

(क) बुद्धेति । परिक्रम्य पादविक्षेपं कृत्वा । आकाशे शून्ये अप्रविष्टामवलोकितां संबोध्यैवं, कथयतीति शेषः । "अप्रविष्टे सहालापो भवेदाकाशभाषित"मिति त्रिपुरारि-धृतमाकाशभाषितलक्षणम् ।

"तदात्मना किञ्चिदाख्यानुकारिणी"त्यादिना "यदि तद्विषयोऽनुरागबन्ध" इत्यन्तेन बुद्धरक्षितया कामन्दक्या च मालतीमाधवयोर्मदनविकारस्य, वर्णनात् तयोः परस्परसमागमोपाय-भूतानुरागस्य लक्ष्यतया नन्दनविवाहनिषेधेनालक्ष्यतया च इतः प्रभृति चतुर्थाङ्कसमाप्तिं यावत् "प्रतिमुखसन्धिः" । तल्लक्षणं यथा दर्पणे —

"फलप्रधानोपायस्य मुखसन्धिनिवेशिनः ।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखञ्च तदिति ॥"

(ख) प्रविश्येति । प्रमुह्यसि मोहं प्राप्नोषि, कथमन्यथा विशेषतः परिज्ञातविषये

বুদ্ধরক্ষিতার প্রবেশ।

(ক) বুদ্ধ। (পাদবিক্ষেপ করতঃ অপ্রবিষ্ট অবলোকিতার প্রতি) অব-লোকিতে ! তুমি জান কি, ভগবতী কোথায় (আছেন) ?

(খ) অবলোকিতা। (প্রবেশ করিয়া) বুদ্ধরক্ষিতে ! তুমি কি মোহ-

बुद्ध। हुं, तुमं उण कहिं पत्थिदासि ? (ग)

अव। अहं क्खु भअवदीए माहवसआसं अणुप्पेसिदा, सन्दिट्ठं अ तस्स, जधा मअणघरसम्बद्धं कुसुमाअरं णाम उज्जाणं गदुअ कुब्जअणिउञ्ज-पेरन्त रत्तासोअ-गहणे चिट्ठत्ति, गदो अ तत्थ माहवो (घ)।

(ग) हुं, त्वं पुन: कुत्र प्रस्थितासि ?

(घ) अहं खलु भगवत्या माधवसकाशमनुप्रेषिता, सन्दिष्टञ्च तस्य, यथा मदनगृहसम्बद्धं कुसुमाकरं नामोद्यानं गत्वा, कुब्जकनिकुञ्जपर्यन्तरक्ताशोकगहने तिष्ठ इति, गतश्च माधवः।

मत: सम्भवेदिति भाव:। कालमपि यदि श्रीमुमापकमला अपयामीत्यभिप्रायेणाह—कोऽपीति। विश्वपालनेना निर्दिष्टभोजनकालं वर्जयित्वा परित्यज्य मालतीं अनुवर्त्तमानया: मालतीमनुसरन्त्या, कोऽपि च अनिर्वचनीय: काल: समय: भोजनकालातिरिक्त: सर्व एव कालस्तस्य, गच्छतीति शेष:। भोजनसमयातिरिक्ते सर्वस्मिन्नेव समये भगवती मालती-समीप एव वर्त्तत इति सम्यगपि तात्पर्यार्थ:।

(ग) हुं इति। हुमित्यनुमती। "हु वितर्के चानुमता" इति विश्वप्रकाश:।

(घ) अवेति। तस्य माधवस्य, मदनगृहसम्बद्धं शिवालयसंलग्नम्। कुब्जक: "कुजा" इति ख्यातो वृक्षविशेष: तस्य यो निकुञ्ज: लतागृहम् तस्य पर्यन्ते प्रान्तभागे यत् रक्ताशोक-गहनं रक्ताशोकानां वनं तत्र। कुसुमाकरपदेन तन्नामकस्य दु:खचारत्वाद्विजनत्वं सूचितमिति मन्तव्यम्।

প্রাপ্ত হইয়াছ? নির্দ্দিষ্ট ভোজনকাল ভিন্ন এই সুদীর্ঘ কাল (ভগবতীর) মালতীর অনুবর্ত্তনে অতিবাহিত হইতেছে।

(গ) বুদ্ধ। ভাই, তুমি তবে কোথায় গিয়াছিলে?

(ঘ) অব। ভগবতী আমাকে মাধবের নিকট পাঠাইয়াছিলেন এবং তাঁহার সম্বন্ধে আদেশ করিয়াছিলেন যে, "শিবালয়সংলগ্ন কুসুমাকরনামক উদ্যানে যাইয়া কুব্জকবৃক্ষপরিব্যাপ্ত কুঞ্জের প্রান্তভাগে রক্তাশোকবনে অবস্থান কর।" মাধবও তথায় গিয়াছে।

बुद्ध। किंत्ति तहिं माहवो अणुप्पेसिदो ? (ङ)

अव। अज्ज कसणचउद्दसीत्ति, भअवदीए समं मालदी सङ्करघरं गमिस्सदि, तदो किल एव्वं सोहग्गं वड्ढदित्ति देवदाराहण-णिमित्तं सहत्थकुसुमावचअं उद्दिसिअ, लवङ्गिआदुदीअं मालदीं, भअवदीजेव्व कुसुमाअरुज्जाणं आणइस्सदि, तदो अण्णोण्णदंसणं भविस्सदित्ति। तुमं उण कहिं पत्थिदा ? (च)।

(ङ) किमिति तत्र माधवोऽनुप्रेषित ?

(च) अद्य कृष्णचतुर्दशीति, भगवत्या सम मालती शङ्करगृहं गमिष्यति, ततः किल एवं सौभाग्यं वर्द्धत इति, देवताराधननिमित्त स्वहस्तकुसुमावचयमुद्दिश्य लवङ्गिकाद्वितीया मालती भगवत्येव कुसुमाकरोद्यानमानेष्यतीति, ततोऽन्योन्यदर्शनं भविष्यतीति। त्वं पुनः क प्रस्थिता ?

(ङ) बुद्धेति। किमिति किमर्थं केन हेतुनेति यावत्। तत्र कुसुमाकरोद्याने।

(च) अवेति। इति हेतो (कृष्णचतुर्दश्या शिवार्चनस्य प्रशस्तत्वात् शङ्करगृहगमन-हेतुतया तदुपन्यासो युक्त इति मन्तव्यम्।) भगवत्या कामन्दक्या। ततः शङ्करगृहगमनानन्तरं। किलेत्यलीके सौभाग्यवृद्धिकथनस्य मिथ्यात्वात्। एवं—स्वहस्तावचितकुसुमैरर्च्चने कृते। इति एवं बोधयित्वेति शेषः। देवताया आराधनं निमित्त हेतुर्यस्य तादृशं स्वहस्तेन कुसुमानां पुष्पाणां अवचय चयनेन उद्दिश्य निमित्तीकृत्य, लवङ्गिकाद्वितीया लवङ्गिका-मात्रानुयायिका। अन्योऽन्यदर्शनं मालतीमाधवयोः परस्परनिर्जनसाक्षात्कारः भविष्यति इति हेतोः माधवस्तत्रानुप्रेषित इत्यर्थः। मालतीमाधवयोरतर्कितविश्रब्धदर्शनेन परस्परानुरागः समतीव वर्द्धतामिति भगवत्या आशय.।

(ঙ) বুদ্ধ। কি জন্য মাধব সে স্থানে প্রেরিত হইয়াছে ?

(চ) অব। আজ কৃষ্ণচতুর্দ্দশী (সুতরাং) ভগবতীর সহিত মালতী শঙ্কর-গৃহে গমন করিবে। পরে ভগবতীই স্বহস্তোত্তোলিত কুসুমে দেবতার্চ্চনা করিলে সৌভাগ্য বৃদ্ধি পায় (ইহা মালতীকে বুঝাইয়া) দেবতার্চ্চনের নিমিত্ত স্বহস্তে কুসুমচয়নের উদ্দেশ করিয়া মাত্র লবঙ্গিকার সহিত মালতীকে কুসুমাকরোদ্যানে আনয়ন করিবেন। পরে মালতী ও মাধবের পরস্পরসন্দর্শন ঘটিবে। তুমি আবার কোথায় যাইতেছ ?

बुद्ध। अहं क्खु सङ्करघरं जेव्व पत्थिदाए पिअसहीए मद-अन्तिआए आमन्तिदा, तदो भअवदीए पादवन्दणं करुअ, तहिं जेव्व गच्छामि (छ)।

अव। तुमं क्खु भअवदीए जस्सिं पओअणे णिउत्ता, तस्स को वुत्तन्तो? (ज)।

बुद्ध। मए क्खु भअवदीए समादेसेण, तासु तासु विस्सम्भ-कधासु, ईरिसो तारिसोत्ति मअरन्दस्स उवरि पिअसहीए मदअन्ति-आए दूरं आरोविदो परोक्खाणुराओ एसो अ से मणोरहो, अवि णाम तं पेक्खामित्ति (झ)।

(छ) अहं खलु शङ्करगृहमेव प्रस्थितया प्रियसख्या मदयन्तिकया आमन्त्रिता, ततो भगवत्याः पादवन्दनं कृत्वा तत्रैव गच्छामि।

(ज) त्वं खलु भगवत्या यस्मिन् प्रयोजने नियुक्ता, तस्य को वृत्तान्तः?

(झ) मया खलु भगवत्याः समादेशेन तासु तासु विस्रम्भकथासु, ईदृशस्तादृश इति मकरन्दस्योपरि प्रियसख्या मदयन्तिकाया दूरमारोपितः परोक्षानुराग एष चास्याः मनोरथः, अपि नाम तं प्रेक्षे इति?

(छ) बुद्ध इति। आमन्त्रिता आहूता। तत्रैव शङ्करगृह एव।

(ज) अवेति। यस्मिन् प्रयोजने मकरन्दे मदयन्तिकायाः अनुरागवर्द्धनरूपे कार्य्ये। को वृत्तान्तः? कीदृक् संवाद वर्त्तत इति भावः।

(झ) बुद्ध इति। विस्रम्भकथासु विश्वस्तालापेषु। ईदृशं असामान्यरूपलावण्यसम्पन्न, तादृश अद्वितीयशौर्य्यवीर्य्यशाली मकरन्द इति भाव, इति कृत्वा असोमनवमोपम्यादि-मित्यर्थः। प्रियसख्या मदयन्तिकायाः परोक्षानुराग. अप्रत्यक्षानुरागः तथा तेन प्रकारेण दूरं

(ছ) বুদ্ধ। আমিও শঙ্করগৃহেই প্রস্থিত মদয়ন্তিকা কর্ত্তৃক আহূত হইয়াছি, সুতরাং ভগবতীর পাদবন্দন করিয়া সে স্থানেই যাইব।

(জ) অব। তোমাকে ভগবতী যে কার্য্যে নিযুক্ত করিয়াছিলেন, তাহার কি হইল?

(ঝ) বুদ্ধ। আমি ভগবতীর আদেশক্রমে সেই সেই বিস্রম্ভালাপে মকরন্দ

अव। साहु बुद्धरक्खिदे! साहु। (ञ)

बुद्ध। एहि गच्छह्म। (ट) [इति परिक्रम्य निष्क्रान्ते]

प्रवेशकः। (२)

[ततः प्रविशति कामन्दकी।] (३)

(ञ) साधु बुद्धरक्षिते! साधु।

(ट) एहि गच्छावः।

आरोपितः इति प्रापितः। अथवा मदयन्तिकाया "अपि नाम किं तं मकरन्दं प्रेक्षे साक्षात् पश्यामि" एष मनोरथः अभिलाष समसृदिति शेषः। तदापादितानुरागैव मदयन्तिका समन्वितमभिमुखा यत् सर्वदैव साक्षान्मकरन्दं द्रष्टुमाकाङ्क्षतीति। तथात्मकमिम् जात इति भावः।

(ञ) अथेति। साधु सम्पादितमिति शेषः। अनेन त्वया भवत्याः कार्यभारो लघूकृत इति भावः।

(२) द्वितीयाङ्कप्रवेशक-व्याख्यायामेव प्रवेशकलक्षणमभिहितम्। अयञ्च प्रवेशकः इतश्च कुसुमाकरोद्याने माधवगमनस्य कामन्दकीनिर्देशेन मकरन्दं मदयन्तिकाया गाढानुरागेण पादभक्तं वर्णयिष्यमाणस्य च मालत्यादीनां शङ्करगृहगमनादेर्निर्देशक इत्यनुसन्धेयम्।

(३) कामन्दक्याः प्रवेशः अवलोकितया सूचितः।

এইরূপ লাবণ্যসম্পন্ন, তাদৃশ পাণ্ডিত্য বীর্য্যৌদার্য্যশালী এইরূপ প্রলোভনবাক্য বলিয়া মকরন্দের উপর প্রিয়সখীর এতাদৃশ অনুরাগ বৃদ্ধি পাওয়াইয়াছি যে, যদ্দ্বারা তাহার (মদয়ন্তিকার) এইরূপ মনোভিলাষ জন্মিয়াছে যে, 'তাঁহাকে (মকরন্দকে) সাক্ষাৎ নিরীক্ষণ করিব?"

(ঞ) অব। বুদ্ধরক্ষিতে! তুমি বেশ (সম্পাদন করিয়াছ)

(ট) বুদ্ধ। এস আমরা যাই।

(বুদ্ধরক্ষিতা ও অবলোকিতা নিষ্ক্রান্ত হইল)

কামন্দকীর প্রবেশ।

तथा विनयनम्रापि मया मालत्युपायतः ।
नीता कतिपयाहोभिः सखीविस्रम्भसेव्यताम् ॥ (४)
सम्प्रति । व्रजति विरहे वैचित्त्यं, नः प्रसीदति सन्निधौ,
रहसि रमते, प्रीत्या वाचं ददात्यनुवर्त्तते ।
गमनसमये कण्ठे लग्ना, निरुध्य निरुध्य माम्,
सपदि शपथैः प्रत्याहर्त्तुं प्रणम्य च याचते ॥ (५)

---

(४) कामन्दकी स्वीयकार्यसम्पन्नतामुचितां मालत्यवस्थां वर्णयति—तथेति। मया तथा तेन प्रकारेण गुरुजनोचितेनेत्यर्थः, विनयेन सत्कुलोत्पन्नकन्यकाजनसुलभस्वभावेन नम्रापि अवनतापि (मदन्तिके इति शेषः) मालती उपायतः सततसमीपावस्थानादिसखीजनोचितव्यवहारैः, कतिपयाहोभिः स्वल्पैरेव दिवसैः (राजाहःसखिभ्यष्टजिति समासान्तप्रत्ययादपि नाहः-शब्दादत् प्रत्ययः) सखीविस्रम्भसेव्यतां आत्मनि सखीजनोचितविश्रम्भव्यवहारार्हतां नीता प्रापिता।

पूर्वस्मिन्निव गुरुजन इव मय्यपि मालती गुरुजनोचितभक्तिश्रद्धालज्जाभयादानुप्राणित-विनयभावेनैवात्मसत्कुलोत्पन्नकन्यकावदवनताऽऽसीत्, किन्तु कतिपयदिनं मया सततसमीपावस्थानेन विविधक्रीडा कवरीबन्धनादिगात्रशोभासम्पादनेन कपोलकुचपत्रकादिचित्रणा-चित्ररचनेन सहासकौतुकेन नानाविधनर्मालापोपन्यासेन च सखीजनोचितविविधोपायेन मालत्येव नायनीकृता यदधुना नवमालिकादिसखीजन इव मयि लज्जाभयादिपरित्यागेन विश्रब्धं व्यवहरति, सुतरां स्वमनोगतमपि निःशङ्कमावेदयतीति तात्पर्यार्थेन: सरलार्थः। तस्मादस्मत्कृतं परं मालती मदुपदिष्टमाचरिष्यतीति भावः।

अत्र सखीविस्रम्भसेव्यतामिति लुप्तोपमालङ्कारः। अनुष्टुभ् वृत्तम्॥

(५) सखीवद्व्यवहारमेव दर्शयति—व्रजतीति। नोऽस्माकं विरहे असन्निधाने वैचित्त्यं चित्तविकलतां व्रजति गच्छति। तथा सन्निधौ प्रसीदति प्रसन्ना, हृष्टा भवति। रहसि

---

(৪) অর্থ। পূর্ব্বে মালতী গুরুজনোচিত ভক্তিশ্রদ্ধাপ্রাণিত কুলকন্যকা-জনসুলভ সংস্বভাবে আমার নিকট অবনত থাকিলেও আমি অল্পদিনেই সতত, সমীপে অবস্থানাদি নানাবিধ উপায়ে লবঙ্গিকাদি সখীর ন্যায় মালতীর বিশ্বাস-যোগ্য হইয়াছি।

(৫) সম্প্রতি মালতী আমার সন্নিধানে বৈমনস্য লাভ করে ও অসন্নিধানে

इदञ्च साधीयस्तव समागमानिबन्धनम् । (६)
शाकुन्तलादीनितिहासवादान् प्रस्तावितानन्यपरैर्वचोभिः ।
श्रुत्वा मदुत्सङ्गनिवेशिताङ्गी चिराय, चिन्तास्तिमितत्वमेति ॥ (७)

निर्जने सम्भावयितीये स्थाने इत्यर्थः, रमते सर्व्वावस्थैरधरा सह क्रीड़ति। प्रीत्या प्रणयेन याच दहाति न कदाचिदपि पक्षे भावत इत्यर्थः। (वाचमित्यत्र "दाम देव"मिति च पाठान्तरं दृश्यते, तत्र दाम मौक्तिकमनुक्त देयमिति वा "देयं दाने च दाम स्यात्कार: मौक्तिकमाल्य" इति मेदिनी। देय उपहारयोग्यं कर्पूरादिक वस्त्वित्यर्थः)। तथा अनुवर्त्तते प्रियसम्भाषणा-भ्युत्थानासनदानादिभिरुपचरति, यदा गमनसमये अनुवर्त्तते मामनुगच्छतीत्यर्थः। एवं गमन-समये तत्कमोपान्ते प्रति गमनावसरे कण्ठे लग्ना मदीयहस्तबाहुपाशेन मां निरुध्य निरुध्य बहुशो मम गमनप्रतिरोधं जनयित्वा प्रणम्य पादवन्दनं कृत्वा च शपथे यदि नेदानीमागच्छसि तदा गुरुजनशापेन लिप्यसे, अथवा मम मस्तकं खादसीत्याद्यनतिक्रमणीयशपथवाक्यैः सपदि तत्क्षणादेव प्रत्यागमनं याचते प्रार्थयति। सर्वत्र मामितीति शेषः।

अत्र प्रजानि प्रमोदति इत्यादानेकासु क्रियासु मालतीरूपमेक कर्त्तृकारकमिति दीपकालङ्कारः, प्रधानमिति सखीगुणमय्य वहार प्रतिपादनरूपकार्य्यं प्रति निरवे वैचित्र्यमाध्यमादिर्बहुकारणानां मृदयाधान समुच्चयालङ्कारः, इत्यनयो सङ्करः। हरिणी वृत्तम्।

(६) इदमिति। सम्प्रति इदानीं तव मालतीमाधवयोः समागमसाधने इदं वक्ष्यमाणञ्च साधीयः दृढतरं आयासा नियतमिदं मदुक्तमाचरिष्यतीत्येवंरूपाया प्रत्याशाया निबन्धनं हेतुः।

(७) किमदायानिबन्धनमित्याह—शाकुन्तलादीनिति। अन्यपरैः मालत्युपदेशभिन्नतात्-पर्य्यकैः वस्तुतो मालत्युपदेशाय प्रयुक्तैरपि अन्योद्देशेन प्रयुक्तवदवभासमानैरित्यर्थः, वचोभिर्वाक्यैः प्रस्तावितान् मया मदिङ्गितज्ञेन सखीजनेन वा उत्थापितान् शाकुन्तलादीन् शकुन्तलादीनाम्

প্রসঙ্গচিন্তা হয়। নির্জ্জনে সর্ব্বালাপদ্বারা আমার সহিত ক্রীড়া করে, সর্ব্বদা প্রিয় কথা বলে ও সম্ভাবণাদিদ্বারা আনুগত্য স্বীকার করে। এবং গমনসময়ে আমার কণ্ঠলগ্না হইয়া বারবার আমাকে নিরুদ্ধ করিয়া ও প্রণাম করিয়া নানা-বিধ শপথদ্বারা তৎক্ষণাৎ আমার প্রত্যাগমন ভিক্ষা করে।

(৬) অনন্তর যাহা বলিতেছি তাহাও মালতীমাধবের সমাগমসাধনে সম্প্রতি দৃঢতর প্রত্যাশার কারণ।

৭। অন্য কোনও প্রসঙ্গক্রমে প্রস্তাবিত শকুন্তলাদির ঐতিহাসিককথা শ্রবণ

तदस्य माधवसमक्षमुत्तरमुपक्रमिष्ये । (८)

[नेपथ्याभिमुखमवलोक्य ।] वत्से ! इत इतः । (९)

[ततः प्रविशति मालती लवङ्गिका च ।]

माल । [स्वगतम् ।] "कथं उपहारीकृतास्मि" इत्यादि पूर्वोक्तं पठति । (१०)

सुखात् रतिकालचपलात् पुराङ्गनानि श्रुत्वा माधवात् कामन्दकी सङ्गमयत् समाहे निवेशितात्मा शरीरस्य महामहता निवेदयन्तीव पालितवियद्वा चिराय बद्धाञ्चलावन चिन्तयत् "बकुलमालादिवत् स्वाधीनावरणं मया कर्तव्यं न वा ? वैगोपायेन वा कर्तव्यमित्यादिभावनया निमित्तत्वं निश्चलत्व प्राप्ति मन्मने। इत्येतदेव तापोय सम्भावनाविकल्पनमिति भावः । (अथ "प्रस्तावप्रस्तवरैकंत्योसि"रिति पाठान्तरं, तत्र प्रस्तवरे, प्रसङ्गवशेन वक्तिमतीभिः मालत्येव माकुलमालाठोमितिहालवादान् प्रस्तावयति मकुलमालादिमि विवादिभिरवैचर्यैस्तान्मा इत इति यत शुश्रूषे तत् किं मया इति मा पृच्छतोऽवदं । तत् श्रुत्वा मकुलमालादिवत् मायमेवेति मतः सम्भाव्यं इति विशेष । समाप्तम् । सर्वं त्वदर्थं चेन्दवत्पो. मद्वदपा मुखकाति शतम् । छन्दोमङ्गदोविहित तद्वत् यथा—"बकुलदोदोरितनवामालानी पादो मदोया-मुपगतवन्ता । इत्यं किमाम्याश्वपि मिथिताम् वदन्ति आतिम्बिदमेव मामे ॥"

(८) तदस्येति । तत्कालं मालतायाः मकुलमालाविकरणोति पूर्वोक्तं विभिरवधार्य इत्यर्थः । माधवस्य समक्षं प्रत्यक्षं समीपं एवेति यावत्, उत्तरं वचनमकर्तव्यं उपक्रमिष्ये आरप्से । 'प्रोपाभ्यामारम्भ'इत्यात्मनेपदम् ।

(९) नेपथ्याभिमुखमवलोक्य नेपथ्याभिमुखमवलोकनेन मालतीं हर्षेत्यर्थः । वत्से इति मालत्याः सम्बोधनम् । इत इत इति आगच्छेति शेषः ।

(१०) मालेति । पूर्वोक्तं अविनाम न पुष्पेति विचिन्तः" इत्यत्र सर्वं सम्बन्धनीयम् ।

করিয়া মালতী তাহার শরীর আমার ক্রোড়ে সন্নিবেশিত করতঃ বহুকাল চিন্তার পরে একেবারে নিশ্চলত্ব লাভ করে।

৮। সুতরাং মাধবের সমক্ষেই আজ ইহার পর যাহা কর্তব্য, তাহার অবতারণা করিব।

৯। (নেপথ্যের দিকে অবলোকন করিয়া) বৎসে ! মালতি এদিকে এস।

(মালতী ও লবঙ্গিকার প্রবেশ)।

১০। মাল। (স্বগতঃ) "কেন আমি উপহারীকৃত হইলাম" ইত্যাদি পাঠ করিতে লাগিল।

लव। सहि! एसो क्खु महुर-महु-रसाड्ढ-मञ्जरी कवलण-केलि--कल--कोइल--उल--कोलाहलाकुलिद--सहआर- सिहरुड्डीण-चडुल-चञ्चरीअणिअर-व्वदिअरुद्दलिद-दल--कराल-चम्प -आहिवास मणोहरो, मराल-मंसल-जहण-परिणाहुव्वहणमन्थरोरुभर-विसंठुल-खलिद-चलण-संचलणीअ-णीद -सेअसीअर--मुत्ताविंदुज्जल- मुद्ध मुद्ध-घन्दणाअमाण-सीअलप्फरसो, तुमं परिस्सअदि कुसुमाअरुज्जाण-मारुदो, ता पविसह्म (ठ) [इति परिक्रम्य प्रविशतः।]

(ठ) सखि! एष खलु मधुरमधुरसाढ्यमञ्जरीकवलनकेलिकलकोकिलकुलकोलाहलाकुलितसहकारशिखरोड्डीन-चटुलचञ्चरीकनिकरव्यतिकरोद्दलित दलकरालचम्पकाधिवासमनोहरो, मरालमांसलजघनपरिणाहोद्वहनमन्थरोरुभरविसंष्ठुलस्खलितचरणसञ्चलनीयमीतस्वेद-शीकरमुधाबिन्दूज्ज्वलमुग्धमुग्धचन्द्रनायमानशीतलस्पर्शः त्वां परिष्वजति कुसुमाकरोद्यान मारुतः, तत् प्रविशावः।

क्वचित् पुस्तके "कथं चञ्चरीकिदहि" इत्यादि। "अविमाल सं पुष्पोवि दिचिअ" इत्यन्तः सर्व्व एव सन्दर्भ, पुनर्लिखितो दृश्यते। व्याख्या तु पूर्व्ववैव प्रदर्शिता।

(ठ) लवेति। सखि। एष कुसुमाकरोद्यानमारुत त्वां परिष्वजति आलिङ्गतीत्यन्वयः। तम्, कुसुमाकरोद्यानमारुतं विशिनष्टि—मधुरेत्यादि। सुदीर्घसमासघटित प्रथमाकपदद्वयेन, तदर्थस्य मधुरैव सुस्वादुना मधुरसेन पुष्पनिर्य्यासद्रवेण आढ्याया मिश्राया मञ्जर्य्याः चूतवल्लर्य्याः कवलने ग्रासने या केलिः क्रीडा तया कलेन मधुरास्फुटेन कोकिलकुलस्य पिकसमूहस्य कोलाहलेन कलकलेन आकुलितात् व्याप्तात् सहकारशिखरात् अतिसुरभिचूतपल्लवात् "सहकारोऽतिसौरभ"इत्यमरः। उड्डीनस्य आशिनोत्पतितस्य चटुलस्य चपलस्य चञ्चरीकनिकरस्य भ्रमरसमूहस्य "चञ्चरीकोऽलिमीलयो"रिति धरणिः। व्यतिकरेण सम्पर्केण सञ्जनितविमर्द्देनेति यावत्। उद्दलितदलानि विकाशितपत्राणि, अत एव करालानि दन्तुराणि "करालो दन्तुरे तुङ्गे

(ঠ) লব। সখি! মধুর পুষ্পনির্য্যাসে আম্র চুতমঞ্জরীর কবলনক্রীড়াবার। মধুরাস্ফুট যে কোকিলকুলের কোলাহল তৎপরিব্যাপ্ত অতি সুরভি চূতপল্লব হইতে ত্রাসবশতঃ উড্ডীন চঞ্চল ভ্রমরকুলের সম্পর্কে যাহাদের দলগুলি বিদলিত হইয়াছে ■ তন্নিবন্ধন যাহারা জাতদন্ত বলিয়া প্রতীয়মান হয়, সেই চম্পককুসুমের

[ततः प्रविशति माधवः ।] (११)

माध । सहर्षम् । हन्त ! परागता भगवती । इयं हि मम । (१२)

आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति ।
मन्तापदग्धस्य शिखण्डियूनो दृष्टिः पुरस्तादचिरप्रभेव ॥ (१३)

शीतलं चाभिषेचन”मित्यादि मेदिनी । यानि अम्बकानि चाम्बुवत् कुसुमानि तेषां अधिवासेन सौरभेण मनोहरं चित्तोन्मादकरं, तथा—मसृणस्य मसृणस्य मांसलस्य स्थूलस्य च जघनस्य श्रोणिपुरोभागस्य च परिणाहः विशालता, तस्य तद्भरेण भारवेण मन्थरं मन्दं, तत्क्रमेण विक्षेपं विषमं यथा स्यात्तथा स्खलितशोणहरिच्चरणयोश्चरणयोर्यन्त् सङ्क्रमणं चलनं तस्मात् तेन उपनीता उपस्थापिता ये स्वेदबिन्दवः ते एव सुधाबिन्दवः अमृतकणास्तैरुज्ज्वलस्य मुखचन्द्रस्य तव चन्दनायमानः चन्दनवदाचरन् शीतलस्पर्शौ यस्य स मरुत् । अत्र चार्या वैलक्षणस्यात्र सूचितः । तन्मरुता एव कुसुमाकरोद्यानाद्बहिरालिङ्गनात् प्रविशाम एतत् कुसुमाकरोद्यानं इति शेषः ।

(११) “ततश्च ततः माधवः” इति प्रवेशकोक्तवाक्येन माधवप्रवेशः सूचितः ।

(१२) माधेति । हन्त हर्षे, परागता उपस्थिता भगवती कामन्दकी । इयं हि ममेति “सोच्छ्वासमन्तःकरणं करोतीति” शीकथ्येनान्वेति । इयं कामन्दकी ।

(१३) आविरिति । सन्तापदग्धस्य ग्रीष्मतापसन्तप्तस्य शिखण्डियूनः, तरुणस्य मयूरस्य दृष्टं पुरस्तात् अग्रेऽवस्थाय आविर्भवन्ती प्रकटीभवन्ती अचिरप्रभा विद्युदिव प्रियायाः

গন্ধে মনোহর এবং মসৃণ অথচ স্থূল জঘনের বিশালতা বশতঃহেতু মন্থর যে উরুভরে বিষমরূপে স্খলিত চরণযুগলের সঞ্চলন তদ্দ্বারা উপস্থাপিত ঘর্মবিন্দুরূপ যে অমৃতকণাদ্বারা উজ্জ্বল তোমার মুখচন্দ্রমণ্ডলকে চন্দনবৎ আচরণশীল শীতল স্পর্শবিশিষ্ট কুসুমাকরোদ্যানের বায়ু সে তোমাকে আলিঙ্গন করিতেছে, সুতরাং (এই কুসুমাকরোদ্যানে) প্রবেশ করি। (পাদবিক্ষেপকরতঃ উভয়ের উদ্যানে প্রবেশ)।

১১। (মাধবের প্রবেশ)।

১২। মাধ। (হর্ষের সহিত) অহো! ভগবতী (কামন্দকী) আসিয়াছেন।

১৩। বৃষ্টির পূর্ব্বে প্রকাশমান বিদ্যুৎ যেমন গ্রীষ্মোত্তাপতপ্ততরুণ ময়ূরে

[दृष्ट्वा ।] अये ! लवङ्गिकाद्वितीया मालत्यपि । (१४)

आश्चर्य्यमुत्पलदृशो वदनामलेन्दु-
सान्निध्यतो मम मुहुर्जडिमानमेत्य ।
जात्येन चन्द्रमणिनेव महीधरस्य
सम्भाव्यते द्रवमयो मनसा विकारः ॥ (१५)

मालत्याः प्रथमं आविर्भवन्ती इयं कामन्दकी सन्तापदग्धस्य कामानलसन्तापतप्तस्य मम मनःकरणं मम सौख्याय प्रियागमनसूचकतया सजीवं करोति।

यथा दृष्टे, प्रथमं आविर्भवन्ती विद्युद्वृष्टेः सूचकतया ग्रीष्मातपतप्तस्य मयूरयूनो मनः समुच्छ्वसितं करोति, तथैव प्रियायाः प्रथममाविर्भवन्तीयं कामन्दकी प्रियागमनसूचकतया तद्विरहानलतापतप्तस्य मम मनः समुच्छ्वसितं करोतीति सरलार्थः।

अत्र पुनरुक्तपदोपादानमपुष्टार्थत्वदोषप्रशमनाय। श्रौतशब्दार्थेत्युपमालङ्कारः, तेन च ग्रीष्मातपतप्तस्य शिखण्डियून इव कामानलसन्तप्तस्य ममेत्युपमापि व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः। वसन्ततिलका वृत्तम्। द्वितीयाङ्कगतेन नन्दनाय मालतीदानप्रस्तावेन प्रकृतकार्यार्थविच्छेदे प्राप्ते अत्र पुनर्माधवस्य मालतीदर्शनप्रस्तावेन तस्याश्छेदहेतुरिति बिन्दुनामार्थप्रकृतिः। तल्लक्षणं यथा दर्पणे—"अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्"इति॥

(१४) (दृष्ट्वा लवङ्गिकया सह मालतीमवलोक्य) अयि इत्यानन्दजनितसम्भ्रमे। न केवलं कामन्दकी लवङ्गिकाद्वितीया मालत्यपि परागतेत्यर्थः। तस्मादतःपरं किमानन्दकारण-मिति भावः।

(१५) आश्चर्यमिति। उत्पलदृशः इन्दीवरलोचनायाः मालत्याः वदनं अमलेन्दुः निर्मलचन्द्र इव अस्याः वदनमिवामलेन्दुः, तस्य सान्निध्यतः सामीप्याद्धेतोः, जातौ साधुः जात्यः तेन अभिजातवता इत्यर्थः, मम मनसा जात्येन उत्कृष्टेन महीधरस्य पर्वतस्य चन्द्रमणिना

মন উচ্ছ্বসিত করে, ইনিও তেমন প্রিয়ার প্রথমে আবির্ভূত হইয়া কামানলসন্তপ্ত আমার মন উচ্ছ্বসিত করিতেছেন।

১৪। (দেখিয়া) লবঙ্গিকার সহিত মালতীও আসিয়াছে।

১৫। এই ইন্দীবরাক্ষীর বদনসদৃশ চন্দ্রের সান্নিধ্যবশতঃ উৎকৃষ্ট পার্বত্য চন্দ্রকান্তমণি যেমন বিগলিত হইয়া দ্রবময় বিকার ধারণ করে, আমার মনও তেমন

सम्प्रति रमणीयतरा मालती। (१६)
ज्वलयति मनोभवाग्निं, मदयति हृदयं, कृतार्थयति चक्षुः।
परिम्लदितचम्पकावलिविलासलुलितालसैरङ्गैः॥ (१७)

चन्द्रकान्तमणिनेव मुहुः आलिङ्गितं जड़िमानं जडत्वं क्रियासु अपाटवं यस्मिन् जलमकलितकं एवं प्राप्य द्रवमयो विकारः चन्द्रकान्तः तन्मध्ये चन्द्रकान्ते इत्याश्चर्यम्। महीधरस्य चन्द्रमणिनेत्यनेन स्वस्यापि महीधरतामप्रतीतिर्येनचन्द्रोदयस्यापि मनो द्रवीभवतीत्याश्चर्यमिति भावः।

अत्र आर्येत्यत्र "आर्द्रं के"ति क्वचित् पाठः, तत्र आर्द्रेण जड़िम्ने ति करणे तृतीया। एवं मनसीत्यत्र मनसः इत्यपि क्वचित् पाठः, तत्र च जड़िमानं एत्य स्थितस्य मनसो विकारः षष्ठ्यः सम्बध्यते निपीयत इत्यर्थस्याध्याहारेण कथञ्चिन्निर्वाहेऽपि चन्द्रमणिनेवेत्युपमाया, शब्दनि-चिन्तनीयतया न मौलिकत्वं तस्येति चिन्तनीयम्।

अत्र वदनमिन्दुरिव इत्यत्र वदनामृतेन्दु इत्यत्र च लुप्तोपमालङ्कारः, चन्द्रकान्तमणिनेवेत्युपमालङ्कारः, तेन महीधरस्येव मनोरुपमापि व्यज्यते इत्यलङ्कारेणालङ्कारध्वनिः। एवं मनसो द्रवमयस्य चन्द्रकान्तमयीत्वं वचसाऽस्य आर्द्रत्वे वैलक्षण्येऽपि श्लेषेण तदभेदाध्यवसायादतिशयोक्तिरलङ्कार इति तेषामङ्गाङ्गिभावेन सङ्करः। वसन्ततिलकं वृत्तम्॥

(१६) सम्प्रतीति। रमणीयतरा पूर्वदृष्टावस्थात समधिकसौन्दर्यशालिनी। कामभावस्य पूर्वतः पल्लवितत्वात्तस्य स्खलितस्खलनलावण्याधारत्वात् पूर्वतो रमणीयतरत्वावधारणं युज्यत एवेति भावः।

(१७) ज्वलयतीति। परिम्लदिता म्लानिमापन्ना या चम्पकावलिः चाम्पेयकुसुममाला तस्या विलास इव विलासः विभ्रमो येषां तानि तथा लुलितानि विरहाद्विना चाञ्चल्यितानि एवं अलसानि क्रियासु अनुद्युक्तानि च तैः तथाभूतैः (परस्परविशेषणविवक्षया त्रिपदकर्मधारय-समासः) अङ्गैः मनोभवाग्निं कामानलं ज्वलयति दीपयति, हृदयं मम मनः मदयति हर्षपरवशं करोति, तथा चक्षुः नयनं कृतार्थयति द्रष्टव्यवस्तुनोऽपूर्वदर्शनेन चरितार्थं करोति, सर्वत्र ममेति शेषः, पूर्ववाक्यस्थितं मालतीति कर्तृपदम्।

এই ইন্দীবরশ্যামার বদনচন্দ্রের সান্নিধ্যবশতঃ শীতল কান্তামণির ন্যায় আমার দ্রবময় বিকার অর্থাৎ দ্রবীভাব ধারণ করিতেছে, ইহা নিতান্ত আশ্চর্য্যজনক।

১৬। সম্প্রতি মালতী পূর্ব্বদৃষ্টাবস্থা হইতে সমধিক সৌন্দর্য্যশালিনী হইয়াছে।

১৭। (সম্প্রতি মালতী) ম্লানিভাবাপন্ন চম্পকমালার ন্যায় শোভাযুক্ত

मालः। सखि! इमस्सिं कुज्जअणिउञ्जे कुसुमाइं अवचि-णुम्ह (ड)।

माधः। प्रथमप्रियावचनसंश्रवस्फुरत्पुलकेन सम्प्रति मयावलम्ब्यते।

घनराजिनूतनपयःसमुच्छ्वसद्बकुड्मलकदम्बडम्बरः॥(१८)

(ड) सखि। अस्मिन् कुब्जकनिकुञ्जे कुसुमानि अवचिनुवः।

अचाक्लिंदिष्टकर्मकधातोरकर्मकत्वनियमात् कर्थं अकुरिति ख्यातवतीत्यस्य कर्मपद-मिति न शङ्कनीयं, नतु नहि निर्दिष्टकर्मकधातव एवाकर्मकाः, परन्तु तदाक्लिंदिष्टकर्मका अकर्माकाङ्क्षानिवर्तकी तस्यानिर्दिष्टकर्मकधातोः कर्मान्तरं न तिष्ठेत्, यथा कम्पयति कम्पयतीत्यादि, ■■ चोद्रे त्वविशेषमात्रादित्विदिया अकर्मकत्वं भवति, तत विधिवकर्मकोऽनिर्दिष्टकर्मक इति निराकाङ्क्षया अनिर्देशेऽद्रे त्वादिवत् कर्मान्तरं स्यादेव। अत एव वितृष्णयति मस्थानं रात्रिमिति भावाऽस्तिकता दुर्जन गच्छति घट इयमनीति कर्मावकर्मकता च प्रदर्शिता। "आचार्यदाजतिविस्मयमप्यवधभे ववोऽयमवादीनाम्। रथोद्धतमिव गहनमवाहयाम-वतियती"त्यादिके वाक्यार्थे अभ्यासाभ्यासाविनयादिवाक्यमपि तत्समकं कर्मकतामतिं। तथा-त्व अत्रपि कर्मत्वं इति न कश्चिद्विरोध इति स्थितम्।

मालतीदर्शनकर्तृकारकाभ्यां स्वस्वकीयाभावेककरियाभ्यां प्रयोगाद्दीपकालङ्कारः। मनोभवाप्ति-मिति पदकं। द्वितीयार्द्धे लुप्तोपमा चेति एतैषामङ्गाङ्गिभावेन सङ्करः। आर्या छन्दः।

(ड) माल्येति। कुब्जकस्तरुविशेषस्तस्य अनुगमेन तत्कुसुमावचयनस्य अवस्थायमानया-तथाविलासो मालत्या सूचित एवेति भावः।

(१८) प्रथमेति। प्रथमः आदिमः प्र- प्रियायाः मालत्याः वचनसंश्रवः "सखि" इत्यादि वाक्यश्रवणं, तेन स्फुरन् आविर्भवन्तः पुलकाः रोमाञ्चाः यस्य तेन तादृशेन मया सम्प्रति

বিষাক্তোলিত ও অনল অশ্রবাবা আমার কামাগ্নি প্রজ্বলিত করিতেছে, হৃদয় হর্ষযুক্ত করিতেছে ও চক্ষু কৃতার্থ করিতেছে।

(ড) মাল। সখি! এই কুব্জকনিকুঞ্জে কুসুম চয়ন করি।

১৮। মাধ। প্রিয়ার প্রথম বাক্যশ্রবণে রোমাঞ্চিত হইয়া সম্প্রতি আমি মেঘের নূতন জল সেবনকণ্টককুট্মল কদম্বপুষ্পের শোভা ধারণ করিতেছি।

लव। सहि एव्वं करेह्म। (ढ) [पुष्पावचयं नाटयत: ।]

माध। अपरिमेयाश्चर्य्यमाचार्य्यकं भगवत्या: (१८)

माल। सहि ! इदोवि अण्णस्सिं अवचिणुह्म। (ण)

(ढ) सखि। एवं कुर्वः ।

(ण) इतोऽप्यन्यस्मिन्‌ अवचिनुव ।

घनवारिशीतलजातस्य यानि मुकुलपत्राणि सर्वतोविगलितजन्मानि तैर्यत् समुत्थं सेचनं तत्सम्भवानि तन्मयानि बहूनि वृन्तानि कुड्मलानि मुकुलानि येन तस्य तथाभूतस्य कदम्बस्य नीपतरोः इव, अस्य अङ्गान्यपि भोग्यानि ।

यथा जलदसलिलसम्पर्कमात्रेण एव कदम्बतरुः कुड्मलितो भवति, तथैव प्रथमप्रियावचन-श्रवणमात्रेण एवायं रोमाञ्चितो जात इति भावार्थः ।

अत्रार्थी उपमालङ्कारः, स च छेकानुप्रासेन संसृज्यते। अनुप्रासिनी वृत्तम्। "कदम्ब-कुड्मलकदम्बकम्" इति चरणत्रयस्य समस्तवर्णसाम्येऽपि दृश्यते। चार्वङ्गिमित्यादि श्लोक-द्वयेन मालत्या मुखावलोकनवचनश्रवणतदनीयस्पर्शादि-चेष्टाया प्रतीयमानतया रतिभोगाशाया, समीहाया प्रतीते विलासो नाम प्रतिमुखसन्धेरङ्गम्। तल्लक्षणं यथा दर्पणे—

"समीहा रतिभोगार्था विलास इति कथ्यते।"

(ढ) सखीति। एवं कुसुमनिकुञ्जे पुष्पावचयम्।

(१८) मालेति। भगवत्या कामन्दक्या आचार्यस्य उपदेष्टुर्भाव आचार्यकं कार्यसाधनो-पदेशकौशलं अपरिमेयाणि परिच्छेत्तुमशक्यानि आश्चर्याणि यत्र तादृशम्। कामानुरोधेन मन्दमार्दवलक्षणेन मल्याकर्षणमानसादिमध्यगतमभ्यां यत् प्रमाधादय कुसुमस्तवकतोलनायोद्यमित-हस्तत्वेन समलतायुक्तायमवर्णितो मि प्रदर्शनीकृतिन् प्रभवतीति भाव ।

एतेन पूर्वमवलोकिताया पश्चादनवलोकिताया मालत्या पुनरनुसर्पणात् परिसर्पो नाम प्रतिमुखसन्धेरङ्गं दर्शितम्। तल्लक्षणं यथा दर्पणे—"परिसर्पस्तु दृष्टनष्टानुसर्पणम्।"

(ण) मालेति। इतोऽपि प्रदेशात् अन्यस्मिन्‌ प्रदेशे अवचिनुवः पुष्पाणीति शेषः ।

(ঢ) লব। সখি! তাহাই করি। (উভয়ের পুষ্পচয়ন)।

১৮। মাধ। ভগবতীর কার্য্যোপদেশ-কৌশল অতীব আশ্চর্য্যজনক।

(ণ) মাল। সখি! এই স্থান হইতে অন্য দিকে যাইয়া পুষ্পচয়ন করি।

काम। [मालतीं परिष्वज्य।] अयि! विरम, निःसहासि जाता। (२०) तथाहि—

स्खलयति वचनं ते, संश्रयत्यङ्गमङ्गम्
जनयति मुखचन्द्रोद्भासिनः स्वेदविन्दून्।
मुकुलयति च नेत्रे सर्वथा सुभ्रु! खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन॥ (२१)

---

(२०) प्रच्छन्नावस्थापितमाधवो यथा निःशङ्कं मालतीमवलोकयितुं प्रभवति, तथा सम्पादनायैव पुष्पावचयनव्याजेन समानीतायाः मालत्याः अन्यत्र गमने तद्व्याघातो भवेदिति मन्यमाना कामन्दकी पुष्पचयनार्थमन्यत्र जिगमिषन्तीं तां संस्थापयितुं छलतः प्राह—अयीति। विरम निवर्त्तस्व कुसुमचयनादिति शेषः। यतो निःसहा पुष्पचयनजनितश्रमसहनाक्षमा असि भवसि।

(२१) स्खलयतीति। हे सुभ्रु! शोभनभ्रुयुक्ते! खेदः पुष्पचयनजनितः श्रमः "श्रमः शरीरयोः खेदः क्रियातिशयतः श्रम" इति कोषः। ते तव वचनं स्खलयति गद्गदं करोति, तथा अङ्गं अङ्गं प्रत्यवयवं संश्रयति, सर्व्वान् अवयवान् व्याप्य वर्त्तते। "स्रंसयती"ति पाठे तु श्लथयतीत्यर्थः। मुखचन्द्रोद्भासिनः मुखचन्द्रस्य शोभाविशेषसम्पादनशीलान् स्वेदविन्दून् घर्म्मजलकणान् जनयति। एवं नेत्रे नयने मुकुलयति निमीलयति च। अत एव वल्लभालोकनेन वल्लभकर्त्तृकेण हृदाभिलाषकामिनीजनकर्त्तृकेण दर्शनेन तुल्यं समानं यथा स्यात्तथा त्वयि सर्व्वथा विलसति सर्व्वतोभावेन वर्त्तते। वल्लभावलोकनमपि युवत्या वचनं गद्गदं करोति, अवयवानवसादयति वदने घर्म्मविन्दून् जनयति, आनन्दातिशयसम्पादनेन नेत्रे च निमीलयतीति तुल्यविलासाभिधानं युक्तम् एवेति मन्तव्यम्।

২০। কাম। (মালতীকে আলিঙ্গন করিয়া) অয়ি! পুষ্পচয়ন হইতে নিবৃত্ত হও। তুমি পুষ্পচয়নশ্রম-সহনে অসমর্থ হইয়াছ।

২১। দেখ, হে সুভ্রু! এই পুষ্পচয়ন-জনিত শ্রম তোমার বাক্য স্খলিত করিতেছে, এবং এই শ্রম তোমার সর্ব্বাবয়বে পরিব্যাপ্ত হইয়াছে, মুখচন্দ্রের শোভা-বিশেষ-সম্পাদক ঘর্ম্মবিন্দু উৎপাদিত করিতেছে ও তোমার নেত্রযুগল নিমীলিত করিতেছে, অতএব এই শ্রম সর্ব্বপ্রকারেই বল্লভালোকনের তুল্যরূপে তোমাতে বর্ত্তমান আছে।

[मालती लज्जते ।] (२२)

लव । सोढ़व्यं भगवत्योऽ आज्ञत्तम् । (त)

माध । हृदयङ्गमः परिहासः । (२३)

(त) सोढ़व्यं भगवत्याज्ञप्तम् ।

अत्र मन्नभावलोकनमिव विद्म्नयि विलसतीत्यत्रोत्प्रेक्षितया चार्थी पूर्णोपमालङ्कारः । एवं मामवलोकयतीत्यादिवाक्यार्थानां विलसतीतिवाक्यार्थहेतुतया वाक्यार्थहेतुकं काव्यलिङ्गं, तैद मध्येवावर्ज्जकाना मामवलोकयतीत्येकक्रियाणां प्रयोगाद्दीपकमप्यलङ्कार इति तेषां सङ्करः। एवमव यं पिव लतान्तरितमन्नभावलोकनेन सह तव पुष्पचयनजनितः स्वेदो विलसतीत्यर्थोऽपि व्यज्यत इति वक्रोक्तिरपि व्यज्यत इत्यनुसन्धेयम् । मालिनी वृत्तम् ।

सानुरागं कामवलोकयन्त्या ते चतुराभा जायते ग्लानत्वात्त्वयापि ते दृश्यत इति परिहास- गर्भोक्तित्वात् नर्मनाम सन्ध्यङ्गम् "परिहासवचो नर्म" इति दर्पणोक्तं तल्लक्षणम् । अथात्र सुभ्रु शब्दस्याश्लीलत्वे नाटकेऽसि नन्दीभावेन कथं सम्बोधने कथः शिक्षोपदेशेति मत्वं "विमानना सुभ्रु कुत पितुर्गृहे" इत्यादि महाकविप्रयोगदर्शनादिति केचिदाचचक्षिरे । केचित्तु "जाता सुभ्रु मनोरमे तदथमि"ति वटुप्रयोगवत् सामान्योपक्रमोऽयमित्याहुः । वस्तुतस्तत्र दुर्गाप्रमा- धामव माधोय । तथाहि—"कृष्णय कचती"ति सुबटीकायां दुर्गोक्तं—"कथं विमानना सुभ्रु कुत पितुर्गृहे" इति ? मतान्तरेऽस्त्रीवचन इत्यस्य व्यावर्त्तनात्, पञ्जीवचने भवति नदीसंज्ञायः स्यात्, अमवति न भवति । स्त्रीवचने तु सर्वत्र नदीसंज्ञास्त्येवेति न विरुध्यत" इति । "न स्मारे पु ति कथं सुन्दरी"ति सूत्रं विदधता श्रीपतिनाप्येतदेव समर्थितम् । "सुभ्रु विमान- नीयमे !" इति परमपण्डितदण्डिवचनमप्यमुमर्थं समर्थयतीति स्त्रीवचने सुभ्रू शब्दस्य नदीत्वं मतोऽवैति स्थितम् । तथाप्यत्र श्रुतसंस्कारतादोषोऽपीति ।

(२२) लज्जते लज्जां नाटयतीत्यर्थः, क्वचिदेव पाठः ।

(त) सोढ़व्यं । भगवत्या यदाज्ञप्तं पुष्पावचयादिरभेति यदनुज्ञातं तत् साधु युक्तियुक्तम् । यतो मयापि स्मरणीयं लक्ष्यत इति विलास एव विषेय इति भावः ।

(२३) माध । परिहासः खल्वयोऽर्थात् मेयवचनं हृदयङ्गमः मनोज्ञः ।

---

२२ । (मालती লজ্জার ভাব দেখাইতে লাগিল)।

(ত) লব । ভগবতী তাহা আজ্ঞা করিয়াছেন ।

২৩ । মাধ । এই পরিহাস অতীব হৃদয়গ্রম

काम। तदास्यतां, किञ्चिदाख्येयमाख्यातुकामास्मि। (२४)

[सर्वा उपविशन्ति।]

काम। [मालत्याश्चिबुकमुन्नमय्य।] शृणु विचित्रमिदं, सुभगे!। (२५)

माल। अवहिदह्मि। (ख)

काम। अस्ति तावदेकदा प्रसङ्गतः कथित एव मया माधवाभिधानः कुमारो यस्त्वमिव मामकीनस्य मनसो द्वितीयं निबन्धनम्। (२६)

(ख) अवहितास्मि।

---

(२४) कामेति। तदधुना आस्यता उपविश्यताम्; किञ्चिदाख्येयं आश्चर्यं वृत्तं आख्यातुकामा वक्तुमभिलषन्ती अस्मि—अहमिति शेषः।

(२५) कामेति। चिबुकं वदनाधोभागं उन्नमय्य उत्थाप्य, स्नेहातिशयात् इति क्रियैकवर्णकलालापूर्वकाणि वाक्यानि। विचित्रं आश्चर्यं, सुभगे! सौभाग्यशालिनि! अनेन माधवविषयकवृत्तान्तश्रवणात् सौभाग्यमिति ध्वनितम्।

(ख) मालेति। अवहिता अहं दत्तावधाना।

(२६) कामेति। अमात्यः "कल्याणशरीरो माधव" इत्यत्रोक्तितात्पर्यग्रहणात् मया कथित, तत्कालिके यतः माधवाभिधानः माधवनामा कुमारः अविवाहितः कश्चिद्युवकः। यः माधवः त्वमिव मामकीनस्य मदीयस्य (ममेदमित्यर्थे—मम-ख-ईन)। मनसः चेतसः, निबध्यते अनेन बध्यतेऽस्मिन्निति निबन्धनं आलम्बनम्। मम मनसः यथैव आलम्बनं मया माधवो द्वितीयमालम्बननिबन्धः।

২৪। কাম। তবে উপবেশন কর, কিঞ্চিৎ বক্তব্য বিষয় বলিতে ইচ্ছা করিতেছি।

(সকলের উপবেশন)

২৫। কাম। (মালতীর বদনের অধোভাগ উত্তোলিত করিয়া) অয়ি সৌভাগ্যশালিনি! এই বিচিত্র কথা শ্রবণ কর।

(খ) মাল। আমি অবহিত হইয়াছি।

২৬। কাম। মাধবনামক এক কুমারের কথা প্রসঙ্গক্রমে এক দিন

लव। सुमरामो। (द)

काम। स खलु मन्मथोद्यानयात्रादिवसात् प्रभृति दुर्मनायमानः, परवानिव शरीरोपतापेन। (२७)

> यदिन्द्रावानन्दं प्रणयिनि जने वा, न भजते,
> व्यवस्यन्नस्तायं तदयमतिधीरोऽपि विषमम्।
> प्रियङ्गुश्यामाङ्गप्रकृतिरपि, चायाण्डुमधुरम्
> वपुः क्षामं क्षामं वहति, रमणीयश्च भवति ॥ २८ ॥

(द) स्मरामः।

(द) स्मरेति। आगाम' भवता कथितस्य माधववृत्तान्तस्येति शेषः।

(२७) कामेति। स माधवः दुर्मनायमानः, दुर्मनाः दुःखितान्तःकरण इव आचरन्, शरीरोपतापेन कामजदेहदाहेन परवान् पराधीन इव जात इति शेषः।

(२८) विशेषतो मदनदशा दर्शयति—यदिन्द्राविति। यद यस्मात् इन्दौ चन्द्रे सर्वलोकाह्लादकरेऽपीत्यर्थः प्रणयिनि स्निग्धतया आस्पदे जने वा हर्षं भजतीति शेषः। आनन्दं आह्लादविशेषं न भजते न लभते, तत्तस्मात् अतिधीरोऽपि निरतिशयधैर्य्यशाली अपि अयं माधवः विषमं दुःसहं व्यवसाय हृदयनिहितमभिप्रायं व्यनक्ति प्रकटयति, सुहृद्भ्योऽप्यन्तःसन्तापमपि सर्वाह्लादकरं सुधाकरं प्रणयिनं जनं वा सुखाभावेऽप्यानन्ददायकमनं नैव मन्यतेति भावः। अनेनारति-सन्तापाभिधाने मदनावस्थे दर्शिते। तथा—"प्रियङ्गुः फलिनीलता" तद्वत् श्यामा श्यामवर्णा अङ्ग-प्रकृतिः शरीराकृतिर्यस्य सः, तथाविधश्यामाकृतिरपीत्यर्थः, आपाण्डु विरहेणेषत् श्वेतवर्णं, तथापि मधुरं माधुर्य्ययुक्तम् ("सर्वावस्थासु चेष्टानां माधुर्य्यं मधुरादिति"ति माधुर्य्यलक्षणम्)। क्षामं क्षामं

তোমার নিকট বলিয়াছি। যে মাধব তোমারই ন্যায় আমার মনের দ্বিতীয় অবলম্বনস্বরূপ।

(দ) লব। সেই মাধবের বৃত্তান্ত স্মরণ আছে।

২৭। কাম। সে (মাধব) মদনোদ্যানযাত্রার দিবস হইতে দুর্মনায়মান হইয়া যেন কামজ শরীরতাপের অধীন হইয়া পড়িয়াছে।

২৮। যেহেতু সে (সর্বাহ্লাদকর) চন্দ্র বা নিতান্ত প্রেমাস্পদ জনকে দেখিলেও আনন্দলাভ করিতেছে না, সুতরাং সে অতি ধৈর্য্যশালী হইলেও অতি বিষম অন্তঃ

मन्त्र। एदंवि तस्सिं अवसरे भअवदीं तुवराअन्तीए, अवलो-इदाए उदीरिदं आसि, जधा असत्थसरीरो माहवोत्ति (ध)।

काम। यावदस्त्वेवं, मालत्येवास्य मन्मथोन्मादहेतुरिति, ममापि स एव निश्चयः। कुतः—(२८)

(ध) एतदपि तस्मिन्नवसरे भगवतीं त्वरयन्त्या अवलोकितयोदीरितमासीत्, यथा अस्वस्थ-शरीरो माधव इति।

अतिशयकृशं वपुः शरीरं वहति धारयति, रमणीयं कान्तिमात्रावशेषेण मनोहरञ्च भवति। तथाच नैवं पाण्डुता कोमलता वा रोगजनिता, तथात्वे रमणीयत्वासम्भवादिति भावः। अनेन काम्यं नाम मदनावस्था दर्शिता।

अत्र प्रथमार्द्धे इन्दुकलाग्निमणालनीलकमलकारणे सत्यपि आनन्दलाभरूपतत्फलाभावा-द्विशेषोक्तिः, तत्फलाभावेन च कारणाभावस्याप्यनुमानादनुमानञ्चालङ्कारः। द्वितीयार्द्धे च स्फुट एव विरोधाभास इत्येतेषां परस्परनैरपेक्ष्येण संसृष्टिः। "सति हेतौ फलाभावे विशेषोक्ति-स्तथा द्विधा" इति विशेषोक्तिलक्षणम्। अनयोस्तु लक्षणं प्रोक्तम्। शिखरिणी वृत्तम्।

(ध) नवेति। एतदपि तस्य शरीरोपतापवर्णनमपि। तस्मिन्नवसरे माधववृत्तान्तकीर्त्तन-काले।

(२८) कामेति। अयथायथम् यथार्थकथया युक्तवती। ननु लोकपरम्परया यदर्थं कदाचित् मिथ्यापि भवेदित्याशङ्क्य निश्चयार्थमाह—ममापीति। स एव अस्य कामोन्मादः मालतीनिमित्तक इत्येव निश्चयः अवधारणम्। तादृशावधारणे कारणं दर्शयितुमवतारयन्ती पातयति—कुत इति।

সন্তাপ প্রকাশ করিতেছে। এবং যে কদলী লতার ন্যায় শ্যামবর্ণাকৃতি হইয়াও (বিরহবশতঃ) ঈষৎ পাণ্ডুবর্ণ মধুর ও অতিশয় কৃশ শরীর ধারণ করিতেছে—অথচ কান্তিমাত্রাবশেষ বলিয়া মনোহর হইতেছে।

(ধ) মন্ত্র। মাধবের শরীরোপতাপের কথা ও মাধববৃত্তান্ত কথনকালে আপনাকে ত্বরায় যাওয়ার জন্ত অবলোকিতা বলিয়া দিল, যথা—"মাধবের শরীর নিতান্ত অসুস্থ"।

২৮। লোকপরম্পরা শুনিয়াছি যে, মালতীই সেই মদনোন্মত্ততার কারণ, আমারও তাহাই ধারণা। তাহার হেতু এই যে—

अनुभवं वदनेन्दुरुपागमयितमेव यदस्य महात्मनः ।
क्षुभितमुत्कलिकातरलं मनः पय इव स्तिमितस्य महोदधेः ॥३०

माध । अहो ! उपन्यासशुद्धिः, अहो ममात्महत्त्वारोपणे यत्नः ।(३१)
अथवा—
शास्त्रेषु निष्ठा सहजश्च बोधः प्रागल्भ्यमभ्यस्तगुणा च वाणी ।
कालानुरोधः प्रतिभानवत्त्वमेते गुणाः कामदुघाः क्रियासु ॥ ३२ ॥

---

(३०) अनुभवमिति । माधवमालिकुलदर्शनरूपेणोक्तिं [illegible]—एष इति । एष वदनेन्दुः मालत्या आननचन्द्रः नियतं निश्चितमेव महात्मनः, महानुभवस्य अस्य माधवस्य अनुभवं आत्मप्रत्ययं तदधिगततामिति यावत्, उपागमयत् प्रापयत् । यदयस्मात् अस्य, अस्य चित्तं स्तिमितस्य निश्चलस्य महोदधेः समुद्रस्य पयो जलमिव उत्कलिकातरलं, उत्कण्ठया तरङ्गैश्च चपलं सत् क्षुभितं धैर्यरहितं जातं [illegible] इति भावः । "कल्लोल उत्कलिकोर्मिः [illegible] उत्कण्ठयोरपि" इति मेदिनी । यथा समुद्रजलमिन्दुदर्शनादेव क्षुभ्यति, तथा माधवमनोऽपि तव वदनचन्द्रावलोकनेनैव क्षुभितमनुमानात्प्रतीयते, माधवस्य महत्त्वे परिमम्य मनसः [illegible] [illegible] विना सर्वथैव क्षोभासम्भवादिति भावः ।

अत्र वदनेन्दुरिति रूपकेण पय इवेत्युपमया चानुप्राणिते माधवमनःक्षोभरूपकार्यलिङ्गे न मालतीमुखेन्दुदर्शनरूपकारणस्यानुमानादनुमानमलङ्कारः । द्रुतविलम्बितं वृत्तम् । "द्रुतविलम्बित-माह नभौ भरौ" इति तल्लक्षणम् ।

、(३१) मार्धेति । उपन्यासस्य प्रतिपाद्यविषयव्याख्यानस्य शुद्धिः [illegible] । महत्त्वारोपणे मयि अविद्यमानस्यापि माहात्म्यस्य संस्थापने ।

(३२) अथवा [illegible] नेदमाश्चर्यकरमिति समर्थयितुमाह—अथवा शास्त्रेष्विति । शास्त्रेषु नीत्यादिसकलविद्यासु निष्ठा संशयादिरहितज्ञानवत्तिः पारदर्शितेति यावत्, सहज'

৩০। এই মালতীর মুখচন্দ্র নিশ্চয়ই এই মহাত্মা মাধবের প্রত্যক্ষীকৃত হইয়াছে, যেহেতু নিশ্চল সমুদ্রের জল যেমন কল্লোলে চঞ্চল হইয়া ধৈর্য্যরহিত হয়, ইহার মনও সেইরূপ উৎকণ্ঠায় চঞ্চল হইয়া ধৈর্য্যরহিত হইয়াছে।

৩১। মাধ। অহো! কথোপন্যাসের কি বিশুদ্ধতা এবং আমার মহত্ত্বারোপের জন্য কি চেষ্টা!! অথবা—

৩২। শাস্ত্রের পারদর্শিতা স্বাভাবিক নির্মল বুদ্ধিতা, প্রগল্ভতাদি গুণযুক্ত

काम। अतस्तेन जीवितादुद्विजमानेन दुष्करमपि न किञ्चिन्न क्रियते। असौ हि,—(२२)

सामाजिको बोधः अनभ्यस्तेष्वपि विषयेषु झटिति प्रवेशशीला निर्मला बुद्धिः, प्रागल्भ्यं "निःसाध्वसत्वं प्रागल्भ्यं सभास्वपि सर्वत"इत्युक्तलक्षणं, वाग्मित्वं, तथा अभ्यस्ता आयत्तीकृता गुणाः प्रसादमाधुर्य्यादयो यया एवम्भूता वाणी वाक्यस्य काव्यावबोधः कस्मिन् समये किं वक्तव्यमित्यवसरज्ञानं, प्रतिभानवत्त्वं तात्कालिकप्रत्युत्पन्नमतित्वमित्यं एते गुणाः क्रियासु अभीष्टकार्य्येषु कामं दुहन्तीति कामदुघाः (काम—दुह—क कर्त्तर्य्यर्थे)। अभिलाषसम्पादकाः। तथाच दर्शितं पे. सर्व्वमेव शोभमानायां भगवत्यां उपन्यासशुद्धत्वं न विस्मयावहमिति भावः।

अत्राप्रस्तुतात् क्रियासामान्यात् प्रस्तुतदूतीक्रियायाः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः, स च गुणसमुच्चयालङ्कारेण संसृज्यते। तथाच मादृशगुणयुक्तकामन्दकीरूपसहायदूतीलाभान्मनोरथोऽपि मालतीसमागमरूपो माधवस्यावश्यं फलिष्यतीति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः। अप्रस्तुतप्रशंसालक्षणं यथा दर्पणे—"क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः। कार्य्यान्निमित्तं कार्य्यञ्च हेतोरथ समात् समे। अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः। अप्रस्तुतप्रशंसा स्या"दिति॥

(२२) कामेति। अतः अस्मात् धैर्य्यराहित्याद्धेतोः तेन माधवेन जीविताज्जीवनात् उद्विजमानेन त्वया विना जीवनधारणमतीव दुःखकरमिति मन्यता, दुष्करं दुःसम्पाद्यमपि किञ्चित् कार्य्यं न क्रियत इति न, अपि तु क्रियत एवेत्यर्थः।

त्वद्विरहेण जीवनमेवेदानीमतिदुःसहदुःखाकरमिति विभाव्य जीवनाद्विरक्ततया तेन तत्परित्यागेच्छया दुष्करमपि जीवननाशकरं कार्य्यं क्रियत एवेति सरलार्थः।

हि तथाहि—असौ माधव इति श्लोकस्थेन असौ इत्यादिना अन्वेति।

বাক্য, কোন্ কালে কি বলিতে হয়, তাহার অবসরপরিজ্ঞান এবং প্রতিভশালিত্ব এই সকল গুণাবলীই কার্য্যে অভিলাষ-সম্পাদক হয়। (ইহার সমস্তই দেবীতে বিদ্যমান আছে, সুতরাং ইহার কথোপন্যাসের যে বিশুদ্ধতা হইবে, তাহাতে আর বিস্ময় কি?)।

৩৩। কাম। অধীরতাবশতঃ তোমার বিরহে জীবনধারণ নিতান্ত ক্লেশকর, বিধায় জীবনে বীতশ্রদ্ধ হইয়া মাধব যে দুষ্কর কার্য্যের অনুষ্ঠান করিতেছে না, তাহা নহে।

धत्ते चक्षुर्मुकुलिनि रणत्कोकिले बालचूते
मार्गे गात्रं क्षिपति बकुलामोदगर्भस्य वायोः।
दावप्रेम्णा सरसबिसिनीपत्रमात्रोत्तराय-
स्ताम्यन्मूर्त्तिः श्रयति बहुशो मृत्यवे चन्द्रपादान् ॥ ३४ ॥

(३४) धत्ते इति। मुकुलिनि सञ्जातकोरके रणत्कोकिले शब्दायमानपिके बालचूते बालत्वात् मनोहरे सहकारतरौ मन्यथे मरणाय बहुशो वारं वारं चक्षुर्द्धत्ते धारयति। अत्र मुकुलिनि इत्यनेन कामसायकत्वम् रणत्कोकिल इत्यनेन च कामसैन्यतारिष्यमुक्तं, तथाच कोकिलकुलकलाकुलितादवाप्य सहकारविभिन्नं कोरकजालमस्त्रं मम चक्षुर्भित्वा प्राणनाशं विधास्यतीत्यभिप्रायेण—हरिविषयं इव विरहिजनानिष्टं सहकारतरौ मरणाय पुनः पुनर्दृष्टिं पातयतीति भावः। तथा—बकुलामोद, बकुलकुसुमसौरभं गर्भे मध्ये यस्य तस्य वायोर्दक्षिणानिलस्य मार्गे निर्गमपथे मन्यथे बहुशो गात्रं देहं क्षिपति अर्पयति। किमनेन दुःखानुभवदुर्वहदेहेन? कामनाराचघातपातकमुल्योऽयं वायुरेवैनम् चूर्णयतु इत्यभिप्रायेणेत्यर्थः। चन्दनाचलमन्दगन्धवहस्य विरहिजनातिदुःसहतया कामबाणपातसमुत्पन्नकालं प्राणकालवत्सनस्य न विरहजिति मन्तव्यम्। किञ्च—सरसं आर्द्रं यत् बिसिनीपत्रं विरहजदाहप्रशमनाय परिजनोपनीतं सरोजपत्रं तन्मात्रं उत्तरीयः प्रावरणवस्त्रं यस्य सः, सरसबिसिनी-पत्रमात्रे विरहजदाहेनैव शोषणप्रकारवशीभूतत्वं स्यादिति भावः। "पत्रमात्रोत्तरीय" इति पाठे तादृशं पत्रमात्रं उत्तरीयं प्रावरणं यस्य सः। तथा ताम्यन्ती ग्लानिं प्राप्नुवन्ती मूर्त्तिराकृतिर्यस्य स तादृशः) मदवस्थितात्रविषयस्य विशेषणम्। दावप्रेम्णा सन्तापकत्वात् चन्द्रकिरणेषु दावानलबुद्ध्या मरणसाधकतया तत्प्रेमपातेनेत्यर्थः, मन्यथे मरणाय बहुशो वारं वारं चन्द्रस्य पादान् किरणान् श्रयति सेवते। विरहिजनानां निरतिशयसन्तापकत्वं अनुभूतं तत् संक्षेपतः मरणायावलम्बत इत्यर्थः। "दवदावौ वनारण्यवह्नी" इति॥ "पादा रश्म्यङ्घ्रितुर्य्यांशाः" इति चामरः।

৩৪। এই মাধব মরণের জন্য মুকুলিত ও শব্দায়মান কোকিলযুক্ত নব সহকার বৃক্ষে বার বার দৃষ্টি নিক্ষেপ করিতেছে। বকুলপুষ্পগন্ধামোদিত বায়ুর সঞ্চরণপথে মরণের জন্য বারবার গাত্র পাতিয়া রাখিতেছে। এবং নিতান্তম্লান-মূর্ত্তি হইয়া পরিজনসমানীত সরস কমলিনীপত্রকেই একমাত্র বিরহানল কর্ত্তৃক দাহের বিঘ্নস্বরূপ মনে করিয়া অতি সন্তাপকত্বনিবন্ধন দাবানলবোধে মরণের জন্য বারবার চন্দ্রকিরণের সেবা করিতেছে।

माध। अन्य एव अद्भुतः कथाप्रकारो भगवत्याः। (३५)

माल। [स्वगतं।] अदिदुक्करं करेदि। (न)

काम। तदेवं प्रकृत्या सुकुमारः कुमारः कदाचिदपि अन्यत्र अपरिक्लिष्टपूर्वस्तपस्वी, यतोऽधुना शक्यमनेन मरणमपि अनुभवितुम्। (३६)

(न) अतिदुष्करं करोति।

अत्र मुकुलितालोक्यादिविशेषणानां साभिप्रायत्वात् परिकरालङ्कारः। तथा स्फुरणबन्धे—एकस्मिन् माधवे अलसे इत्यादि बहुक्रियाणां कारकत्वेनान्वयात् समुच्चयालङ्कारः। तासां क्रियाणामसावित्येककर्तृकत्वाद्दीपकालङ्कारश्चेति तेषामङ्गाङ्गिभावेन सङ्करः। मन्दाक्रान्ता वृत्तम्।

(३५) माधेति। अन्य एव साधारणकथाप्रकाराद्विलक्षण एव अनन्यसाधारण इति यावत्, अद्भुतः अद्भुतः, कथाप्रकारः कथनक्रमः।

(न) मालेति। अतिदुष्करं मरणाध्यवसायं मदेकसाध्यमित्यर्थः, करोति स माधव इति शेषः, क्वचित् पुस्तके "स" इति मूलोक्त एव पाठः।

(३६) कामेति। यतो यस्मात् अनेन माधवेन तदेव उपक्रमेण मरणमपि अधुना अनुभवितुं शक्यं, अतः प्रकृत्या स्वभावेन कुमारः सुकुमारः सौकुमार्यभाक् "सौकुमार्यं विधाभिन्नं श्रेष्ठमध्याधमक्रमात्। अमूलपत्रसम्पर्कितुह्यं यत् स्यात्तदुत्तमम्"। कुमारः अकृतदारः (एतेन विशेषतो युवतिजनदर्शनौत्सुक्यं सूचितम्)। अन्यत्र त्वद्विनाभ्यां तपस्वी अपरिक्लिष्टपूर्वः, पूर्वं अक्लिष्टः पूर्वमीदृशमरणरागानाविषयीभूत इत्यर्थः। (अनेनाननुभूतपूर्वत्वात् क्लेशस्यातिदुःसहत्वं त्वमेव प्रथमानुरागविषय इति धन्या त्वमिति च ध्वन्यते)। अयं माधवः तपस्वी अनुकम्पनीयः "तपस्वी तापसे चानुकम्प्ये च" इति विश्वः। त्वमप्यस्मिन्ननुरक्ते अनुरागयोग्ये जने अनुरक्ता सती एनं रक्षस्वेति भावः।

৩৫। মাধব। ভগবতীর কথার উপক্রম সর্বতোভাবেই বিলক্ষণ ও নির্দোষ।

(ন) মাল। (স্বগত) অতি দুষ্কর করিতেছে।

৩৬। কাম। স্বভাবতঃ অতি কোমল অবিবাহিত এই মাধব যেহেতু কখনও কোন স্ত্রীবিষয়ে এরূপ ক্লেশ অনুভব করে নাই, কাজেই ইহার পক্ষে মরণও অসম্ভব নহে।

माल। [जनान्तिकं।] सहि! अत्तणो कारणादो तस्स सव्वलोअालङ्कारभूदस्स, किम्पि आसङ्कमाणाभूदाविट्ठाविय ण आणामि किं पडिवदिस्सिम्हि (प)

माध। दिष्ट्यानुकम्पितोऽस्मि भगवत्या। (३०)

लव। भअवदी एव्ववादिणीत्ति आअक्खीअदि, अह्माणम्पि भट्टिदारिआ, भवणासण्णरच्छामुहसमुत्तुङ्गमण्डणस्स, तस्स ज्जेव्व बहुसो अणुभूदद्दंसणा भविअ, रविकिरणासिलिट्ठमुद्धकमलिणी-

---

(प) सखि। आत्मनः कारणात्तस्य सर्वलोकालङ्कारभूतस्य, किमपि आशङ्कमाना भूताविष्टेव न जानामि किं प्रतिपत्स्ये इति।

(फ) भगवती एवं वादिनी इति आख्यायते अस्माकमपि भर्तृदारिका, भवनासन्नरथ्यामुखसमुत्तुङ्गमण्डनस्य तस्यैव बहुशोऽनुभूतदर्शना भूत्वा, रविकिरणाश्लिष्टमुग्धकमलिनीकन्दसुन्दरा-

---

(प) मालेति। आत्मनः मम हृदये। किमपि अवक्तव्यं मरणमित्यर्थः, भूतेन पिशाचादिदेवयोनिविशेषेण आविष्टा यस्ता अभिभूता इति यावत्। किं प्रतिपत्स्ये भगवतीवचनस्य किमुत्तरं दीयते इति न जानामीत्यन्वयः। भवत्या त्वयैव यथोचितमुत्तरं दीयतामित्याशयः।

(३०) माधेति। अनुकम्पितः, भगवत्या अनुरागसम्पादनेन एवं रीत्या कथोपन्यासेनानुगृहीतः।

(फ) लवेति। एववादिनी निःशङ्कमकपटं माधवस्य कामावस्थाप्रकाशिनी इति हेतोः आख्यायते मयापि मालत्याः अवस्था अभिधीयते। अत्र माधवेन सम्प्रश्नेनाहं दूत्यादिकां परित्यज्य गुरुजनसमक्षं तयाभिहितं मालत्या अवस्था कथञ्चिदुद्दयुक्ताऽऽस्मीति मम धृष्टता न गृहीत-

---

(প) মাল। (জনান্তিকে) সখি! আমার জন্য সর্বালঙ্কারভূত সেই মহাত্মার যদি কিছু হয়, এই আশঙ্কায় আমি ভূতাভিভূতার ন্যায় হইয়া দেবীবাক্যের যে কি উত্তর দিতে হইবে, তাহা বুঝিতেছি না।

৩০। মাধ। ভাগ্যক্রমেই আমি ভগবতীকর্তৃক অনুগৃহীত হইতেছি।

(ফ) লব। ভগবতী মাধবের অবস্থা ব্যক্ত করিতেছেন বলিয়াই আমিও মালতীর অবস্থা বলিতেছি। আমাদের ভর্তৃদারিকা মালতী স্বীয় বাসগৃহের

कन्द-सुन्दरावअव-सोहा-विभाविदाणङ्ग-वेअणा-धिअदर-रमणीआवि, परिअणं दूणेदि। णाभिणन्दिदि केलिकलाओ, केवलं कमलाअमाण-कन्तहत्थपल्लत्थगण्डमण्डला दिअसाइं गमेदि। (फ)

शवयवशोभाविभावितानङ्गवेदनाधिकतररमणीयापि, परिजनं दुनोति नाभिनन्दति केलिकलाः, केवलं कमलायमानकान्तकरपर्यस्तगण्डमण्डला दिवसानि गमयति।

यैति भावः। भर्तृदारिका महाकन्या मालती भवनस्य सौधवासगृहस्य आसन्नं सन्निहितं यत् रथ्यामुखं प्रतोलप्रदेशः तस्य मुहुर्मुहुः मण्डनं भूषणं येन तथाभूतस्य तस्यैव माधवस्यैव बहुशो वारं-वारं अनुभूतदर्शना प्राप्तदर्शनाभूत्वा (अनेन चक्षुःप्रीतिरुक्ता) रविकिरणैः सूर्यरश्मिभिः आश्लिष्टं स्पृष्टं मुग्धं मनोहरं यत् कमलिनीकन्दं नलिनीमूलं मृणालमिति यावत्। ("कन्दोऽस्त्री सूरणे मूले" इति विश्वप्रकाशः)। तद्वत् सुन्दरस्य पाण्डिमत्वान्मनोहरस्य अवयवस्य शोभया कान्त्या विभाविता सूचिता या अनङ्गवेदना मदनपीडा तया अधिकं यथा स्यात्तथा रमणीया कामाविष्टितकायस्य कान्तिप्रकर्षोद्दीपकत्वादाह्लादजनिकाऽपि (अतिकामस्य सुखजनकत्वेनेष्टत्वेऽपि दुःखजनकत्वादनिष्टसम्पादकत्वाभिप्रायः)। सखी परिजनं माद्दशं सखीजनं दुनोति सन्तापयति। विरहदुःखप्रतिकारासामर्थ्यादिति भावः। (अनेनाङ्गम्लानिः पाण्डिमा च दर्शितः) दुःखप्रकारमेव दर्शयति—नाभिनन्दतीति। केलीः कन्दुकादिक्रीडाः, कलाः नृत्यगीतादीः नाभिनन्दति नाद्रियते। (अनेनारतिरुक्ता)। कथं तर्हि दिनान्यतिपातयतीत्याह—केवलमित्यादि। कमलायमानः सरोजवदाचरन् कान्तः मनोज्ञः यो करः कमलवदनुरूप्यं पाणितलमित्यर्थः, तत्र पर्यस्तं न्यस्तं गण्डमण्डलं यया सा तथाभूता। (एतेन चिन्ता कथिता)। कान्तात्यभि करतले गण्डविन्यासः युवतीनां स्वाभाविकः, यथोक्तं भरतेन—"अप्राप्ते च प्रिये कार्यः स्त्रीभिर्गण्डाश्रितः करः" इति।

সন্নিহিত প্রশস্ত পথের অলঙ্কারকারী সেই মাধবেরই বারবার দর্শনলাভ করিয়া সূর্য্যরশ্মি-সংস্পৃষ্ট মুগ্ধ মৃণালের ন্যায় সুন্দর অবয়বের শোভাদ্বারা সংসূচিত যে কামবেদনা তদ্দ্বারা অধিক মনোহর হইয়াও মাদৃশ সখীদিগকে সন্তাপিত করিতেছে। কন্দুকাদিক্রীড়া ও নৃত্যগীতাদি শিল্পের আদর করিতেছে না। কেবল কমলবৎ বিরাজমান হস্তে মস্তক বিন্যস্ত করিয়া দিন অতিবাহিত করিতেছে।

अविअ। विअसिआरविन्दमअरन्दणिस्सन्द-सुन्दरेण, दर-दलिअ-कुन्दमाअन्द-महुबिन्दुसन्दोहवाहिणा, मअणुज्जाणपेरन्तमारुदेण उत्तम्मदि। (व)

अण्णं अ जदोप्पहुदि तस्सिं जत्तादिअहे णिअमहूसवाब्भुदअ-दंसण-पडिवण्णरूवस्स भअवदो कामस्स विअ, कामकाणणालङ्कार-धारिणो तस्स, विविहविब्भमाहिरामं, अणुरूवाणुराआणुबन्धमहु-

---

(व) अपि च। विकसितारविन्दमकरन्दसुन्दरेण कुन्दमाकन्दमधुबिन्दुसन्दोहवाहिना मदनोद्यानपर्यन्तमारुतेन उत्ताम्यति।

(भ) अन्यच्च, यतः प्रभृति तस्मिन् यात्रादिवसे, निजमहोत्सवाभ्युदयदर्शनप्रतिपन्नरूपस्य भगवतः कामस्येव, कामकाननालङ्कारधारिणः तस्य, विविधविभ्रमाभिराममनुरूपानुरागानु-

---

(व) अपि चेति। विकसितानाम् अरविन्दानां मकरन्दनिष्यन्देन निर्यासद्रवेण तत्संवर्धनेत्यर्थः, सुन्दरः मधुरत्वेन मनोहरः तेन, तथा दरविदलितौ ईषद्विकसितौ ("ईषदर्थे दराव्यय"मित्यमरः)। यौ कुन्दमाकन्दौ कुन्दचूतकुसुमे ("माकन्दः सहकारेऽस्त्री धात्रीमगध-भेदयो"रिति मेदिनी)। तयोर्मधुबिन्दुसन्दोहं मधुकणसमूहं वहति धारयतीति तेन तथाभूतेन पुष्पनिर्यासद्रवसम्पर्कादतिशीतलेनेत्यर्थः। मदनोद्यानस्य पुरवर्त्तिनोपवनस्य पर्यन्तमारुतेन तत्प्रान्त-सञ्चारिणा वायुनेत्यर्थः, उत्ताम्यति अतीवाधीरा भवति। (एतेनोद्दीपनविभावनाऽनिल-वेदनाभिहिता)।

(भ) अन्यच्चेति। निजस्य स्वस्य यो महोत्सवः स एव अभ्युदयः वृद्धिः तस्य दर्शनाय प्रतिपन्नरूपस्य अनङ्गत्वेऽपि स्वप्रभावेन सायकमङ्गीकृतविग्रहस्य भगवतः कामस्य मदनस्येव काननकाननालङ्कारकारिणः स्वकान्त्या मदनोद्यानशोभाभिवृद्धिविधायिनः तस्य माधवस्य विविधैः नानाप्रकारैः विभ्रमैर्विलासैः अभिरामं मनोरमं अनुरूपस्य समुचितस्य प्रियजनाभिलाषविशेषस्य

(ব) অপর এই যে, বিকসিত নির্য্যাসসংস্রবে মদগন্ধযুক্ত ও ঈষদ্বিকসিত কুন্দ এবং চূতকুসুমের মধুকণবাহী মদনোদ্যানপ্রান্তসঞ্চারী বায়ুদ্বারা সে অতীব অধীরা হইতেছে।

(ভ) আরও এই যে, সেই যাত্রাদিবসে যে সময় হইতে নিজমহোৎসবরূপ অভ্যুদয়দর্শনের জন্য শরীরধারী কামদেবের ন্যায় মদনোদ্যানের অলঙ্কারকারী সেই মাধবের বিবিধবিলাস-মনোহরসমুচিতানুরাগানুসরণদ্বারা যৌবনারম্ভের

मग्घीकिदजोव्वणारम्भं अण्णोण्णदिट्ठिविणिवादक्खणावसरखिज्जमाण-
चित्ततुवरन्तकोदूहलं समुल्लसिद-सहसत्थम्भमन्थराअवअपडिलम्भसेअ-
पुलअघडक्कम्प-सुन्दरं, आणन्दिदसहीअणं पिअसहीए परम्पराअलोअण-
सुहं समासादिदं,तदो पहुदि, सविसेस-दूसहाआसविअम्भमाणुद्दाम-
देहदाहदारुणं दसापरिणामं अणुभवन्तो, मुहुत्त-मेत्तसम्पत्तपुव्व-
चन्दोदआ वालकमलिणी विअ पम्मलाअदि । (अ)

अथ महार्घीकृतयौवनारम्भमन्योऽन्यदृष्टिविनिपातक्षणावसरच्छिद्यमानचित्तत्वरमाणकौतूहलं, समु-
ल्लसितसाध्वसस्तम्भमन्थराङ्गप्रतिलम्भस्वेदपुलकोत्कम्पसुन्दरं, आनन्दितसखीजनं, प्रियसख्याः
परम्परावलोकनसुखं समासादितं, ततः प्रभृति, सविशेषदुःसहायासविजृम्भमाणोद्दामदेह-
दाहदारुणं दशापरिणाममनुभवन्ती मुहूर्त्तमात्रसम्प्राप्तपूर्वचन्द्रोदया बालकमलिनीव प्रम्लायति ।

अनुबन्धेन अनुवर्तनेन महार्घीकृतः श्लाघ्योकृतः यौवनारम्भो येन तत् तथोक्तं, तथा अन्योन्यदृष्टि-
विनिपातः परस्परदृष्टिनिक्षेप एव क्षणः विरलकालदुष्प्रापत्वात् उत्सवः तस्य अवसरे समये
छिद्यमानं कामभावोदयेन खण्डं चित्तं तस्मिन् त्वरमाणं सत्वरं कौतूहलं परस्परावलोकनस्यैव
कौतुकं यस्मिन् तत् एवं समुल्लसितेन समुत्पन्नेन साध्वसेन भयेन यः स्तम्भः स्तब्धीभावः तेन
मन्थरेषु निश्चलेषु अवयवेषु हस्तपादादिषु प्रतिलम्भाः उत्पन्नाः वर्तमानाः ये स्वेदपुलकोत्कम्पाः
घर्मरोमाञ्चकम्पाः सात्त्विकभावविशेषाः तैः सुन्दरं अत एव आनन्दितः सखीजनोऽवलोकन-
जनितानुरागवैशेष्यवृद्धेरिति सन्तुष्टाः सखीजना येन तत् तथाभूतं परस्परावलोकनसुखं यतः
प्रभृति प्रियसख्या कान्तया समासादितमित्यन्वयः । ततः प्रभृति सविशेषः सातिशयः अत एव
दुःसहः यः आयासः कामजनितखेदविशेषः तेन विजृम्भमाणो वर्धमानः उद्दामः महान् यो देहदाहः
शरीरसन्तापः तेन दारुणं भीषणं दशापरिणामं अवस्थापरिणतिं अनुभवन्ती इयं म्लायतीति
शेषः । मुहूर्त्तमात्रं क्षणमात्रं सम्प्राप्तः अधिगतः पूर्वचन्द्रोदयो यया सा तथाभूता सती
यथोक्तविशेषणा बालकमलिनी नवनलिनीव (बालशब्दस्यातिकोमलताद्योतनार्थं)। प्रम्लायति
अवसीदति, पक्षे मुद्रिता भवति। यथा पूर्वचन्द्रोदयदर्शनमात्रेणैव बालकमलिनी सङ्कुचिता

শ্লাঘাসম্পাদক পরস্পর দৃষ্টিনিক্ষেপরূপ উৎসবক্ষণসময়ে কামভাবোদয়নিবন্ধন
চিত্ত খণ্ড হইলে অতিত্বরায় দর্শনকৌতূহলশালী, সমুৎপন্ন ভয়জনিত স্তব্ধতা
বশতঃ নিশ্চেষ্টাঙ্গসমূহে প্রতিনিয়ত ঘর্ম, রোমাঞ্চ ও কম্পদ্বারা মনোহর এবং সখী-

तहावि, मुहुत्तमेत्त-हिअअविणिविट्ठ-णिअ-वल्लह-समागमा, णिब्भर-सलिलासारसिच्चमाणेव्व मेइणी सीदलाअदित्ति जाणामि। जेण पप्फुरिद-कन्तदसणच्छदुल्लसन्तदन्तमुत्तिआवलिकन्ति सविसेस-सोहिदं, णिरन्तरूससिद-पुलअ-पम्हलकवोलघोलन्तसंदाणन्दबाह-

---

(अ) तथापि च, मुहूर्त्तमात्रहृदयविनिविष्टनिजवल्लभसमागमा निर्भरसलिलासारसिच्यमानेव मेदिनी शीतलायत इति जानामि। येन प्रस्फुरितकान्तदशनच्छदोल्लसद्दन्तमौक्तिकावलिकान्ति-सविशेषशोभितं, निरन्तरोच्छ्वसितपुलकपक्ष्मलकपोलघूर्णमानसान्द्रानन्दवाष्पसलिलपरिकलित-

---

भवति, तथेयमपि मालती तदितरवेदनामनुभवन्ती चन्द्रोदयदर्शनमात्रेणातितरमवसादं लभत इति तात्पर्यम्। विरहिणीनामतिदुःसहत्वाच्चन्द्रदर्शनस्येति भावः। अथवा यथा पूर्वचन्द्रोदय-दर्शनमात्रेणैव कमलिनी म्लानिं भजते, तथैव तादृगतिदुःसहं दशापरिणाममनुभवन्ती मालती म्लानिं भजत इत्यर्थः। एतच्च—मुहूर्त्तेत्यादि विशेषणं कमलिनीपक्ष एव योज्यम्।

(अ) अथैवमवस्था चेत् कथं जीवतीत्याह—तथापि चेति। तादृशकामदशापरिणामा-वसन्नापि चेत्यर्थः। मुहूर्त्तमात्रमल्पकालं हृदये विनिविष्ट कल्पनया निर्मित, निजवल्लभस्य स्वप्रियस्य माधवस्य समागमो यया सा, अत एव निर्भरेण अतिशयितेन सलिलासारेण वर्षधारा-सम्पातेन सिच्यमाना आर्द्रीक्रियमाणा मेदिनी पृथिवीव शीतलायते कथञ्चिदुपशमितमदन-सन्तापा शीतलेव आचरति, इति जानामि अनुमिनोमि। सङ्कल्पोपनीतप्रियसमागम एवास्याः प्राणधारणौषधिरिति भावः। एतेन सङ्कल्प उक्तः। सङ्कल्पोपनीतप्रियसमागमानुमाने हेतुं दर्शयति—येनेति। तत्र समागमाङ्गं प्रियचुम्बनानुभवं दर्शयितुं मुखं विशिनष्टि—प्रस्फुरदी-त्यादिना। प्रस्फुरन्तौ स्पन्दमानाभ्यां दशनच्छदाभ्यां ओष्ठाधराभ्यां उल्लसन्ती प्रकाशमाना या दन्तमौक्तिकावलिः दन्तरूपमौक्तिकश्रेणिः, तस्याः कान्त्या शोभया सविशेषं सातिशयं शोभितं भूषितम्, तथा निरन्तरोच्छ्वसितैः घनमाविर्भूतैः पुलकैः रोमाञ्चैः पक्ष्मलयोः, कण्टकितयोः

জনের আনন্দজনক পরস্পরাবলোকনসুখ প্রিয়সখী অনুভব করিয়াছিল, সেই হইতেই অতিশয় দুঃসহ কামজ খেদে পরিবর্দ্ধমান দেহদাহদ্বারা ভীষণ অবস্থা-পরিণাম অনুভব করতঃ অতি অল্পকালমাত্র চন্দ্রোদয়দর্শনে নব নলিনীর ন্যায় ম্লানভাব ধারণ করিতেছে।

(অ) তাদৃশ কামদশাপরিণামে অবসন্না হইয়াও মুহূর্ত্তমাত্র হৃদয়ে মাধব-সমাগমের কল্পনা করতঃ অতিশয় বর্ষণধারায় আর্দ্রীভূত মেদিনীর ন্যায়

वम्मं ईसि-विअसिदणिप्फन्दमन्दताकन्ताणमसिणमउलाअन्तणेत्त-णीलुप्पलं, अविरलुब्भिण्ण-सेअजलविन्दुसुन्दर-ललाटपट्टं णवचन्दलेहा-मणोहरं मुद्धमुहपुण्डरीअमुव्वहन्ती, विअड्ढसहअरीचित्त संसइद-कोमारभावा भोदि। (म)

निष्पन्दतारोत्तानमसृणमुकुलायमाननेत्रनीलोत्पलं, अविरलोद्भिन्नस्वेदजलबिन्दुसुन्दरललाटपट्टं नव-चन्द्ररेखामनोहरं मुग्धमुखपुण्डरीकम् उद्वहन्ती विदग्धसहचरीचित्तसंशयितकौमारभावा भवति।

कपोलयोः गण्डयोः स्वरीत्यर्थः, घूर्णमानः परिस्यन्दमानः सन्ततः अविरलधारः आनन्दबाष्पस्तबकः चुम्बनानन्दानुभवसमुत्थाश्रुजलसमूहः यत्र तत् तथोक्तम्। सङ्कल्पोपनीतवल्लभं प्रति—दर्शनप्रकार दर्शयितुं विशिनष्टि—ईषदित्यादिना। ईषद्विकसिते मनाग्विहितचाञ्चल्ये ऽपि तत्क्षणात् किञ्चि विकसिते निष्पन्दं सौन्दर्यातिशयचिन्तया कृपितिमिरनी मन्दतारे सकौतुकदर्शनादनतिविक-सिततारके कनीने जडं दैन्यदर्शनार्थं कदाचिदुन्मिलिते मसृणे कोमले मुकुलायमाने मुकुली इवाचरन्ती कुड्मलसदृशे इत्यर्थः, नीलोत्पले नयनेन्दीवरे यत्र तत् तथाभूतम्। सङ्कल्पोपस्थापित-प्रियेण सह रतिसुखानुभवं दर्शयितुं विशिनष्टि—अविरलेत्यादिना। अविरलं अविश्रान्तं यथा स्यात्तथा उद्भिन्नैः उत्पन्नैः स्वेदजलबिन्दुभिः घर्मोदककणैः सुन्दरं ललाटपट्टं कपालदेशो यस्मिन् तत् तथाभूतं एवं नवचन्द्ररेखामनोहरं नवोदितेन्दुकलाभिरामं मुग्धं मनोहरं मुखपुण्डरीकं वदनसरोजं उद्वहन्ती धारयन्ती मालती येन कारणेन दन्तच्छदस्फुरणादिना संयोगचिह्नेन विदग्धाभिः चतुराभिः, सुचतुराभिरिति यावत्। सहचरीभिः सखीभिः चित्ते खचेतसि संशयितः सन्देहगोचरीकृतः कौमारभावः अपरिणीतावस्थालं यस्या सा तथाभूता भवति,—तेनैवकारणेन सुहृदर्शनात्तद्दर्शनिहितवल्लभसमागमैश्वमिति जानातीत्यन्वयः।

শীতলতাব ধারণ করিতেছে বলিয়া আমি অনুমান করি। [illegible] হেতু ওষ্ঠাধরের স্পন্দনবশতঃ প্রকাশমান দন্ত মৌক্তিকশ্রেণীর কান্তিদ্বারা বিশেষরূপে পরি-শোভিত, নিরন্তরোৎপন্ন রোমাঞ্চদ্বারা কণ্টকিত, গণ্ডদেশে অবিরলধারে অভিস্পন্দ-মান (চুম্বনাদ্ভবজনিত আনন্দাশ্রুপরিব্যাপ্ত, ঈষদ্বিকশিত নিশ্চল নাতিবিকসিত-তারাদ্বয়যুক্ত উন্নমিত কোমল এবং কুটমলের ন্যায় পরিদৃশ্যমান নেত্রযুগল-শালী, অবিশ্রান্ত উৎপন্ন ঘর্মবিন্দুদ্বারা সুন্দর ললাটপট্টযুক্ত ও নূতন চন্দ্রলেখার ন্যায় মনোহর, মুখপুণ্ডরীক ধারণ করিয়া সুচতুরা সখীদিগের চিত্তে এইরূপ সন্দেহ জন্মাইতেছে যে, এখনও অবিবাহিতা অবস্থা আছে কি না ?

किंच—उद्दामससिमऊहणिउरुम्बचुम्बिदपज्झरन्तणीसन्दचन्दमणि-हारधारिणी कप्पूरपूरविसेससिसिरचन्दणरसच्छडाभारणिब्भर-दन्तुरिदबालकदलीवत्तसअणा पादसंवाहणादिव्वावारतुवरन्त-सहअरीसत्थविरइदोवणीदकमलिणीदलजलद्दतालवन्ता उण्णिद्दा एव्व रअणीओ गमेदि। (य)

(य) किञ्च। उद्दामशशिमयूखनिकुरम्बचुम्बितप्रक्षरन्निस्यन्दचन्द्रमणिहारधारिणी, कर्पूरपूर-विशेषशिशिरचन्दनरसच्छटाभारनिर्भरदन्तुरितबालकदलीपत्रशयना, पादसंवाहनादिव्यापार-त्वरमाणसहचरीसार्थविरचितोपनीतबालकमलिनीदलजलार्द्रतालवृन्ता उन्निद्रैव रजनीर्गमयति।

दर्शितदन्तच्छदस्फुरदधरोमाधवानन्दवाष्पद्विकारविशेषस्य दमयतिभिः संयोगचिह्नैः स्मरातुराः सखीजनाः "किं मालत्याश्चौरः एव कश्चित् परिरम्भोऽभवत्? कथमन्यथेदं सम्भोगचिह्नानि सम्भवेयु"रिति सन्देहदोलायमाना जाता, वस्तुतः विप्रलम्भोऽस्याः सर्वभावाभिधाने-चिह्नैः उद्दलोपनीतप्रियमाधवसमागमनिबन्धनमीति भावः।

(थ) रागावस्थां कथयति—किञ्चेत्यादिना। उद्दामेन सान्द्रेण शशिमयूखानां इन्दुकिरणानां निकुरम्बेण समूहेन चुम्बितः स्पृष्टः, अत एव प्रक्षरन्निस्यन्दः समारब्धजलस्रावः विगलित इति यावत्, यश्चन्द्रमणिहारः चन्द्रकान्तमणिनिर्मितो हारस्तं धारयतीति तथोक्ता। एवं कर्पूरपूरेण कर्पूरसमूहेन सविशेषशिशिराया नितान्तशीतलायाः, चन्दनरसच्छटायाः चन्दनद्रवसमूहस्य भारनिर्भरेण धारासम्पातनिवहेन दन्तुरितं विषमीकृतं बालकदलीपत्रमेव शयनं शय्या यस्याः सा (कदलीपत्रस्य बाल्यविशेषणं शैत्यशीकुमार्यप्राशस्त्यसूचनार्थं)। तथा—पादसंवाहनादि-व्यापारत्वरमाणेन व्यग्रीभूतेन सहचरीसार्थेन सखीनिवहेन विरचितोपनीतं "प्रकृतमेवाम्"-मित्यादिवत् पूर्वं विरचितं निर्मितं पश्चात् उपनीतं उपस्थापितमित्यर्थः, यत् बालकमलिनीदलं नवीननलिनीपत्रं तदेव जलार्द्रं तालवृन्तं व्यजनं यस्याः सा तथाभूता उन्निद्रैव निद्रारहितैव रजनीः रात्रीः गमयति अतिवाहयति। एतेन कामरावस्था कथिता।

(থ) আরও কি বলিব? পরিণত চন্দ্রকিরণসমূহের স্পর্শে বিগলিত চন্দ্রকান্তমণিনির্মিত হার ধারণ করিয়া কর্পূরসমূহসম্পর্কে বিশেষরূপে শীতলীকৃত চন্দনরসের ধারাসম্পাতে বিষমীকৃত বালকদলীদলরূপ শয্যায় শয়ান মালতী পাদসেবাদিব্যাপারে ত্বরাযুক্ত সখীগণ পূর্ব্ববিরচিত বালকমলিনীদলরূপ ব্যজনদ্বারা বাতাস করিলেও অনিদ্রিতাবস্থাতেই রাত্রি অতিবাহিত করিয়া থাকে।

कधं वि उवलद्धणिद्दासुहा सेदपप्फुरिदपादपल्लवुव्वत्तपिण्डालत्त-अरसा थरथरायन्त-पीवरोरुमूलपासविसंवादिणीविब्भमा उक्कुव्-वन्त-हिअअब्भन्तरुत्तरंगणीसासविसमसमूससन्तपह्मल-पओहरोवरि-णिहित्तवेवन्तभुअलदावेट्ठनब्भमा झत्ति पडिबोधवेलाविसज्जिदु-

(२) कथमपि उपलब्धनिद्रासुखा स्वेदप्रस्रुतपादपल्लवोद्वान्तपिण्डालक्तकरसा, थरथराय-मानपीवरोरुमूलपार्श्वविसंवादिनीविभ्रमा, उत्क्षुभ्यमाणहृदयाभ्यन्तरोत्तरङ्गनिश्वासविषमसमुच्छ्वसत्-पक्ष्मलपयोधरोपरिनिहितवेपमानभुजलतावेष्टनविभ्रमा, झटिति प्रतिबोधवेलाविसर्जितोभयहस्ति-

न च कमलिनीपत्रस्य तालवृन्तत्वासम्भवादयोग्यमिदं वाक्यमिति शङ्कनीयं, तालवृन्तपदस्य व्यजनमात्र एव रूढत्वात्। अत एवामरसिंहेनापि—"व्यजनं तालवृन्तक"मिति व्यजनसामान्य-परत्वमेवोपदिष्टं। "सञ्चालयामि नलिनीदलतालवृन्त"मित्यादिकालिदासादिवाक्यमपि तथैव प्रति-पादयतीत्यनुसन्धेयम्।

(२) स्वाभाविकनिद्राविगमेऽपि चिन्ताजनिता निद्रा दर्शयति—कथमपीति। "दौर्बल्या-लस्यचिन्तादेर्निद्रा स्यात् कथमपि चे"ति निद्रायाश्चिन्ताजनितत्वे प्रमाणम्। कथमपि प्रबल-दुश्चिन्तया कथञ्चित्। उपलब्धं निद्रैव सुखं स्वप्नेन प्रियसमागमसम्पादकत्वात् परमानन्दरूपं यया सा, अत एव स्वेदेन स्वप्ने सुरतश्रमजनितघर्मजलेन प्रस्रुताभ्यां व्याप्ताभ्यां पादाभ्यां चरणाभ्यां उद्वान्त: द्रवीभूय पतित: पिण्डालक्तकरस: पिण्डीभूतो लाक्षाद्रवो यस्या: सा, थरथराय-मानं स्वप्ने वल्लभोरुयुगलाक्रमणानुभवात् कम्पमानं यत् पीवरं महत् ऊरुमूलं तस्य पार्श्वात् समीपात् विसंवादि वल्लभाकर्षणभावनया स्खलितं नीविबन्धनं यस्या: सा, (थरथरायमाणेति शब्दो ग्राम्य: कम्पार्थक:) तथा उत्क्षुभ्यमाणस्य कामसन्तापेन क्षुब्धीक्रियमाणस्य हृदयस्य अभ्यन्तरात् उत्तरङ्गा: निरन्तरोद्गततया समुच्छलिता: ये निश्वासा: तै: विषमं अतिशयं यथा स्यात्तथा समुच्छ्व-सद्भि: समुद्गच्छद्भि: पुलकै: रोमाञ्चै: पक्ष्मलौ कण्टकितौ यौ पयोधरौ स्वकीयस्तनौ तयोरुपरि-निहिताभ्यां वल्लभभुजभावनया स्थापिताभ्यां भुजलताभ्यां स्वकीयबाहुवल्लीभ्यां यत् आवेष्टनं तदेव भ्रमणं वल्लभालिङ्गनं यस्या: सा। तादृशस्वप्नभङ्गकालीनावस्थां कथयति—झटितीति।

(২) অতি দুশ্চিন্তাবশতঃ কদাচিৎ নিদ্রাসুখলাভ করিলেও স্বপ্নদৃষ্ট সুরত-শ্রমজনিত ঘর্ম্মজলব্যাপ্ত চরণযুগল হইতে শুষ্ক অলক্তক রসগুলি (ঘর্ম্মজলে দ্রব হইয়া) ক্ষরিত হইতে থাকে। (বল্লভ ঊরুযুগল আক্রমণ করিতেছে, এইরূপ স্বপ্নদর্শন করায়) থর থর কম্পান্বিত স্থূল ঊরুমূলের সমীপদেশ হইতে (কাঞ্চ-

ल्लिगदिट्ठि-विणिवादविसंठुलसअणिज्जसञ्जादमोहमोलन्तलोअणा ससम्भमसहीअण-पअत्तपडिवण्णमुच्छाविच्छेअसमअ-संगलिददीहणी-सासजणिदजीविदासा, किंकादव्वदामूढदाए पढमपत्थिदणिअजीवि-दावसाणं दुव्वारदेव्वविलसिदोवालम्भमेत्तव्वावारं अम्हारिसं जणं करेदि। (२)

विनिपातविसंष्ठुलमदशनीयसञ्जातमोहमीलल्लोचना, ससम्भ्रमसखीजनप्रयत्नप्रतिपन्नमूर्च्छाविच्छेद-समयसङ्कलितदीर्घनिःश्वासजनितजीविताशा किंकर्तव्यतामूढतया प्रथमप्रार्थितनिजजीवितावसानम् दुर्वारदैवविलसितोपालम्भमात्रव्यापारमस्मादृशं जनं करोति।

झटिति धीरं प्रतिबोधवेलायां जागरणकाले विसर्जिता निक्षिप्ता त्यक्ता वल्लभविच्छेदभयया ससाध्वसा या दृष्टिः तस्या विनिपातेन अधिकमेव विसंष्ठुलं व्यस्तं एवं वाञ्छितजनविरहितं मत् प्रदनीयं द्रष्टुं अनर्हम् तज्जात वल्लभवियुक्तताशंसनेन पुनरुत्पन्नो यो मोहः, तेन मीलती पुनर्निमीलिते लोचने नेत्रे यस्याः सा तथाभूता। ससम्भ्रमाणां वेगेन सम्भ्रान्ताय सत्वरायां सखीजनानां प्रयत्नेन शीतलानिलव्यजनादिव्यापारेण प्रतिपन्नः उत्पन्नः यो मूर्च्छाविच्छेदः मोहविगमः तस्य समये काले सङ्कलितेन बहिर्गतेन दीर्घनिःश्वासेन जनिता उत्पादिता जीविताशा जीवनमस्तीति सखीजनानां विश्वासो यस्याः सा तथाभूता मालती अस्मादृशं जनं सखीजन-समूहमित्यर्थः। किङ्कर्तव्यतामूढतया कर्तव्याकर्तव्यानवधारणेन प्रथमप्रार्थितं प्रथमाभिलषितं निजजीवितस्य स्वस्य जीवनस्य अवसानं विनाशो येन तं, तथा दुर्वारस्य वारयितुमशक्यस्य प्रति-कार्यस्य दैवस्य नियतेर्वा विलसितं चरितं तं कार्यं तस्य उपालम्भमात्रं तिरस्कारमात्रः व्यापारः अनुष्ठानं यस्य तं तथाभूतं करोति। प्रार्थितवल्लभस्यातिदुर्लभतया तादृशीं विपदं दृष्ट्वा-ऽनुभवन्त्या मालत्या अत्याहितमचिरमेव भविष्यतीति सहसातर्कितचिन्ता वयं अति दुःखकरात् तदत्याहितापतनात् पूर्वमेवात्मनः पतनं कामयामहे, अस्य सामर्थ्याभावेन चाप्रतिविधेयं दैवविल-सितमेव केवलमुपालभामहे इति भावः।

কর্তৃক আকর্ষণভাবনায়) নীবিবন্ধন শিথিল হইয়া যায়। কামজ সন্তাপ-ক্ষুব্ধ হৃদয়মধ্যে সমুদ্বেলিত নিশ্বাসবশে বিষমকম্পে সমুৎপন্ন রোমাঞ্চদ্বারা কণ্টকিত নিজস্তনযুগলের উপরিভাগে (বল্লভের ভুজলতাবিবেচনায়) নিজের ভুজলতা স্থাপন করিয়া তৎপরিবেষ্টনরূপ কান্তালিঙ্গন অনুভব করিতে থাকে। হঠাৎ

ता पेक्खदु भअवदी, इमेसु दाव लावण्ण-भूइट्ठणिम्माणपरिवेल्लिदेसु अङ्गेसु दारुणविजिम्भिदस्स कित्तिअच्चिरं कुसलावसाणदा मम्महस्स भविस्सदि। (ल)

कधं अ इमाइं रमणकेलिकलहकोवोवराअपल्लविअकेरलीकवोल-कोमलुब्वेल्लविमलचन्द-चन्दिमोद्दामदलिदतिमिरावरणाइं विह्वा-

---

(ल) तत् प्रेक्षतां भगवती, एतेषु तावल्लावण्यभूयिष्ठनिर्माणपरिवेल्लितेषु अङ्गेषु दारुण-विजृम्भितस्य कियच्चिरं कुशलावसानता मन्मथस्य भविष्यति।

(ल) वक्तव्यमुपसंहरति—तदिति। तत् तस्मात् मालत्या एवमवस्थापन्नत्वात् प्रेक्षतां सखीजनदुर्लभयोगबलेन निरूपयतु। लावण्यभूयिष्ठं लावण्यबहुलं निर्माणं येषां तानि अत एव परिवेल्लितानि क्षीयमाणानि तेषु अङ्गेषु मालत्यवयवेषु दारुणविजृम्भितस्य भीषणभावेन हृदिमापन्नस्य मन्मथस्य कामदेवस्य कुशलेन मालतीजीवनस्थितिरूपमङ्गलेन सह अवसानं प्रशमनं यस्य तस्य भावः तत्ता, कियच्चिरं कियत्कालमपर्यन्तं अर्थः। भविष्यतीत्यन्वयः। मालत्या जीवन-सत्त्व एवास्य दुर्विदग्धकामजसन्तापस्य प्रशमनं भविष्यति नवेति—स्वीयशीघ्रमावलम्बनावधार्य्या-स्माकं ख्यापेर्ने कथयतु भगवतीति सरलार्थः।

জাগরণকালে কান্তবিরহানলের গভীর দৃষ্টি নিক্ষেপ করতঃ শয্যাতল শূন্য বুঝিতে পারে ও পুনরায় মূর্চ্ছিত হইয়া নেত্রযুগল নিমীলিত করে। চৈতন্য-সম্পাদনে ব্যস্ত সখীজনের প্রযত্নে কথঞ্চিৎ মূর্চ্ছা ভাঙ্গিলেও অতিবেগে প্রবাহিত দীর্ঘ নিশ্বাসেই কেবল জীবনাশা সঞ্চার করিয়া থাকে। (মালতীর এইরূপ অবস্থাদর্শনে) আমাদের ন্যায় সমদুঃখসুখভাগী সখীসকল (অচিরকাল-মধ্যে মালতীর মরণ আশঙ্কা করিয়া) কিংকর্তব্যবিমূঢ়তাবশতঃ অগ্রে নিজ নিজ মরণকামনা করে ও কেবল অপ্রতিবিধেয় দৈববিধানের নিন্দা করিয়া থাকে।

(ল) সুতরাং আপনি যোগবলে নিরীক্ষণ করিয়া দেখুন, কতদিনে লাবণ্য-বাহুল্যপরিনির্ম্মিত অতিশোভমান এই মালতীর শরীরাবয়বে অতিভীষণভাবে পরিবর্দ্ধমান কামভাবের মঙ্গলময় অবসান ঘটিবে।

वरीमुहाइं। इमे अ उल्लसिददुद्धसिन्धुपूरधवलुज्जलजोण्हाजलप्पक्खा-
लिदगअणांगणा, परिमलिदपाडलाउत्तणिम्महन्तबहलपरिमलुग्गार-
संवलन्तमसिणसंचलन्तमलअमारुदुद्धूमाविद दहदिहामुहा वसन्त-
रअणीपरिणामा अणत्थकारिणो भविस्सन्ति पिअसहीए त्ति। (ख)

काम। लवङ्गिके !

यदि तद्विषयोऽनुरागबन्धः स्फुटमेतद्धि फलं गुणज्ञतायाः।

(ख) अपच इमानि रमणकेलिकलहकोपोपरागप्रवित्तकेरलीकपोलकोमलोद्भिन्न चन्द्रिकोद्दामदलिततिमिरावरणानि विभावरीमुखानि। इमे च उल्लसितदुग्धसिन्धुपूरधवलोज्ज्वलज्योत्स्नाजलप्रक्षालितगगनाङ्गनाः परिमलितपाटलापुञ्जनिर्गलद्बहलपरिमलोद्गारसंवलन-मसृणसञ्चलन्मलयमारुतोद्धूमितदशदिङ्मुखा वसन्तरजनीपरिणामा अनर्थकारिणो भविष्यन्ति प्रियसख्या इति।

(ख) अपचेति। इमानि उपस्थितप्रायाणि, रमणकेलिकलहेन सुरतक्रीडाविषयक-विवादेन (जनितः) यः कोपः तेन (उपनीतः) यः उपरागः लौहित्यं तेन प्रवर्त्तितौ पल्लवतुल्यारक्तीकृतौ यौ केरलीकपोलौ केरलदेशीयललनाकपोलद्वयं (अत्र केरली-पदोपादानं केरलदेशीयस्त्रीकपोलस्यातिकोमलत्वसिद्ध्यै तत्सादृश्ये चाभिलाषमलक्षणीयत्वाय) तद्वत् कोमला मार्द्दवशालिनी उद्भिन्ना उद्गता विमला निर्मला च या चन्द्रिका ज्योत्स्ना तया उद्दामं अतिशयितं यथा स्यात्तथा दलितानि निराकृतानि तिमिरावरणानि तमो-रूपाच्छादनानि यैस्तानि तथाभूतानि विभावरीमुखानि प्रदोषकालाः कथं केन वा प्रकारेण "अनर्थकारिणो भविष्यन्ती"ति अग्रेण अनर्थकारीणीति लिङ्गव्यत्ययेनान्वयः। तदपि मे चता भगवतीति सम्बन्धः कार्यः। प्रदोषस्यातिशयकामोद्दीपकत्वात् तदभावे विभावरीमुखानां सुखम्, अतएव मालत्याः वल्लभाभावेन रजनीपरिणामेन न परितापः। तथापि विभावरीमुखा अतीव दुःखदायीनि भविष्यन्तीति भावः।

(খ) সুরতক্রীড়াবিষয়ক কলহজনিত কোপোপনীত রক্তিমায় পল্লবসদৃশ আরক্তীকৃত কেরলদেশীয় স্ত্রীলোকদিগের কপোলের ন্যায় কোমল ও উদ্ভিন্ন নির্মল জ্যোৎস্নাধারা যাহার অন্ধকারাবরণ নিঃশেষরূপে বিদলিত হইয়াছে, উপস্থিত প্রায় সেই প্রদোষকাল কি প্রকার অনর্থকারী হইবে। এবং যেই বসন্ত-রজনীতে ক্ষীরসমুদ্রপ্রবাহের ন্যায় শুভ্র ও দীপ্তিমৎ জ্যোৎস্নারূপজলে গগনতল বিধৌত হয়,

इति नन्दितमप्यवश्ययाऽस्या हृदयं दारुणया विदार्यते मे ॥ (१८)

इमे च नातिदूरवर्त्तिन, उल्लसिता उद्वेला दुग्धसिन्धुपूरवत् क्षीरसमुद्रप्रवाहवत् धवला यथा स्यात्तथा दीप्तिमती च या ज्योत्स्ना सैव जलं तेन प्रक्षालितं विधौतं तमोऽपसारणेन निर्म्मलीकृतमिति यावत्, नभोऽङ्गनं आकाशप्रदेशो येषु ते। तथा पचिमल्लितानि सप्तलापरिमल्लानि (नारङ्गादिषादिलत्) यानि पाटलात्वक्कुसुमानि कुसुमविशेषा' तेषां निर्म्मथनेन विमर्द्दनेन यो बहुलानां प्रभूतानां परिमलानां सौरभाणां उद्गार उद्गमः तेन यत् संवलनं मिश्रीभावः तेन मन्थरं' कोमलं, मोहनायमानः मांसलः पुष्टः इत्याचरन् यो मलयमारुतः दक्षिणानिलः तेन उद्घूर्णितानि उच्छलद्‌धूमायमानानि कलानि (उद्घाता धूमा येषु तानि उद्धूमानि, उद्धूमानी-वाचरन्तीति उद्धूमायानि आयमानात् पचादित्वादच्, तानि कलानीति कर्म्मार्थे—उद्धूमाय-मन्द्रादिस्, तत उद्धूमायीतीपन्नषाभो' कर्म्मणि ज्ञप्रत्ययेन उद्धूमायितानीति सिद्धम्) दश-दिङ्मुखानि सकलदिक्‌चक्राणि येषु ते तथाभूता' वसन्तरजनीपरिवाहा वसन्तकालीन-विभावरीविन्यासा: विरहत्वादतिदीर्घवत् प्रतीयमाना वसन्तविभाता इत्यर्थः। प्रियसख्या मालत्या, अयं कीदृशा अनर्थकारिण' विपत्तिसम्पादिन: भविष्यन्ति। इति च भगवती प्रेक्षता-मित्यन्वयः।

अत्र अयं हि नववसन्तविहारसुखा इत्यादौ तन्नरेशार्य्यैः दारुणत्वे प्रतिसारयोपायादर्शनात् "तापनं" नाम प्रतिमुखसन्ध्यङ्गम्। तल्लक्षणं यथा दर्पणे—"उपायादर्शनं यत्तु तापनं नाम तद्भवे"दिति ॥

(१८) यदीति। अनुरागश्च, मालत्या गाढानुरागं यदि तद्विषयः स माधव एव विषयो यस्य तादृशः माधवालम्बन इति यावत् अभवदिति शेषः, तदा एतद्धि एतदेव गुणज्ञतायाः गुणपक्षपातस्य स्फुटं व्यक्तं फलम्। माधवं अतीव गुणवानिति तदनुरागो युक्त एवेति भाव.। इति ऐत्री. अथाद्‌दृतामार्ग्गे सौविध्यं, नन्दितमपि आह्लादितमपि ■ मम हृदयं अस्या मालत्याः

এবং মল্লিকাপরিমলপাটলা কুসুমের বিমর্দ্দনবশতঃ বহুলসৌরভোদ্গমসংমিশ্রণে মন্থর ■ পরিপুষ্টাচারী দক্ষিণানিল দিক্‌সমূহকে ধূমধূক্রের ন্যায় করিয়া থাকে, বিরহবশতঃ দীর্ঘবৎ প্রতীয়মান অদূরবর্ত্তিনী সেই বসন্তরজনীই বা প্রিয়সখীর পক্ষে কিরূপ অনর্থকারিণী হইবে, ইহাও ভগবতী ভাবিয়া দেখিবেন।

(১৮) কায়। লবঙ্গিকে! মালতীর এই গাঢ়ানুরাগ যদি মাধবের প্রতিই হইয়া থাকে। তবে ইহা নিতান্তই গুণজ্ঞতার সুব্যক্ত ফল। এই অনুরাগে

माध। स्थान एव हृल्लासो भगवत्याः। (३९)

काम। अहो! प्रमादः। (४०)

प्रकृतिललितमेतत्सौकुमार्य्यैकसारम्
वपुरयमपि सत्यं दारुणः पञ्चबाणः।
चलितमलयवातोद्धूतचूतप्रसूनः,
कथमयमपि कालश्चारुचन्द्रावतंसः ॥ ४१ ॥

दारुणया भीषणया अवस्थया तदुत्कामपीड़ोत्कटदशया विदार्य्यते, अस्याः सुमतीव कोमल-हृदयतयानिष्टोपनिपातं सम्भाव्य विदारितमिव क्रियत इत्यर्थः।

अत्र तापस्य माधवगुणवत्त्वस्य भङ्गीविशेषेणाभिधानात् पर्यायोक्तमलङ्कारः। तथा कार्य-भूतविदारणस्य कामन्दकीहृदयगतत्वेन तत्कारणीभूतावस्थायाः मालतीगतत्वेन च कार्य-कारणयोर्भिन्नदेशत्वादसङ्गतिनामालङ्कारः अनयोर्मिथो नैरपेक्ष्येण संसृष्टिः। तयोर्लक्षणे यथा—दर्पणे—"पर्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते।" "कार्यकारणयोर्भिन्नदेशतायामसङ्गतिः।" मालभारिणीवृत्तम्—"विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीय"मिति तल्लक्षणम्—

(३९) माधेति। योग्यतायां अत्र स्थाने शब्दः, भगवत्याः कामन्दक्याः हृल्लासः हृदय-शोषः स्थान एव युक्त एवेत्यर्थः। मालत्याः शरीरावस्थाया दृष्टत्वादनिष्टस्य सम्भावनादिति भावः। "पर्युल्लास" इति पाठे तु पर्युल्लासः अनिष्टाशङ्कया उद्वेग इत्यर्थः।

(४०) कामेति। प्रमादः अस्माकं अनवधानता। अहो आश्चर्यम्। एतावतापि कालेन [illegible] समागमो न साधितः, परन्तु केवलं सन्देह एव क्रियते तदतीवाश्चर्य-मिति भावः।

(४१) प्रमादेन सम्भाव्यमानमनिष्टं दर्शयितुमाचष्टे—प्रकृतीति। एतद्वपुः मालत्याः शरीरं

আমার হৃদয় নিতান্ত আনন্দিত হইলেও মালতীর এই ভীষণ কাযাবস্থা অনিষ্টোপ-নিপাতের আশঙ্কা জন্মাইয়া হৃদয়কে বিদীর্ণ করিতেছে।

(৩৯) মাধ। ভগবতীর এই হৃদয়-শোষ যুক্তই হইয়াছে।

(৪০) কাম। অহো আমাদের কি অনবধানতা।

(৪১) এই মালতীর শরীর যে স্বভাবসুন্দর ও কোমলতামাত্রাবলম্বনে নির্মিত

लव। अणस्स, जाणिदं भोदु भअवदीए। एदं माहवपडिच्छन्दसणाहं चित्तफलअं। [मालत्याः स्तनांशुकमपनीय] एसावि तस्सज्जेव्व सहत्थविरइदेत्ति कण्ठावलम्बिदा बउलमाला जीवणं पिअसहीएत्ति (ञ)

(ञ) अन्यच्च, ज्ञातं भवतु भगवत्या। एतन्माधवप्रतिच्छन्दकसनाथं चित्रफलकम्। एषापि तस्यैव स्वहस्तविरचितेति कण्ठावलम्बिता बकुलमाला जीवनं प्रियसख्या इति।

प्रकृत्या स्वभावेनैव ललितं सुन्दरं, तथा सौकुमार्य्यं कोमलत्वमेव एकः अद्वितीयः सारः स्थिरांशो यस्मिन् तत्, कोमलतामात्रात्मकेनैव निर्म्मितमित्यर्थः। एतत् सत्यं निश्चितम्। तथा अयं पञ्चबाणः कामोऽपि दारुणः अत्यन्तं भीषणः, एतदपि सत्यम्। पञ्चबाण इत्यनेनैकबाणापेक्षया दुःसहत्वमुक्तं। तथाच कोमलतरेऽस्मिन् शरीरे पञ्चबाणाक्रमणमतीवानर्थसम्पादकमिति भावः। भवतु नामैवं, कथं चलितेन प्रवहता मलयवातेन दक्षिणानिलेन चन्द्रमसापि चेत्यर्थः, उद्धूतानि कम्पितानि चूतप्रसूनानि आम्रमुकुलानि यस्मिन् स तथाभूतः, तथा चारुः शीघ्रहिमात्ययतमात् कालान्तरापेक्षया मनोज्ञः अयं वसन्तः मधुमासः यस्य साहयः अयं कालोऽपि विरहिजनानां दुःसहः वसन्तसमयोऽपि इदानीमेव समुपस्थित इति शेषः। तथाचातीवानर्थपरम्परा समापतितेति प्रमादेनाधुनापि मिलनविलम्बो नैवेदं जीविष्यतीति भावः।

अत्र स्वभावसुन्दरं कोमलतरञ्च शरीरं तथा दारुणः पञ्चबाण इत्यनयोर्बिम्बयोः संघटनात् विषमालङ्कारः, तथा असदृशात् दारुणपञ्चबाणवातादिमधुमासकालरूपार्थयोः मालत्या अनिर्व्वचनीयानर्थसम्पादकत्वार्थप्रतीतेरप्रस्तुतप्रशंसालङ्कारः अनयोरङ्गाङ्गिभावेन सङ्करः। मालिनीवृत्तम्॥

(ञ) अन्येति। मालत्या अनुरागस्य माधवविषयकत्वे संशयं निरस्यति—अन्यच्चेति। अपरञ्च—माधवानुरागव्यञ्जकमिदं भगवत्या ज्ञातव्यमित्यर्थः। माधवस्य प्रतिच्छन्देन प्रतिकृत्या सनाथं युक्तम्। कण्ठावलम्बितबकुलमालाप्रदर्शनार्थं स्तनांशुकापनयनमिति मन्तव्यम्। तस्यैव माधवस्यैव स्वहस्ताभ्यां रचिता निर्म्मिता इति हेतोः माधवस्वहस्तनिर्म्मितत्वमेव अतः कण्ठाव-

---

ইহা সত্য, কামদেব যে অতি নিদারুণ ইহাও সত্য। পরন্তু সেই বসন্তকালে প্রবহমাণ দক্ষিণানিলে আম্রমুকুলগুলি কম্পিত হয় ও অতিমনোহর চন্দ্র যাহার ভূষণ সেই বসন্তকালও আবার কেন এসময়েই উপস্থিত হইয়াছে।

(ঞ) নব। ইহাও ভগবতীর জাতব্য যে, মাধবের প্রতিকৃতিযুক্ত এই চিত্র

माध । [सस्पृहं ।] (४२)

जितमिव भुवने त्वया यदस्याः,
सखि बकुलावलि ! वक्षसि जाता
परिणतबिसकाण्डपाण्डुमुग्ध-
स्तनपरिणाहविलासवैजयन्ती ॥ (४३)

जीवने हेतुरित्यर्थः । जीवनं जीवनहेतुत्वाज्जीवनस्वरूपा, कार्यकारणयोरभेदादिति भावः । तथाच मालत्या माधवं प्रत्यनुरागे न किञ्चिदपि भगवत्या संशयितव्यमिति यथाकथञ्चित् सम्मेलनीयाय: श्रीमन्मथारण्यीय इत्यर्थः ।

(४२) समाश्वासवचनेन तयोर्व्यंजनदर्शनात् सस्पृहत्वम् ।

(४३) जितमिति । हे सखि ! (मालत्यनुरागानुकूल्यकरणात्) बकुलावलि ! बकुलमालि ! इह भुवने संसारे त्वया त्वयैव जितं सर्वथा अधिकया इत्थम् । यद्यस्मात् त्वं परिणतः प्रौढः यो बिसकाण्डः मृणालदण्डः तद्वत् पाण्डू श्वेतवर्णौ मुग्धौ मनोज्ञौ च यौ स्तनौ कुचौ तयोः परिणाहो विशालता तस्य यो विलासः सौन्दर्यं तस्य वैजयन्ती पताका-स्वरूपा सती अस्या मालत्या वक्षसि व्यापनात् प्रियसखस्थानीया जाता असि । अस्माकमनो-रथमात्रदिदृक्षं मया सततमाशास्यते तत्तल्लभ्यमानमप्रतिमतया त्वया तत्सुखसनिविशं लभ्यत इत्यतो महते सौभाग्यमिति भावः ।

“सर्वं तत्त्वान्वेषाय मधुकर ! कृतार्थं खलु कृती” इत्यत्रभूतानामाशोकानुरूपोऽयमिति मन्तव्यम् ।

अत्र त्वयैव जितं न मयेति प्रतीयमानत्वादार्थी परिसंख्या, विलासवैजयन्तीति रूपकं तथा त्वया भुवने जितमिति वाक्यार्थं प्रतीतस्योक्तावाचां हेतुत्वात् काव्यलिङ्गं, अतीवमये हेतुनु-प्रासपालङ्कार इत्येषां मिथो नैरपेक्ष्यात् संसृष्टिः ।

কলকে (মালতীর স্তনাংশুক সরাইয়া) এবং সেই মাধবের স্বহস্তনির্মিত বলিয়া কণ্ঠাবলম্বিত এই বকুলমালাই (এখন) প্রিয় সখীর জীবনস্বরূপ।

(৪২) মাধ। (সতৃষ্ণ হইয়া)

(৪৩) সখি ! বকুলমালে ! তুমিই জগতে সর্বথা জয়লাভ করিয়াছ। যে হেতু প্রৌঢ় মৃণালদণ্ডবৎ শুভ্র ও মনোজ্ঞ স্তনযুগ্ম বিশালতার বিজয়পতাকাস্বরূপ হইয়া এই মালতীর বক্ষঃস্থানীয় হইতে পারিয়াছ।

[नेपथ्ये कलकलः। (४४) सर्वे आकर्णयन्ति।]

[पुनर्नेपथ्ये।] रे रे णअरघराधिवासिणो जाणवदा! एसो क्खु ओव्वणारम्भ-गव्वसम्भरिट्ट-दुव्विसहामरिसरोस-क्खित्त-थर-बलामोडि-विहडिदुग्घाडिद-लोहपञ्जर-पडिलम्भ-संगलिअ-णिअलो*णिअलीला-विलासुव्वेल्लिअवलहतुङ्गलङ्गूलविअडवेजअन्तिआ-विसमडामरद्दाम-सरीर-सण्णिवेसो, मडादो अवक्कमिअ, तक्खणमेत्तिप्पक-वलिदाणि-अदेहि देहावयवभञ्जणिट्ठुरमत्थिखण्डखण्डणटङ्कार-कडकडा-अन्त-करवत्तकठिणदाढा-करालमुहकन्दरो, पअण्डबज्झणिग्घाद-दारुण-

---

(४) रे रे नगरगृहवासिनो जानपदाः! एष खलु यौवनारम्भगर्वसम्भृतदुर्विषहामर्ष-रोषक्षिप्तस्थिरबलात्कारविघटितोद्घाटितलोहपञ्जरप्रतिलम्भसङ्गलितनिगलः, निजलीलाविलासो-

---

तथा रमणीयत्वेन मालतीकुचमण्डलाद्याकाङ्क्षणतोऽनेः "स्पृहा" नाम नाट्यालङ्कारः। तल्लक्षणं यथा दर्पणे—"आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा"।

"पुष्पं" नाम प्रतिमुखसन्ध्यङ्गम्। तल्लक्षणं यथा दर्पणे—"पुष्पं विशेषवचनं मतम्" इति।

एवं यद्धन्मध्योत्तरवाक्यगतत्वेन तत्कन्दनमेवाविशेषाविमर्शदोषाभावः। पुष्पिताग्रा वृत्तम्।

(४४) एवमन्योऽन्यानुरागद्योतकपरस्परावस्थाकीर्तनेन शृङ्गाररसं परिपोष्य, रसान्तरेण तं तिरोधातुं "चूलिका" नामकार्थोपक्षेपकमाह—नेपथ्ये इति। चूलिकालक्षणं यथा—"अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका" इति।

(४) रे रे नगरेति। यौवनारम्भेण यो गर्वः अहङ्कारः, तेन सम्भृतौ पूर्णौ दुर्विषहौ असह्यौ अमर्षरोषौ ईर्ष्याक्रोधौ, यद्वा स्थिरक्रोधतात्कालिकक्रोधौ (ययोस्तं

---

(৪৪) (নেপথ্যে কল কল শব্দ হইতে লাগিল ও সকলে শুনিতে লাগিল)।

(৪) (পুনর্নেপথ্যে) হে নগরগৃহবাসি-জনগণ! এই দুষ্ট ব্যাঘ্র যৌবনারম্ভ-দর্পপূর্ণ অসহনীয় ঈর্ষা ও ক্রোধবশতঃ বলপ্রয়োগদ্বারা লৌহপিঞ্জর ভগ্ন ও

---

* "प्रतिबद्धमडलानिरोधप्रतिभग्नसङ्कलिते" इत्यं क्वचित् पाठान्तरम्। लोहपिञ्जरे प्रतिबद्धया मडलया यो निरोधः, तेन यः प्रतिभङ्गः विपरीतभङ्गः तेन सङ्कलिता मिलिता या निजलीलि-त्यादिसन्दर्भः।

चवेडामोडिद कबलिदाणेअणरतुरङ्गजंगलम्मारम्भरिदगलगुहागब्भंग-म्भीरघग्घरो, रत्तिगन्धूरणसद्दमंदब्भपरिपूरिदणहत्थलो णिद्दणिप्पे-सिदणद्दन्तिडाविडाविसेस-जणणिवहो, कठोरणक्खरकप्परक्कमणणिद्दल-दारिद-जन्तुगत्तावअवप्पउत्तरत्तकद्दमिदग ह्ववहो दुट्ट सद्दूलो कुसिम-किमन्तलीलाइदं करेदि। ता रक्खध अधासत्ति अत्तणो जीविदं त्ति। (ग)

हे स्निग्धमहत्क्षारा रविकटवैजयन्तिकाविषमडामरोद्दामशरीरसन्निवेश:, महादपकम्प, शत्रुचप-चटचपकवलितानेकदेहिदेहावयवमध्वनित, रक्तिमरक्तधनुर्जरटमार्कटाग्रमानवरमकलिन-मैन्द्राकराग्नमुखकन्दर, शवशबनिर्घातदावचपेटामोटितकवलितानेकनरतुरङ्गमाम्भोगारभरित-गम्भीरगुहागर्भगम्भीरघर्घर: रक्तिमारुणघ्नन्दसन्दर्भपरिपूरितनभस्तल, निर्दयनिर्येषितमदनिद्राविता-शेषजननिवह:, कठोरमखकर्परक्रमणनिर्दलितदारितजन्तुगात्रावयवप्रवृत्तरक्तकर्दमितगतिपथो, दुष्टशार्दूल:, कुसितकृतान्तलीलायितं करोति। तद्रक्षत यथाशक्ति आत्मनो जीवितमिति।

"कोष: शत्रावराधेषु स्त्रियोऽमर्षलक्ष्मणि। रोषलात्मकाखिल. कोप" इति)। तयोर्व्यतिकरेण अन्यत्वेन यो बलात्कार. बलप्रयोग, तेन पूर्वं विघटित भग्नं, पश्चादुद्घाटितं शृङ्खलारोदघाटनं यद्गोलधरं तत्र प्रतिबद्ध. संलग्न. शङ्खलित पादद्वयादन्तर: निगड' शृङ्खला यस्य स:।

निम्न: स्वकीयो यो नीरविलासं बहुकालात परं पञ्चरस्थापनादपघेस्तविचरणम्, तेन स्वत्क्षिप्तं जङ्घे समानिता यम मनभं शिर मुख' कर्पतं लाङ्गूलं सदैव विकटा भीषणा वैजयन्तिका पताका तया विषमो दुर्दर्शो डामरो भीषण: उद्दाम' प्रचण्ड' शरीरसन्निवेशो देहसंस्थानं यस्य स।

উদ্‌ঘাটিত করিয়াছে এবং তৎকালে ইহার পাদদ্বয়ের শৃঙ্খল স্খলিত হইয়া সেই পিঞ্জরেই সংলগ্ন রহিয়াছে। (বহুকাল পরে বন্ধনোন্মুক্ত হওয়ায়) যথেষ্ট বিচরণবশতঃ ঊর্দ্ধসঞ্চালিত শির ও উন্নত লাঙ্গূলরূপ ভীষণ পতাকাদ্বারা ইহার দেহসংস্থান অতি-প্রচণ্ড ভীষণ ও দুর্দর্শনীয় হইয়াছে। এবং স্বীয় বন্ধনাগার হইতে নির্গত হইয়াই তৎক্ষণাৎ সতৃষ্ণ ভাবে প্রাণিদিগের হস্তপদাদি অনেক অবয়ব কবলিত করিতেছে ও দন্তমধ্যস্থিত কঠিন অস্থিখণ্ডের চর্ব্বণশব্দে কটকটশব্দায়মান করাতের ন্যায় কঠিন দন্তগুলিদ্বারা তাহার মুখবিবর অতি ভয়ঙ্কর ভাব ধারণ করিয়াছে। প্রচণ্ড

मठात् स्वकीयबन्धनमन्दिरात् अपक्रम्य निर्गत्य, तत्क्षणं अपक्रमणस्यैव समये सहसा प्राक्काङ्‌ यथा स्यात्तथा कवलितानां खादितानां अनेकेषां देहिनः प्राणिनो देहावयवानां करचरणादिशरीरावयवानां मध्ये विधुराः कठिना ये अस्थिखण्डाः तेषां खण्डनस्य दन्तैर्निष्पेषणस्य घट्टहारः शब्दविशेषः तेन कटकटायमानाभिः कटकटाशब्दं कुर्वाणाभिः करपत्रवत् क्रकचवत् कठिनाभिः दंष्ट्राभिः दन्तैः करालो भयङ्करः मुखकन्दरो वदनविवरं यस्य सः।

प्रचण्डवज्रनिर्घातवत् दारुणः भीषणः चपेटः पाणितलप्रहारः तेन आमोटितानि आमर्दितानि (मुटमर्दने इत्यस्य रूपम्) यस्मात् कवलितानि ग्रासीकृतानि (आमोटितेत्यत्र आमोडनेति पाठे आमोडनं घूर्णनं तेन कवलितानीत्यर्थः) यानि अनेकेषां नरतुरङ्गाणां मनुष्यघोटकानां जाङ्गलानि मांसानि ("जाङ्गलं क्लीं मांस"मिति शब्दकल्पद्रुमः)। तेषां उद्गारैः पुनर्बहिर्निःसरणेन भरितः परिपूर्णो यो गलगुहागर्भः गलविवरमध्यः, तत्र गम्भीरः घर्घरः, तदाकारायमानशब्दो यस्य सः।

तथा रसितदीर्घमधुरः यो गम्भीरमन्द्रः मांसभक्षणकालीनकुपितसाटोपगर्जनध्वनि-विशेषः, तस्य सन्दर्भेण समूहेन परिपूरितं व्याप्तं गगनतलं आकाशदेशो येन सः।

तथा केचन निहता व्यापादिताः केचन निष्पिष्टाः चूर्णिताः केचन नष्टाः (नशेरदर्शनार्थत्वात्) अदर्शनं प्रापिताः, केचन निद्रापिताः भयातिशयवशेन तत्र तत्रैव निद्रां स्थितिं लम्भिताः अनेके जननिवहा येन सः।

(अत्र केचित् "घर्घरोद्गारिगम्भीरमन्द्रशब्दपूरितदिगन्तभीतभीषितजननिद्रापितानेकजननिवह" इत्येकं पाठं कल्पयन्तः घर्घरो दीर्घमधुरो उद्गारिगर्जितं तेन यो गम्भीरमन्द्रः तस्य

বজ্রনির্ঘাতবৎ ভীষণ চপেটাঘাতে বিমর্দ্দিত করিয়া অনেক নর এবং ঘোটকের মাংসগুলি গিলিতেছে ও গিলিতমাংসগুলির উদ্গারে পরিপূর্ণ ইহার গলদেশে গম্ভীর ঘর ঘর শব্দ হইতেছে। এমন কি দীর্ঘ মধুর মাংসভক্ষণকালীন সকোপ-গর্জ্জনশব্দসমূহে গগনতল পর্য্যন্ত পরিব্যাপ্ত করিতেছে। এবং কেহকে আক্রমণ করিতেছে, কেহকে চূর্ণ করিতেছে, কেহকে বিনাশিত করিতেছে, কেহকে বা ভয়াভিভূত করিয়া স্বস্থানেই বিনাশ করিতেছে ও শিরোহির ন্যায় কঠিন নখপ্রহারে নির্দ্দয়ভাবে বিদারিত প্রাণিসমূহের গাত্র হইতে নিঃসৃত রক্তধারা গমনপথকে কর্দ্দমিত করিতেছে। (আর অধিক কি বলিব) এই দুষ্ট ব্যাঘ্র যেন কোপাক্রান্ত যমের লীলাভিনয় করিতেছে। সুতরাং সকলেই যথাশক্তি আত্ম-জীবন-রক্ষার চেষ্টা কর।

[प्रविश्य बुद्धरक्षिता । सत्रासं ।] परित्तायध, एसा णो पिअसही अमच्चणन्दणस्स बहिणिआ मदअन्तिआ, एदिणा दुट्ठसद्दूलेण विणिहदविद्दाविदणिस्सेसपरिअणा अहिभवीअदि (ग)

माल । लवङ्गिए ! अह्नो प्पमादो । (ङ)

माध । [ससंभ्रममुत्थाय ।] बुद्धरक्खिदे ! क्वासौ । (४५)

(ग) परित्रायध्वं, एषा नः प्रियसखी अमात्यनन्दनस्य भगिनी मदयन्तिका, एतेन दुष्टशार्दूलेन विनिहतविद्रावितनिःशेषपरिजना अभिभूयते ।

(ङ) लवङ्गिके ! अहो प्रमादः ।

शब्देन समूहेन प्रतिरवाभोगः प्रतिशब्दविस्तारः तेन भीषितो भयं प्रापित इत्यादि व्याचष्टे । तत्र च रहितस्य दुर्श्वेत्यादिरिमौदाप्रचलितशब्दमयौ बयेत्तं शब्दार्थयोः कलन मानसमनन्यत्वात्तदमिति समन्वयम् । कथमेव सुदोर्घमत्ताशराधिबहुटनैव कर्कशप्रचलित-शब्दविस्तारेण च लोकव्यामोहनो भयभृतिरसदभिनिवेश इति स एव आभाति, यतो निरङ्कुश क्षवथ इति)।

तथा कठोरा. कठिना नखराः नखा. कर्कशा निरीक्षणेनैव तदाक्रमणेन तत्प्रकारैव निहत्य निष्ठुर यथा तथा दारितेभ्यः विदारितेभ्य अमुनामारयवेभ्यः प्राणिशरीरखण्डसदायर्मेभ्यः प्रवर्तितं घृते रक्ते. शोणिते. कर्दमितः पङ्किलीकृत गतिपथो गमनमार्गो येन सः। दुष्टो हिंसाप्रवण. शार्दूलो व्याघ्र., कुपितकृतान्तलीलाश्रितं कुतकान्तलीलावरणं करोति ।

(ग) प्रविश्येति। विनिहता विनाशिता विद्राविता प्रपद्भिताच अशेषाः निःशेषाः परिजना यस्या. सा। एतेन परिजनकर्तृकरक्षाभाव सूचितः। अभिभूयते व्यापाद्यते ।

(ङ) मालेति । अहो इति विषादे । प्रमाद. अनवधानता पशुपालकपुरुषाणामिति शेषः।

(४५) माधेति । क्वासौ दुष्टशार्दूलेनाक्रान्ता मदयन्तिका क कुत्र, शार्दूलं निहत्याशुनैव ता मोचयिष्यामीत्याशय. ।

(গ) বুদ্ধরক্ষিতা। (প্রবিষ্ট হইয়া) পরিত্রাণ কর। এই, দুষ্ট ব্যাঘ্র, সমস্ত পরিজনদিগকে বিনাশিত ও বিমর্দ্দিত করিয়া অমাত্যনন্দনের ভগিনী আমাদের প্রিয়সখী এই মদয়ন্তিকাকে আক্রমণ করিয়াছে।

(ঙ) মাল। লবঙ্গিকে ! অহো পশুপালক পুরুষদিগের কি অনবধানতা।

(৪৫) মাধ। (সসম্ভ্রমে উঠিয়া) বুদ্ধরক্ষিতে। মদয়ন্তিকা কোথায় শার্দ্দূল কর্তৃক আক্রান্ত হইয়াছে ?

माल। [दृष्ट्वा सहर्षसाध्वसं आत्मगतं।] अम्महे ! एसोवि इहय्यो ज्जेव्व (ख)

माध। [स्वगतं।] हन्त ! पुण्यवानस्मि, यदहमतर्कितोपनतदर्शनोच्छ्वसितलोचनया अनया। (४६)

अविरलमिव दाम्ना पौण्डरीकेण नद्धः,
स्नपित इव च दुग्धस्रोतसा निर्भरेण।
कवलित इव कृत्स्नश्चक्षुषा स्फारितेन,
प्रसभममृतवर्षेणेव सान्द्रेण सिक्तः॥ (४७)

(ख) अहो! एषोऽपि इहस्थ एव।

(ख) मालतीति। सततामिलषितवल्लभस्यातर्कितावलोकनात् हर्षः, निर्जनोपवने अत्र अवस्थितां मां यदि कश्चिद्दैवादवलोकयिष्यत्तदा किं भवेदित्याशङ्कया च साध्वसं, ताभ्यां सह यथा स्यात्तथा दृष्ट्वा माधवमिति शेषः। "अम्महे" इति सम्मदादविस्मयार्थकमव्ययं नाटके प्राकृतभाषायां व्यवह्रियते—तदुक्तं—

"विस्मये सम्मदादौ च अम्महे इति कल्पितम्।
शब्दरूपं विशेषेण प्रयोक्तव्यं प्रयोक्तृभिः॥" इति

संस्कृते पुनरेतदर्थकमव्ययं विरलत्वादस्माभिर्नैवास्यानुवादः क्रियते। एषोऽपि माधवोऽपि। अपिरेवार्थे।

(४६) माधेति। हन्तेति हर्षे। अतर्कितं पूर्वमचिन्तितं यथा तथा उपस्थितं यद्दर्शनं तस्य विलोकनं तेन उच्छ्वसिते आनन्दिते लोचने यस्याः तथाभूतया अनया मालत्या अहं नद्ध इत्यादि श्लोकस्थक्रियापदैरन्वयः।

(४७) अविरलमिति। अनया मालत्या (कर्त्र्या) अहं (कर्म) स्फारितेन विकासितेन चक्षुषा (करणेन) पौण्डरीकेण सिताम्भोजसम्बन्धिना दाम्ना मालया अविरलं घनं यथा-

---

(ক) মাল। (হর্ষ ও ভয়ের সহিত দেখিয়া আত্মগত) অহো! মাধবও দেখি এখানেই উপস্থিত আছে।

(৪৬-৪৭) মাধ। (স্বগত) অহো আমি অতীব পুণ্যবান্, [illegible] হেতু অচিন্তিতোপনতদর্শনে চঞ্চলনয়না এই মালতী বিস্ফারিতনেত্রে যেন (শ্বেতপদ্ম-

बुद्ध। महाभाअ ! उज्जाण-वाहिरत्था-मुहे । (क)

[माधवः साटोपं परिक्रामति ।] (४८)

काम । वत्स ! अप्रमत्तो भूत्वा विक्रमस्व । (४९)

(क) महाभाग ! उद्यानबाह्यरथ्यामुखे ।

ज्योत्स्नया लग्नो बद्ध इव। निर्भरेण अतिमात्रेण दुग्धस्रोतसा दुग्धप्रवाहेण च व्याप्त, आप्लुत इव। "दुग्धस्रोतसां निर्भरेणे"ति पाठे तु निर्झरेण प्रवाहेणेत्यर्थः। अत एव मे सर्वाणि मम चाङ्गानीत्यर्थः, कवलित ग्रस्त इव। तथा गाढेन घनेन अमृतवर्षेण सुधावृष्टेन सबलं बलात् सिक्त इव। अनेन मालत्याः दृष्टिव्यापारः प्रदर्शितः। यथोक्तं—"धाराधाविकसधारी यस्य तस्यीत्सुज्यते" इति।

अत्र दुग्धस्रोतसा ,इत्यत्रैव अकारस्य लुप्तत्वात् पूर्वविन्यासेन प्रथमचतुर्थचरणयोः सहमिलनपदयोः पूर्वविन्यासेन च "अक्रमता" दोषः।

मम इत्यादि क्रियोत्प्रेक्षाचतुष्टयस्य परस्परनैरपेक्ष्येण संसृष्टिरलङ्कारः। मालिनीवृत्तम्।

(क) बुद्धेति। "क्वासौ"इति माधवप्रश्नोत्तरमाह—महाभागेति। अत्र मालतीमाधवयोर्नायिकानायकयोः समागमे न कश्चिद्विच्छेद इति मन्तव्यम्। उद्यानबाह्यरथ्यामुखे उपवनबहिर्मार्गप्रान्ते आह्वा मृगयात्रालापा मदयन्तिका वर्त्तत इत्यर्थः।

(४८) माधव इति। साटोपं सदर्पं परिक्रामति, तत्र गमनाय पादविक्षेपं करोति।

(४९) कामेति। अप्रमत्तः अनवधानतारहितः सावहितः इति यावत्। विक्रमस्व मदयन्तिकारक्षार्थं विक्रमप्रकाशाय उत्सहस्व। "वृत्तिसर्गतायनेषु क्रमः" इति कर्त्तरि आत्मनेपदम्।

মালাধারা আমাকে গাঢ়ভাবে আবদ্ধ করিতেছে। অতিমাত্রদুগ্ধস্রোতোধারা যেন আমাকে আপ্লুত করিতেছে ও আমার সর্ব্বাঙ্গ যেন গ্রাস করিতেছে। এবং গাঢ় অমৃতবর্ষণদ্বারা যেন আমাকে সবলে সিক্ত করিতেছে।

(ক) বুদ্ধ। মহাভাগ! উদ্যানবাহ্য পথের মুখে (মদয়ন্তিকা আক্রান্ত হইয়াছে)।

(৪৮) (মাধব সগর্ব্বে পাদবিক্ষেপ করিতে লাগিলেন)।

(৪৯) কাম। বৎস! সাবহিত হইয়া বিক্রম প্রদর্শন করিও।

माल। [जनान्तिकं।] लवङ्गिए! हद्धी! हद्धी! संसओ क्खु जादो। (ख) [सर्वास्त्वरितं परिक्रामन्ति।] (५०)

माध। [अग्रे दृष्ट्वा सबीभत्सं।] अहह! (५१)

संसक्तत्रुटितविवर्त्तितान्त्रजाल-
व्याकीर्णस्फुरदपवृत्तरुण्डखण्डः।
कीलालव्यतिकरगुल्फदघ्नपङ्कः
प्राचण्ड्यं वहति नखायुधस्य मार्गः॥ (५२)

(ख) लवङ्गिके! हा धिक्! हा धिक्! संशयः खलु जातः।

(ख) मालेति। संशयः माङ्गल्याभावात् मदयन्तिकायामुक्तौ सन्देहः।

(५०) सर्व्वा इति। सर्व्वाः कामन्दकीप्रमुखाः, परिक्रामन्ति मदयन्तिकायाः अवस्थां द्रष्टुं पादविक्षेपं कुर्व्वन्ति।

(५१) माधेति। सबीभत्सं सघृणं आह इति शेषः। "अहह" इति खेदे।

(५२) संसक्तेति। संसक्तानि पथिपार्श्वस्थितशवादावादौ संलग्नानि पश्चात् त्रुटितानि प्रबलाकर्षणेन छिन्नानि, ततश्च विवर्त्तितानि भूमौ विक्षिप्तानि यानि अन्त्रजालानि नाड़ीविशेष-श्रेणयः तैर्व्याकीर्णा व्याप्तः स्फुरतो अचिरहतत्वेन स्पन्दमानाना अपवृत्तानां विपर्य्यस्तानां रुण्डानां छिन्नशिरस्कानां खण्डा यस्मिन् सः, तथा कीलालानां शोणितानां व्यतिकरेण सम्पर्केण गुल्फदघ्नः गुल्फपरिमाणः ("प्रमाणे मात्रट् द्वयसट् दघ्नट्" इत्यनेन गुल्फशब्दाद्दघ्नट्-प्रत्ययः) पङ्कः कर्द्दमो यत्र स तथाभूतः, नखा एव आयुधानि अस्त्राणि यस्य तस्य शार्द्दूलस्य मार्गः तत्कृतव्यतिक्रमणवर्त्म प्राचण्ड्यं अतिभयङ्करतां वहति धारयति।

अत्र प्राचण्ड्यवहनं प्रति प्रथमद्वितीयपदार्थयोर्हेतुत्वात् पदार्थहेतुककाव्यलिङ्गालङ्कारः। प्रहर्षिणी वृत्तम्॥

(খ) মাল। (জনান্তিকে) লবঙ্গিকে! হা ধিক্ হা ধিক্!! (মদয়ন্তিকার জীবনরক্ষাবিষয়ে) সংশয় হইতেছে।

(৫০) (সকলে দ্রুত পদবিক্ষেপ করিতে লাগিল)

(৫১-৫২) মাধ। (অগ্রে দেখিয়া ঘৃণার সহিত) অহো! এই নখায়ুধের (বাঘের) গমনপথে পথিপার্শ্বস্থিত শবাদিতে সংলগ্ন ও পরেতে (সবেগাক্রমণে) ছিন্ন হওয়ায় ভূমি বিক্ষিপ্ত নাড়ীশ্রেণীদ্বারা পরিব্যাপ্ত কম্পমান ছিন্নশিরস্ক

अहो प्रमादः। (५३)

वयं वत विदूरतः क्रमगता पशोः कन्यका (५४)

सर्व्वाः। हा मदयन्तिए ! (ग)

[कामन्दकीमाधवौ सहर्षाकूतं।] (५५)

कथं तदभिपातितादधिगतायुधः पूरुषात्।

कुतोऽपि मकरन्द एत्य सहसैव मध्ये स्थितः॥ (५६)

(ग) हा मदयन्तिके।

---

(५३) अहो इति। प्रमादः अनवधानता रक्षिपुरुषाणामिति शेषः, यत एतादृशविपद्यपि नैते उदासत इति भावः।

(५४) मदयन्तिका विपद्प्रतीकारासामर्थ्यं दर्शयति—वयमिति। वयं विदूरतः दूरवर्त्तिनि देशे वर्त्तामहे इति शेषः, कन्यका मदयन्तिका पशोः व्याघ्रस्य क्रमं पादविक्षेपं गता प्राप्ता, एतन्मात्रपदविक्षेपलभ्यस्थाने वर्त्तते इत्यर्थः। तथाचास्मद्गमनात् पूर्व्वमेव मदयन्तिका व्याघ्रेण कवलगता भविष्यतीत्यस्या विपन्निवारणासामर्थ्यमिति भावः।

(ग) सर्व्वा इति। अत्र हा इत्यव्ययं खेदजनकविपत्तिद्योतकं।

(५५) कामेति। उपयुक्तसखीविपत्त्या मदयन्तिकाया रक्षावधारणादुभयोर्हर्षः। आकूतमभिप्रायः। तथाहि मकरन्दो यदि मदयन्तिकां रक्षेत् तदा सा तस्मिन्नेव सुरत-सुस्थोत्पन्न इति माधवस्याभिप्रायः। रक्षादानेन प्रसन्नाया मदयन्तिकाया मकरन्देन सह संयोजनं अनायासलभ्यं भविष्यतीति च कामन्दक्या अभिप्रायः। हर्षितकमाकूताभ्यां सह यथा स्यात्तथा कथयत इति शेषः।

(५६) कथमिति। अत्र कथमव्ययो हर्षे। "कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे

দেহগুলি (লুণ্ঠিত হইতেছে এবং শোণিতসম্পর্কে গুরুপরিমাণ কঠিন হইয়াছে। সুতরাং এইপথ অতি ভীষণ ভাব ধারণ করিয়াছে।

(৫৩) অহো রক্ষকদিগের কি অনবধানতা (যে হেতু তাহারা এখনও নিশ্চেষ্ট আছে)

(৫৪) আমরা এখনও দূরে আছি, মদয়ন্তিকা প্রায় ব্যাঘ্রের আক্রমণগতা, (সুতরাং আমাদিগের রক্ষা অসম্ভব)

(গ) সকলে হা! মদয়ন্তিকে!!

(৫৫-৫৬) কামন্দকী ও মাধব। (হর্ষ ও অভিপ্রায়ের সহিত) একি এই ব্যাঘ্র-

इतराः । साहु, महाभाअ ! साहु । (घ)

कामन्दकीमाधवौ । [सभयं]—हृदय पशुना हतः (५७)

इतराः । अच्चाहिदं ! अच्चाहिदं ! (ङ)

कामन्दकीमाधवौ । [सहर्षं ।]—प्रमथितश्च दंष्ट्रायुधः ॥ (५८)

(घ) साधु महाभाग ! साधु ।

(ङ) अत्याहितमत्याहितम् ।

भये त्वभावकादयो"रिति मेदिनी । तेन साहसेन अभियानितात् विस्मयितात् दुष्टात् कस्माच्चित् नाकुलाद्यादिभ्यः, अधिकत आहत्य खड्ग आयुध अधिकेन अन्तकृतो मकरन्दः कुतोऽपि अकस्मादित्यादीव व्याघ्रात् एव मदयन्त्या मदनेव स्वकीयजीवनविलम्बविक्रममपि अत्यर्थे च मध्ये अन्तराले मदयन्तिकाशार्दूलयोरिति शेषः, स्थितः मदयन्तिकारक्षणार्थं शार्दूलमभिधावतीति भावः ।

(घ) इतरा इति । साधु साधु इति हर्षे द्विरुक्तिः । कृतमिति शेषः ।

(५७) कामेति । पशुना शार्दूलेन हृद् वीर यथा स्यात्तथा हतः अस्त्रैः प्रहृतः मकरन्द इत्यर्थः ।

(ङ) इतरा इति । अत्याहितं महद्भयं अनेन शार्दूलसकलप्रकारैर्जीवनाशसम्भवमिति शेषः ।

(५८) कामेति । दंष्ट्रा एवाः आयुध प्रहरणं यस्य स दंष्ट्रायुधः शार्दूलश्च प्रमथितः दागुणाद्वैवाभिमतरीत्या निहतः मकरन्देनेति शेषः । "अत्युग्रतरौ आसवाद्भुते"ति कश्चित् पाठः, अनुना मकरन्देन अमी व्याघ्र. अत्र विवेकस्य: अत्र इति तदर्थः ।

अत्र कामन्दकी कपालकुण्डलाव्याघ्रवधादेरपि—५४—५६—५७—५८ अङ्कचित्तितानि वक्ष्य एव बोध.। अत्र च प्रथमे पाठे व्याघ्रस्यनवृत्तिवर्णनं मदयन्तिकारक्षणाभिप्राये च

কর্তৃকই আহত কোন এক পুরুষের অসি গ্রহণ করিয়া মকরন্দ সহসা কোথা হইতে মদয়ন্তিকা ও ব্যাঘ্রের মধ্যবর্ত্তী হইল ?

(ঘ) সকলে। সাধু মহাভাগ ! সাধু। (তুমি ভালই করিয়াছ)।

(৫৭) কামন্দকী ও মাধব। (সভয়ে) মকরন্দ শার্দ্দূলকর্ত্তৃক বক্ষঃস্থলে আহত হইয়াছে।

(ঙ) অপরসকলে। সর্ব্বনাশ সর্ব্বনাশ !

(৫৮) কামন্দকী ও মাধব। (সহর্ষে) দংষ্ট্রায়ুধ (ব্যাঘ্র) মকরন্দকর্ত্তৃক নিহত হইয়াছে।

इतराः । [सानन्दं ।] दिष्ट्या परिहृतं दुर्ज्ञातं (च)

काम । [साकूतं ।] कथं व्यालनखरप्रहारनिःसृतरक्तप्रवाहः, चितितलनिपन्नखड्गलतावष्टम्भनिश्चलः, संभ्रान्तमदयन्तिकावलम्बितः ताम्यतीव वत्सो मे मकरन्दः । (५८)

(च) दिष्ट्या प्रतिहतं दुर्ज्ञातम् ।

अत्राद्ये पद्यरूपवयोः सामान्ययोरुपादानात्, द्वितीये चविकपायुधविशेषे वक्तव्ये चाधिगतायुधमिति सामान्योपादानात्, चतुर्थेऽपि व्याघ्ररूपपशुविशेषे वक्तव्ये पशुमिति सामान्यत उपादानाच चत्वारो विशेषे चविशेषाख्यदोषाः, एव प्रथमे पादे भेदयोरकिञ्चनादिपदस्य वक्तव्यत्वेऽपि तदनभिधानादुक्ताख्यानभिधानतादोषः, तथा तृतीयपादे चक्रमाकरे पृथ्वीवृत्तनियमस्य यदच्छेदस्याभावेन यतिभङ्गदोषश्च । यतिभङ्गश्च दोषत्वमुक्तम् । यथा काव्यादर्शे—

"श्लोकेषु नियतस्थानं पदच्छेदं यतिं विदुः ।
तदपेतं यतिभ्रष्टं श्रवणोद्वेजनं यथा ॥"

पृथ्वीवृत्तम् । "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः" इति तल्लक्षणम् ।

(च) इतरा इति । दुर्ज्ञातं व्यसनं "दुर्ज्ञातं व्यसनं श्लोकमसम्यग्ज्ञातवस्तुनी"ति मेदिनी । दिष्ट्या भाग्येन प्रतिहतं नाशितं मकरन्दे न शार्दूलस्य वधादिति शेषः ।

(५८) कामेति । साकूतं साकूतेन "मदयन्तिकामकरन्दयोर्हृदयस्थेऽय परस्परसंवर्थं एवोत्पत्तिरानुरागसंवर्धको भविष्यतो"त्यभिप्रायेण सह यथा स्यात्तथा । कथमिति सम्भ्रमे । व्यालस्य हिंस्रपशो "व्यालो दुष्टगजे सर्पे श्वापदे हिंस्रपशौ अपि" इति इत्यायुधः । शार्दूलस्येत्यर्थः, नखरप्रहारेण नखाघातेन निःसृतः निर्गतः रक्तप्रवाहो यस्य सः, चितितले निपन्ना पतिता खड्गलता तस्या अवष्टम्भेन अवलम्बनेन निश्चलो निस्पन्दः, तथा सम्भ्रान्तया ससम्भ्रमया मदयन्तिकया अवलम्बितः पतनभयाद्धृतः मे मम वत्सः अतिशयोऽनुवर्तनीयो मकरन्दः ताम्यतीव मुह्यतीव ।

(চ) অন্য সকলে । ভাগ্যক্রমে এই ব্যসন বিনাশিত হইল।

(৫৮) কাম। (সাভিপ্রায়ে) শার্দূলের নখপ্রহারে মকরন্দের গাত্র হইতে রক্তপ্রবাহ নির্গত হইতেছে। ক্ষিতিতলসংলগ্ন খড্গলতা অবলম্বন করিয়া বৎস মকরন্দ একেবারে নিষ্পন্দ হইয়া পড়িয়াছে ও পড়িয়া যাওয়ার আশঙ্কায় অতি-

इतराः। हद्धी! हद्धी! गाढ़प्पहारदाए किलम्मदि महाभाओ (छ)

माध। कथं प्रमुग्ध एव। [कामन्दकीं प्रति।] भगवति! मां परित्रायस्व। (६०)

काम। अतिकातरोऽसि। तदेहि तावत् पश्यावः। (६१)

(छ) हा धिक्! हा धिक्! गाढप्रहारतया क्लाम्यति महाभाग॰।

(छ) इतरा इति। गाढप्रहारतया गौरवमहत्तया महाभागः मकरन्दः क्लाम्यति मुह्यति।

(६०) माधवेति। कथमिति सम्भावनायाम्। प्रमुग्धो मूर्च्छितः। मां परित्रायस्व निज-महत्तात्रक्षः। अत्र 'विरोधो' नाम मुखसन्ध्यङ्गम्। तल्लक्षणं यथा दर्पणे—"विरोधो व्यसन-प्राप्ति"रिति।

(६१) कामेति। तत् तस्मात् निजमहत्तवेनातिक्रिमत्वादित्यर्थः, एहि आगच्छ, पश्यावः गत्वा अवलोकयावः, मकरन्दमिति शेषः।

अत्र च कथावस्तूनि "प्रविश्य सम्भ्रान्ता बुद्धरक्षिता।" "परित्रायध्वं परित्रायध्वं"-इत्यादिना अत्र सभामिपथ्यान्तेन सन्दर्भेण बुद्धरक्षितादिभिः पात्रैरनुपात्तवस्तुनः सूचनात् "चूलिका" नामार्थोपक्षेपकविशेषोऽयम्। तल्लक्षणन्तु प्रथमाङ्कव्याख्यायामेव प्रदर्शितम्।

অবহিতা হইয়া অনবহিতা তাহাকে ধরিয়াছে। একি আমার অতি স্নেহাস্পদ মকরন্দ তুমি যা মূর্চ্ছিত হইল।

(ছ) অন্য সকলে। হায় হায়! প্রহারের তীব্রতানিবন্ধন মহাভাগ মকর ক্লান্ত হইয়া পড়িয়াছেন।

(৬০) মাধ। একি মূর্চ্ছিতই হইল! (কামন্দকীর প্রতি) ভগবতি আমাকে (এই বিপদ্ হইতে) উদ্ধার কর।

(৬১) কাম। তুমি অতি কাতর হইয়াছ; সুতরাং এস, যাইয়াই মকরন্দকে দেখি।

इति परिक्रम्य निष्क्रान्ताः सर्वे । (६१)

इति मालतीमाधवे शार्दूलविद्रावणो नाम तृतीयोऽङ्कः (६२)

---

(६१) सर्वे माधवादयः । (क्वचित् पुस्तके एतदंशो नास्ति ।)

(६२) इतीति । शार्दूलस्य विद्रावणं विनाशो यत्र सः । शार्दूलविद्रावणस्यैवात्र प्रधानतः उद्देश्यीभूतत्वात्तदाख्ये नाटकत्वमित्यनुसन्धेयम् ।

इति काव्यतर्कतीर्थोपनामक-श्रीकृष्णविहारिकर्कसिद्धान्तभट्टाचार्यकृतायां तत्त्वबोधिनी-समाख्यायां मालतीमाधवव्याख्यायां तृतीयाङ्कविवृतिः समाप्ता ॥

---

(৬২) পাদবিক্ষেপণপূর্বক সকলের প্রস্থান।

মালতীমাধবের শার্দূলবিদ্রাবণনামক তৃতীয় অঙ্ক সমাপ্ত।

चतुर्थोऽङ्कः ।

ततः प्रविशतो मदयन्तिकामालतीभ्यामवलम्ब्यमानौ प्रमुग्धौ मकरन्दमाधवौ, सम्भ्रान्ता कामन्दकी बुद्धरक्षिता लवङ्गिका च। (१)

मद। पसीद भअवदि! परित्ताहि परित्ताहि मदयन्तिआणिमित्तसंसइदजीविदं आअण्णजणाणुकम्पिणं महाभाअं (क)।

लवङ्ग। हद्धी! हद्धी! किं दाणिं अह्मेहिं एत्थ पेक्खिदव्वं। (ख)

(क) प्रसीद भगवति! परित्रायस्व, मदयन्तिकानिमित्तसंशयितजीवितमापन्नजनानुकम्पिनं महाभागम्।

(ख) हा धिक्! हा धिक्! किमिदानीमस्माभिरिह प्रेक्षितव्यम्।

---

(१) पूर्वाङ्कादावतारित सूचितपात्रप्रवेशमाद्यमङ्कं कविरारभते—तत इत्यादिना। अत्र मदयन्तिकया अवलम्ब्यमानो मकरन्दः मालत्या च माधव इति यथासंख्येनान्वयो बोद्धव्यः। व्याघ्रहननप्रकारेण मकरन्दस्य विमर्दनेन च माधवस्य प्रमुग्धतया सविचिन्ताभ्यां ताभ्यां दयापरोऽहिर्दयाभ्यां प्रतीकारचेष्टया धारणालेन तयोरेव प्रागल्भ्यकल्पनं न सहृदयहृदयगम्यमित्यनुसन्धेयम्।

(ग) भद्रेति। भगवति! इति कामन्दक्याः सम्बोधनम्। सा परिव्राजिकेति जीवनरक्षणादौ तस्याः सामर्थ्यमस्तीति विश्वासात् प्रार्थनोक्तिरियम्।

(घ) हतेति। हा धिक् हा धिगिति खेदे द्विरुक्तिः। माधवमकरन्दयोः प्राणनाशसम्भवात्—किमिदमिति।

---

(১) মদয়ন্তিকা এবং মালতীকর্ত্তৃক অবলম্ব্যমান মূর্চ্ছিত মকরন্দ ও মাধব, সম্ভ্রান্তা কামন্দকী, বুদ্ধরক্ষিতা ও লবঙ্গিকার প্রবেশ।

(ক) মদ। ভগবতি! প্রসন্না হও। মদয়ন্তিকার (আমার) নিমিত্ত সংশয়িতপ্রাণ বিপন্ন দয়ালু এই মহাভাগকে রক্ষা কর, রক্ষা কর।

(খ) লবঙ্গ। হায় হায়!! এখানে এখন আমাদের কি দেখিতে হইবে।

कामन्दकी। [उभौ कमण्डलूदकेन सिक्त्वा।] ननु भवत्यः पटाञ्चलेन वत्सौ वीजयन्तु। (२)

[मालत्यादयस्तथा कुर्वन्ति। (३)]

मक। [समाश्वस्यावलोक्य च।] वयस्य! कातरोऽसि, किमेतत्, ननु स्वस्थ एवास्मि। (४)

मद। [सहर्षं।] अम्महे! पडिबुद्धं दाणिं मअरन्दपुण्णिमाचन्देन (ग)।

माल। [माधवस्य ललाटे हस्तं दत्त्वा।] महाभाअ! दिट्ठिआ वट्टसि, णं भणामि, पडिवण्णचेदणो महाभाओत्ति (घ)

(ग) अहो। प्रतिबुद्धमिदानीं मकरन्दपूर्णिमाचन्द्रेण।

(घ) महाभाग। दिष्ट्या वर्द्धसे ननु भणामि प्रतिपन्नचेतनो महाभाग इति।

---

(२) कामेति। पटाञ्चलेन वस्त्रप्रान्तभागेन।

(३) तथा—पटाञ्चलेन वीजनम्।

(४) मकेति। वयस्येति माधवसम्बोधनम्। एतत् कातर्यं किम् किमर्थम्? निजार्थं कच्चिदिति, कस्मिन् स्वभावे तिष्ठतीति स्वस्थ प्रकृतिस्थ एवास्मि अहमिति शेषः। तथाच मत्कृते कातर्यमनुचितमिति भावः।

(ग) मदेति। मकरन्द एव पूर्णिमाचन्द्रस्तेन प्रतिबुद्धं चैतन्यमाप्तम्। निरतिशयमदनाह्लादकरत्वान्मकरन्दे पूर्णिमाचन्द्रत्वारोपणेन च महाननुरागो व्यज्यते।

(घ) मालेति। मूर्च्छापनोदनाय शीतलक्रियाभ्यसनात्तदर्थमेव माधवललाटे हस्तार्पणम्। नन्वित्यवधारणे। चेतनमस्त्यस्मात् आवश्यकानिर्द्दिष्टत्वात् प्रतिपन्नचेतनः प्राप्तचैतन्य इत्यर्थः, महाभागो मकरन्दः। यस्य मूर्च्छादर्शनेन जीवनसंशयो यो इतरतः मूर्च्छितोऽपि स मकरन्द-

---

(২) কাম। (মকরন্দ ও মাধবকে কমণ্ডলুজলে সিক্ত করিয়া) তোমরা বৎস দুইটিকে বস্ত্রাঞ্চলদ্বারা বাতাস দেও।

(৩) (মালতী প্রভৃতি বাতাস করিতে লাগিল)

(৪) মক। (আশ্বস্ত হইয়া ও দেখিয়া) বয়স্য। কাতর হইয়াছ, তোমার এ কাতরতা কেন? আমি ত সুস্থই আছি।

(গ) মদ। (সহর্ষে) অহো! মকরন্দরূপ পূর্ণিমাচন্দ্র চৈতন্যলাভ করিয়াছে!

(ঘ) মাল। (মাধবের মস্তকে হস্তার্পণ করিয়া) মহাভাগ! ভাগ্যক্রমেই

माध। [आश्वस्य] वयस्य! साहसिक! एह्येहि। [इत्यालिङ्गति (५)]।

काम [उभौ शिरस्याघ्राय] दिष्ट्या जीवितवत्सास्मि (६)

इतराः। पिअं पिअं णो संवुत्तम्। (ङ)

[सर्वा हर्षं नाटयन्ति।] (७)

बुद्ध। [जनान्तिकम्] हला मदअन्तिए? एसो क्खु सो। (च)

(ङ) प्रियं प्रियं नः संवृत्तम्।

(च) सखि मदयन्तिके। एष खलु सः।

क्षेमं मकरन्दमिति तत्कृते चिन्तां परित्यज्य त्वय सुखी भवेति भावः। मालत्या कृतसा ग्रहणीया ईदृशे विपत्कालेऽपि समुचितोपचारकरणस्य कुत्रापि लोके दृष्टत्वादकथनादित्युक्तप्रायम्।

(५) माधेति। आश्वस्य धृत्वा लब्ध्वा। साहसं मृत्यापादनरूपातिदुष्करकार्यकारित्वात् साहसिकेति मकरन्दालपनम्।

(६) कामेति। शिरस्याघ्राणमायुर्वर्द्धनायेति इत्थः। अत एव गुरुजनैरति-स्नेहमूर्ध्न्याघ्रायादिषु तथा क्रियते। जीवन्तौ वत्सौ पुत्रकल्पौ माधवमकरन्दौ यस्याः सा। अद्य पुत्रयोर्जीवनं वत्सलत्वं वर्त्तमानमिति भावः।

(ङ) इतरा इति। प्रियं प्रियमिति हर्षे द्विरुक्तिः। उभयोर्जीवनरूपं प्रियमित्यर्थः।

(७) नाट्यं न हर्षभाव दर्शनात् बोधयन्तीत्यर्थः।

(च) बुद्धेति। हलेति सखी सम्बोधनम्। एष दृश्यमान एव सः यो मकरन्दस्त्वयि महानुरागवत्या अमुष्मै मया कथित इति शेषः।

ইচ্ছিলাক করিয়াছ, আমি নিশ্চয় বলিতেছি, মহাভাগ মকরন্দ চৈতন্যলাভ করিয়াছে।

(৫) মাধ। (আশ্বস্ত হইয়া) বয়স্য সাহসিক! এস এস। (এই কথা বলিয়া মকরন্দকে আলিঙ্গন করিল)

(৬) কাম। (উভয়ের মস্তক আঘ্রাণ করিয়া) ভাগ্যক্রমেই আমার বৎস-দ্বয় জীবিত হইয়াছে।

(ঙ) অন্যসকলে। আমাদের অতিপ্রীতির বিষয় সম্পন্ন হইয়াছে!

(৭) (সকলে হর্ষভাব অভিনয় করিতে লাগিলেন)

(৮) বুদ্ধ। (জনান্তিকে) সখি মদয়ন্তিকে! ইনিই সেই (মকরন্দ)।

मद। तदा ज्जेव्व जाणिदं मए, जदा एसो माहवो, अअं पि सो जणोत्ति (छ)।

वृद्ध। अयि, सच्चवादिणी अहम् ? (ज)

मद। ण क्खु अलिआविसेसु सुआरिसीओ पक्खवादिणीओ होन्ति। [माधवमवलोक्य] सहि ! मालदीअ वि रमणीओ एसो महाणुहावे पक्खवादो (झ)

(छ) तदैव ज्ञातं मया यदा एष माधवः, अयमपि स जन इति।

(ज) अयि सत्यवादिन्यहम्।

(झ) न खलु अलीकवादेषु सुजनाः, पक्षपातिन्यो भवन्ति। सखि ! मालत्या अपि रमणीय एवास्मिन् महानुभावे पक्षपातः.

(छ) मदेति। यदैव सखीचित्तनिरपेक्षतया मन्मुखात् रक्षितुमसमर्थतः माद्रु धारयैव मूर्च्छामवलोक्य "हा वयस्ये"ति विलपन् माधवः मालत्यादिभिः परिवृतोऽस्मीति तदुपागतस्तदैवेत्यर्थः। तथाच मालत्यादीनां व्यवहारो विश्वसमानुरागस्य माधवस्य परिज्ञाने सखीचित्तनिरपेक्षतया मन्मुखपरिमोचनत्वं एकमात्रवयस्यतया ख्यातस्य माधवस्य अन्योऽहमेव "हा वयस्ये"ति विलापासम्भव मकरन्दपरिज्ञाने हेतुरिति मन्तव्यम्। मकरन्दस्य नामापदेशम् आविष्करिष्यामीति।

(ज) वृद्धेति। अयि सखे। कृतवीणावीणादिवाचस्य यथाथा कथितं तत्प्रत्ययोत्पत्ति मम सत्यवादिनी सत्यवादिनीत्यर्थः।

(झ) मदेति। अलाकवेषु असत्येषु सुजनाः पक्षविपर्ययकारिण्यः, सख्यः, पक्षपातिन्य गुणहीनस्यापि जनस्य पक्षपातेन गुणवत्तादिप्रतिपादिन्यः न खलु भवन्ति, तथात्वे छिन्नकुचिन्तयाविलक्षणावलेरिति भावः। (अलाकवेष्विति पाठे कुत्सितविशेषेष्विति तदर्थः)। अस्मिन् महानुभावे माधवे अनुरागप्रधान, एकान्तानिष्ठाय, किमन्यो रमणीयः, परस्परयोग्यत्वे सिद्धान्तमनोहरः। तथाच मदयन्त्या मालतीमाधि प्रत्याशासूचनादलेवेति भावः।

(छ) मদ। ইনি যখন নিজের জীবনের প্রতি দৃষ্টিপাত না করিয়া [illegible] মালত্যাদি পরিবৃত হইয়া অপর ব্যক্তি ইহার নিকটে আসিয়াছে, তখনই বুঝিয়াছি যে, অপর ব্যক্তি মাধব ও ইনিই সেই ব্যক্তি।

(জ) বৃদ্ধ। কেমন আমি সত্যই বলিয়াছি ত ?

(ঝ) মদ। মাদৃশজনে তোমার মত স্নেহপ্রবণ সখীজনের পক্ষপাত

[इति मकरन्दमेव सस्पृहमवलोकयति। (८)]

काम। [स्वगतम्] रमणीयोर्जितं हि मदयन्तिकामकरन्दयोर्दैवाद्दर्शनम्। [प्रकाशम्] वत्स मकरन्द! कथं पुनरायुष्मान् अस्मिन्नवसरे मदयन्तिकाजीवितपरित्राणहेतोर्भवता दैवेन सन्निधापितः (९)।

मक। अद्याहमत्रैव नगर एव काञ्चिद्वार्त्तामुपश्रुत्य माधवस्य चित्तोद्वेगमधिकमाशङ्कमानस्त्वरितमवलोकितानिवेदितकुसुमाकरोद्यानवृत्तान्तः परापतन्नेव शार्दूलावस्कन्दगोचरगतामेवमभिजात-कन्यकामभ्युपपन्नवानस्मि (१०)।

---

(८) सस्पृहं स्पृहया निरतिशयाभिलाषेण सह वर्त्तमानं यथा स्यात्तथा अवलोकयति पश्यति। मदयन्तिका सानुरागं पुनर्मकरन्दस्यैव दर्शनं नाटयतीत्यर्थः।

(९) कामेति। रमणीयं मधुमासस्तनाद्युज्ज्वलतया सुस्पष्टं परस्परानुरागोद्भव-गर्भितत्वात्, व्याघ्रव्यपदेशेन गाढालिङ्गनसुखानुबन्धित्वात् विपत्प्रतीकारकतया चैतन्यलाभजनीय-त्वाच्च मनोहरं, ऊर्जितं शार्दूलनिपातकत्वेन बलप्रकाशकं (परपदस्य विशेष्यत्वविवक्षा-भावे कर्मधारयः।) ईदृशं दर्शनं परस्परसाक्षात्कारः दैवात् नियत्यानुकूल्यविधिनियोग-त्वादिव सम्पन्नमिति शेषः। मदयन्तिकामकरन्दयोर्दर्शनस्य सर्वथैवासम्पादनीयत्वादिति भावः। आयुष्मान् दीर्घायुष्क (“आयुष्मानिति वृद्धैर्न वाच्यो बालः श्रीमांश्च” इति भरतः)। कथं केन प्रकारेण, अस्मिन्नवसरे एतच्छार्दूलाक्रमणसमये। मदयन्तिकाजीवितपरित्राणहेतोः मदयन्तिकाया जीवनरक्षार्थं। सन्निधापितः समीपवर्त्तीकृतः।

(१०) मकेति। अत्रैव नगरे एव नगरमध्ये एव। काञ्चिद्वार्त्तां माधवस्योद्वेगवर्द्धक

সম্ভবপর হয় না। (মাধবকে দেখিয়া) এই মহাপুরুষে মালতীর অনুরাগ-কিংবদন্তী ও সর্বথা উপযুক্ত হইয়াছে।

(৮) (পুনরায় মকরন্দকেই সস্পৃহলোচনে দেখিতে লাগিল)।

(৯) কাম। (স্বগতঃ) অতি মনোহর ও বলপ্রকাশক এই মদয়ন্তিকা-মকরন্দের পরস্পরসন্দর্শন দৈববশতঃই অত্র সম্পন্ন হইয়াছে। (প্রকাশ্যে) বৎস মকরন্দ! এই শার্দূলাক্রমণাবসরে মদয়ন্তিকার জীবনরক্ষার্থ কি প্রকারে ভগবান্ দীর্ঘায়ুষ্ক তোমাকে সন্নিহিত করিলেন?

(১০) মক। আজ আমি এই নগরমধ্যেই কোন একটি বৃত্তান্ত শুনিয়া

[मालतीमाधवौ विस्मयतः। (११)]

काम। [स्वगतम्]। वृत्तान्तेन खलु मालतीप्रदानेन भवितव्यम्। [प्रकाशम्]। वत्स माधव! दिष्ट्या सुहृदनुवृत्त्या वर्द्धितोऽसि मालत्या तदयमवसरः प्रीतिदानस्य।

माध। भगवति! इयं हि—

कञ्चित् कालम्। अधिकं यद्गमात् इति लोकपरम्परया तदार्त्तावचनावश्रवणादिति भावः। अवलोकितया निवेदितः कुसुमाकरोद्यानस्य वृत्तान्तः मालतीमाधवप्रियसमागमादिवार्त्ता यत्र तादृशोऽयं त्वरितं सत्वरं पदात्पदमेव आगच्छन्नेव अहं 'लावङ्गिकामालतीपरगतां व्याघ्राक्रमणविषयता-मापन्नां अभिजातकन्यकां कौमारसिन्दूरादिवियुक्ताकृतिविशिष्टामुचितकुलीनकुमारीमध्यां ("अभिजातः कुलीने स्यान्न्याय्ये पण्डितयोरपि" इति मेदिनी) अभ्युपपन्नवान् उपगतवानस्मि।

(११) मालतीति। विस्मयत.—का सा वार्त्तेति चिन्तयत, निस्पन्दनयनत्वादिना तदाननम-मभिनयत इति यावत्। माधवार्पितचित्तत्वेन समसुखदुःखभावितया माधवीयं मकरन्दवृत्तान्त-गतौ मालत्या अपि भावना युक्तैवेति मन्तव्यम्।

(१२) कामेति। मालतीप्रदानेन नन्दनाय मालतीदानसङ्कल्पेन, भवितव्यमिति तावदेव माधवीयं वनमधिवात् स्वयमपि सदैव सुतरामेवमनुमानमिति भावः। सुहृदनुवृत्त्या बन्धुजनेन, वर्द्धितोऽसि मस्तके हस्तसंवाहनादिना चेतनीकृतोऽसि। तस्मात् प्रीतिदानस्य पारितोषिक-दानस्य अयं अवसरः अवकाशः, अधुनैव तद्दीयतामिति भावः।

মাধবের চিত্তোদ্বেগবৃদ্ধির আকাঙ্ক্ষা করিত, অবলোকিতার নিকট কুসুমা-করোদ্যানবৃত্তান্ত অবগত হইয়া অতি দ্রুতপদে তথায় যাইতে যাইতেই (পথে) শার্দ্দূলকবলগত এই কুলীন-কন্যার কাছে আসিয়া পড়িয়াছিলাম্।

(১১) (মালতী ও মাধব্ "সেই কথাটি কি ?" তাহার চিন্তাভিনয় করিতে লাগিলেন)।

(১২) কাম। (স্বগত) বৃত্তান্তটি নন্দনে মালতী প্রদান সম্বন্ধেই হইবে। (প্রকাশে) বৎস মাধব! ভাগ্যক্রমে বন্ধুজনে মালতী তোমাকে চৈতন্য করিয়াছে, সুতরাং প্রীতিদানের এই অবসর।

यद्व्याघ्रग्रथितसुहृत्प्रमोहमुग्धम्
कारुण्यात् विहितवती गतव्ययं माम्।
तत्कामं प्रभवति पूर्णपात्रवृत्त्या
स्वीकर्तुं मम हृदयस्य जीवितस्य॥ (१३)

लव। पडिच्छिदो क्खु णो पिअसहीए अअं पसादो (ञ)

(ञ) प्रतीष्टः खलु नः प्रियसख्या अयं प्रसादः।

---

(१३) यदिति। इयं हि एषैव मालती यद्यस्मात् व्याघ्रेण हिंस्रजन्तुना व्याघ्रे वीरार्थः, ग्रथितस्य (ग्रथः सन्दर्भोऽप्यैति नारकादिचकादिवत्,) विक्षतशरीरस्य सुहृदः प्रियस्य मकरन्दस्य प्रमोहेन मूर्च्छया मूर्च्छादर्शनजनितमोहेनमज्झयेत्यर्थः, मुग्धं मूर्च्छितं मां गतव्ययं व्यसनरहितं "पडिबुद्धेहधो महाभाओ" इत्याद्यभिधानेन च प्रकृतिस्थं विहितवती कृतवती। तत् तस्मात् कामं यथेच्छं मदनुमतिं विनापीत्यर्थः, पूर्णपात्रस्य "हर्षादुत्सवकाले यदलङ्कारा-म्बरादिकम्। आकृष्य गृह्यते पूर्णपात्रं पूर्णानकञ्च त"दिति जटाधरलक्षणलक्षितस्य नियमितैरेव बलादाकृष्य गृह्यमाणस्य अलङ्कारादिकस्य वृत्त्या प्रकारेण मम हृदयस्य जीवितस्य स्वीकर्तुं ग्रहीतुं प्रभवति शक्नोति। यद्वा मालत्या दानयोग्यं मम हृदयं जीवितञ्च पूर्वमादि-परिग्रहेणैव मालत्या पूर्वमेव तयो" रात्मसात्कृतत्वात्तदधिकदेयद्रव्याभावेन किमिदानीमपरं दास्यामीति भावः। प्रकटीभावेऽप्यत्रेदं प्रयमन नाम प्रतिमुखसन्ध्यङ्गम्। "प्रगमनं वाक्यं स्यादुत्तरोत्तर"मिति तल्लक्षणात्।

अत्र हिंसाविशेषे शार्दूले वक्तव्ये सामान्यहिंस्रवाचकव्याघ्रपदोपादानात् विशेषेऽविशेषाभिधानदोषः। पूर्णपात्रवृत्त्येति आर्थी उपमालङ्कारः। प्रहर्षिणी वृत्तम्॥

(ञ) लवेति। नः प्रियसख्या मालत्या अयं प्रसादः तव अनुग्रहः प्रतीष्टः स्वीकृतः।

---

(১৩) মাধ। ভগবতি! যেহেতু এই মালতী সৌহৃদ্যবশতঃ ব্যাঘ্রকর্তৃক বিক্ষতশরীর প্রিয়সুহৃৎ মকরন্দের মূর্চ্ছাদর্শনে মূর্চ্ছিত আমাকে হস্তসঞ্চালন ও মকরন্দের চৈতন্যবার্তাদি দ্বারা প্রকৃতিস্থ করিয়াছে, সেইহেতু পূর্ণপাত্রবৃত্তি প্রদানা-নুসারে (অর্থাৎ মঙ্গলবার্তাজ্ঞাপক ব্যক্তি যেমন উৎসবকালে বলপূর্বক বস্ত্রালঙ্কারাদি গ্রহণ করিয়া থাকে, সেইরূপ বলপূর্বক) আমার অনুমতি ব্যতিরেকেই আমার হৃদয় ও জীবন গ্রহণ করিবার অধিকারিণী।

(ঞ) লব। আমার প্রিয়সখী মালতী আপনার এই অনুগ্রহ সর্বতো-ভাবে স্বীকার করিলেন।

मद। [स्वगतम्] जाणादि महाभाअधेओ जणो अवसरे गुरुअरमणिज्जं मन्तिदुम् (ट)।

माल। [स्वगतम्।] किं णाम मअरन्देण उब्वेअकारणं सुदं भविस्सदि? (ठ)।

माध। वयस्य! का पुनर्ममाधिकोद्वेगहेतुर्वार्त्ता? (१४)

[प्रविश्य पुरुषः।] वत्से मदयन्तिके! भ्राता ते ज्यायान् अमात्य-नन्दनः समादिशति, "अद्य परमेश्वरेण अस्मद्भवनमागत्य, भूयिष्ठो-

(ट) जानाति महाभागधेयो जनोऽवसरे गुरुतरमणीयं मन्त्रयितुम्।

(ठ) किं नाम मकरन्देन उद्वेगकारणं श्रुतं भविष्यति।

तत्र हृदयमोहितयोर्भावयोर्मध्ये नान्यत् किमपि माधवः प्रार्थनीयमिति भावः। गुरुजन-सन्निधौ स्वयमभिधाने मालत्या धृष्टता स्यादिति मालतीहृदयं लवङ्गिकयेदमभिहितमिति मन्तव्यम्।

(ट) मदेति। महाभागधेयः परमसौभाग्यशाली जनः, अवसरे उपयुक्तकाले, गुरुके-रमणीयं वाञ्छितार्थानुकूलत्वादतिमनोहरं, मन्त्रयितुं अभिधातुम्। तदत्र यथावसर-मुपयुक्तमिदमुक्तं माधवेन दत्तमिति भावः।

(ठ) कामेति। उद्वेगकारणमिति माधवस्येति शेषः।

(१४) माधेति। "कामिदवार्त्तानुपस्थुते"ति यन्मकरन्देनाभिहितं तां वार्त्तां माधवः पृच्छति—का पुनरिति।

(१५) प्रविश्येति। पुरुषः कश्चित् अमात्यलोकस्य भृत्य। ज्यायान् ज्येष्ठः। परमे-श्वरेण अप्रतिहतेच्छत्वात् परमैश्वर्ययुक्तेन महाराजेनेत्यर्थः। तदत्र तदवचनं कदापि नान्यथा

(ট) মদ। (স্বগত) পরম সৌভাগ্যশালী ব্যক্তিগণ উপযুক্ত অবসর বুঝিয়াই অতি রমণীয় কথা বলিতে জানেন।

(ঠ) মাল। (স্বগত) মকরন্দ (মাধবের) কি উদ্বেগের কারণ শুনিলেন?

(১৪) মাধ। বয়স্য! আমার অধিক উদ্বেগের হেতুজনক সংবাদটি কি? (যাহা শুনিয়া তুমি সত্বর আসিয়াছ?)

(১৫) কোন্ একটি পুরুষ। (প্রবেশ করিয়া) বৎসে! মদয়ন্তিকে,

दुपरि परं विश्वासमस्मासु च प्रसादमाविष्कुर्वता, स्वयमेव प्रति-
पादिता मालती, तदेहि सम्भावयामः प्रमोद"मिति । (१५)

मक । वयस्य ! सेयं वार्त्ता । (१६)

[मालतीमाधवौ वैवर्ण्यं नाटयतः । (१७)]

मद । [मालतीं सहर्षमालिङ्ग्य ।] सहि मालदि ! तुमं क्खु

यवितव्यमिति सूचितम् । भूरिवसो नाम्यथा पितरि पर निरतिशयं विश्वासं "भूरिवसुः कथमपि मदयन्तिकामुद्वाहयितुं न प्रभुरा"दिति विश्वासम् । कथमन्यथा स्वसा प्रतिपादनेऽपि निःसंशयः स्यादिति भावः । प्रसादं अनुग्रहम् । आविष्कुर्वता प्रकटयता । अत्र च विश्वासाविष्करणं भूरिवसोरधीनत्वाभिप्रायकथनादिप्रतिपादनेन, प्रसादाविष्करणञ्चैतदर्थं मन्दन-नियमनत्यादिनेति मन्तव्यम् । प्रतिपादिता दत्ता तस्मै प्रतिश्रुतेति यावत् । प्रमोदं आनन्दं सम्भावयामः माङ्गलिकक्रियाभिः सम्पादयामः । "प्रसाद"मिति पाठे प्रसादं तदनुग्रहं सम्भावयामः अनुमोदादिभिः बहु मन्यामहे इत्यर्थः ।

(१६) सेयमिति । यथं प्रविष्टपुरुषेण कथिता नन्दनाय मालतीप्रतिपादनरूपा वार्त्ता सा तवाधिकोद्वेगहेतुत्वेन मया कल्पितेत्यर्थः, इमामेवोपलक्ष्य त्वरितमहमागत इति भावः ।

(१७) मालतीति । वैवर्ण्यं अप्रतिविधेयोऽयंविपत्पातजनिततापहेतुकं मालिन्यादिरूपं विवर्णभावम् । तथाचोक्तं—"वैवर्ण्यं वर्णभेदः स्यात् भयप्रहर्षादिभि"रिति ।

তোমার জ্যেষ্ঠ ভ্রাতা নন্দনকে আদেশ করিয়াছেন, "অদ্য মহারাজ স্বয়ং আমাদের ভবনে আসিয়া ভূরিবসুর উপরে পরম বিশ্বাস ও আমার উপর অনুগ্রহ প্রকটন করতঃ মালতীপ্রদানে প্রতিশ্রুত হইয়াছেন, সুতরাং এস আমরা আনন্দানুষ্ঠান করি"।

(১৬) মক। বয়স্য! এই পুরুষ যাহা বলিল, সেই মালতীর নন্দনার্পণ-প্রতিশ্রুতিবার্তাই তোমার অধিক উদ্বেগের কারণ বলিয়া আমি মনে করিয়াছি।

(১৭) (মালতী ও মাধব সন্তাপজনিত বিবর্ণ ভাব প্রকটন করিতে লাগিল)।

एअणअरणिवासेण सहपंसुकीलणादो पहुदि मे पिअसही आसि बहिणिआ अ, सम्पदं उण णो घरस्स मण्डणं जादासि। (ङ)।

काम। वत्से मदयन्तिके! दिष्ट्या वर्द्धसे भ्रातुर्मालतीलाभेन। (१८)

मद। भअवदि! तुम्हाणं आसिसां पहावेण। सहि लवङ्गिए! फलिदा णो मणोरहा तुम्हाणं लाहेण। (च)

(ङ) सखि मालति। त्वं खलु एकनगरनिवासेन सहपांशुक्रीडनात् प्रभृति मे प्रियसखी आसीर्भगिनिका च, साम्प्रतं पुनर्नो गृहस्य मण्डनं जातासि।

(च) भगवति। युष्माकमाशीःप्रभावेण। सखि लवङ्गिके। फलिता नो मनोरथा युष्माकं लाभेन।

(ङ) मदेति। सह पांशुक्रीडनात् प्रभृति मिलिता भगिनीव चासि। नः अस्माकं गृहस्य मण्डनं भ्रातृजायाभावमाप्तत्वे शोभाजनकत्वात् भूषणम्।

(१८) कामेति। कोपकाकोक्तिरियम्।

(च) मदेति। प्रभावेण माहात्म्येन मालतीलाभो जात इति शेषः। अत्र सिद्धोक्तिर्नाम नाट्यलक्षणम्। यदुक्तं दर्पणे—

"स्यात् प्रमाणयितुं पूज्य सिद्धोक्तिर्वचनमात्मक"मिति।

तथा "नो" इत्यस्य अस्माकमित्यत्र निर्दिष्टार्थकत्वेऽपि अन्वयेन आनन्दकरत्वविवक्षया युष्माकं लाभेन मनोरथा नो फलिताः अथवा न जाता इति भविष्यत्पताकास्थानस्यापि सूचनात् पताकास्थानमिदम्। यदुक्तं दर्पणे—

"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं पर"मिति॥

(ঙ) মদ (সহর্ষে মালতীকে আলিঙ্গন করিয়া) সখি মালতি! এক নগরে বসতিনিবন্ধন একত্রিত হইয়া ধূলিখেলা হইতে আরম্ভ করিয়াই তুমি আমার প্রিয়সখী ভগিনী ছিলে, এখন আবার আমাদের গৃহের অলঙ্কারস্বরূপ হইলে।

(১৮) কাম। বৎসে মদয়ন্তিকে! ভাগ্যক্রমেই তোমরা মালতীলাভে বৃদ্ধি লাভ করিলে।

(চ) মদ। ভগবতি! আপনাদের আশীর্বাদপ্রভাবেই (এই মালতী লাভ ঘটিল)। লবঙ্গিকে! তোমাদের লাভে আমার মনের অভিলাষ সফল হইল।

लव । सहि ! किं अह्माणम्मि अत्थि मन्तिदव्वं (ण) ।

मद । सहि बुद्धरक्खिदे ! दाणिं विवाहमहूसवं सम्भाविह्म । (त)

बुद । सहि ! एहि गच्छह्म । (थ) [इत्युत्तिष्ठतः ।] (१८)

लव । [जनान्तिकम्] । भअवदि ! जहा एदे ह्निअअभरिदुव्वित्त-विब्भमाणन्द-सुन्दरा-दोलिद-धीरत्तण-मणोहरा, पहुत्यन्ति मदअन्ति-

---

(ण) सखि ! किमस्माकमप्यस्ति मन्त्रयितव्यम् ।

(त) सखि बुद्धरक्षिते ! इदानीं विवाहमहोत्सवं सम्भावयामः ।

(थ) सखि ! एहि गच्छावः ।

"युष्माक"मिति बहुवचनन्तु माधवमीलनाय तत्परिजनसाधारण्यसम्भावनादुपात्तमिति मन्तव्यम् ।

(ण) लवेति । अस्माकमपि मन्त्रयितव्यं अस्मिन् विषये वक्तव्यं किमस्ति न किमपीत्यर्थः । युष्माभिरेवास्मादस्माकमपि मनोरथसिद्धिर्जातेति भावः । इयमपि परिहासोक्तिः । अत्र च "अस्माकमप्यस्ति मन्त्रयितव्य"मित्यर्थकमपि पाठान्तरम्, तथात्वे च तत्—"वाञ्छिता मे मनोरथा युष्माकं लाभेने"ति वाक्यं अस्माकमपि-वक्तव्यमित्यर्थः । परन्तु युष्माकं सपरिजनाया भवत्या लाभेन भाविना मकरन्दप्राप्तिरूपेण अस्माकं मनोरथाः सफलाः भवितार इत्येतदस्माकं मन्त्रयितव्यमित्यर्थोऽपि बोध्यत इति बोध्यम् ।

(त) मदेति । विवाहमहोत्सवं मालतीमाधवयोर्विवाहस्य प्रमोदं, सम्भावयामः यथोचितानुष्ठानेन सम्पादयामः । अत्र "लवली" नाम नाट्यालङ्कारः । यथोक्तं दर्पणे—"कार्य्यस्यारम्भ लवम्" इति ।

(१८) उत्तिष्ठत इति मदयन्तिकाबुद्धरक्षिते इति शेषः ।

(द) लवेति । हृदये चित्ते भरिताभ्यां व्याप्ताभ्यां पूर्णाभ्यां पश्चात् उद्वृत्ताभ्यां हृदये व्याप्ता-

---

(ণ) লব। সখি! এবিষয়ে আমাদেরই আর কি বক্তব্য আছে?

(ত) মদ। সখি! বুদ্ধরক্ষিতে! এখন যথোচিত অনুষ্ঠানে বিবাহমহোৎসব সম্পন্ন করিব।

(থ) বুদ্ধ। সখি! এস আমরা যাই। ১৮ (মদয়ন্তিকা ও বুদ্ধরক্ষিতা উঠিল)।

मामभरन्दाणं दरदलिदणीलुप्पलदामसरिच्छा बहुलविक्खेमा तह तक्केमि संघोरहणिम्बुत्तसम्बन्धा एदेत्ति । (८)

काम । [विहस्य ।] ननु इमौ विलोकनेन, मानसं मुहुर्मुहुः प्रमोदमनुभवतः । (२०) तथाहि—

---

(८) मदयन्ति । ययेने मदयन्तिकामकरन्दयोर्दरदलितनीलोत्पलदामसदृशा बहुलविक्षेपा: अन्योन्यं मनोहरा: कटाक्षविक्षेपा: तथा तर्कयामि सङ्घोरह-निर्वृत्तसम्बन्धावेताविति ।

मामकरन्दयो: एतयो: मदयन्तिकामकरन्दयो: मुग्धं यथा स्यात्तथा आमीलिता: सम्मीलिता: तथा नीरजत्वे च नानाराग्योपगतमनवलम्बितविक्षेपेषु मनोहरा: सुन्दरा: । परस्पर विविधबलविवलया समयो: कर्मधारय: । तथा दरविदलितानां ईषद्विकसितानां नीलोत्पलानां वद्दाम माला तत्तुल्या: एते मदयन्तिकामकरन्दयो: कटाक्षविक्षेपा: इति भेद: यथा येन प्रकारेण परस्परं प्रति निपतन्ति, तथा तेन प्रकारेण तर्कयामि अनुमिनोमि सर्वोत्कर्षेण निर्वृत्त: सम्पन्न: सम्बन्ध: परस्परसमागमरूपसम्बन्धो ययोस्तादृशौ एतौ मदयन्तिकामकरन्दौ इति ।

(२०) कामेति । नन्विति प्रश्नविकल्पने । इमौ मदयन्तिकामकरन्दौ, मानसं मनोऽर्थं स्वान्तर्निहितसम्भोगाभिलाषम् मुहुर्मुहुर्भावं विलोकनेन परस्परसन्दर्शनेन अनुभवत इत्यन्वय: । "मानस मोहम" इति पाठे तु, मोहनं सुरतं, तदुक्तं कामशास्त्रे—"मोहनं सुरतं सांप्रयोगिकं च मिथ्या" इति । मानसं प्रमोदमनुभवत इति मदुक्तं हेतुमवगन्तुं प्रष्टुमिच्छन्नाह—तथाहीति ।

---

(৮) মদ। (সবিস্ময়ে) হৃদয়ে পূর্ণ হইয়া হানাভাবে বহির্ভূত বিষয় এবং আনন্দবশতঃ মুগ্ধভাবে সঙ্কোচিত ও নীরজ্বাবশতঃ মনোহর ঈষদ্বি-কসিতনীলোৎপলমালার সদৃশ এই মদয়ন্তিকা ও মকরন্দের কটাক্ষবিক্ষেপ যেরূপ ভাবে প্রবর্তিত হইতেছে,তাহাতে মনে হয়,মনে মনে ইহাদের পরস্পর সম্বন্ধ সম্পন্ন হইয়াছে।

(২০) কাম। (হাস্য করিয়া) অয়ি দেবিতেছ! বার বার পরস্পরা-বলোকনদ্বারা ইহারা অন্তঃকরণে সম্ভোগের আনন্দ অনুভব করিতেছে। দেখ—

ईषत्तिर्यग्वलनविषमं कूणितप्रान्तमेतत्
प्रेमोद्भेदस्तिमितललितं किञ्चिदाकुञ्चितभ्रु ।
स्वल्पमोदानुभवमसृणं स्रस्तनिष्कम्पपक्ष्म
व्यक्तं शंसत्यचिरमनयोर्दृष्टमाकेकराक्षम् ॥ * (२१)

---

(२१) ईषदिति। ईषत्तिर्यग्वलनेन किञ्चिद्वहिर्गमीदयनेन विषमं वक्रं प्रान्ते अपाङ्गदेशे कूणितमिति कूणितप्रान्तं अपाङ्गदेशे मानसयेव सङ्कुचितमित्यर्थः, राजदन्तादित्वात् परनिपातः। तथा प्रेम्ण अनुरागस्य उद्भेदेन प्रकाशेन क्वचित् स्तिमितं निष्पन्दं क्वचित् ललितं पुनर्विकसनशीलं परस्य विशेषणविवक्षया उभयोः कर्मधारयः। किञ्चिदाकुञ्चिता ईषद्वक्रतां गते भ्रुवौ यत्र तत् किञ्चिदाकुञ्चितभ्रु। स्वल्पमोदस्य मानसिकानन्दस्यानुभवेन मसृणं अनुरागरञ्जितं, तथा स्रस्तानि अवनतानि निष्कम्पानि निश्चलानि पक्ष्माणि नेत्रलोमानि यत्र तत्तादृशं एतत् प्रत्यक्षोपलभ्यमानं अनयोः मालविकाग्निमित्रयोः आकेकराक्षं अर्धमीलितनेत्रं दृष्टं परस्परावलोकनं (कर्तृ) व्यक्तं स्पष्टं यथा तथा अचिरं अचिरजातं शंसति मानसिकप्रमोदानुभवं ज्ञापयतीत्यर्थः।

अत्र च इदस्य पूर्वोक्तैकविशेषणेन वक्रादिदर्शनविशेषा दर्शितास्तेषां लक्षणानि यथा—

"वलितो वाक्रमचारी यत्र तद्वक्रमुच्यते।"
"मानसस्य सङ्कोचो विकासस्तत्परस्य च।
यस्यादृष्टेर्भवेच्च तद्धि कूणितमुच्यते॥"
"निष्पन्दं तदहमाव दृष्टावस्पन्दते क्वचित्।"
"प्रेमार्द्रमर्धविकसत्तारं ललितमुच्यते॥"

---

(২১) কিঞ্চিৎ বক্রভাবে উর্দ্ধসঞ্চালন হেতু বক্র অপাঙ্গদেশের ভাগত্রয়ে সঙ্কুচিত এবং অনুরাগের উদ্ভেদবশতঃ কচিৎ নিশ্চল, কচিৎ ললিত ও ঈষদ্বক্র সিত ভ্রূ মানসিকানন্দানুভববশতঃ অনুরাগরঞ্জিত, পরন্তু যাহাতে চক্ষুর পক্ষগুলি অবনত ও নিশ্চল তাদৃশ আকেকরাক্ষ এই উভয়ের পরস্পরসন্দর্শন স্পষ্টভাবেই অচিরজাত মানসিকানন্দ উপভোগ ব্যক্ত করিতেছে।

---

* "ईषत्तिर्यग्वलितविषमं कूणितप्रान्तमेतत्। प्रेमोद्भेदस्तिमितलुलितं किञ्चिदाविचितभ्रु। स्वल्पामोदानुभवमसृणं सान्द्रनिष्कम्पपक्ष्म।" क्वचित् पुस्तके पूर्वपादत्रये एतादृशः पाठभेदो दृश्यते।

पुरुषः । वत्से ! मदयन्तिके ! इतः इतः । (२२)

मद । सहि बुद्धरक्खिदे ! अवि णाम पुणो वि दक्ख दीसद एस जीविदप्पदो पुण्डरीअलोअणो ? (ध) ।

बुद्ध । जइ देव्वमणुकूलं भविस्सदित्ति । (न)

[पुरुषेण निष्क्रान्ते ।] (२३)

माध । [अपवार्य्य ।]

(ध) सखि बुद्धरक्षिते ! अपि नाम पुनरपि द्रक्ष्यत एष जीवितप्रदः पुण्डरीकलोचनः ।

(न) यदि देवमनुकूलं भविष्यति ।

"एकान्ता एव कम्पेरो भ्रुव प्रस्रवणस्थने ।"

मस्तव तनु विद्धे समकुरागकवाश्रितं ।"

"आकुञ्चितपुटा याऽस्रतार्धनिमीलिता ।

दृष्ट्वीवर्णतारा च दृष्टिरार्द्रकरा मता ॥"

अत्रान्यव्याख्यातिलेहवदर्शनरूपसाधनेन मनःकल्पितनवीनसखितानन्दानुभवज्ञानादनुमाना-लङ्कारः। अस्त भवति कथयति वेति प्रतीकमनोऽर्थं वेति केचित्। मदतीयस्य कर्म्म पदानुपन्यासात् न्यूनपदत्वदोषः। मन्दाक्रान्ता वृत्तम्।

(२२) पुरुष इति। इत इत इति आगम्यतामिति शेषः।

(ध) सखीति। अपि नामेति सम्भावनायाम्। पुनरपीति चौर्य्यसङ्कटातिक्रमणोत्तरमर्थम्। जीवितप्रदः शार्दूलनिधनेन जीवनदाता। एषः मकरन्दः, नामायकः भावि पतित्वसम्भावनया।

(न) यदीति। अनुकूले साहाय्यकारि, भविष्यतीति तदा पुनर्द्रक्ष्यत इति शेषः। इति शब्दो मदयन्तिकाबुद्धरक्षितयोस्तात्कालिकालापसमाप्तिद्योतकः।

(२३) पुरुषेण इति सहार्थे तृतीया। निष्क्रान्ते मदयन्तिकाबुद्धरक्षिते इति शेषः।

---

(২২) পুরুষ। বৎসে! মদয়ন্তিকে! এদিকে এদিকে।

(ধ) মদ। সখি বুদ্ধরক্ষিতে! পুণ্ডরীকলোচন জীবনদাতা এই মহাপুরুষকে পুনরায়ও কি দেখিতে পাইব?

(ন) বুদ্ধ। যদি দৈব অনুকূল [illegible] (তবে দেখিতে পাইবে।)

(২৩) (পুরুষের সহিত মদয়ন্তিকা ও বুদ্ধরক্ষিত নিষ্ক্রান্ত হইল)।

चिरादायातनु स्फुटतु बिसिनीसूत्रभिदुरो,
महानाधिव्याधिर्निरवधिरिदानीं प्रसरतु।
प्रतिष्ठामव्याजं व्रजतु मयि पारिप्लवधुरा,
विधिः स्वास्थ्यं धत्तां, भवतु कृतकृत्यश्च मदनः॥ (२४)

अथवा—समानय्य मायं जनमसुलभं प्रार्थितवतो,
विधौ वामारम्भे मम समुचितैवा परिणतिः।

---

(२४) अथ मालत्यामन्दनापर्थनिश्चयमभिमतवान् माधवो नैराश्यजनितदुःखं समस्तरपक्षोद्य-मवलम्ब्य आह—चिरादिति। चिरात् बहुकालादनुबन्ध बन्धः, बिसिनीसूत्रवत् मृणालतन्तुवत् भिदुरः (भिदिः कुर.) स्वयमेवभिद्यमानः आयातनु, मालतीप्राप्तिसम्भावनारूप सूत्रं स्फुटतु इदानीं छिन्नो भवतु; मालतीलाभसम्भावनात्र्या(?)ति चेतु सर्वथैव योऽयं। तथा इदानीं महान् विपुलः आधिरेव मालतीलाभाभावविनननिमित्तका मानसी व्यथैव व्याधिः रोगः निरवधिः सीमारहितः यावज्जीवनस्थायीति यावत् प्रसरतु विजृम्भताम्। पारिप्लवधुरा (धुरमधवकेति दाक्षादित्वादत्) अरतिरूपचित्तचापल्यभारः अव्याज निष्कपटं यथातथं यथा स्यात्तथा प्रतिष्ठां स्थितिं प्रमहदवजताम्। तथा विधि मदीयदुःखविधायकं दैवं स्वास्थ्यं निवृत्तिं विरामनिर्ध्यः, धत्तां अवलम्बताम्; निरवधि दुःखार्पणरूपतदीयकर्तव्यस्य सम्पादितत्वादिति भावः। मदनश्च कन्दर्पश्च कृतकृत्यः निवर्तितकार्यः भवतु; चित्तविविरहदहनरूपतत्कार्यस्यापि सम्पादितत्वादिति भावः।

चिरादायातनुरिति आधिव्याधिरिति च विरुद्धं वचनं, बिसिनीसूत्रभिदुर इति लुप्तोपमा,-तथा मदीयाधिदुःखदुःखप्रतिपादनरूपैककार्यं प्रति बहूनामन्वयाभिधानात् समुच्चयश्चालङ्कारः। शिखरिणीवृत्तम्॥

(२५) निजात्मपरितोषायमन्यां स्वयमेवाक्षिप्य समाश्वासयन्नाह—अथवा समानीयेति।

---

(২৪) মাধ। (গোপনে) মৃণালতন্তুর ন্যায় স্বয়ং ছিদ্যমান বহুকাল যাবৎ পরিপোষিত মালতীলাভের আশারূপসূত্র এখন ছিন্ন হউক। মালতীলাভ-প্রত্যাশার ছেদনজনিত মনোব্যথারূপ বিশাল রোগ এখন যাবজ্জীবনের জন্য বিস্তৃত হউক। অরতিরূপচিত্ত চাঞ্চল্যভার অপ্রতিহতভাবে আমাতে স্থিতি-লাভ করুক। আমার দুঃখবিধানকর্তা বিধাতা এখন স্বাস্থ্যলাভ করুন, এবং কামদেবও এখন কৃতকার্য্য হউন।

(২৫) তুলাপ্যস্বরাম দুর্লভ জনকে প্রার্থনা করিলে ও বিধি প্রতিকূলাচারী

तथाप्यस्मिन् दानश्रवणसमयेऽस्याः प्रविगल-
दभ्रं प्रातश्चन्द्रद्युति वदनमन्तर्दहति माम् ॥ (२५)

काम। [स्वगतम्।] एवमतिदुर्मनायमानः पीड़यति मां वत्सो माधवो, वत्सा मालती च। दुष्करं निराशा प्राणितीति। [प्रकाशम्।] वत्स! पृच्छामि तावदायुष्मन्तं, अपि भवान् मन्यते यथा भूरिवसुरेव मालतीमस्मभ्यं दास्यति?। (२६)

समानमेवार्थं तुल्यानुराग वस्तुतः विवाहयोगत्वेन दुष्प्राप मम मालतीमित्यर्थः, प्रार्थितवतः मनसा वाञ्छितवतो मम विधौ दैवे वामात्मनि प्रतिकूलोद्योगी भवति एवा अस्मदीप्सितमायाः परिणतिः यथाविध्योगः मालतीलाभस्वरूपेण परलविवाहलक्षण इति यावत्, सदृशितैव युक्तैव। विधौ हि प्रतिकूले सुलभमपि न लभ्यते का कथा दुर्लभस्येति भावः। ईदृशावस्थापन्नेऽपि पुनःसमधिकपरितापकारणं दर्शयति—तथापीति। तथाप्येवं शीलपरमविवाहलाभस्य कथञ्चित् सम्भावितत्वेऽपीत्यर्थः, अस्मिन् दानश्रवणसमये "नन्दनाय राजा मालतीं दत्ते" तदर्थकवाक्याकर्णनकाले प्रविगलती दुर्विषहविषादव्याप्ततया [illegible] अस्याः मालत्याः अत एव प्रातश्चन्द्रद्युति [illegible] अस्याः मालत्याः वदनं (कर्तृ) मां अन्तर्दहति सन्तापयति। नन्दनार्पणवार्ताश्रवणकाले एवास्या ईदृशी दशा जातेति अतो पुनस्तदर्पणे किमस्या भविष्यतीत्येव मे सम्प्रति नितरां परितापहेतुर्न स्वकीयस्वार्थविपर्यास इति भावः।

अभीष्टापरिणतिं प्रति अनुकूलस्य विधेः प्रतिकूलत्वस्य च हेतुतया पदार्थहेतुकं काव्यलिङ्गं, एकमनन्यगोचरकार्ये माधवस्य मालतीगतत्वेन च कार्थबाधकयोर्निबद्धत्वात्‌ समुच्चयः, प्रातश्चन्द्रद्युतीति लुप्तोपमा चालङ्कार, एतेषामङ्गाङ्गि-भावेन सङ्करः। शिखरिणीवृत्तम्।

(२६) कामेति। एवं अनेन नन्दनार्पणवृत्तान्तेन अतिदुर्मनायमानः अतिदुर्मनस्कः,मालती च अतिदुर्मनायमानेत्यर्थः। मां पीड़यति सन्तापयति। तथाच मालतीमाधवयोर्दुर्मनायमानत्वेन

হইলে তাহার পক্ষে ঈদৃশ বিবাহলাভরূপ পরিণাম যুক্তই। কিন্তু তথাপি এই নন্দনার্পণবার্ত্তাশ্রবণমাত্রেই তৎক্ষণাৎ ক্ষীণপ্রভ প্রাতঃকালীন শশধরের তুল্য-কান্তি এই মালতীর বদন আমাকে অন্তর্দগ্ধ করিতেছে।

(২৬) কাম। (স্বগত) এই নন্দনার্পণবৃত্তান্তে নিতান্ত দুর্ম্মনায়মান বৎস মাধব ও বৎসা মালতী আমাকে সন্তপ্ত করিতেছে। নিরাশ ব্যক্তিদিগের জীবন

माध। [सलज्जम्।] नहि नहि। (२७)

काम। न तर्हि प्रागवस्थायाः परिहीयसे ? (२८)

पीडनं प्रति हेत्वन्तरमुपन्यस्यति—दुष्करमिति। निर्न विद्यते आशा यस्याः सा निराशा जननेति शेष, तथाच निराशो जनसमूहः प्राणिति जीवतीति यत्तद् दुष्करमित्यर्थः, दुष्करमिति प्राणिति क्रियाविशेषणं वा, आशाभङ्गे जनस्य जीवनधारणं मरणापेक्षयापि क्लेशावहमिति भावः। एवञ्च मालतीमाधवयोरपि चिरपोषिताशा, सम्प्रत्यनाशाया नन्दनार्थप्रतिश्रुतिश्रवणात्तेन विनाशाज्जीवनधारणमशक्यमेव भवेदित्यपि मां पीडयतीति स्थितम्। सम्प्रति आश्वासप्रदानाय प्रकारां भूमिकामारचयति—वत्सेति। "भूरिवसु"रेव अत्रास्य मह्यं (वत्सदेयेति बहुवचनम्)। मालती दास्यति इति अपि किं भवान् अमत्र मनसा निर्धारितवान्" ? इति आयुष्मन् दीर्घजीविन् भवन्नित्यर्थः पृच्छामीत्यन्वयः। तथा निर्धारण एव त्वां परिहायाम्यहं मालतीदाने भूरिवसुनाऽङ्गीकृतेऽपि भवतः परितापो युज्यते नान्यथा, तुच्छ मालतीप्रदानस्याप्रदानविषयकमाध्यस्थ्य निर्धारिते तन्मन्त्रणायाः अणुमात्रापि विद्यमानत्वादिति भावः। अत्रायुष्मन्नित्यनेन "नहि जीवता त्वया जीवनसन्देहो न कर्त्तव्य" इति सूचितम्।

(२७) माधेति। "स्वकीयचित्तचाञ्चल्यादेव भवान् मालत्यामनुरक्तो, न तु मालतीप्रदानार्थं भूरिवसुनाऽऽहूतोऽत्र समागत इति कामन्दकीवचनाभिप्रायावगतिरेवात्र सलज्जत्वे हेतुः। नहि नहि—"भूरिवसुरेव मह्यं मालतीं दास्यती"ति नैवाहं मनसा निर्धारितवानित्यर्थः। तेन मदीयनामधेयश्रवणमपरिज्ञानादिति भाव। पुनरुक्तं प्रबलेन मालतीप्राप्तिसम्भावनाऽनौचित्यार्थोऽप्यर्थेन व्यज्यते।

(२८) कामेति। तर्हि भूरिवसुकर्त्तृकमालतीदानस्य प्रत्याशाराहित्यायां प्रागवस्थायाः पूर्व्वावस्थातः न परिहीयसे न कथमपि विच्युतो वर्त्तसे। पूर्वेत इदानीं न किञ्चिदपि वैलक्षण्यं जातमित्यर्थः। यथाहि पूर्वमपि भूरिवसुर्मालतीं दास्यतीति प्रत्याशा नासीत, इदानीमपि नास्ति; युवयोः परस्परानुरागोऽपि यथापूर्वं वर्त्तते, अत्राहं प्रश्नेऽपि पूर्ववदेव विद्यते, तस्मादधुनापि कस्यचिदभिनवोऽभ्युपायस्यानुसन्धानाभावाद्भ्युपायः परित्यागः कर्त्तव्य इति भावः।

ধারণ করা অতীব দুষ্কর। (প্রকাশ্যে) বৎস মাধব! দীর্ঘায়ু তোমাকে জিজ্ঞাসা করি,তুমি কি মনে ভাবিয়া ছিলা যে,"ভূরিবসুই আমাকে মালতী প্রদান করিবে"।

(২৭) মাধ। (লজ্জিত ভাবে) ভূরিবসুই যে আমাকে মালতী প্রদান করিবেন, ইহা আমি কখনও ভাবি নাই।

(২৮) কাম। ভূরিবসু কর্ত্তৃক মালতীপ্রদানের আশা না করিয়া থাকিলে এযাবৎ পূর্ব্বাবস্থা হইতে কিছুই বিচ্যুত হও নাই।

मक। भगवति! दत्तपूर्वेत्याशङ्कते। (२९)

काम। जानामि तां खलु वार्त्तां इदन्तु प्रसिद्धमेव, यथा *नन्दनाय मालतीं प्रार्थयमानं भूरिवसुः प्रतिमुक्तवान्,* "प्रभवति निजस्य कन्यकाजनस्य महाराज" इति। (३०)

मक। अस्त्येतत्। (३१)

---

(२९) दत्तेति। पूर्वं दत्ता दत्तपूर्वा (सुप्सुपेति समासः) भूरिवसुना महाराजाय मालती समर्पिता, यथेच्छितवराय मालतीसमर्पणाधिकारो महाराजाय दत्त इत्यर्थः, इति शेषः। आशङ्कते महाराजेन नन्दनाय मालतीवार्त्तां श्रुत्वा मन्त्रिणि, आर्येति शेषः। [illegible] पूर्वं कस्मैचिदपि मालत्या अदानेऽपि भूरिवसुना मालतीप्रदानाधिकारस्यापि [illegible] [illegible], इदानीन्तु [illegible] महाराजेन नन्दनाय मालती देयेति [illegible] [illegible] [illegible] पूर्वाभ्यासात् [illegible] [illegible]।

(३०) जानामीति। तां वार्त्तां पूर्वोक्तां [illegible] जानामि [illegible], यदि [illegible] [illegible]। तथापि मालत्या परिणयार्थं [illegible] भूरिवसुः प्रत्यवदत्— इदन्त्विति, प्रसिद्धमेव सर्वजनविदितमेव। प्रभवतीत्यादि [illegible] [illegible] कर्त्तुं [illegible]।

(३१) अस्तीति। एतत् सर्वजनविदितं अस्ति, ममाप्येतत् स्वीकार्यमित्यर्थः, तेन प्रकृते [illegible] [illegible]।

---

(২৯) মক। ভগবতি! ভূরিবসু পূর্ব্বেই মহারাজকে যথেচ্ছ পাত্রে মালতী-প্রদানের অধিকার দিয়াছেন, এই জন্যই "মহারাজ নন্দনে মালতী সমর্পণ করিতে প্রতিশ্রুত হইয়াছেন" শুনিয়া নগর মধ্যে আশঙ্কা করিতেছেন।

(৩০) কাম। আমি সেই বৃত্তান্ত জানি, ইহাও সকলেই জানে যে, নন্দনকে মালতী দেওয়ার অনুরোধ করিলে মহারাজকে ভূরিবসু ইহা বলিয়াছিলেন, "মহারাজই স্বীয় নিজকন্যাজনেরপ্রভু"।

(৩১) মক। ইহা যে সর্ব্বজনবিদিত তাহা আমিও স্বীকার করি।

काम । यच्च च स्वयं राज्ञैव दत्ता मालतीति पुरुषेणावेदितं, तदस्तु । यदि प्रतिष्ठानिबन्धनानि देहिनां व्यवहारतन्त्राणि, वाचि पुण्यापुण्यहेतवो व्यवस्थिताः, सर्वञ्च वचनानामायत्तं, सा च भूरिवसोर्यागनूनामितिकैव, न खलु महाराजस्य मालती निजा कन्यका, कन्याप्रदाने च नृपतयः प्रमाणमिति नैवंविधो धर्माचारसमयः,

---

(७२) काममिति । राज्ञैव न तु प्रकृताधिकारिणा भूरिवसुनेति भावः । सम्प्रत्येव इदानीमेव एवकारेण कालविलम्बव्यवच्छेदात् भूरिवसुना न दत्तैव स्थितं, भूरिवसुना नन्दनादेर्वाङ्गीकारे कृत एवं विलम्बकारणमसीदित्याशयः । ननु भवतीत्यादिवाक्येन पूर्वमेव भूरिवसुना राज्ञे दानाधिकारस्यार्पणात् राज्ञाङ्गीकारेणैव तदङ्गीकारोऽपि सिद्ध एवेत्याशङ्कय-नयनाय तत्रापत्य कन्याप्रदानं निर्णेतु भूमिकामवतारयति—तदस्त्विति । देहिनां प्राणिनां व्यवहारतन्त्राणि व्यवहारपदानि तन्त्राणि कुटुम्बतन्त्राणि "तन्त्रं कुटुम्बकृत्ये स्यादि"ति इत्यमरः । यदि प्रतिष्ठा निबन्धनानि वचनस्थितिहेतुकानि वचनानामिप्रायानुरूपाणीति यावत्, न तु केवल वाक्यानुरूपाणीत्यर्थः । ननु वचनाभिप्रायानुसारीण्येव वाक्यानि किं-मस्तीति कृतो वाक्यानुरूपत्वव्यभिचार इत्याशङ्कायां सत्यवाक्यस्य तथात्वेऽपि कपटवाक्यस्य न तथात्वमिति व्यवस्थापयितुं सत्यमिथ्याभेदेन वाक्यस्य द्वैविध्यं वक्तुं प्रतिपादयति —वाचीति । पुण्यापुण्ययोः धर्माधर्मयोः हेतवः प्रयोजकानि सत्यत्वमिथ्यात्वरूपाणीत्यर्थः, वाचि वाक्ये व्यवस्थिताः "सत्यं ब्रूयात्प्रियं ब्रूयात्"मिति विधिनिषेधाभ्यां स्थिरीभूताः । चकारार्थं स्पष्टयति—सर्वञ्चेति । सत्यप्रकटनं मिथ्याप्रकटनञ्च सर्वमित्यर्थः, वचनायत्तं वाक्याधीनं सत्यं मिथ्या च सर्वमेव वाक्यैः प्रतिपादयितुं शक्यत इति भावः । नन्वेतावतापि प्रकृते किमायातं तत्राह—सा चेति । तथापीति चकारार्थः, एकवचनान्त्या वाक्यस्य द्वैविध्ये सतीत्यर्थः, सा— "प्रभवति निजस्य"इत्यादिका भूरिवसोर्वाक् वचनाभिप्रायेण छिन्नपदघटितत्वे कथनानन्दा यथार्थ-प्रतीयमानत्वेऽपि परमार्थतो मिथ्याभूतैव । तथाच नाभिप्रायानुरूपेति भावः । मिथ्याभूतत्वमेव दर्शयति—न खल्विति । तथाच मालत्या महाराजस्य निजकन्यात्वाभावेऽपि तत्प्रतिपादकत्वं गाढ-विश्वासितथा तद्वचनं मिथ्याभूतमेवेत्यर्थः । एवञ्च तदाभ्यपतिपादितं प्रतिनिधित्वमप्यलीकमिति भावः । नन्वेतावता भूरिवसोर्मिथ्यावादित्वं नाशङ्क्यं यतः सत्यमेव राजोऽन्यथा बोधयितुं प्रयुक्तत्वेन वस्तुतया तद्वाक्यस्य मिथ्यात्वेऽपि "निजस्य अपत्यस्य कन्यकाजनस्य महाराजः

---

(৭২) কাম। স্বয়ং মহারাজই মালতীদানে প্রতিশ্রুত হইয়াছেন, ইহা সম্প্রতিই নন্দনের দূতী বলিয়া গেল। সুতরাং বৎস! অভিপ্রায়ানুসারেই লোকের ব্যবহারিক কার্য্য হইয়া থাকে। (কেবল বাক্যানুসারে নহে) বাক্যেতে পুণ্য ও

तस्मादिमर्शितव्यमेतत्। कथञ्च, वत्स! माम् अनवधानां मन्यसे। पश्य। (३२) मा वा भवत्स्वपि नाम तद्भूत् पापं यदस्यां तु मया विमृष्टम्। तत्सर्वथा सङ्गमनाय यत्नः प्राणव्ययेनापि मया विधेयः॥ (३३)

प्रभवतीति न तु मम कन्यकाप्रनयने"त्येतावद्भावार्थान्तराभिव्यक्त्यानेनापि वेनाभिहितत्वात्। न चैतादृश-चातुर्य्यपूर्वाभिधानमपि दूषणीयमिति वचनीयम्। "अश्वत्थामा हत"इत्यभिहितवता धर्म्मावतार-युधिष्ठिरेणाप्यनृता ताहशाभिधानस्याङ्गीकृतत्वे न राजानुमन्यधी-नामात्याद्यभिज्ञतामीतादृशव्यवी ताहशाभिधानस्य प्राय' स्वभावसिद्धत्वादिति मन्तव्यम्।

ननु तद्वाक्यप्रतिपादितप्रतिनिधित्वस्यानीकत्वे ऽपि राज्ञ' सर्वस्वामित्वादेवास्यदीयकन्याप्रदानेऽपि स्तत एव तस्याप्यधिकार इत्याग्रहात् निराकर्त्तुमाह—कन्याप्रदाने चेति। नृपतय' राज्ञः प्रभाव निरत्तार स्वतन्त्रकर्त्तार इति यावत्, इत्येवविध' एतत्प्रकारः धर्म्माचारव्यवहारः धर्म्मशास्त्रशिष्टाचारयो' सिद्धान्त / "अन्यथा अधर्म्माचार अनभिज्ञान्तर्भिद"इति विश्व:) न नासीत्यर्थः। वाक्यार्थमुपसंहरति—तस्मादिति। इर्शितयुक्त्यादिभि' राज्ञ: प्रदानस्य लोकशास्त्र-विरुद्धत्वादित्यर्थः, एतत् राज्ञ, प्रदानप्रतिश्रुत्यादिकं विमर्शितव्य' विशेषतो विवेचनीयं युष्माभि-रिति शेष। तथाच राज्ञ प्रदानवार्त्तामात्रेणैवात्मा न व्यथिष्यति भाव:।

नन्वेतावतापि नन्दनाय समर्पणे राज्ञो व्यावृत्तिमयात् माधवाय समर्पणे कस्यापि चेष्टा विरहात् माधवस्य कथं तत्प्राप्तिसम्भावनाप्रत्ययमाह—कथञ्चेति। कथं केन हेतुना अनवधानां मालतीमाधवयो, समागमविषये उदासीना मन्यसे चिन्तयसि? तथाच मदीयचेष्टयैव मालती-माधवयो, संघटनं भविष्यतीति नाविश्व' ग्रहणीयमिति भाव.। विधावस्थापनाय कारणान्तर-माह—पश्येति। जानीहीत्यर्थः। अन-मुख्यतर्कोऽन्यत्र शाब्दप्रत्यक्षम्। तथाच दर्पणे—"तुल्यतर्कौ यदर्थेन तर्कं प्रहतगामिना" इति।

(३३) साधिति। न भो! अस्या मालत्या यत् पाप विवाहानिर्वाहे मरणरूपं प्रदर्शितं

পাপের হেতু সত্যে ও মিথ্যায় ব্যবস্থিত আছে। সত্য ও মিথ্যা প্রকটন সমস্তই বাক্যের অধীন। সুতরাং ভূরিবসুর সেই বাক্য সর্ব্বৈব মিথ্যা। মালতী কিছু মহারাজের নিজকন্যা নহে, রাজা যে কন্যা প্রদানের কর্ত্তা এরূপও ধর্ম্মশাস্ত্রের বা শিষ্টাচারের সিদ্ধান্ত নাই, সুতরাং রাজার এইরূপ প্রদানাঙ্গীকার যে যুক্তিযুক্ত কি না, ইহা তোমাদের বিশেষ বিবেচনীয়। বৎস! আমাকেই বা এবিষয়ে উদাসীন মনে করিতেছ কেন? দেখ—

(৩৩) তোমার সহিত বিবাহনির্ব্বাহ না হইলে মালতীর যে ‘অনিষ্টের’ আশঙ্কা

मक। सुष्ठु युज्यमानमादिश्यते युष्माभिः। अपिच—(३४)

दया वा, स्नेहो वा, भगवति! निजेऽस्मिन् शिशुजने
भवत्याः संसाराद्विरतमपि चित्तं द्रवयति।
अतश्च प्रव्रज्यासमयसुलभाचारविमुखः,
प्रसक्तास्ते यत्नः प्रभवति पुनर्दैवमपरम्॥ (३६)

मया विमृश्य "प्रेम पश्यति भयान्यपदेऽपी"ति नीत्या आशङ्कनीयं तदनिष्टं स्वप्नेऽपि शत्रुष्वपि किं पुनस्त्वय्यस्मत्स्नेहास्पदायामित्यर्थः। मा वा भैव (वाशब्द एवार्थे) भूत् नैव भवतु। अस्याहि-(स्त्रुलतया) पापदर्शनीयत्वात्। तस्मात् सर्वदा सर्वप्रकारैश्च प्राणव्ययेनापि जीवनव्ययेनापि किं पुनः साधारणायासेनेत्यर्थः, युवयोर्मेलनाय मया यत्नः विधेयः करणीयः। तथाच मदीयप्रयत्नेनैव युवयोरपत्याप्रत्यूहः इत्याद्यस्य न भवितव्यमिति भावः। अत्र "मा"इत्यत्र 'मा स्म भवतो'इत्यत्र "त्वयि वे"ति च पाठान्तरं, तथात्वे अस्या त्वयि माधवे वा यत् पापं आशङ्कनीयं तत् युवयोः स्वप्नेऽपि मा भूदिति वाक्यार्थः। गवी नाम द्वितीयावस्थेयम्। तथाच दर्पणे—"प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः"। अत्र किं पुनस्त्वय्यस्मत्स्नेहास्पदायामित्यर्थस्य किं पुनः साधारणायासेनेत्यर्थस्य च व्यञ्जनात् अर्थापत्तिरलङ्कारः। तल्लक्षणं यथा दर्पणे—"दण्डापूपिकया न्यायादर्थान्तरोऽर्थापत्तिरिष्यते" इति। इन्द्रवज्रावृत्तम्।

(३४) मखेति। सुष्ठु युज्यमानं सम्यक् युक्तियुक्तं आदिश्यते कथ्यते। तथाचा-स्माभिरपि आदिष्टं ज्ञानमित्यर्थः। आदिश्यत इति पदोपादानम् युष्माभिरिति बहुवचनं च गौरवद्योतनार्थम्।

(३५) दयेति। निजे आत्मीये तस्मिन् शिशुजने मालत्यां माधवे च दया अनुकम्पा वा स्नेहो वात्सल्यं वा (वाशब्दो चार्थे, काकाक्षिगोलकवदुभयत्रापि सम्बन्ध इति योजनीयम्, तथाच भवत्या दया च स्नेहश्चेत्यर्थः।) संसारात् स्त्रीपुत्रादिविषयगौरवविषयरूपसंसारसुखभरात् विरतमपि प्रव्रज्याग्रहणेन निवृत्तमपि भवत्याश्चित्तं द्रवयति आर्द्रं करोति आवर्जयतीति यावत्। अतश्च अत एव कारणात् प्रव्रज्यासमये सन्यासग्रहणकाले सुलभाः ये आचाराः "सर्वं सहचरि-

---

আমি করিতেছি, তাহা যেন শত্রুদিগেরও না হয়, সুতরাং প্রাণপণেও আমি তোমাদিগের সম্মেলনের জন্য সর্বতোভাবে চেষ্টা করিব।

(৩৫) অয়ি ভগবতি, এই স্বকীয় শিশুজনে (মালতী ও মাধবে) আপনার দয়া বা স্নেহই আপনার সংসার-বিরক্ত চিত্তকেও আর্দ্র করিতেছে। অতএব এই

[नेपथ्ये ।] भअवदि कामन्दइ ! एसा भट्टिणी विण्णवेदि, जधा मालदीं घेत्तण तुरिदमाअच्छदु त्ति (प) ।

काम । वत्से । उत्तिष्ठ । [सर्वे उत्तिष्ठन्ति ।] (२६)

[मालतीमाधवौ सकरुणानुरागमन्योऽन्यमवलोकयतः ।] (२७)

(प) भगवति कामन्दकि ! एषा भट्टिनी विज्ञापयति, यथा मालतीं गृहीत्वा त्वरितमागच्छतु इति ।

त्यागी प्रसन्नवर्यमन्वित. । जितेन्द्रियत्वमनायासे नैकान्निन् वसतिरिव" मित्यादि शास्त्रनिर्दिष्टः सर्वं सत्परित्यागादय: तेषां विमुखा विरोधो मे नव यव मालतीमाधवसमागमसम्पादने प्राप्ति: प्रसक्त लब्ध, ज्ञापतिन इति यावत् । अपरं पुन: इत: परन्तु दैवं जनयोर्भाग्यं प्रभवति समागमाभिलाषं पूरयितुं नाशयितुं वा शक्नोति । मया तु यावत् कर्त्तव्यं तावदेव क्रियते, तथापि यदि कलोदयसिद्धिर्न भवेत्तदा निन्दाजनकोऽहं न भवेयमिति भाव: । इदवानुवयवस्य पर्य्युपासनं नाम प्रतिमुखसन्ध्यङ्गम् । तदुक्तं दर्पणे "—शमस्त्वनुनय: पुन: । स्यात् पर्य्युपासनं—" भवाप्रस्तुतधीर्हि यावे इत्योर्द्वयोरनीचितक्रियाभिमतस्यानुवर्त्तीनीतालङ्कार: । शिखरिणीवृत्तम् । उभयोरेव लक्षणमुक्तम् ।

(प) नेपथ्य इति । भट्टिनी राज्ञी, यथाह भरत. —राजस्त्रियस्तु सम्भाष्या सर्व्वाः परिजनेन तु । भट्टिनी स्वामिनीत्येवं गुरुर्वं भ्रातृभिर्वचसा: ॥" त्वरितमागच्छतु वैवाहिक-माङ्गलिकानुष्ठानसम्पादनार्थमित्याशय: ।

(२६) कामेति । वत्से मालति ! उत्तिष्ठ त्वरितमित्यर्थं, राज्ञी विज्ञापनवशात् प्रदर्शने कार्य्यवान्: कादिताशय: । सर्व्वे मालतीमाधवादय. ।

(२७) मालेति । सकरुणानुराग करुणानुरागाभ्यां सह यथा स्यात्तथेत्यर्थः । अत्र कारुण्यं परस्परवियोगभयेन, अनुरागं परस्परभावाभिव्यक्तिद्वारेण ।

সন্ন্যাসাশ্রমসমুচিত ব্যবহারের বিরোধী হয় ও আপনার আপতিত হইয়াছে। এখন ইহাদের অদৃষ্টই যাহা করিতে সমর্থ হয়।

(প) (নেপথ্যে) ভগবতি কামন্দকি ! রাজ্ঞী জানাইতেছেন যে, মালতীকে নিয়া অতি সত্বর আসুন।

(৩৬) কাম। বৎসে ! উঠ। (সকলে উঠিল)।

(৩৭) (মালতী এবং মাধব করুণ ও অনুরাগের সহিত পরস্পরকে অবলোকন করিতে লাগিল)।

माध। [स्वगतम्।] कष्टमेतावती लीलया मालत्या समं माधवस्य, अहो नु खलु भोः। (३८)

सुहृदिव प्रकटय्य सुखप्रदः प्रथममेकरसामनुकूलताम्।
पुनरकाण्डविवर्त्तनदारुणो विधिरहो विशिनष्टि मनोरुजम् ॥३९

माल। [स्वगतम्।] महाभाअ! लोअणाणन्द! एत्तिअं दिट्ठोसि। (क)

(क) महाभाग लोचनानन्द! एतावद्दृष्टोऽसि।

---

(३८) माधेति। माधवस्य दुर्भाग्यस्य इमेतदं। मालत्या समं लीलया दर्शनालाप
श्रवणानुरागसम्भोगाद्, एतावती इयती परम्परा जातेति यावत्। तदिदम्
कष्टमित्यर्थः। अहो आश्चर्य्य, नु वितर्के, खलु निश्चये, भोः सम्बोधने, तदास्य हे हृदय!
आश्चर्य्यमेव दैवस्य दुर्विलसितमिति सर्वथायमर्थः। अथवा "अहोनुखलुभोः" इत्येकमेवाव्ययं
निरतिशयविषादसूचकम्।

(३९) सुहृदिति। विधिर्विधाता सुहृदिव बन्धुरिव प्रथमं आदौ एकरसां एकमुख्यां
कारुण्यैकमुख्यामिति यावत् (कारुण्ये)... रसे ... इत्यमरः)। अनुकूलतां
प्रस्तुतकार्य्यानुगुण्यं प्रकटय्य प्रकाश्य सुखप्रदः सुखविधायकः सन् अहो आश्चर्य्यं पुनः अकाण्डे
अनवसरे असमये इति यावत् (काण्डोऽस्त्री दण्डवाणार्व्ववर्गावसरवारिषु इत्यमरः)। विवर्त्तनेन
विपरिवर्त्तनेन प्रातिकूल्येनेत्यर्थः, दारुणः कठिनः सन् मनसश्चित्तस्य रुजं पीड़ां विशिनष्टि
विशेषेणोत्पादयति। विधेरिदमतीवाश्चर्य्यमिति भावः। तदास्य शिथिलिन्दया विषादातिशयो
व्यज्यते। उत्तररामचरितचतुर्थाङ्केऽपि श्लोकोऽयमविकलः परिदृश्यते। अत्र सुहृदिवेति श्रौती
उपमालङ्कारः। द्रुतविलम्बितं वृत्तम्।

(क) मालेति। लोचनयोरानन्दो यस्मात् स लोचनानन्द लोचनानन्दकर इत्यर्थः,

---

(৩৮) মাধ। (স্বগত) অহো! মালতীর সহিত আলাপাদি সাহুরাগ মনোচিত ব্যবহার মাধবের এ পর্য্যন্তই পরিসমাপ্ত হইল। দৈবগতি নিতান্তই আশ্চর্য্য মনে হইতেছে।

(৩৯) বিধাতা প্রথমে কারুণ্যপ্রধান অনুকূলতা প্রকাশ করিয়া সুখপ্রদ হইয়াও পুনরায় অসময়ে অকারণ প্রতিকূলাচরণে কঠিন হইয়া চিত্তপীড়া উৎপাদন করিতেছেন; ইহা অতীব আশ্চর্য্য।

(ক) মাল। (স্বগত) হে মহাভাগ! লোচনানন্দকর! এ পর্য্যন্তই তোমাকে দেখিলাম।

लव। हद्धी! हद्धी! शरीरसंसअं जेव्व णो पिअसही आरोविदा अमच्चेण (ब)।

माल। [स्वगतम्] परिणदं दाणीं मे जीविदत्तिह्णाए फलम्। [सास्रम्।] णिव्वूढं च णिक्करुणदाए तादस्सवि कावालिअत्तणं, पडिहिदो दुद्दैवस्स दारुणसमारम्भसरिसो परिणामो, कं एत्थ उआलंहामि मन्दभाइणी, कं वा असरणा सरणं पडिवज्जामि (भ)।

(ब) हा धिक् हा धिक् शरीरसंशयमेव नः प्रियसखी आरोपिता अमात्येन।

(भ) परिणतमिदानीं मे जीवितवाञ्छायाः फलम्। निर्व्यूढं च निष्करुणतया तातस्यापि कापालिकत्वम्। प्रतिहितो दुर्दैवस्य दारुणसमारम्भसदृशः परिणामः। कमिदानीमुपालभे मन्दभागिनी, कं वा अशरणा शरणं प्रतिपद्ये।

कथितवदेव दाह.। एतेन [illegible], [illegible] दर्शि ध्वनिः। एतावत् [illegible] इष्टोऽपि [illegible], [illegible] भावादिति भावः। [illegible] प्रतिपुस्तकमेव [illegible]। तदुक्तं दर्पणे— "प्रत्यभिज्ञेयं वस्तु" मिति।

(ब) हद्धीति। शरीरसंशयं [illegible], आरोपिता प्रापिता भगवति। अमात्येन भूरिवसुना। तस्मात् गुरुजनमपेक्ष्य त्वमेव सख्याः शरणमित्यर्थ आशयः।

(भ) मालीति। जीवितवाञ्छाया प्राणधारणस्पृहायाः फलं परिणतं पर्यवसितं। कापालिकत्वस्य नरबलिदानकर्तृभाव. कापालिकत्वं तत्कृतांसत्वमित्यर्थः, निर्व्यूढं सम्पन्नं दुर्दैवस्य क्रूरनियतेः दारुण भयङ्करः यः समारम्भः प्रक्रिया कार्येषिषाकरणाम तत्सदृशः तदनुरूपः परिणामः परिणतिः-प्रतिहितः. (प्रतिष्ठा समाप्तिः सञ्जाता यस्येति तारकादित्वादितच्) समाप्तिं प्राप्त इत्यर्थः। मरणस्याविरभावित्वात्तदतिरिक्तस्य च परिणामस्य अभावादिति भावः। मन्दभागिनी मन्दभाग्या या [illegible], कं उपालभे निन्दामि? भाग्यमेव मे निन्दनीयमित्यर्थः।

(ব) লব। হায়! হায়!! অমাত্য আমাদের প্রিয় সখীকে জীবনসংশয়াবস্থায় আরোপিত করিলেন।

(ভ) মাল। (স্বগত) এতক্ষণেই আমার প্রাণধারণ-স্পৃহার ফল পর্যবসিত হইল। নির্দয়তায় পিতাও নরঘাতকের ন্যায় নৃশংসত্ব সম্পন্ন হইলেন। দুষ্ট নিয়তির

लव। सखि, इदो इदो (म) [इति निष्क्रामन्ति।]

माध। [स्वगतम्।] नूनमाश्वासनमात्रमेवैतत् माधवस्य मङ्गलच्छेदकातरा करोति भगवती। [सोद्वेगम्।] हन्त सर्वथा संशयितजन्मसाफल्यः संवृत्तोऽस्मि, तत्किमिदानीं कर्त्तव्यम्।

[विचिन्त्य।] न खलु महामांसविक्रयादन्यदुपायान्तरं पश्यामि। [प्रकाशम्।] वयस्य! मकरन्द! अपि भवान् उत्कण्ठते मदयन्तिकायाः? (४०)

(म) सखि! इत इत.।

ममापरा रक्षकस्य पितुरपि विनाशसम्भवात् रक्षकहीना त्वं वा शरणं रक्षणं प्रतिपद्ये प्राप्नोमि? तथाच भवति कामन्दकि! कद ... ! इत्यादिव मां रक्षतामित्याशयः।

(म) सखीति। इत इत आगम्यतामिति शेषः। निष्क्रामन्ति मालतीकामन्दकी-लवङ्गिका इति शेषः।

(४०) माधेति। मङ्गलच्छेदेन मां प्रति आशाविच्छेदभयात् न ... मदीयदुःखभावना-दुःखखिन्ना भगवती कामन्दकी नूनं निश्चितमेतत्—"न तावं मालत्याः परिणेष्यति" इत्यादिकं माधवस्य मम समाश्वासनमात्रं केवलं सान्त्वनामेव करोति। अथ नन्दनस्य विरोधित्वात् भगवती किमपि कर्त्तुं न शक्नोतीति आशयकेन सूचितम्। संशयितं संदिग्धं प्रति-बन्धकत्वात् कामन्दकया आनुकूल्याय सन्दिग्धं जन्मसाफल्यं मालतीलाभरूपं यस्य सः तादृशः संवृत्तोऽस्मि। तथाचात्र मालतीलाभ एव जीवनसाफल्यरूपत्वकथनेन मालत्या

অন্যত্র কার্য্যক্রমের অনুরূপ পরিণামও পরিলক্ষিত হইল। হতভাগিনী আমি এবিষয়ে কাহাকেই বা তিরস্কার করিব? রক্ষকবিহীন হইয়া কাহাকেই বা শরণ পাইব?

(ম) লব। সখি! এদিকে এদিকে। (কামন্দকী, মালতী ও লবঙ্গিকা নিষ্ক্রান্ত হইল)

(৪০) মাধ। (স্বগত) মঙ্গলচ্ছেদকাতরা ভগবতী (কামন্দকী) নিশ্চয়ই (পূর্ব্বোক্ত সকল বলিয়া) মাধবের আশ্বাস প্রদর্শন মাত্র করিলেন। উদ্বেগের

मक। अथ किम्। (४१)

तस्मै मनः क्षिपति यत्सरसप्रहारमालोक्य मामगणितस्खलदुत्तरीया।
त्रस्तैकहायनकुरङ्गविलोलदृष्टिराश्लिष्टवत्यमृतसंवलितैरिवाङ्गैः ॥४२

गुणातिशयत्वादिसन्निपातेनात्र सातिशयवचनस्य पुष्टं नामाङ्गम्। तदुक्तं—"पुष्टं सातिशयं वचः" इति।

विचिन्त्य कर्त्तव्यं निर्द्धारयति—न खल्विति। महामांसस्य नरमांसस्य विक्रयात् मालती-रूपमूल्यलाभाभिसन्धानेन चामुण्डानुचरपिशाचसमर्पणात् अन्यं भिन्नम् उपायं मालतीप्राप्ति-निबन्धनं न पश्यामि। तथाच आत्मवृत्तितोऽपि श्रेयस्करत्वेन स एव मया कर्त्तव्य इत्याशयः।

मांसाचारानुसारेण महामांसस्य चामुण्डार्चनानन्तरं तदनुचरपिशाचेभ्योऽर्पणेन महामांसार्पणं श्रेयस्करमिति तन्त्रशास्त्रे प्रसिद्धम्। उक्तञ्च "गोनरेभाश्वमहिषवराहोष्ट्रोरगोत्थितं महा-मांसाष्टकं देवि। दैवतप्रीतिकारक"मित्यादिना सर्व्वास्वपि मांसेषु महामांसत्वेऽप्युक्ते, तथापीह गतयुगाने नरमांसस्यैव विशिष्टत्वादिह नरमांसमेव बोद्धव्यम्। अनेन प्रस्ताव-स्यापि सूचितमिति ध्येयम्। महामांसविक्रयव्यवहारस्यानुष्ठाने जीवनमात्रादिसंशयेन मकरन्दमपि सहायीकर्त्तुं तन्मनोभावमवगन्तुमाह—वयस्येत्यादि। मदयन्तिकायाः कृते हेतोः। अपि प्रश्ने। तथाच मदयन्तिकार्थं किमुत्कण्ठितोऽसि त्वमित्यर्थः।

(४१) मकेति। अथ किमिति स्वीकारे, उत्कण्ठित एवास्मीत्यर्थः।

(४२) उत्कण्ठां द्रढयति—तस्मै इति। सरसः सशोणितः प्रहारः व्याघ्रनखदन्ताघात-जनितव्रणं यस्य तादृशं मां आलोक्य दृष्ट्वा अगणितम् अविचारितं यथा स्यात् तथा स्खलत् उत्तरीयं स्तना-वरणवस्त्रं यस्याः सा, स्तनावरणवस्त्रस्य स्खलनमगणयन्तीत्यर्थः, (अनेन परमौत्सुक्यमाविष्कृतं) त्रस्त-

---

সহিত) হায় মালতী-প্রাপ্তিরূপ আমার জীবনের সার্থকতা সর্ব্বপ্রকারেই সন্দিগ্ধ হইয়া দাঁড়াইল, সুতরাং এখন কি কর্ত্তব্য ?

(চিন্তা করিয়া) চামুণ্ডাসহচর পিশাচদিগকে নরমাংস অর্পণ করা ভিন্ন মালতীপ্রাপ্তির উপায়ান্তর দেখিতেছি না। (প্রকাশ্যে) বয়স্য মকরন্দ! তুমিও মদয়ন্তিকার জন্য উৎকণ্ঠিত হইতেছ কি ?

(৪১) মক। আর কি বলিব ? সর্ব্বথা উৎকণ্ঠিত হইতেছি।

(৪২) ভীত ও একবর্ষবয়স্ক হরিণের ন্যায় চঞ্চলদৃষ্টি মদয়ন্তিকা ব্যাঘ্রের আঘাতে আমাকে রক্তাক্ত দেখিয়া নিজের উত্তরীয় বসনখণ্ডের দিকেও লক্ষ্য,

माध। सुलभैव बुद्धरक्षिता प्रियसखी भवतः। अपिच—(४३)

प्रमथ्य क्रव्यादं मरणसमये रक्षितवतः
परिष्वङ्गं लब्ध्वा तव कथमिवान्यत्र रमताम्।
तथा च व्यापारः कमलनयनाया नयनयो-
स्त्वयि व्यक्तस्नेहस्तिमितरमणीयश्चिरमभूत्॥ (४४)

न्यथोऽपि जात इति सूचितम्)। तथा मम कुत्रचित् कारणादभीतः यः एकहायनकुरङ्गः एक-वर्षवयस्कमृगः (वर्षोऽब्दो हायनोऽस्त्री स्यादित्यमरः) तस्येव विलोले विशेषेण चञ्चले दृशौ नयने यस्याः सा (सम्बन्धं एकहायनस्य कुरङ्गस्य विशेषेण नेत्रयोश्चाञ्चल्यातिशयद्योतनार्थं) तथाभूता मदयन्तिका अमृतस्थगितैः सुधाविनिर्मितैरिवाङ्गैः अर्थात् शरीरावयवैः यत् आश्लिष्टवती आलिङ्गनं कृतवती, तत् आलिङ्गनं (कर्तृ) मे मम मनः क्षिपति आकुलयति। तस्मात्तदीयोत्कण्ठितोऽस्मीति भावः। अत्र तन्मे मनः क्षिपतीत्यत्र विधेयत्वेनाभिमतस्य मनः-क्षेपस्य यच्छब्दघटितवाक्यपूर्वपाठकरणाद्वैपरीत्येन गुणीभूतत्वात् "अकारि ध्ययमेव मे य"-दित्यादिवद्वाक्यगतविधेयाविमर्शदोषः, तथा क्षिपधातोराकुलीकरणार्थावाचकत्वादवाचकत्व-दोषश्च। अत्र तृतीयचरणे लुप्तोपमालङ्कारः। चतुर्थचरणे च अमृतस्थगितैरिवेति क्रियोत्प्रेक्षालङ्कारः, द्वयमपीति चापेक्षया संसृष्टिः। वसन्ततिलकं वृत्तम्। एतत् श्लोकीयतृतीय-चरणस्य यद्यन्तमात्र च पाठवर्तितमुत्तररामचरितेऽपि दृश्यते।

(४३) माधवेति। बुद्धरक्षितायाः प्रियसखी मदयन्तिका भवतः सुलभैव अनायास-प्राप्यैव। अत्र बुद्धरक्षिताप्रियसखीत्युल्लेखेन कथनमनुकूलदूतीसद्भावद्योतनार्थं। तथाच बुद्धरक्षितैव विविधमुपायमवलम्ब्य तत्समागमं साधयिष्यतीत्याशयः। सुलभत्वमेवोपपत्त्या द्रढयति—अपि-चेति। अपिच तदवाप्तौ कारणं परमप्यस्तीत्यर्थः।

(४४) किन्तत् कारणमित्याह—प्रमथ्येति। क्रव्यं मांसं अत्तीति (क्रव्ये चेति नियमात् कर्मण्यण्) क्रव्यादं मांसाशिनं व्याघ्रमित्यर्थः, प्रमथ्य निहत्य मरणसमये तस्याः प्राण-

---

না করিয়া যে সুধাবিনির্মিতের ন্যায় প্রতীয়মান অঙ্গদ্বারা আলিঙ্গন করিয়াছে, সেই আলিঙ্গনই আমার মনকে আকুলিত করিতেছে।

(৪৩) মাধব। বুদ্ধরক্ষিতার প্রিয়সখী (মদয়ন্তিকা) অবশ্যই তোমার অনায়াসলভ্যা হইবে। আরও দেখ—

(৪৪) মরণসময়ে ব্যাঘ্র নিহত করিয়া তুমি তাহাকে রক্ষা করিয়াছ, সুতরাং

मक। तदुत्तिष्ठ पारासिन्धुसम्भेदमवगाह्य नगरीमेव प्रविशावः। (४५) [उत्थाय परिक्रामतः।]

चिरोपनिक्षिप्ता रचितस्नेहा: मौक्तिकमदालसायुगलगीयमुखकार्यं कृतवत्यास्य परिष्वङ्गं चालिङ्गनं लब्धा कथमिव केन प्रकारेण मदयन्तिका पश्चात् सदृश अपि रमणे अनुरक्तापिता भवेत्, अपि तु नैवेत्यर्थ:। स्वयञ्च मान्यस्यमकरन्दस्योपचारज्ञत्वात् एवमालिङ्गनं लब्धा पुरुषान्तरानुरागस्य कुलबालाजनविरुद्धत्वात् मदयन्तिका कामयमपि प्रत्याख्यं न अर्हतीति तवैव सुलभा भवेदिति भाव:। ननु तदीयतत्कृतालिङ्गनादिप्रदर्शनं कामहेतुकमेव नानुरागहेतुकमिति चेत्तत्राह निरातङ्कं मदनुरक्ति-निदर्शनं दर्शयतीति—सद्यापीति। तयाच त्वयि तदनुरागानुमापकमेवेत्यर्थ:। कमल-नयनाया पद्मे क्षणाया: मदयन्तिकाया: नयनयोर्व्यापार: दृष्टिनिक्षेप: त्वयि व्यक्तो दैव परि-स्फुटानुराग इव स्तिमित: निश्चल' अत एव रमणीय: मनोहर' चिरं बहुकाल 'व्याप्य अभूत्, मदयन्तिका बहुकालं व्याप्य निष्पन्देनचक्षुषा त्वामद्राक्षीदित्यर्थ:।

तथाचात्र नाहमपित्वदाश्लेषकलपमाधनेन मकरन्दे मदयन्तिकाया दृढानुरक्तिरूपसाध्यस्य ज्ञानात् अर्थापत्ति प्रमाणमा लिङ्गलिङ्गानुमानालङ्कार:। पर्व नायमदविशेषे व्याप्य षष्ठ्यो कस्यादि इति सामान्याभिधानाविशेषेऽभिधानाद्दोष:। तथा पुनिरवदर्शनेनार्थविशेषावधारणा-"दुष्चारो" नाम प्रतिमुखस्याङ्गं रूपम्। तल्लक्षणं भावप्रकाशे यथा—"उपदर्शितलो यो:ऽर्थ, स अवधान उच्यते" इति नाहमपित्वदीन मकरन्दस्य प्रश्नप्रतायां भाग्यु तदादनात् "तपस्याम" मघाहृन"मिति दर्पणोक्तलक्षणमत्र घटत इति मन्तव्यम्। शिखरिणीवृत्तम्।

(४५) तदिति। पारासिन्धु तदाख्ये नदीविशेषौ तयो: सम्भेद सङ्गमम्। अवगाह्य आलोड्य स्नात्वेति यावत्। तत्सम्बन्धे शङ्कुम्बरावपादनलहरिसंयोजितादिचलनाये च स्नानमिदम्भावमिति मन्तव्यं। "पारे"मत्र "वरहीवि"पाठभेद:।

তোমার আলিঙ্গন লাভ করিয়া মদয়ন্তিকা কিপ্রকারে পুরুষান্তরে অনুরক্তা হইবে? তাহার অনুরাগের নিদর্শনও এই যে, সেই কমলনয়নার বহুকালব্যাপী দৃষ্টিনিক্ষেপও তোমাতে পরিস্ফুটস্নেহ নিশ্চলত্বরমণীয় হইয়াছিল।

(৪৫) মক। তবে উঠ, পারা ও সিন্ধুনদীর সঙ্গমস্থলে অবগাহন করিয়া নগরেই প্রবেশ করি। (উঠিয়া উভয়ের পরিক্রমণ)।

माध। अयमसौ महानद्योः सम्भेदः, य एषः। (४६)

जलनिविडितवस्त्रव्यक्तनिम्नोन्नताभिः
परिगततटभूमिः स्नानमात्रोत्थिताभिः ।
रुचिरकनककुम्भश्रीमदाभोगतुङ्ग-
स्तनविनिहितलक्ष्मस्वस्तिकाभिर्वधूभिः ॥ (४७)

---

(४६) माधवेति। अयं दृश्यमानः, असौ प्रसिद्धः, महानद्योः पारासिन्ध्वोः। "सम्भेदः" इत्यत्र "व्यतिकरः" इति पाठभेदः, सोऽपि सङ्गमार्थक एव।

(४७) जलेति। स एषः सम्भेदः—स्नानमात्रं अवगाहनानन्तरमेव (मात्रशब्देन तत्-क्षणमात्रादित्यवच्छेदः)। उत्थिताभिः तीर्थं उत्तीर्णाभिः अत एव जलेन निविडितानि (निविडितानि करोतीति करोत्यर्थे [illegible] कर्मणि क्त)। नितान्तसंश्लिष्टतया देहे समन्तात् संलग्नानि वस्त्राणि यासां ताः, अत एव च व्यक्तानि सुस्पष्टं दृश्यमानानि निम्नानि नाभिमध्यादि-निम्नदेशस्थानानि उन्नतानि स्तनमण्डलापुरदेशस्थानि च यासां तथा रुचिरकनककुम्भवत् मनोहरस्वर्णकलसवत् श्रीमन्तः कान्तिमन्तः आभोगेन परिपूर्णतया ('आभोगः परिपूर्णते'त्यमरः)। तुङ्गा उन्नताश्च ये स्तनाः तेषु निहिताः अर्पिताः लक्ष्माः मङ्गल्याः, स्वस्तिका इव मङ्गलद्रव्याणीव ("स्वस्तिको मङ्गलद्रव्ये चतुष्पथगृहभेदयोः। पिष्टकस्य विकारे च स्वस्तिको रक्तालिके" इति विश्वः)। लक्ष्मा एव च स्वस्तिकाः याभिस्ताभिर्वधूभिः स्त्रीभिः, परिगता व्याप्ता तटभूमि-स्तीरप्रदेशो यस्य तथोक्तः वर्त्तते इति शेषः। स्वस्तिक विन्यासविशेष इति केचित्, तथाचोक्तं "सर्वचक्षनविन्यासा-वरात्मोत्कीर्णयोगिनी। उत्तानीवामपार्श्वस्थौ स्वस्तिकः परिकीर्त्तितः" इति। अत्र च भिन्नभिन्नेन चातुर्वर्ण्यसमागमद्योतनात् "वर्णसंहारो" नाम प्रतिमुखसन्ध्य-ङ्गम्। तथाचोक्तं दर्पणे—"चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते"। इति।

तथा स्नानोत्थितस्त्रीजनसमाजवर्णनात् स्वभावोक्तिः, जलनिविडितेत्यादिपदार्थहेतुकत्वेन-काव्यलिङ्गम्, रुचिरकनककुम्भश्रीमदिति लुप्तोपमा, लक्ष्मस्वस्तिकेत्यत्र विनिगमकाभावेन रूपकोपमयोः सन्देहसङ्करालङ्कार इत्येतेषामङ्गाङ्गिभावेन सङ्करः। मालिनीवृत्तम्।

---

(৪৬) মাধ। এই সেই পারা ও সিন্ধুনদীর সঙ্গমস্থল।

(৪৭) যাহারা বস্ত্রের নিতান্ত গাত্রলগ্নতা নিবন্ধন যাহাদের নাভি ও স্তন-মণ্ডলাদি নিম্নোন্নত স্থানগুলি সুস্পষ্টরূপে পরিদৃষ্ট হইতেছে, মনোজ্ঞ স্বর্ণ-কলসের ন্যায় শোভমান ও পরিপূর্ণতায় উন্নত স্তনে যাহারা স্বস্তিরূপ মাঙ্গলিক দ্রব্য ন্যস্ত

[इति निष्क्रान्ताः सर्वे । (४८)]

इति मालतीमाधवे शार्दूलविक्रमो नाम चतुर्थोऽङ्कः (४८)।

---

(४८) इतीति। सम्प्रति द्वयोर्निष्क्रान्तत्वेऽपि सर्वेषामन्येषां चतुर्थस्याङ्कस्य चोपरतिः प्रथमादृष्टिपथरोधस्या।

(४९) इतीति। शार्दूलहननद्वारेण विक्रमः मकरन्दमाधवयोर्वीर्यः यस्मिन् सः, नाम तदाख्या यस्य। कस्मिंश्चित् शार्दूलहननद्वारेण मकरन्दस्य विक्रमः तद्दर्शनेन माधवस्य च प्रधानतया वर्णित इति शार्दूलविक्रमनाम्ना प्रसिद्धोऽयमङ्क इत्यर्थः। क्वचित् पुस्तके शार्दूलविक्रमो नामेत्यंशो नास्ति॥

इति काव्यतर्कतीर्थोपनामक-गोकुलविहारि सर्वविद्यालङ्कारभट्टाचार्यकृतायां तत्त्वबोधिनी समाख्यायां मालतीमाधवव्याख्यायां चतुर्थाङ्कविवृतिः समाप्ता॥

করিয়াছে, মানবাযোচিত সেই সকল বস্তুজলে বাতাস তটভূমি পরিব্যাপ্ত।

(৪৮) (সকলে নিষ্ক্রান্ত হইল)।

(৪৯) (শার্দ্দূলবিক্রমনামক চতুর্থ অঙ্ক সমাপ্ত)।

पञ्चमोऽङ्कः ।

[ततः प्रविशति आकाशयानेन भीषणोज्ज्वलवेशा कपालकुण्डला । (१)]

कपा । षड्धिकदशनाडीचक्रमध्यस्थितात्मा,

हृदि विनिहितरूपः सिद्धिदस्तद्विदां यः ।

---

(१) चतुर्थाङ्कसूचितमहामोहविजयोपयोगिवृत्तान्तावेदकं विष्कम्भकमारभते—तत इत्यादिना । भीषणो नरशिरोऽस्थिधारणादिना भयदः, उज्ज्वलो पीतवस्त्रादिना प्रदीप्तश्च वेशो यस्याः सा, कपाले नरशिरोऽस्थिनी कुण्डले कर्णालङ्कारविशेषौ यस्याः सा कपालकुण्डला तन्नाम्नी काचित् कापालिकी आकाशयानेन योगजसिद्धिप्रभावादाकाशमार्गेण विचरन्तीति यावत्, प्रविशति रङ्गभूमिमागत्य तिष्ठति ।

(२) षड्धिकेति । यः षड्धिकदशनाडीचक्रमध्यस्थितात्मा (षडधिकदशसंख्याधिक इति निपातः), दश षडधिका दश इत्यर्थः, या नाड्यः इडादयः, तासां चक्रं मण्डलाकारं हृत्पद्मं तस्य मध्ये स्थित आत्मा स्वरूपं यस्य स तथाभूतः, तथा तद्विदां तत्स्वरूपवेदिनां योगिनां हृदि हृदये विनिहितं ध्यानवशात् संस्थापितं रूपं अणीयाकृतिर्येन तादृशः सन् सिद्धिदः मुक्तिप्रदः, तथा अविचलितमनोभिः तदेकाग्रीकृतमानसैः साधकैः उपासकैः मृग्यमाणः अन्विष्यमाणः, शक्तिभिः इच्छाक्रियाज्ञानरूपाभिः परिवृतः व्याप्तः अथवा ब्राह्म्याद्यष्टशक्तिभिः परिवृतः प्राच्यसम्भवतया परिवेष्टितः, स शक्तिनाथः शक्तीनां निग्रहानुग्रहादिक्रियाज्ञानरूपाणां नाथः प्रयोक्ता, अथवा ब्राह्म्याद्यष्टशक्तिभिः परिवृतः प्राधान्यसम्भवतया परिवेष्टितः, स शक्तिनाथः शक्तीनां निग्रहानुग्रहादिक्रियाज्ञानरूपाणां नाथः प्रयोक्ता, अथवा ब्राह्म्यादिशक्तीनां पतिः भूतनाथ इत्यर्थः, जयति सर्वोत्कर्षेण वर्तते ।

नाडीनामनन्तत्वेऽप्यत्र षोडशनाडीनामभिधानं प्राधान्यानुसन्धानेन, प्रधानाः षोडश नाड्यो यथा—

"इडा च पिङ्गला चैव सुषुम्ना च तथा कुहूः ।

गान्धारी हस्तिजिह्वा च पूषा यशस्विनी तथा ॥

---

(১) গগনমার্গে ভীষণ ও উজ্জ্বল বেশধারিণী কপালকুণ্ডলার প্রবেশ।

(২) কপা। যাহার স্বরূপ ইড়াপিঙ্গলাদি ষোড়শ নাড়ীচক্রের অর্থাৎ হৃৎপদ্মের মধ্যে অবস্থিত, যিনি তাদৃশ আত্মজ্ঞদিগের হৃদয়ে নিজের আকৃতি

अविचलितमनोभिः साधकैर्मृग्यमाणः
स जयति परिणद्धः शक्तिभिः शक्तिनाथः ॥ (२)

अलम्बुषा कुहूश्चैव शङ्खिनी दमनी च या।
मातृसिक्ता च जिह्वा च विजया कामदा परा ॥
अमृता बहुला नाम नाड्यो वायुसमीरिताः ॥"

नाडीचक्राणि यथा, दीपिकायाम्—

"चतुर्दलं स्यादाधारे स्वाधिष्ठाने च षड्दलम्।
नाभौ दशदलोपेतं सूर्यसंख्यदलं हृदि ॥
कण्ठे स्यात् षोडशदलं भ्रूमध्ये द्विदलान्वितम्।
सहस्रदलमाख्यातं ब्रह्मरन्ध्रे तु पद्मकम् ॥
एतानि सप्तपद्मानि चक्राणि संप्रचक्षते ॥"

चक्रमध्यस्य लिङ्गत्वमयमपायकाले इत्यत्र तत्परत्वस्यास्थानत्वमिति प्रमाणं यथा—

"पार्थिवः सुषुम्णा देहे यद्यपि व्याप्य तिष्ठति।
तथाप्यस्य परं स्थानं ब्रह्मरन्ध्रमुदाहृतम् ॥"

इच्छादीनां शक्तित्वं प्रमाणं यथा—

"इच्छा क्रिया तथा ज्ञानं गौरी ब्राह्मी तु वैष्णवी।
त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति ॥"

अत्र नाडीचक्रादिपदानां केवलशास्त्रप्रसिद्धानां प्रयुक्तत्वादप्रतीतत्वदोषः, स चात्र स्वयं परामर्शेऽनुपपत्तेन नास्ति। यथोक्तं दर्पणे—"गुणः स्यादप्रतीतत्वं तत्त्वविद्वक्तृवाच्ययोः स्वयं वापि परामर्शे ... ॥" इति।

तथा विवाहरूपफलप्रधानोपायस्य मालतीमाधवयोरनुरागस्य पूर्वोद्भिन्नस्य "प्रेमार्द्र प्रणयस्पृश" इत्यादिना समुद्भेदात्, "हा तात निष्करुण!" इत्यादिना "अमात्यो"ऽपि च पुनरस्य ह्रासात्, "भो भो मालत्याः पितः सैनिकाः" इत्यादिना अन्वेषणात्, "नाथस्य प्रथम" इत्यादिना पुनरुद्भेदात्, "भगवती भगवती विजयते" इत्यादिना पुनः ह्रासात्, "परमत्र यदि चि" । इत्यादिना पुनरन्वेषणात् ततः प्रभृति सप्तमाङ्कसमाप्तिं यावत् गर्भसन्धिः यथोक्तं दर्पणे—

"फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन।
गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ॥"

एवं मालतीलाभविषये कामन्दक्यादीनां तदुपायतत्परत्वेनादुपायचिन्तया इन्दनाथ नाथ

इयमहम् इदानीं—

नित्यं न्यस्तषडङ्गचक्रनिहितं हृत्पद्ममध्योदितम्
पश्यन्ती शिवरूपिणं लयवशादात्मानमभ्यागता।
नाडीनामुदयक्रमेण जगतः पञ्चामृताकर्षणा-
दप्राप्तोत्पतनश्रमा विघटयन्त्यग्रे नभोऽम्भोमुचः॥ (२)

महानायं राज्ञो सुरक्षवेक्षादिदर्शनादुपायचिन्तया च सफलीयसाङ्कत्वात् प्राप्तिसम्भव इति "प्राप्त्याशा" नाम तृतीयावस्था। यदुक्तं—"उपायापायचिन्ताभ्यां प्राप्त्याशा प्राप्तिसम्भव" इति। अस्या चत्वारि च यथास्थानं सूक्ष्मं निवेद्याख्यमुखमे ज्ञापनीति। मालिनी वृत्तम्।

(२) नित्यमिति। न्यस्त पूजाजपादिप्रारम्भसमये "आं हृदयाय नमः, ईं शिरसे स्वाहा" इत्यादि मन्त्रैर्निर्दिष्टक्रमेण न्यासीकृत यत् षडङ्गा हृदयशिरःशिखाकवच-नेत्रास्त्राख्या षडङ्गं चक्रं समूहः, तत्र निहितं आरोपित षडङ्गन्यासपूर्वकं तत्र ध्यातमिति यावत्, अत एव हृत्पद्मस्य पूर्वोक्तषडङ्गदलहृदयपुण्डरीकस्य मध्ये कर्णिकास्थाने उदितं प्रकाशमानं शिवरूपिणं तद्रूपेणैव चिन्तितया अहोरात्रमहर्निशमित्यर्थः आत्मानं परमात्मानं नित्यं सदा पश्यन्ती साक्षात् कुर्वती, तथा अयः योगाभ्यासवशात् सर्वमानसस्य वायोर्नाडीविशेषेषु निरोधः एकायतता वा तद्वशादवलम्बनात् नाडीनां पूर्वोक्तनाडीविशेषाणामुदयक्रमेण वायु-पूरणादिरीत्या पूरककुम्भकरेचकात्मकप्राणायामेनेत्यर्थः, जगतः जङ्गमात् जलधीवाहेत्यादिति यावत्, ("जगत् स्यात् विष्टपे क्लीबं वायौ ना जङ्गमे त्रिषु"ति मेदिनी)। पञ्चामृतानां "विट् च मूत्रमेदक् मज्जा शुक्रं पञ्चामृतं स्मृत" मित्युक्तानां शरीरगुरुत्वापादकविण्मूत्रमज्जा-शुक्राणां आकर्षणात् आकृष्यापसारणादित्यर्थः न प्राप्त उत्पतनस्य आकाशगमनस्य श्रमः आयासो यया तथाभूता इयमहं प्रागुक्तमयास्थितं विशेषणपदमिदमनुसन्धनीयं), अग्रे सम्मुखे स्थिताकाशस्य (अग्रे स्थितेकाकाशमध्यस्य) अम्भोमुचो गमनप्रतिकूलीभूतान् मेघान् विघटयन्ती दीप्यमानेनापसारयन्ती सती इदानीं (इदमपि अत्रास्थितं) अधुना अभ्यागता श्रीपर्वता-त्तुङ्गं करालायतनं प्राप्ता।

पूर्वश्लोकपदमपि षडङ्गचक्रादिशब्दश्रौतश्रुताप्रतीतत्वदोषः स्वयं परामर्शादनुचितमेव

স্থাপিত করিয়া সিদ্ধি প্রদান করেন, একাগ্রচিত্ত সাধকগণের অবিদ্যমান আত্মাদি অষ্ট শক্তি-পরিবেষ্টিত সেই শক্তিনাথ (মহাদেব) সর্ব্বোৎকর্ষেই বর্ত্তমান আছেন।

(৩) এই আমি ষড়ঙ্গ ন্যাসপূর্ব্বক হৃদয়াদি ষড়ঙ্গে আরাধনাবশতঃ হৃৎপদ্ম-

अपिच—चञ्चोल * स्खलित-कपाल-कण्ठमाला-
सङ्घट्ट-क्वणित करालकिङ्किणीकः।
पर्य्यासं मयि रमणीयडामरत्वम्,
सन्धत्ते गगनतलप्रयाणवेगः॥ (४)

मध्ये। [illegible] “प्राणः [illegible]” इत्यादि[illegible]। [illegible]।

(४) चञ्चोलेति। चञ्चोला [illegible] स्खलिता [illegible] या कपालकण्ठमाला [illegible] सङ्घट्टेन [illegible] क्वणिता [illegible] करालाः [illegible] किङ्किण्यः [illegible] गगनतलप्रयाणवेगः मयि पर्य्यासं [illegible] रमणीयडामरत्वं [illegible] (“[illegible]” इति [illegible])। [illegible]—

“[illegible]।
[illegible] न निद्रा न [illegible]॥”

अत्र [illegible]। प्रहर्षिणी [illegible]॥

মধ্যে প্রবাহমান শিবরূপী পরমাত্মাকে সর্ব্বদা দেখিতে দেখিতেও একাগ্রতাবশতঃ ইড়াপিঙ্গলাদি নাড়ীর বায়ুপূরণাদি রীত্যনুসারে অর্থাৎ প্রাণায়ামদ্বারা গমনশীল এই দেহ হইতে গুরুত্বাপাদক সিদ্ধাদির অপসারণ করায় ঊর্দ্ধে উঠিতে কোনরূপ ব্যাঘাত না করিয়াই অগ্রবর্ত্তী আকাশের মেঘগুলিকে যোগবলে অপসারিত করিতে করিতে সম্প্রতি করালার আয়তন উপস্থিত হইয়াছি।

(৪) আরও দেখ, যাহাতে চাঞ্চল্যবশতঃ উর্দ্ধভাবে পরিচালিত কপাল-কণ্ঠমালার মুণ্ডগুলির পরস্পর আঘাতে আলম্বিত করালকিঙ্কিণীগুলির শব্দ হইতেছে, সেই গগনতলে গমনের বেগ আমার যথেষ্টরূপে ভয়ানক ও কৌতুকের নির্ব্বন্ধ সম্পাদন করিতেছে।

---

* अत्र क्वचित् पुस्तके “अपिचे”त्यो नास्ति, “चञ्चोल” स्थाने “उच्चले”ति पाठभेदः। तथात्वे उच्चला ऊर्द्ध्वेन कदाचिदूर्द्धोत्थिता स्खलिता कदाचिदधःपतिता अर्थः करणीयः।

तथाहि—(५)

विष्वग्वृत्तिर्जटानां प्रचलति निविड़ग्रन्थिनद्धोऽपि भारः,
संस्कारक्वाणदीर्घं पटु रटति जटाग्रस्थितश्चाक्षघण्टा ।
रुद्धं धुनोति वायुर्विहतभवशिरःश्वेतिकुञ्जेषु गुञ्ज-
मुक्तालः किङ्किणीनामनवरतरणत्कारहेतुः पताकाम् ॥ (६)

---

(५) गमनवेगातिशयमेव समर्थयति—तथाहीति ।

(६) विष्वगिति । विष्वक् सर्वतोऽभिव्याप्य वृत्तिः यस्य सः तादृशः, जटानां भारः कलापः, निविड़ेन गाढेन ग्रन्थिना बन्धेन नद्धोऽपि बद्धोऽपि सन् प्रचलितवेगवशात् चलति । जटाग्रस्य घण्टा विशिष्टस्य भैरवीकर्णोचितस्य विद्युत्स्य घण्टा तत्र घण्टा घण्टिकेत्यर्थः, संस्कारेण वेगात्कर्षसंस्कारविशेषेण ("संस्कारोऽवेक्षो वेगोऽस्य स्थितिस्थापकभावना" इति विश्वः) । रुद्धं कपाल, ग्रथनं किङ्किण्यादीनां धमनमिति यावत्, ("निनदश्च निनदः, शब्दः रवः स्वनः" इत्यमरः) । तेन दीर्घं चलितं पटु स्फुटं यथास्यात् तथा, पुनः पुनरभ्यासे पत्तिः तद्यथा स्यात् (एतत् तद्वदेव रटतीति क्रियाविशेषणम्), रटति शब्दायते तथा कपालः घण्टा ("कपाल कर्पटे न्ये के निवरातो ..." इति मेदिनी) । किङ्किणीनां क्षुद्र-घण्टिकानामनवरतम् अविरतम् अविरतः यो रणत्कारः, शिवाद्यः तस्य हेतुः सम्पादकः वायुः गमनवेगजनितः विहतानि अवरोधितानि भवस्य भगवतः शिरःकुञ्जेषु अभिलम्बमानानीति यावत्, यानि भवशिरांसि कपालमालास्थितकपालानि तेषां रन्ध्रेषु गुञ्जन् एव शब्दं कुर्वन् तेषु, मुक्तालः सन् पताकां वैजयन्ती, वाद्यभाण्डवद्ध्वनिमिति यावत् रुद्धं कर्कशितं यथा स्यात्तथा धुनोति कम्पयति । अत्र वेगस्य गमनस्य वा गमनोपायः सामग्र्येण प्रतिपादयतीति भावः ।

अत्र प्रस्तुतेऽभिलषितमर्थमात्, अप्रस्तुतस्य गमनस्य कार्यं वेगः सर्वे दर्शयति, यथा कुर्वन्नेव गुञ्जतीति अनुप्रासान्तरम् ... इति एषां संसृष्टिः । ... यथा दर्पणे—"कैवो व्यञ्जनकुम्भ ..." इति । स्रग्धरा वृत्तम् ।

(৫।৬) যেহেতু গতিবেগবশতঃ অবস্থিত আমার জটাসমূহ দৃঢ় গ্রন্থিবদ্ধ হইয়াও গমনবেগবশতঃ কম্পিত হইতেছে। আমার ত্রিশূলের ঘণ্টা সংস্কারজনিত শব্দে দীর্ঘ সুস্পষ্ট ও অত্যুচ্চতর শব্দ করিতেছে এবং কণ্ঠনালাস্থিত কিঙ্কিণীগুলির অনবরত উৎকট গমনবায়ু মহাদেব আমার পতাকাকে সর্বদাই কম্পিত করিতেছে।

[परिक्रम्यावलोक्य गन्धमाघ्राय च।] इदं तावत् पुराणनिम्ब तैलाक्तपरिभुज्यमानरसोनगन्धिभिश्चिताधूमैः पुरस्तादभिभावितस्य महतः श्मशानवाटस्य नेदीयः करालायतनम्॥ (७)

यत्र पर्य्यवसितमन्त्रसाधनस्य भगवद्गुरोः अघोरघण्टस्य आज्ञया सविशेषमद्य पूजासम्भारो मया सन्निधापनीयः, कथितञ्च मे गुरुणा, "वत्से कपालकुण्डले! अद्य मया भगवत्याः करालायाः प्रागुपयाचितं स्त्रीरत्नमुपहर्त्तव्यम्। तदत्रैव नगरे विदितमास्ते" इति तद्विचिनोमि।

---

(७) इदमिति। पुराणेन चिरन्तनेन निम्बतैलेन अक्तानां अक्तितानां परिभुज्यमानानां भर्जितुमारब्धानां रसोनानां लशुनानां ("लशुनं गृञ्जनारिष्टमहाकन्दरसोनकाः" इत्यमरः), गन्ध इव गन्धो येषां तैः ताद्दृशैः चिताधूमैः पुरस्तात् अग्रत एव विभावितस्य सूचितस्य महतः विस्तीर्णस्य श्मशानवाटस्य श्मशानाभिमुखविस्तृतपथस्य (वाटते वेष्टते जनैरिति वाटः, वट+घञ्) "वाटः पथि, पथो भाग" इति भास्करः। नेदीयः अतिसमीपवर्त्ति (अन्तिक + ईयसुन्, "अन्तिकबाढयोर्नेदसाधौ" इति अन्तिकशब्दस्य नेदादेशः), इदं दृश्यमानं करालायाः तदाख्यदेवतायाः आयतनं मन्दिरम्। अत्र मम गन्तव्यमिति भावः।

(८) यत्रेति। यत्र करालायतने। पर्य्यवसितं समाप्तं मन्त्रसाधनं पुरश्चरणात्मक-व्यापारविशेषः यस्य तथाभूतस्य सविशेष दिनान्तरेभ्यो विशेषेण आधिक्येन सह वर्त्तमानं यथा स्यात्तथा। पूजासम्भारः करालायाः नीपकरणसम्भारः, सन्निधापनीयः उपस्थापनीयः। विशेषमेव विशदयति—कथितमिति। प्राक् मन्त्रसाधनारम्भात् पूर्व्वं, उपयाचितं स्वीकृतं "अस्य मन्त्रसाधनस्य समाप्तौ भवत्यै स्त्रीरत्नमुपहरिष्यामी"ति प्रतिश्रुतमित्यर्थः ("यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये। उपयाचितकं तत्तु दोहदं समयाचकं॥" इति हारावली)। स्त्रीरत्नं

ছুরে অব্যক্তমধুর শব্দ করিতে করিতে ত্রিশূলের বৈজয়ন্তীকে ঊর্দ্ধে উঠাইয়া কম্পিত করিতেছে।

(৭) অগ্রেই পুরাতন নিম্বের তৈল মাখা রশুনের গন্ধের ন্যায় চিতাধূমের গন্ধে সংসূচিত বিস্তৃত শ্মশানপথের নিকটবর্ত্তী এই করালা দেবীর গৃহ।

(৮) সেই করালাদেবীর গৃহে সমাপ্তমন্ত্রসাধন আমার গুরু অঘোরঘণ্টের আদেশে আজ আমাকে বিশেষরূপে পূজোপহার উপস্থিত করিতে হইবে। গুরুদেব আমায় বলিয়াছেন "বৎসে কপালকুণ্ডলে! আজ আমার ভগবতী

[सकौतुकमग्रेऽवलोक्य ।] तत्कोऽयमतिगम्भीरमधुराकृतिः उत्स्मित-कुटिलकुन्तलः, कृपाणपाणिः श्मशानवाटमवतरति ? स एषः—(८)

कुवलयदलश्यामोऽप्यङ्गं दधत्परिधूसरम्,
ललितचरणन्यासः श्रीमान्मृगाङ्कनिभाननः ।
हरति विनयं वामो यस्य प्रकाशितसाहसः ।
प्रविगलदसृक्पङ्कः पाणिर्ललत्करजाङ्कुसः ॥(८)

वाचिकुमुकहा स्त्री, ("नारी नारी यदुत्कट तनु रत मयचत" इति विश्वः)। समवहर्तव्यं बलिकमेव दातव्यम्। तत् स्त्रीरत्न अत्रैव नगरे सुप्रसिद्धे पद्मावतीनामकजनपदे, विदितं सर्वजनानामत्र वाले तिष्ठति। इति मे गुरुणा कथितमित्यन्वयः। तस्मात् 'विचिनोमि' अन्विष्यामि। सकौतुक—"एतादृशमतिगम्भीरमधुराकृतिरयं कथमस्मिन् भीषणे महाश्मशाने निशायां सञ्चरति" इति कौतुकेन सह वर्त्तमानं यथा स्यात्तथेत्यर्थः। अतिगम्भीरा दृढभीषण-स्थानेऽपि भयकम्पादिविकाररहिता मधुरा कोमला च आकृतिर्यस्य सः। गाम्भीर्यमाधुर्ययो-र्लक्षणं यथा—

यथा—"विकाराः सहजा यस्य हर्षक्रोधभयादिषु।
भावेषु नोपलभ्यन्ते तद्गाम्भीर्यमुदाहृतम् ॥
अभ्यासात् करणानाञ्च श्लिष्टत्वमुपजायते।
महत्स्वपि विकारेषु तन्माधुर्यमुदाहृतम् ॥" इति

तथा उत्स्मित, गृहीतम् चत: कुटिलः वक्रः कुन्तलभारः केशकलापो यस्य सः, कृपाणः खड्गः पाणौ हस्ते यस्य सः, एवम्भूतः कोऽयं श्मशानवाटं अवतरतीत्यन्वयः। तमेव विशिनष्टि—स एष इति।

(८) कुवलयेति। कुवलयदलश्यामोऽपि स्वभावतः इन्दीवरपत्रवन्नीलवर्णोऽपि सन् परिधूसरं विरलभादिनिमित्तकसंस्कारराहित्यात् धूसरवर्णं अङ्गं दधत् धारयन्, ललितः

कराला देवীর নিকট পূর্ব্বপ্রতিশ্রুত স্ত্রীরত্ন উপহার দিতে হইবে। সর্ব্বজনবিদিত সেই স্ত্রীরত্ন এই পদ্মাবতীনগরেই আছে" সুতরাং আমি অন্বেষণ করিয়া দেখি। (কৌতুকের সহিত সম্মুখের দিকে অবলোকন করিয়া) কুঞ্চিতরূপে বদ্ধ কেশকলাপশালী ও অতি গম্ভীর মধুরাকৃতি ইনি আবার কে খড়্গহস্তে শ্মশান-পথে অবতরণ করিতেছেন?

(৮) ইনি স্বভাবতঃ নীলোৎপলদলের ন্যায় শ্যামবর্ণ হইয়াও বিপ্রলম্ভাদি

[निरूप्य] अये ! स एष कामन्दकीसुहृत्पुत्रो महामांसस्य पणयिता माधवः। तत्किमनेन, भवतु समीहितं सम्पादयामि। विगलितप्रायश्च पश्चिमसन्ध्यासमयः। तथाहि सम्प्रति—(१०)

मनोहरः चरणन्यासः पादविक्षेपो यस्य सः, श्रीमान् स्वभावतः कान्तिशाली, शशाङ्कनिभाननः शशाङ्कसदृशवदनः स एष इत्यन्वयः, परिलक्ष्यत इति शेषः। यस्य अस्य हस्तः विलसन् नरजाङ्गलं मनुष्यमांसं यस्य सः ("जाङ्गलं निर्जलस्थाने पिशिते पिशितेऽन्यवत्" इति मेदिनी), अत एव प्रविलसन्तः क्षरन्तः असृक्स्रुतः रक्तकर्दमा यस्मात् सः, अत एव च प्रकाशितं प्रकटीकृतं साहसं मांसार्थं मनुष्यमारणरूपं लोकोत्तरसाहसकार्यं येन सः तादृशः, वामः दक्षिणेतरः पाणिः करः विनयं विनीतभावं हरति विनाशयति अविनीततामेव द्योतयतीत्यर्थः। तथात्वं विनयसाध्यं साधयितुमेवैष पराक्रमेऽदनसाहसमङ्गीकृतवानिति भावः। साहसमुक्तं नारदेन यथा—

"मनुष्यमारणं चौर्यं परदाराभिमर्षणम्।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम्॥"

अत्र प्रथमार्द्धे लुप्तोपमालङ्कारः, द्वितीयार्द्धे च पदार्थहेतुकं काव्यलिङ्गमिति तयोः परस्परनैरपेक्ष्येण संसृष्टिरलङ्कारः। हरिणीवृत्तम्॥

(१०) निरूप्येति। निरूप्य श्रीमन्मालतीमाधवार्थं। स कामन्दकीसुहृदः कुण्डिनपुराधिपतिसचिवदेवरातस्य पुत्रः माधवः दृष्टपूर्व्वं इत्यर्थः, स एव महामांसस्य पणयिता क्रेता विक्रेता च। किमनेन तत् अवसरलोकनम्, पवनापहारेऽसौ चेति अपहारार्थमपयातो सुचिरं कथं प्रतीक्षितेति। अत्र महामांसविक्रयस्य अनुष्ठाने मालतीकाले मान्यादिप्रयोजनेऽपि श्रीमन्तेन महत्त्वान्न विरुद्धमिति मन्तव्यम्। तत् तस्मात् अनेन परस्परनुसरणेन किं ? कि अत्र किमपि प्रयोजनं नास्तीत्यर्थः। भवतु अवसरमेवमिति शेषः।

আগন্তুক কারণে পুনর্ব্বার অস্ত্র ধারণ করিয়াছেন। ইহার চরণবিক্ষেপ অতি মনোহর ও মুখচন্দ্রের ন্যায় সুন্দর এবং ইনি স্বভাবতঃই কান্তিশালী; কিন্তু সাহসপ্রকাশক বাম হস্ত ইহার বিনীতভাব বিনাশ করিতেছে। যেহেতু বাম হস্তে নরমাংস বিলসিত হইতেছে ও তন্নিবন্ধন সেই হস্ত হইতে রক্তকর্দম নিঃসৃত হইতেছে।

(১০) (নিরূপণ করিয়া) অহো! এই ব্যক্তি কামন্দকীর সুহৃৎপুত্র সেই মাংসবিক্রেতা হইয়া মাধব অবতরণ করিতেছে। তবে ইহার অনুসরণে আর

व्योम्नस्तापिच्छगुच्छावलिभिरिव तमोवल्लरीभिर्व्रियन्ते
पर्यन्ताः प्रान्तवृत्त्या पयसि वसुमती नूतने मज्जतीव।
वात्यासंवेगविष्वग्विततवलयितस्फीतधूम्याप्रकाशम्
प्रारम्भेऽपि त्रियामा तरुणयति निजं नीलिमानं वनेषु॥ (११)

स माधवः क कुत्र इदानीं वर्त्तते इति शेषः। अत्यासक्तः अत्याकाङ्क्षितः (तथाच कमनीय गौपथरतिरिति भावः) भर्त्ता पतिः तव स्वामी माधवः त्वां परित्रातुं इह समेत्य समुद्धरतु। (कथमपि मोचयितुं समर्थो स्यादिति भावः) अस्मिन् मांसाशी पक्षिविशेषः, तस्य अधःपातेन निपतनेन चकिता भीता वनवर्त्तिकेव वन्यपक्षिणीव किं किमर्थं चेष्टसे आत्मानं रक्षितुं ईहसे ? अस्मिन्नावपातचकितवर्त्तिका इव तवात्मरक्षणचेष्टा सर्वथैव विफला स्यादिति भावः। अपिच सम्बोधने। हे मालती ! चिरात् बहुदिनात् परं कृपणाकृतासि त्वं मया आक्रान्तासि। तथाच कथमपि त्वामहं न परित्यजामीति भावः।

« उपमालङ्कारः। वसन्ततिलका वृत्तम्।

(११) एनां मालतीं लवशो लवशः खण्डशो खण्डशः छित्त्वा छित्त्वा इत्यर्थः, निकृत्य छित्त्वा, दुःखं पीडादिना मरणादधिकक्लेशजनकं मरणं यस्याः तथाभूतां। आदिश्य बलादाकृष्य।

(घ) अहमपि अनुसरिष्यामि, मालत्या निःसहायमनसस्य ममापि निःसहायावस्था-

सक्ताभिमुख তোমার পতি এই মাধব (আসিয়া এখন) তোমাকে রক্ষা করুক। শ্যেন পক্ষীর নিপতনে ভীত বন্য পক্ষিণীর ন্যায় কেন বৃথা চেষ্টা করিতেছ ? অয়ি মালতি ! বহুদিন পরে আজ তুমি আমার কবলীকৃতা হইয়াছ।

(৩১) শ্রীপর্বতে নিয়া ইহাকে অতি খণ্ড খণ্ড রূপে ছিন্ন করিয়া ইহার অতি দুঃখজনক মৃত্যু সম্পাদন করিব। (বলপূর্বক মালতীকে গ্রহণ করিয়া কপালকুণ্ডলার প্রস্থান)

(গ) মদ। আমিও মালতীরই অনুসরণ করি। (পাদবিক্ষেপ করিয়া) প্রিয়সখি মালতি !

[प्रविश्य लवङ्गिका।] सहि मदयन्तिए! लवङ्गिआ क्खु अहम्। (फ)

मद। अवि सम्भाविदो तुए महाणुभाओ। (ब)

लव। णहि, णहि, सो क्खु उज्जाणवाडोवणिग्गमादो ज्जेव्व कलकलं सुणिअ, सावक्खेवावविद्धविकटोरुदण्डणिब्भरं पधाविअ,

---

(फ) सखि मदयन्तिके! लवङ्गिका खलु अहम्।

(ब) अपि सम्भावितस्त्वया महानुभावः।

(भ) नहि नहि, स खलु उद्यानवाटोपनिर्गमादेव कलकलं श्रुत्वा, सावक्षेपावविद्ध-विकटोरुदण्डनिर्भरं प्रधाव्य परानीकं प्रविष्टः। ततः प्रतिनिवृत्ताऽस्मि मन्दभागिनी, अपीति च कष्टं कष्टं गुणानुरागकातरस्य पौरलोकस्य "हा महानुभाव माधव! हा मकरन्द! हा

महासुहृत्त्वादिति भावः। परिक्रम्य तदनुगमनीयपादविक्षेपं कृत्वा। अन्धकारेणालक्षितेव आगच्छन्त्या लवङ्गिकायाः पदस्पन्देन मालतीं सम्भाव्य सम्बोधयसि—सखि मालतीति।

(फ) मदयन्तिकाया भ्रमं निरसितुमाह—लवङ्गिका खल्वहमिति, न तु मालतीति भावः।

(ब) अपि त्वयि, महानुभावो माधवः, त्वया सम्भावितः मालतीवार्त्ताप्रदानाय संप्राप्तः किमित्यर्थः।

(भ) नहि नहीति, सम्भावित इति शेषः। कथमित्याह—स खल्विति। उद्यान-वाटात् उद्यानप्राकारात् उद्यानमार्गाद्वा (वाटी मार्गे वृत्तिस्थाने-स्यात् कुटीवास्तुनोः स्त्रियामिति मेदिनी) उपनिर्गमो निःसरणं तस्मादेव ततःपरमेव। 'कलकलो वेष्टाना कलरवं', सावक्षेपं सावहेलं अपविद्धाभ्यां क्षिप्ताभ्यां विकटाभ्यां परिवाहिभ्यां उरुदण्डाभ्यां निर्भरं निरतिशयं यथा स्यात्तथा प्रधाव्य धावित्वा, परानीकं परसैन्यं, ततः परकीयसैन्यप्रवेशानन्तरं। प्रति-

---

(ফ) লব। (প্রবেশ করিয়া) সখি মদয়ন্তিকে! আমি লবঙ্গিকা (মালতী নহি)।

(ব) মদ। মহানুভব মাধবকে তুমি পাইয়াছিলে ত?

(ভ) লব। না না (আমি তাঁহাকে পাই নাই) কারণ তিনি এই উদ্যান-প্রাকার হইতে নির্গমনের পরেই সৈন্যের কলরব শুনিয়া সাবহেলে বিক্ষিপ্ত

पराणीअं पविट्ठो, तदो पडिणिउत्तह्मि मन्दभाइणी, सुणामि अ घरे घरे गुणाणुराअकाअरस्स पोरलोअस्स, "हा महाणुभाव ! हा माहव ! हा मअरन्द ! हा साहसिअ ! त्ति परिदेवणाओ, किल एदाणं मन्तिधीआणं विप्पलम्भवुत्तन्तं सुणिअ, सञ्जाअमच्छराधिक्खेवो, तक्खणविसज्जिदपोढपाइक्कणिवहो चन्दादवेण सोहसिहरट्ठिदो पेक्खदित्ति मन्तोअदि । (अ)

साहसिक !" इति परिदेवनाः, महाराजोऽपि किलैतयोर्मन्त्रिदुहित्रोर्विप्रलम्भवृत्तान्तं श्रुत्वा, सञ्जातमत्सराधिक्षेपस्तत्क्षणविसर्जितप्रौढपदातिनिवहश्चन्द्रातपेन सौधशिखरस्थितः प्रेक्षत इति मन्त्र्यते ।

निवृत्तास्मि प्रत्यागतास्मि, मन्दभागिनीति सहमिति शेषः, मालतीवाञ्छितदानासामर्थ्यमेवात्र मन्दभागिनीत्वाभिधाने हेतुः । परिदेवनाः खेदोक्तीः । विप्रलम्भवृत्तान्तं प्रवञ्चनावार्त्तां, सञ्जातमत्सराधिक्षेपः समुद्भूतविद्वेषतिरस्कारः, तत्क्षणे तदानीमेव विसर्जितः समादिष्टोऽवरोधार्थं प्रेरितः प्रौढः दक्षः पदातिनिवहः पदातिसैन्यसमूहो येन तथाभूतः । चन्द्रातपेन चन्द्रालोकेन (विरहिजन सन्तापकतया आतपत्वाभिधानम्) परिशोभित इति शेषः, (तदानीं-तनस्थानावस्थित इति भावः) प्रेक्षते माधवमकरन्दाभ्यां सह स्वकीयसैन्यानामाहवं अवलोकयति । इति मन्त्र्यते पुरवासिभिः परस्परमालाप्यते । इति च समीचीनोऽर्थः ।

বিদায় উহারাও দ্বারা নিরতিশয়রূপে ধাবিত হইয়া শত্রু-সৈন্যমধ্যে প্রবিষ্ট হইয়াছেন। মন্দভাগিনী আমিও তৎপরে প্রতিনিবৃত্তা হইয়া আসিলাম, এবং (আসিতে আসিতে "হা মহানুভব মাধব! হা মকরন্দ! হা সাহসিক! ইত্যাদিরূপ গুণানুরাগ কাতরপুরবাসিদিগের বিলাপ শুনিলাম। আরও শুনিলাম "মহারাজও এই মন্ত্রী ও দুহিতার প্রতারণা বৃত্তান্ত শুনিয়া বিদ্বেষ ও তিরস্কারের উদ্ভূতিবশতঃ তৎক্ষণাৎ সুদক্ষ সৈন্যসমূহ পাঠাইয়া চন্দ্রালোকে বিভূষিত ও প্রাসাদের ছাদের উপরে সংস্থিত হইয়া মাধব ও মকরন্দের সহিত নিজ সৈন্যের যুদ্ধ দেখিতেছেন" এই কথা পুরবাসীরা বলিতেছে।

मद। हा हदम्हि! मन्दभाइनी। (म)

लव। सहि! मालदी उण कहिं?। (य)

मद। सा क्खु पढमं ज्जेव्व दे मग्गमवलोइदुं पसरिदा, पच्छादो अहं ण तां पेक्खामि। अवि णाम उज्जाणगहणपविट्ठा भवे? (र)

लव। सहि! तुरिदं अण्णेसह्म। अदिकादरा णो पिअ-

(म) हा हतास्मि मन्दभागिनी।

(य) सखि! मालती पुनः क्व?

(र) सा खलु प्रथममेव ते मार्गमवलोकयितुं प्रसृता, पश्चादहं न च तां पश्यामि। अपि नाम उद्यानगहने प्रविष्टा भवेत्?

(ल) सखि! त्वरितमन्विष्यावः। अतिकातरा नः प्रियसखी, अभिन्नवसरे न धारयत्यात्मानम्। सखि मालति! ननु भणामि मालतीति।

(म) हतास्मीति, अयं पार्श्वेव कोपपरवशेन केनापि प्रेषितास्मीति तयोः परित्राणासम्भवादिति भावः।

(य) क्व पुनः स्थिता इति शेषः।

(र) ते मार्गे तव प्रत्यागमनपथं प्रसृता मत्सकाशात् निर्गता। सम्भावनायां नाम-शब्दः। उद्यानगहने उद्यानस्य निविड़स्थाने।

(ल) अभिन्नवसर इति, माधवस्य जीवितप्रत्याशमये, आत्मानं प्राणान् न धारयति वियोगासहतया धारयितुं न शक्नोतीति। परिक्रम्येति मालत्यान्वेषणार्थमुभे एव पादविक्षेपं कृत्वा आहतुरित्यर्थः। ननु भद्रोऽसावनुनयो, तथापि अनुनयं कृत्वा सखि मालतीति भणामि तथापि किं नोत्तरं यच्छतीति भावः।

(ম) মদ। হা মন্দভাগিনী! আমিও হত হইলাম।

(য) লব। সখি! মালতী কোথায়?

(র) মদ। সে প্রথমেই তোমার প্রত্যাগমনপথ দেখিবার জন্য নির্গতা হইয়াছিল, তৎপরে আর আমি তাহাকে দেখিতেছি না। সম্ভবতঃ উদ্যানের নিবিড় স্থানে প্রবিষ্টা হইয়া থাকিবে।

(ল) লব। সখি! সত্বর আমরা অন্বেষণ করি। আমাদের প্রিয়সখী

सही इमस्सिं अवसरे ण धारेदि अप्पाणम्। [त्वरितं परिक्रम्य ।] सहि मालदि ! णं भणामि सहि मालदित्ति । इतस्ततः परिक्रामतः । (ख)

[प्रविश्य प्रहृष्टः कलहंसकः ।] दिट्ठिआ कुसलेण णिग्गदो म्हि संगमादो । ह्हीमाणहे ! पेक्खामि विअ णिम्मलणिरन्तरपहुत-धोद-तरवारिधारा-पडिफलिद-चन्दकिरणुज्जलभोसणदंसणं, मद-लीलाकलिदकामपालवियटभुजदण्डाविद्ध-इलहेला-विव भत्तिदुद्धम-डुत्तरङ्ग-कलिन्द तणआसंतसग्गिह विसकुसुप्पडिदणिहचमण्डम-परन्दज्झदसरकखोभविसडपडिलोध-पडिबदा णगुणदधमत्थगभणकण्णा-चचासम्भिसत्तकलकलं पारकमलसमूहम् । (ग)

(ख) दिष्ट्या कुशलेनास्मि निर्गतः सङ्गमात्। ह्हीमानहे प्रेक्षे इव निर्मलनिरन्तरोद्धूत-धौततरवारिधाराप्रतिफलितचन्द्रकिरणोज्ज्वलितभीषणदर्शनं मदलीलाकलितकामपालविकट-भुजदण्डाविद्धहलहेलाविक्षिप्तोर्मि भिन्नतरङ्गकालिन्दतनयावीतःचक्रिभ 'विसकुसुमोच्छलितनिर्दया-मन्दमकरन्दव्यतिकरक्षोभविकटप्रतिलोमपरिवर्तनीक्षणमसहनवासभारकार्यविकसत्कलकलं पारकमलसमूहम् ।

(ग) प्रविश्येति । दिष्ट्या भाग्येन, कुशलेन अनाहतदेहतया सङ्गमेन संग्रामात् युद्धविमर्दात् अहं निर्गतः निःसृतः अस्मि । "ह्हीमाणहे" इति सौरसेन्यादिभाषायां महर्षं-सूचकमव्ययम् । निर्मला मालिन्यरहिता निरन्तरोद्धृता सर्वदा विधार्यमाणा उत्तोलकम्पिता धौता निर्मिता च या तरवारिधारा असिधारा, तस्यां प्रतिफलितः प्रतिबिम्बितैः चन्द्रकिरणैः उज्ज्वलितं प्रकाशितं भीषणं भयङ्करं दर्शनं यस्य तथाभूतं मदस्य बलोन्मत्तायाः लीलया

মালতী অত্যন্ত কাতরা, মাধবের এই জীবনাশঙ্কা সময়ে সে জীবন ধারণ করিতে পারিবে না। সখি মালতি! অনুনয় সহকারে "সখি মালতি"! বলিয়া ডাকিতেছি, (তথাপি প্রত্যুত্তর দিতেছ না কেন?) (উভয়ে ইতস্ততঃ পাদবিক্ষেপ করিতে লাগিল)।

(গ) কল। (হর্ষের সহিত প্রবিষ্ট হইয়া) ভাগ্যক্রমেই আমি সেই যুদ্ধ-বিমর্দ পথ হইতে কুশলে নির্গত হইয়াছি। আহা! যাঁহাদের ভীষণদর্শন নির্মল সতত কম্পিত ও নির্মিত অসিপংক্তিতে প্রতিফলিত চন্দ্রকিরণ দ্বারা

अविअ। सुमरामि भीसणभुअअज्जज्जरिदपञ्जरावसरिद-सुभडहत्थावलुत्तविविहाउहणिवहघातिदासेस-रिउसेण्णं इदविअड्ढा-पसारपाइक्कसुण्णमग्गसञ्चारणिवत्तिद-विसम-समरसाहसं णाहमा-हवम्। (ग)

(ग) अपिच स्मरामि भीषणभुजभुजर्जरितपञ्जरापसृतसुभटहस्तावलुप्तविविधायुधनिवह-

---

क्रियया कलितः समन्वितः समतीवबलप्रकाशोन्मत्त इति यावत्, यः कामपालः हलायुधः तस्य विकटाभ्यां परिणाहिभ्यां भुजदण्डाभ्यां आविद्धेन आकर्षणार्थं कथञ्चित् परिचालितेन हलेन लीलयाकृष्टेन हेलया अवहेलया विह्वलिता आकुलीकृता, अतएव तदङ्गम् तीरोपरि समुच्छलत् तरङ्गं यथास्यात्तथाभूता या कलिन्दतनया यमुना तस्याः स्रोतःसन्निभं जलप्रवाहसदृशं, (अत्राविच्छिन्नोच्छलितत्वेन नीलवर्णत्वेन च सैन्यस्य साम्यजलप्रवाहसाम्यं बोध्यम्) तथा विपक्षं शत्रुसैन्यं युद्धनियमरहितमिति यावत्, यथा स्यात्तथा उत्पतितः अत्र सैन्याक्रमणार्थं तदुपरिनिपतितः निर्दयो गत्वरणो दयारहितः अमन्दः युद्धकरणे अनलसश्च यो मकरन्दः तस्य व्यतिकरेण सम्पर्केण आक्रमणेनेति यावत्, यः क्षोभः वैकल्यं तेन विकटपतितवयोधाना विद्रावयन् सैन्यानां यत् परिवर्तनं पलायनं तेन उद्गतः उत्पन्नः समस्तगगनाङ्गनाकारे सकलाकाशप्रदेशान्तराले विकटम् प्रकाशमानः कलकलः कोलाहलो यस्य तथाभूतं पारकीयसैनिकनिचयं प्रेक्षे इव पश्यामीव। अद्यत्वेऽपि तदीयसम्भ्रममशुनापि विस्मर्तुं न शक्नोमीति भावः।

(घ) अपिचेति। भीषणाभ्यां वज्रवत्कठिनबाहुभ्यां जर्जरितपञ्जराः विचूर्णितपार्श्वास्थिनिचयाः अत एव अपसृताः पलायनोद्यताः ये सुभटाः सुनिपुणरिपुसैनिकाः तेषां हस्तेभ्यः अवलुण्ठनेन बलाद्ग्रहणेन विविधानां नानाप्रकाराणां आयुधानां अस्त्राणां निवहेन

প্রকাশিত,যাঁহারা অত্যন্ত বলপ্রকাশোন্মত্ত বলরামের বিশাল ভুজদণ্ড পরিচালিত লাঙ্গল দ্বারা আকুলীকৃতা ও তীরোপরি তরঙ্গিত যমুনা নদীর জলপ্রবাহ সদৃশ, এবং বিশৃঙ্খলভাবে আক্রমণার্থ নিপতিত নির্দয় ও যুদ্ধে আলস্য রহিত মকরন্দের আক্রমণজনিত ক্ষোভ বশতঃ শত্রুসৈন্যের পলায়ন দ্বারা সমুৎপন্ন যাহাদের কোলাহল সমস্ত আকাশপ্রদেশে প্রকাশমান হইতেছিল, তাদৃশ পরকীয় সৈন্য-সমূহ যেন এখনও আমি দেখিতেছি।

(ঘ) যিনি ভীষণ ভুজদ্বয় দ্বারা বিচূর্ণীকৃত পঞ্জর পলায়মান সুনিপুণ শত্রুসৈন্যের হস্ত হইতে বলপূর্ব্বক বিবিধ অস্ত্রসমূহ গ্রহণ করিয়া তদ্দ্বারা সমস্ত

अहो गुणाणुराओ णरिन्दस्स। जं दाणिं सोहसिहराअत्तिस्स-पड़िहारविणओपणामपड़िभसिद-विरोहो, सोम्मेक्करसोवणोद-माहव-मअरन्दसुहचन्दे अलोइअ वारंवारं पसारिदसिणिद्धलोअणो, कल-हंसणादो अभिजण्ण' आणिअ णिवत्तिदमहग्घवहुमाणो, फुरन्त-मच्छरेण्णारवेसत्थ-मसोमलिणिअ-मुहे भूरिवसुणन्दणे महुरवअणो-

_ घातितायैरिपुबलेभ्य इतस्ततः पलायमानेभ्यः पदातिभ्यश्च भीतिभ्रमिततरक्षार्थ माधवम्।

(ख) अहो। गुणानुरागो नरेन्द्रस्य, यदिदानीं सौधशिखरावतीर्णप्रतीहारविनयोपन्यास-प्रतिपादितविरोधौ, सौम्यैकरसोपनीतमाधवमकरन्दमुखचन्द्रौ अवलोक्य वारंवारं प्रसारित-स्निग्धलोचनः, कलहंसनादभिजनं ज्ञात्वा निर्वर्तितमहार्घबहुमानः, स्फुरन्मत्सरद्वेषाभिसौमलि-

घातिता विनाशिता, भग्नेषा रिपुसेना, येन तथाभूतम्, तथा कृतवा माधवमकरन्दाभ्यामता विकटानां विकटतर सैन्यानामित्यर्थः, भयमरिव अपसरणैव पदातियुग्मे पादचारिसैन्यरहिते मार्गे तस्मिन् राजाध्वनि मध्ये हन्तसतः सचलनेन निर्वर्तितं सम्पादितं विषमं भीषणं समरसाहसं युद्धसाहसं येन तथाभूतं माधवमकरन्दाभ्याम् अपि स्मरामि विनिततानःकरणेन परिचिन्तयामि।

(ग) अहो इति। नरेन्द्रस्य नन्दनपितुः, गुणानुरागः गुणपक्षपातः। गुणानुरागमेव विशदयति—यदित्यादिना। सौधशिखरात् प्रासादोपरिभागात् अवतीर्णस्य सन्नीयानुमत्या-ऽवतरणेत्यर्थः प्रतिहारस्य द्वारपालस्य (प्रतिहारी द्वारि द्वाःस्थे द्वाःस्थितायान्तु योषिति इति मेदिनी) विनयोपन्यासेन सुशिक्षणमात्र सविनयवाक्यप्रयोगेन प्रतिपन्नितः निवारितः विरोधः स्वसैनिकैः सह माधवमकरन्दयोर्युद्धं येन तथाभूतः, सौम्यैकरसेन शान्तैकरसेन मानवस्वभावेन वाक्यप्रयोगेनेति यावत्, उपनीतयोः द्वैन कृतप्रायस्त्रैव स्वसमीपं प्रापितयोः माधवमकरन्दयोः मुखचन्द्रौ वदनसुधाकरौ अवलोक्य दृष्ट्वा वारंवारं पुनःपुनः प्रसारिते तथा स्वच्छभावलोकनार्थं

সৈন্যকে বিনাশিত করিয়াছেন এবং যিনি আহত ভীষণ শত্রুসৈন্যদিগের পলায়নে পদাতি সৈন্যশূন্য রাজপথে ইতস্ততঃ বিচরণ করিয়া বিষম সমর সাহস সম্পাদিত করিয়াছেন, সেই নাথ মাধবকেও স্মরণ করিতেছি।

(খ) আহা! রাজার কি গুণানুরাগ, যে হেতু সম্প্রতি প্রাসাদশিখর হইতে অবতীর্ণ দ্বারপালের বিনীত বাক্য দ্বারা স্বকীয় সৈন্যগণের সহিত মাধব ও মকরন্দের বিরোধ প্রশমিত করিয়া শান্তরসপূর্ণ বাক্য দ্বারা সেই

वच्चासेण, किं दाणिं तुम्हाणं भुअणाभोअभूसणेहिं महाणुभावेहिं अभिजणदंसणगुणाहिरामेहिं णवचन्द-दंसणरमणीएहिं जामादुएहिं परितोसोत्ति पडिबोहिअ, गदो अब्भन्तरं राआ। इमेवि माहव-मअरन्दा आअच्छन्ति। अहम्पि भअवदीए एदं वुत्तन्तं निवे-देमित्ति। निष्क्रान्तः। (५)

निरुद्धो भूरिवसुनन्दनौ मधुरवचनोपन्यासेन "किमिदानीं युवयोर्भुवनाभोगभूषणाभ्यां महानुभावाभ्यामभिजनदर्शनगुणाभिरामाभ्यां नवचन्द्रदर्शनरमणीयाभ्यां जामातृभ्यां परितोष" इति प्रतिबोध्य, गतोऽभ्यन्तरं राजा, एतावपि माधवमकरन्दावायच्छतः। अहमपि इमं वृत्तान्तं भगवत्यै निवेदयामीति।

विस्फारिते लोचने येन तथाभूतः, कञ्चुकसकाशात् मया अभिजनं माधवमकरन्दयोः, वंशमर्यादां ज्ञात्वा विदितं परिज्ञाय निर्भर्त्सितः सम्पादितः महार्घो महामूल्यः अनन्यलभ्य इत्यर्थः, बहुमानः माधवमकरन्दयोरतिशयसम्मानः येन तथाभूतः स्फुरन्ति प्रकाशमानानि यानि मत्सरेर्ष्या-वैलक्ष्याणि विद्वेषक्रोधकर्त्तव्यताविमूढत्वानि तान्येव मसाः कज्जलानि (मेघा मलीमसं मनाङ्मनश्च श्यामलितं योरिति त्रिकाण्डशेषः) ताभिर्मलिनिते मालिन्यमापादिते मुखे ययोः तथाभूतौ भूरिवसुनन्दनौ, (अत्र मत्सरेर्ष्यानन्दनस्य मनोरथानीये, भूरिवसोश्च वैलक्ष्यमेव मनोरथानीयं भूरिवसोर्यावत्मत्सरेर्ष्याकारणविरहादिति मन्तव्यम्) भुवनाभोगस्य विश्व-प्रपञ्चस्य भूषणाभ्यां अलङ्करणस्वरूपाभ्यां महानुभावाभ्यां धैर्यवीर्यादिना निरवद्यभावाभ्यां अभिजनं वंशः दर्शनं मालक्षणं गुणाः विनयादयः तैः अभिरामाभ्यां मनोज्ञाभ्यां नवचन्द्रवत् दर्शनेन प्रिया रमणीयाभ्यां आभ्यां जामातृभ्यां युवयोरिदानीं परितोषः सन्तोषः किम्? जात इति शेषः। (ईदृशसर्वगुणसम्पन्नजामातृलाभेन सन्तोषोत्पादः सर्वथैव स्वाभाविक इति भावः) इति इत्थं प्रतिबोध्य स्वयमेव पतिताङ्गीकारेण मालतीमदयन्तिकयोरपहरणादप्रतिकार्यतया

দ্বারপাল কর্ত্তৃক সমীপে সমানীত মাধব ও মকরন্দের মুখচন্দ্র অবলোকন করিয়া দর্শনার্থ বারংবার স্নিগ্ধলোচন প্রসারিত করিতেছিলেন, এবং আমার নিকটে মাধব ও মকরন্দের বংশমর্য্যাদাদি পরিজ্ঞাত হইয়া তাহাদের প্রতি অনন্যলভ্য পরম সম্মান সম্পাদিত করিতেছিলেন। পরন্তু প্রকাশমান বিদ্বেষ ক্রোধ ও কর্ত্তব্যতাবিমূঢ়স্বরূপ কালীমায় মলিনীকৃত ভূরিবসু ও নন্দনকে মধুর বচন দ্বারা "কেমন বিশ্বপ্রপঞ্চের অলঙ্কার স্বরূপ, মহানুভাব,

ततः प्रविशतो माधवमकरन्दौ । (३२)

मक । अहो प्रेयसः सर्वपुरुषातिशायि निर्व्याजमूर्जितं तेजः ।

तथाहि—(३३)

दोर्निष्पेषविशीर्णसन्धयदलत्कङ्कालमुन्मथ्नतः

प्राग्वीरानुपत्य संतृप्तचरणानाक्षिप्य विक्रामतः ।

---

* माधवमकरन्दौ, अनेकबलपक्षतया च आत्मानमाद्रीकरणेन आनन्दिता राजा नन्दनं पद्मावतीपुरं गतः । तदानी राज्ञो गुणानुरागेण विना वैकल्यादपि नीतं तद्विनिमयेन बहुमानं सम्पादनं आत्मादरीकरणञ्च कर्त्तव्यमस्तीति भावः ।

अनिः पुनर्भवेन । निरोधस्य गमनं इति व्याख्यानेन प्रतिमानं निमयमकरन्दम् ।

(३३)* अहोति । अहो इत्याश्चर्ये, प्रेयसः प्रियतमस्य माधवस्य निर्व्याजं अव्यभिचरितं ऊर्जितं बलवत् तेजः विक्रमः सर्वपुरुषातिशायि सर्ववीरपुरुषातिशयि । सर्वपुरुषातिशयित्वमेव समर्थयितुमाह—तथाहीति ।

(३४) दोरिति । प्राक् रणक्षेत्रागमनस्य प्रथमं वीरान् कतिचित् शूरान् सैन्यान् अनुपात्य अनुधाव्य अचिरेणैव कपटेन भूमौ निपात्य दोर्भ्यां बाहुभ्यां निष्पेषेण भुजौ विपीड्यैव विशीर्णाः विच्छिन्नाः सन्धयः अस्थिसन्धानानि येषां तथाभूताः, अतएव दलन्तः स्वयमेव खण्डशः पतन्तः कङ्कालाः शरीरास्थीनि यस्मिन्, तथा कायाः उन्मथ्नतः विलोडयतः तथा संतृप्तचरणानि वैरिजनाङ्गुष्ठानि आक्षिप्य अवकर्षयन् समन्तात् विक्रामतः अथ कौशैः सह समरं कुर्वतः प्रेयसः प्रिय

মদন শাস্ত্রজ্ঞান ও বিনয়াদি গুণ দ্বারা মনোহর, এবং নবচন্দ্রের ন্যায় সৌন্দর্য্য দ্বারা রমণীয় এই আমাদের দ্বারা তোমাদের সন্তোষ হইয়াছে ত ?" ইত্যাদি বলে বুঝাইয়া অন্তঃপুরে চলিয়া গিয়াছেন। মাধব এবং মকরন্দও আসিতেছেন। আমিও যাইয়া এই বৃত্তান্ত মালতীর নিকট নিবেদন করি। (এইরূপে নিষ্ক্রান্ত হইল)।

(৩২) (অনন্তর মাধব ও মকরন্দের প্রবেশ)।

(৩৩) মক। অহো! প্রিয় মাধবের সর্বলোকাতিশায়ী তেজস্বিতা কি বলবত্তর!! কেননা—

(৩৪) রণক্ষেত্রে আসিয়া প্রথমেই কতিপয় বীরকে কৌশলক্রমে ক্রমশঃ ভূমিতে নিপাতিত করিয়া বাহুনিষ্পেষণে বিচ্ছিন্ন সন্ধিবন্ধন শরীরাস্থিসকল

उद्वेलत्करकण्डखण्डनिकराकीर्णस्य, संक्षोदधै-
र्द्वे धास्खलितपरिपिण्डक्तिविकटः पन्थाः पुरस्तादभूत् ॥ (३४)

माध । ननु अनुशयस्थानमेतत् । पश्य—(३५)

यद्यैवेन्दुमयूखखण्डखचितं पीतं निशीथोत्सवे
यैर्लीलापरिरम्भदायिदयितागण्डूषपीयं मधु ।

माधवस्ये ति यद्यपिमान्वय., पुरस्तात् अग्रतः उर्द्ध ऊर्द्धं स्पन्दता चलेन अविरलेन करकखण्ड-निकरेण करकखण्डनिचयेन आकीर्णस्य आच्छन्नस्य संक्षोदधैः आहवार्णवस्य द्वेधा द्विप्रकारेण स्मरस्थिरेभि सञ्चरतो माधवस्योभयपार्श्वे न इत्यर्थः, अभितया अयादिभिर्निर्मन्दितया पत्तिपङ्क्त्या पदातिसैन्यश्रेण्या विकटः विशालः पन्था मार्गः अभूत् । तथाच प्रियमाधवनैश्रमः सर्वपुरुषाति-शायित्वं विना नैतादृक्पयस्य सम्भव इति भावः ।

अत्र प्रत्यनुप्रासश्च काव्यार्थौ शब्दालङ्कारौ, संक्षोदधैरिति लुप्तोपमा चार्थालङ्कार इति तेषा सङ्करः । शार्दूलविक्रीडितं वृत्तम् ।

(३५) माधेति । निश्चयेऽत्र ननुशब्दः । एतत् त्वया वर्ण्यमानं समरवृत्तं अनुशय-स्थानं विवेकिनां परिविम्नस्थानं । कुत इत्यत आह—पश्येति ।

(३६) यद्यैवेति । यद्यैव निशीथोत्सवे अर्द्धरात्रीयकामदेवमहोत्सवे यैर्वीरैः इन्दु-मयूखखण्डैः चन्द्रकराधारम्भप्रविष्टसुधांशुकिरणांशैः खचितं सम्वलितं लीलया परिरम्भ-दायिनीनां आलिङ्गनार्पयित्रीणां दयितानां प्रियाणां गण्डूषपीयं वदनविवरपूरणार्थमिष्टं मधु

যাহাতে বিরলিত হয়, এরূপভাবে তাহাদিগকে খণ্ডিত করিতে করিতে এবং তাহাদেরই অস্ত্রসকল আকর্ষণে গ্রহণ করিয়া অন্য বীরগণের সহিত যুদ্ধ করিতে করিতে প্রিয় মাধবের অগ্রভাগে ঊর্দ্ধে স্পন্দমান অবিরল করকখণ্ড-নিচয়ে পরিব্যাপ্ত যুদ্ধসমুদ্রের দুই প্রকারে (অর্থাৎ সৈন্যচ্ছেদন করিতে করিতে ভ্রমণকারী মাধবের উভয় পার্শ্বে) ভয়ে নিস্পন্দিত পদাতিসৈন্যশ্রেণী দ্বারা বিশাল পথ নির্ম্মিত হইয়াছিল।

(৩৫) মাধ। তোমার বর্ণ্যমান এই রণক্ষেত্র নিশ্চয়ই বিবেকীদিগের চিন্তার স্থল। দেখ—

(৩৬) অর্দ্ধ রাত্রির মদনমহোৎসবে যে সকল বীরগণ ঊর্দ্ধমুক্ত গবাক্ষরন্ধ্র-প্রবিষ্ট চন্দ্রকিরণে পরিব্যাপ্ত লীলাক্রমে আলিঙ্গনদায়িনী বনিতাদিগের গণ্ডূষা-

पश्यन्त्येव भवन्तु जार्णवगुरुव्यापारभग्नाशिभि-
र्गीतैस्ते कथयन्त्यसारविधुरान् प्रायेण संसारिणः ॥ (२६)

स्मर्तव्यन्तु सौजन्यमस्य नरपतेः, यत् अपराधिनोरपि अन-पराद्धयोरिव नौ कृतप्रसादमधिष्ठितवान्। तदिह मालतीसमक्षमधुना मदयन्तिकायाः हरणवृत्तान्तं विस्तरतः कथ्यमानं श्रोतुमिच्छामि। अन्यच्च—(३०)

'मद पीत'। ते धीराः, धन्यास्त एव अधुनैव मनसी मकरन्दस्य तव सुभार्गनयो सुमकपार्श्वयो मर्गसम्भुसयोर्भ्वा गुरुव्यापारेण महदाघातरूपक्रियया भग्नानि चूर्णितानि अस्थीनि येषां तथाभूतैः गात्रैः देहैः, स सारितां लोकान् प्रायेण बाहुल्येन असारैव स्थिराशयाभावेन विधुरान् विकलान् ("असारविधुरान्" इति पाठे तु असारान् स्थिरगाम्भीर्यान् अत एव विधुरान् अपमधुरानित्यर्थः) कथयन्ति सूचयन्ति। कीदृशिन् सौभाग्यमालिना सुखेनैव दीर्घकालगतिधानदर्शनात् प्राणीति-लुप्तम्। तथाच विविधकाः एतत्सुसमय्याधारकवलीका सांसारिकसुखभागीर अवशद्धुरस्य चिन्तयन्तो विरक्ताः भवन्तीति भवाङ्गनिवासुमनस्यबाधिदिवि भावः।

अत्र सांसारिकाणामसारविधुरत्वमूपनक्रियायां ताडनयोरर्थां कर्णलेनान्वयान्वयात् वीरयोः सहसा ताडयप्राप्तिमदनान्तरस्य सांसारिकाणामसारविधुरत्वस्य च विधायनिमित्तभाव बोधनात् समयसनुमन्वयरूपनिदर्शनालङ्कारः। यत् भुजावेशैरिव विनिमयकारणेन कपकोपमयोः सन्देहसङ्कर कथनमीयकाव्यप्रयोगेन सङ्करः। "सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शने"ति दर्पणोक्त निदर्शनालक्षणम्। शार्दूलविक्रीडितं वृत्तम्।

(३०) स्मर्तव्यमिति। नरपतेः नन्दनपितुः अपराद्धयोरपि मालतीमदयन्तिकयोर-पहरणादिना कृतापराधयोरपि नौ आवयोः कृतप्रसादं स्वयं सानादरतायोगारधीन

থাকিতে সহসা কঠিনতর ছিল, সম্প্রতিই তাহারা তোমার কুমারগণের শুক আঘাতে ভগ্নাস্থি শরীর দ্বারা বাহুল্যতঃ সংসারীদিগকে স্থিরাংশাভাবপ্রযুক্ত বিকল রচনা করিতেছে।

(৩০) এই রাজার সৌজন্য অবশ্য স্মরণীয়, যেহেতু মালতী মদয়ন্তিকা হরণাদি দ্বারা অপরাধী হইলেও অনপরাধীর ন্যায় আমাদের সম্বন্ধে অনুগ্রহ করিয়াই তিনি অধিষ্ঠিত। তবে এস সম্প্রতি মালতীর সমক্ষে কথ্যমান

कथयति त्वयि सस्मितमालतीचलितलोलकटाक्षपराहतम् ।
वदनपङ्कजमुल्लसितत्रपास्तिमितदृष्टि सखी नमयिष्यति ॥ (३८)

[इति परिक्रामतः ।] अयमसौ उद्यानवाटः । प्रविशतः । (३९)

माध । कथं शून्या एव प्रदेशाः । (४०)

मूर्तिरनुगच्छतयोः माधवेन च क्रमानुगम्यं यथा मालत्या कथितमनु निरनुबोध स्थितः । कथयामानिति, स्वयेत्यादिः । अत्र च मालतीमनस्य तत्कथने फलान्तरं ।

(३८) किं फलान्तरमित्याकाङ्क्षायामाह—कथयतीति । त्वयि मकरन्दे कथयति मदयन्तिकाहरणवार्त्तां विस्तरतो ब्रुवति सति सखी मदयन्तिका (परमसखीसम्बन्धेन मालतीसखीत्वमिति मन्तव्यम्) सस्मितया कौतुकोद्दीपककथाश्रवणेनेषद्धास्ययुक्तया मालत्या चलितेन परिचालितेन लोलेन चञ्चलेन कटाक्षेण पराहतं संहतं, तथा उल्लसितया स्वसम्बन्धिवृत्ताकर्णनोद्गतया त्रपया लज्जया स्तिमिता निस्पन्दा दृष्टिर्यत्र तादृशं वदनपङ्कजं पङ्कजवत् स्वकीयमुखं नमयिष्यति अवनतं विधास्यति । तथा चालीकहरणवार्त्तासहर्षमनेन तत्र तदङ्गनान्तर्मदनः फलान्तरमिति भावः ।

अत्र वदनपङ्कजमित्युपमा, उल्लसितत्रपेत्यादिपदार्थस्य नमनं प्रति हेतुत्वात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः उभयोरङ्गाङ्गिभावेन सङ्करः । एवं "युक्तिरर्थावधारण"मिति लक्षणात् युक्तिर्नाम नाट्यालङ्कारश्चेति । द्रुतविलम्बितं वृत्तम् ।

(३९) इतीति । परिक्रामतः मालत्यादिसमीपगमनाय पादविक्षेपं कुरुतः । असौ अदूरे मालत्यादयस्तिष्ठन्ति सोऽयम् । प्रविशतः उद्यानवाटिकां गच्छतः ।

(४०) माधवमाह—कथमिति । शून्याः मालत्यादिविरहिताः ।

মদয়ন্তিকাহরণ বৃত্তান্ত বিস্তাররূপে শুনিতে ইচ্ছা করিতেছি। তাহার আরও কারণ এই যে—

(৩৮) তুমি মদয়ন্তিকাহরণবৃত্তান্ত বলিতে আরম্ভ করিলে সখী মদয়ন্তিকা ঈষৎ হাস্যযুক্ত মালতী কর্ত্তৃক পরিচালিত চঞ্চল কটাক্ষাঘাতে ও উদ্ভূত লজ্জাবশতঃ নিস্পন্দদৃষ্টি বদনপদ্ম অবনত করিবে।

(৩৯) (উদ্যানে প্রবেশের জন্য উভয়ের পরিক্রমণ) এই সে উদ্যান-প্রাচীর। (উদ্যানে প্রবেশের অভিনয়)

(৪০) মাধ। এই উদ্যানপ্রদেশ শূন্য কেন?

मक। नूनं शङ्के आवयोः समरसङ्घट्टोद्वेगेन व्याकुलत्वादितः स्ततोऽसन्त्यक्ता अत्रैवात्मानं विनोदयन्ति। तदेहि पश्यावः।
सखी परिक्रामतः। (४१)

लवङ्गिका मदयन्तिके। मालदि! [सहसावलोक्य।] दिट्ठिया पुणोवि एदे महाणुभावा दीसन्ति। (ग)

मकरन्दमाधवौ। भवत्यौ! क्व सा मालती? (४२)

उभे। कुदो मालदी, एदमहेव, अह्मे विप्पलद्धाओ मन्दभाइणीओ। (घ)

(ग) सखि! मालती। दिष्ट्या पुनरपि एतौ महानुभावौ दृश्येते।

(घ) कुतो मालती, एवमेवावां विप्रलब्धे मन्दभागिन्यौ।

---

(४१) नूनं निश्चितं शङ्के मन्ये। समरसङ्घट्टोद्वेगेन युद्धविपत्तावस्माकमनिष्टचिन्तया, व्याकुलत्वात् विह्वलत्वात्। अतैव एतदुद्यानस्य कस्मिंश्चित् स्थाने एव, विनोदयन्ति किञ्चिदवलम्बनादि-व्यापारतया मनश्चिन्ताक्रान्तं कुर्वन्ति।

(४२) माधवमकरन्दौ. पदमन्त्येन मालतीवियोगव्यथया कथञ्चिदुन्मादसम्बोधन कुरुत, "सखि मालति" इति। सहसावलोक्य अकस्मात् सम्मुखे माधवमकरन्दौ दृष्ट्वा।

(४२) भवत्यौ: सम्बोधनमात्रमेतत्। मालत्यन्वेषणे च दूरात् निर्गत्य सर्वात्मना प्रीतमनसौ पृच्छतः, क्व सेति।

(घ) उभे इति। पदमन्येनापि अस्मदीया परवशमेव सखी। विप्रलब्धे वञ्चिते। भवतोः सहायत्वेनैव मालतीलाभं सम्भाव्य तदन्वेषणव्याप्ता भवतीति भावः।

---

(४১) মক। নিশ্চয়ই আমার মনে [illegible] আমাদের যুদ্ধ বিপদাশঙ্কাজনিত দুশ্চিন্তায় ব্যাকুলতা বশতঃ তাহারা ইতস্ততঃ পরিভ্রমণ করিতে করিতে এই উদ্যানেরই কোন স্থানে কথঞ্চিৎ আত্মবিনোদন করিতেছে, সুতরাং এস আমরা অন্বেষণ করিয়া দেখি। (উভয়ের পরিক্রমণ)

(গ) লবঙ্গিকা ও মদয়ন্তিকা। সখি মালতি! (সহসা অবলোকন করিয়া) ভাগ্যক্রমেই পুনরায় এই মহানুভবদ্বয়কে দেখিলাম।

(৪২) মাধব ও মকরন্দ। অয়ি! সেই মালতী কোথায়?

माध। कथं कथमपि. विध्वंसते मे हृदयं. अतः स्फुटम-
भिधीयताम्। (४२)

मम हि कुवलयाक्षी म्लानिदैन्यानुबद्धे-
रविरतमनुबन्धोत्कम्प एवान्तरात्मा।
स्फुरति च खलु चक्षुः वाममेतच्च कष्टम्
वचनमिह भवत्योः सर्वथा हा हतोऽस्मि ॥४३॥

मद। तदोस्सु, इदो निग्गदे महाणुभावे, अमलोइदं सुअ-

(ख) तदा खलु इतो निर्गते महानुभावे कुसुमविलासकौतुकेन सखि अवलोकितमार्ये

(४२) कथं कथमपि अनिर्वचनीयभावेन, विध्वंसते विदीर्णं भवति।

(४३) ममेति। हि यतः कुवलयाक्षी नीलोत्पलनेत्रा मालती इति अनिष्टे विषये एवा ममविषया बुद्धिर्यस्य तथाभूतस्य "खेदः मालत्याश्रयः" इति भावात् दैन्यं तदीयानिष्टा-शङ्किन इत्यर्थः, मम अन्तरात्मा अन्तःकरणं अविरतं अविच्छिन्नमेव अनुबन्धः तथा अनिष्टाशङ्कया विधुतः सत्कम्पः कम्पनं येन तथाभूतः। वामं चक्षुः खलु स्फुरति स्पन्दते। पुरुषस्य वामाक्षिस्पन्दनमनिष्टसूचकमिति भावः। भवत्योः सर्वथैव एतत् "कुतो मालती" इत्याकारं वचनञ्च कष्टं, अत एव तस्याः अनिष्टभावसूचकत्वेनात्यन्तं कष्टप्रदं, हा खेदे, अतएव सर्वथा सर्वप्रकारेण हतः निरतिशयदुःखः अस्मि भवामि।

अनानिष्टसूचनहेतुनामेकत्रैव स्थिरि अस्मि अथ अनेकहेतुनामेकस्य एतद्भवस्य च कारणसमेतोऽस्त्यान्नात् समुच्चयालङ्कारः। मालिनीवृत्तम्।

(ख) मदेति। इतः अस्मात् कुसुमानात् महानुभावे अवति। अवलोकितः सखा... विलुप्त

(९) উভয়ে। কোথায় মালতী, আপনারাই পরস্পর মদয়ন্তিকা
আমরা প্রতারিত হইয়াছি।

(৪০) মাধ। অনির্বচনীয় ভাবে আমার হৃদয় বিদীর্ণ হইতেছে, অতএব
স্পষ্টরূপে বল।

(৪১) মালতী বিষয়ে কেবল অনিষ্টাশঙ্কাকারী আমার অন্তরাত্মা
(অনিষ্টাশঙ্কায়) অবিশ্রান্ত ভাবে উৎকম্পিত হইতেছে। আমার বাম চক্ষুও
স্পন্দিত হইতেছে, মালতী বিষয়ে তোমাদের কথিত "কোথায় মালতী" এই
বাক্যও কষ্টপ্রদ, অতএব সর্বপ্রকারেই আমি হত হইতেছি।

रक्खिदं भअवदीए अम्हाणं पेसिअ, अप्पमत्तणिमित्तं अज्जउत्तं विण्णवेहित्ति लवङ्गिआ अणुप्पेसिदा, तदो च तम्मअमाणाए ताए भअवं अवलोइदुं अब्भुगदो पविट्ठिदा, पच्छादे अहं ण्ण तं पेक्खामि, तदो अहं पि एत्थ विहरन्तोए हिं विहरन्तीणं जाव चिन्तिदाम्हि ताव तुम्हे दिट्ठेत्थि । (ख)

माध। हा प्रिये मालति ! ।

किमपि किमपि मद्दे मङ्गलोघो यदन्यद्-
विरमतु परिहासश्चण्डि ! पर्युत्सुकोऽस्मि ।

विसृज्य, अप्रमत्तनिमित्तं विज्ञापय आर्यपुत्रमिति लवङ्गिकामनुप्रेष्य तदा [illegible] भगवतीमवलोकयितुमभ्युद्गता, प्रविष्टा, पश्चादहं न च तां पश्यामि, तत आत्मापि विहरन्तीभिः [illegible] विचिन्तयन्ती तावद् युष्माकं दृष्टास्मि ।

[illegible] निवेदयितुं भगवत्या कामन्दक्या सखीय [illegible] अनुप्रेष्य [illegible] इत्यादि । [illegible] सुन्दरपल्लवपरिग्रहास्यादीनां [illegible] एतस्मा [illegible] अनेन महापातकम्, [illegible] । विहरन्त्या [illegible] विचरन्त्यौ, [illegible] विचिन्तयति [illegible], [illegible] इति मन्दः, [illegible] । "भूतभाविस्थान- [illegible]"मिति [illegible] "[illegible]" नाम वाक्यालङ्कारः ।

(११) किमपीति । हे चण्डि ! [illegible] ! किमपि किमपि—[illegible]

(ख) मद। आपनि এই উপবন হইতে নির্গত হইয়া গেলে বুদ্ধরক্ষিতা ও অবলোকিতাকে (বৃত্তান্ত নিবেদন করিবার জন্য) ভগবতী কামন্দকীর নিকট পাঠাইয়া "আমাদের নিকট শীঘ্র আর্য্যপুত্রকে জানাও" এই বলিয়া লবঙ্গিকাকে (আপনার নিকট) পাঠাইয়া বৃত্তান্ত জানিবার জন্য অত্যন্ত উৎকণ্ঠিতা হইয়া এই লবঙ্গিকার প্রত্যাবর্ত্তনপথাভিমুখে মালতী গমন করিয়াছিল। তৎপরে আর আমি তাহাকে দেখি নাই। পরে আমরা (অন্বেষণার্থ এই উপবনে বিচরণ করিতে করিতে এই বৃক্ষসমূহের মধ্যে বিহার খুঁজিতে ছিলাম, তখনই আপনাদিগকে দেখিলাম। (এই পর্য্যন্তই আমি জানি)

कलयसि कलितोऽहं वल्लभे! देहि वाचम्,
भ्रमति हृदयमन्तर्विह्वलं, निर्दयासि ॥ (४५)

उभे। हा पियसहि! कहिं गदासि। (क)

(क) हा प्रियसखि! कस्मिन् गतासि?

निर्वचनीयं महद्भयं यदन्यत् अमङ्गलमित्यर्थः, (अं हानिमयत्वादमङ्गलशब्दोच्चारणासामर्थ्यात् अनभिधानमिति मन्तव्यम्) अत तवादर्शनेन शङ्केऽस्मि, सम्प्रति च दर्शनात् कथामात्रशुष्कता-भावश्चरणाद्वेति भावः। अतएव त्वामुद्दिश्य उत्सुकोऽपि तद्दर्शनार्थमतीवोत्कण्ठितोऽस्मि। ननु परिहासेनात्मगोपननिमित्तकमिदमदर्शनं, न तु कथामात्रशुष्कताकोपनिमित्तकमित्यत आह—विरमत्विति। परिहासः आत्मगोपनेनोपहासः विरमतु निवर्त्तताम् नितान्ताकुलितचित्ततया मे तादृशोपहाससहापि नाद्यमवसर इति भावः। नन्वनुरागपरीक्षार्थमिदमात्मगोपनमित्यत आह—कलयसीति, हे वल्लभे, कलयसि अहं त्वय्यनुरक्तो नवेति यदि परीक्षसे, तदा अहं कलित एव श्मशानक्षेत्रे त्वया परीक्षित एव, तथाच ममानुरागपरीक्षार्थमपि नेदमात्मगोपन-मनावश्यकमिति भावः। अत एव वाचं ममाह्वानस्योत्तरम् देहि वितर, यस्मात् मम हृदयं विप्रलम्भे त्वदर्शनेन नितान्तविकलं सत् अकाण्डे भ्रमति अनवस्थितं वर्त्तते, क्वचिदपि स्थैर्यं न लभत इत्यर्थः। तथा निर्दयासि, ममैतादृशावस्थामवलोक्यापि दर्शनाप्रदानादिति भावः।

अत्र पदार्थहेतुकाव्यलिङ्गालङ्कारः। कालिन्दीवृत्तम्।

---

(৪৫) মাধ। হা প্রিয়ে মালতী! অয়ি কোপনে! আমি অনির্ব্বচনীয় অমঙ্গলের আশঙ্কা করিতেছি, সুতরাং তোমাকে দেখিবার জন্যও অত্যন্ত উৎকণ্ঠিত হইয়াছি। অতএব (তুমি যদি পরিহাসের জন্য আত্মগোপন করিয়া থাক, তবে) সেই পরিহাসও এ সময়ে বিরত হউক। আমি তোমার প্রতি অনুরক্ত কি না? যদি ইহার পরীক্ষা করিতেছ, তবে (শ্মশানক্ষেত্রেই) আমি পরীক্ষিত হইয়াছি। অতএব হে বল্লভে! আমার আহ্বানের উত্তর দেও। আমার হৃদয়. (তোমার অদর্শনে) বিকল হইয়া কোনরূপেই মধ্যে স্থিরতা লাভ করিতে পারিতেছে না। তুমি (নিতান্ত) নির্দ্দয়া হইয়াছ, (যেহেতু এ সময়েও দেখা দিতেছ না)।

(ক) উভয়ে। হা প্রিয়সখি! তুমি কোথায় গিয়াছ?

मक। किमित्यविज्ञाय वयस्य! वैक्लव्यमवलम्बसे। (४६)

काम। सखे! किं त्वमपि न जानासि माधवस्नेह-दुःखितायास्तस्याः कातर्य्यचेष्टितानि। (४७)

मक। अस्त्येतत्, किन्तु भगवतीपादमूलगमनमप्याशङ्कते, तदेहि तत्र तावत् पश्यावः। (४८)

उभे। एवमपि सम्भाव्यते। (ख)

माध। एवं नाम भवतु। [सर्वे परिक्रामन्ति।] (४९)

विचिन्त्य चाकाशतम्।

मक। याता भवेद्भगवतीभवनं सखी नो
जीवन्त्यथैष्यति, न चेत्यभियद्धितोऽस्मि।

(ख) एवमपि सम्भाव्यते।

---

(४६) अविज्ञाय किमसत्या. किमभवदिति विशेषतोऽनवधार्य्य, वैक्लव्यं कातर्य्यं।

(४७) माधवस्नेहदुःखितायाः इति माधवस्नेहदुःखितायाः इत्यर्थः। कातर्य्यचेष्टितानि वैक्लव्यनिमित्तकाव्यवसायान्। नन्दनेन सह विवाहस्योद्योगे सति मदन्तिकमागत्य मालतीमरणमेवाङ्गीकरोतीति तथापि प्रत्यक्षीकृतमित्यतः—यदपि मम निपतितमहत्या सख्या किमप्यव्यवसितं कर्त्तुं शक्नोतीति शङ्कते मे चित्तेन कातरताकारणमिति भावः।

(४८) भद्रेति। एतत् मालत्या मरणचेष्टितम् अस्ति तथापि तत् परिज्ञायत एवेत्यर्थः।

(४९) एवं नाम मालत्या यथार्थनत्वात् भगवतीभवने गमनमेव।

(५०) यातेति। नः अस्माकं सखी मालती भगवतीभवनं कामन्दकीनिलयं गता यदा भवेत्। तत गमनमपि भावयत इत्यर्थः। अथ किन्तु जीवन्ती प्राणान् धारयन्ती

---

(৪৬) মক। বয়স্য! না জানিয়াই তুমি এত কাতরতা অবলম্বন করিতেছ কেন?

(৪৭) মাধ। সখে! তুমিও জাননা কি? মাধব-স্নেহদুঃখিতা মালতীর কাতরতার কিরূপ অধ্যবসায়।

(৪৮) মক। তাহা আমি জানি, কিন্তু ভগবতী কামন্দকীর পাদমূলে গমনেরও আমি আশঙ্কা করি। অতএব এস সেই স্থানেই আমরা দেখি।

(৪৯). মাধ। তাহাই হউক। (সকলে পাদবিক্ষেপ করিতে লাগিল)

प्रायेण बान्धवसुहृत्प्रियसङ्गमादि,
सौदामिनीस्फुरणचञ्चलमेव सौख्यम्॥ (५०)

इति निष्क्रान्ताः सर्वे।

इति मालतीमाधवे मालत्यपहारो नामाष्टमोऽङ्कः॥ (११)

एष्यति आयास्यति भवेति अभिसन्धितः मज्ञानशब्दः अस्ति। अत इदं उद्दिश्य आह—प्रायेणेति बान्धवाः भ्रात्रादयः, सुहृदः मित्राणि, प्रियाः प्रेमोपयुक्ताः दारादयः तेषां सङ्गमः संसर्गनिमित्तं सुखं आदिर्येषां यथाभूत सौख्यं सुखं प्रायेण बाहुल्येन सौदामिनी-स्फुरणवत् क्षणप्रभाविकाशवत् चञ्चलमेव अस्थिरमेव। तथाच माधवस्य मालतीसङ्गमजनितं सुखमपि तथा चञ्चलं भवितुमर्हतीति भावः।

अत्र सङ्गमशब्दस्य रूढिप्रयोजनाभावादप्रसिद्धलक्षणया सङ्गमनिमित्तकसुखपरत्वा-प्रतीतेः यार्थत्वदोषः। एवं लुप्तोपमा, काव्यार्थं न विशेषसमर्थनरूपार्थान्तरन्यासश्चालङ्कार इति तयोः संसृष्टिः। वसन्ततिलकावृत्तम्।

परमनिपुणेन कविना सन्दर्भेणानेन "प्रियसङ्गमादिजनितं सौख्यं पुनरपि माधवे सौदामिन्याः प्रथमाङ्कविष्कम्भकसूचितायाः अभिमाङ्कप्रवेश्यमानायाः कस्याचित् कामन्दकीशिष्यायाः स्फुरणेन व्यापारविशेषेण चञ्चलं उच्छलनवत् भविष्यतीत्यर्थस्यापि सूचितत्वात् "द्वितीयं पताकास्थान" प्रकटीकृतम्। लक्षणं यथा दर्पणे—

"यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकन्तु तत्।"
"वचः सातिशयश्लिष्टं नानाबन्धसमाश्रयम्।
पताकास्थानकमिदं द्वितीयं परिकीर्त्तितम्॥"

(११) कपालकुण्डलाकर्तृकमालत्यपहारस्य वाचाऽ प्रधानव्यापारत्वात्तन्नाम्ना अङ्कोऽयं निर्दिष्टः। क्वचित् पुस्तके "मालत्यपहारोनाम"त्यय एव नास्तीति।

इति काव्यतर्कतीर्थोपनामक-श्रीकृष्णविहारितर्कसिद्धान्तभट्टाचार्यकृतायां तत्त्वबोधिनी-समाख्यायां मालतीमाधवव्याख्यायामष्टमाङ्कविवृतिः समाप्ता।

---

(১০) মক। (চিন্তা করিয়া আত্মগত) আমাদের প্রিয়সখী মালতী ভগবতী কামন্দকীর ভবনেও যাইতে পারে। কিন্তু জীবনধারণ করিয়া আসিবে

नवमोऽङ्कः ।

ततः प्रविशति सौदामिनी । (१)

सौदा । एषास्मि सौदामिनी, भगवतः श्रीपर्वतादुत्पत्य पद्मावती-मुपस्थिता, मालतीविरहिणः संस्तुतप्रदेशदर्शनासहिष्णोः स्थानं परित्यज्य, सह सुहृद्वर्गेण बृहद्द्रोणीशैलकान्तारप्रदेशं परिभ्रमतो माधवस्याधुनान्तिकमुपयामीति। भोस्तथाहमुत्पतिता, यथा सकल एव गिरिनगरग्रामसरिदरण्यव्यतिकरश्चक्षुषा परिच्छिद्यते । (१)

[पर्य्यवलोक्य ।] साधु साधु । (२)

---

(१) तत इति । सौदामिनी नाम्नी सम्यग्योगवती काचित् कामन्दकीशिष्या ।

(२) आत्मनः सपरिचयं दर्शयति—एषास्मीति, या खलु कामन्दक्या परमादरेण योगशिक्षा-मापादिता सा सौदामिन्यहमित्यर्थः। तदाच कामन्दकीपरामर्शं हाभ्यदत्त माधवस्योपकारार्थे नगरान्तरस्य' गन्तिव्यमिति भावः। सिद्धस्थानत्वेन ईश्वरासक्ततया श्रीपर्वतस्य भगवत इति विशेषणम्। उत्पत्य योगबलेनाकाशे समुत्थाय। पद्मावतीं तदभिधानाम्नीं राजधानीं मुपाश्रिता प्राप्ता। संस्तुतः मालत्या सह विहारेण परिचितः यः प्रदेशः तस्य दर्शनासहिष्णोः

কিনা এ বিষয়ে আমি শঙ্কিত হইতেছি। কারণ আত্মীয়বান্ধব মিত্র ও কলত্রাদি প্রিয়জনের সঙ্গমজনিত সুখ প্রায়শঃই বিদ্যুদ্বিকাশের ন্যায় চঞ্চল হইয়া থাকে।

(সকলের প্রস্থান)

(৫১) মালতীমাধবের "মালত্যাপহার" নামক অষ্টম অঙ্ক সমাপ্ত।

---

(১) (তৎপরে (কামন্দকীশিষ্যা) সৌদামিনীর প্রবেশ)

(২) সৌদা। (কামন্দকী যাহাকে পরম আগ্রহের সহিত যোগশিক্ষা দিয়াছিলেন) আমি সেই সৌদামিনী। ভগবৎশ্রীপর্ব্বত হইতে যোগবলে

पद्मावती विमलवारिविशालसिन्धु-
पारासरित्परिकरच्छलतो बिभर्त्ति ।
उत्तुङ्गसौधसुरमन्दिरगोपुराट्ट-
संघट्टपाटितविमुक्तमिवान्तरीक्षम् ॥ (२)

विश्लेषलेश्याद्दीपकतया ईषच्चाचमत्, स्थानं तत्सं स्तुतप्रदेशं, सुहृद्वर्गेण मकरन्दप्रमुखात्मीय-समूहेन, हृद्ध्रोणो नदीविशेषः तथा उपलक्षितो यः शैलः पर्वतः तस्य कान्तारो दुर्गमार्गः तदात्मको य, प्रदेशः स्थानं तं । उपशमितु—माधवीदृशान्तेन परिशान्तमाय गच्छति । भो इति विस्मये । तथा तेन प्रकारेण, उत्पतिता ऊर्द्ध्वं उत्थिता, गिरिः पर्वतः नगरं देवतायतनप्रासादापणादिसङ्कुलं वसतिस्थानं, ग्रामः "तथा शूद्रजनप्रायः सुसमृद्ध-कृषीवलः । क्षेत्रोपभोगभूमध्ये वसति ग्रामसञ्ज्ञिता ॥ "इत्युक्तलक्षणः, सरित् नदी, अरण्यं वनं, तेषां व्यतिकरः समूहः, परिविभाव्यते सुस्पष्टं विलोक्यते, मयेति शेषः । एतेन परिमितोच्च-देशोत्पतनं सूचितम् । पश्चादवलोकेत्यनेन कथञ्चित् पश्चाद्व्यतिक्रमप्रतीतेर्व्योमातिशयो ध्वनितः । साधुसाध्विति पद्मावतीसमुत्कर्षदर्शनजनितचमत्कातिशये द्विरुक्तिः ।

(२) पद्मावतीति । पद्मावती तदभिधानेयं नगरी, विमलानि निर्म्मलानि वारीणि जलानि ययोस्तथाभूतयोः विशालयोः विस्तीर्णयोश्च सिन्धुपारासरितोः सिन्धुपारानामकनद्योः व्यतिकरच्छलतः परिवेष्टनरूपसम्पर्कव्याजेन उत्तुङ्गानां उन्नतानां सौधानां राजप्रासादानां सुरमन्दिराणां देवतानिलयानां गोपुराणां बहिर्द्वाराणां अट्टानां अट्टालिकानां संघट्टेन घर्षणेन पाटितविमुक्तं पाटितं विदारितं पश्चात् विमुक्तं त्यक्तमित्यर्थः (स्नातानुलिप्तवत् समासः) अन्तरीक्षं गगनमिव बिभर्त्ति धारयति । सम्मुन्नतप्रासादादिभिर्व्विदार्य्य निपातितः गगनमेव नदीद्वयरूपेण परितः परिदृश्यत इति भावः ।

अत्र वाच्या सापह्नवा क्रियोत्प्रेक्षालङ्कारः, वसन्ततिलका वृत्तम् ।

আকাশমার্গে উঠিয়া পদ্মাবতীনামক এই রাজধানী প্রাপ্ত হইয়াছি। মালতী-বিরহী মাধব মালতীর সহিত বিচরণে পরিচিত স্থানের দর্শনে অসহিষ্ণু হইয়া সেই পরিচিত স্থান পরিত্যাগ করতঃ দুহদ্দ্রোণীনামক নদীসংসৃষ্ট পর্ব্বতের দুর্গম পথপ্রদেশে পরিভ্রমণ করিতেছে (মালতী বৃত্তান্ত দ্বারা শান্ত করিবার জন্য) তাহারই নিকট সম্প্রতি যাইতেছি। অহো!! আমি সেই প্রকার উঠিয়াছি—যে প্রকারে এই সমস্ত পর্ব্বত, নগর, গ্রাম, নদী ও অরণ্যসমূহ চক্ষু দ্বারাই স্পষ্টরূপে দেখিতেছি। (পশ্চাদ্দিকে অবলোকন করিয়া) সাধু সাধু।

अपि च—सैषा विभाति लहरी ललितोर्मिपङ्क्ति-
रम्यागमे जलदसमयस्य यस्याः ।
गौर्गर्भिणीप्रियनवोपलमालभारि-
सेव्योपकण्ठविपिनावलयो विभान्ति ॥ (४)

[अन्यतोऽवलोक्य ।] स एष मनस्वता सिन्धोरविरलोत्तत-
स्फटप्रपातः । (५)

---

(४) सैषेति [illegible] दयितस्य [illegible] विलसन्ति [illegible] इति [illegible] ("[illegible]" इति सूत्रेण [illegible]) [illegible] ("[illegible]" [illegible]) [illegible] विभान्ति विराजन्ते ।

[illegible] इति [illegible] ।

(५) [illegible]

---

(৪) [illegible] এই [illegible] বিরাজিত [illegible] এবং [illegible] [illegible] করিয়াছে।

(৫) [illegible] এই [illegible] বিরাজিত আছে, সেই [illegible] [illegible] এবং [illegible] প্রিয় নূতন [illegible] ([illegible]) [illegible] প্রবাসি- দিগের [illegible] দিতেছেন।

(৬) ([illegible] করিয়া) এই সেই [illegible] [illegible] হইতে নিপতন)।

यदत्य एष तुमुलो ध्वनिरम्बुगर्भ-
गम्भीरनूतनघनस्तनितप्रचण्डः ।
पर्य्यन्तभूधरनिकुञ्जविजृम्भितेन
हैरम्बकण्ठरसितप्रतिमानमेति ॥ (६)

एतायन्दनाश्वकर्णसरलपाटलप्रायतरुगहनाः परिणतमालूर-सुरभयोऽरण्यगिरिभूमयः स्मारयन्ति खलु नवणकदम्बजम्बूवना-नद्धान्धकारगुहानिकुञ्जगभीरगह्वरोद्गारगोदावरीरवमुखरितविशाल-मेखलाभुवो दक्षिणारण्यभूधरान् । (७)

गाविन्याः स्निग्धाः तन्नामकनद्या, दारितं विपाटितं रसातलं भुवः स्वरूपं येन तथाभूतः ("रसा विश्वम्भरा स्थिरा" इति "अधःस्वरूपयोरस्त्रीतल"मिति च चामरः) तटात् देशतट-प्रदेशात् प्रपातः प्रस्रवणनिपतनं ।

(६) यदत्य इति । यदत्यः प्रस्रवणप्रपातप्रनिनादमूलि अम्बूनि गर्भे यस्य तथाभूतः अत एव गम्भीरः गभीरमन्द्रपाती यो नूतनघनः नवीनजलधरः तस्य स्तनितवत् गर्जनवत् प्रचण्डः विशालः एषः आकर्ण्यमानः तुमुलः महान् ध्वनिः शब्दः पर्य्यन्तभूधराणां प्रान्तस्थित-शैलानां निकुञ्जेषु लताद्याच्छादितगह्वरेषु विजृम्भितेन प्रतिध्वनिरूपाद्वृद्धिप्राप्तेन हैरम्बकण्ठ-रसितस्य गजाननकण्ठगर्जितस्य प्रतिमानं साम्यं एति लभते ।

अत्र प्रथमार्द्धे उपमालङ्कारः चौपी लुप्तोपमा, चतुर्थचरणे पुनरार्थी पूर्णोपमेत्यनयो-रङ्गाङ्गिभावेन सङ्करः । वसन्ततिलकावृत्तम् ।

(७) एता इति । एताः परिदृश्यमानाः, चन्दनाश्वकर्णसरलपाटलप्रायाः तत्तन्नाम-प्रसिद्धवृक्षादियुक्ताः तरवो यत्र तथाभूतं गहनं वनं यासु तथाभूताः, तथा परिणतैः सुपक्वैः मालूरैः बिल्वफलैः सुरभयः सुगन्धयुक्ताः अरण्यगिरिभूमयः वनशैलप्रदेशाः, नवणेन

---

(৬) জলপূর্ণতাবশতঃ গম্ভীরনাদী নূতন মেঘের গর্জনের ন্যায় প্রচণ্ড সেই তটপ্রপাতজনিত এই তুমুলধ্বনি প্রান্তস্থিত পর্ব্বতনিকুঞ্জে প্রতিধ্বনি বশতঃ বৃদ্ধিপ্রাপ্ত হইয়া গজাননের কণ্ঠগর্জনের সাদৃশ্য লাভ করিতেছে।

(৭) চন্দন, অশ্বকর্ণ, সরল ও পাটলনামক বৃক্ষবহুল বনশালী ও পরিপক্ক বিল্বফলের গন্ধযুক্ত এই পরিদৃশ্যমান অরণ্যপর্ব্বতভূমিসমূহ যাহাদের বিশাল নিতম্বপ্রদেশ নূতন কদম্ব ও জম্বুবনসম্বদ্ধ অন্ধকারে বিশালবৎ প্রতীয়মান নিকুঞ্জ

अयञ्च मधुमतीसिन्धुसम्भेदपावनो भगवान् भवानीपतिः अपौरुषेय-प्रतिष्ठः सुवर्णबिन्दुः इत्याख्यायते । प्रणम्य—(८) ।

जय देव भुवनभावन ! जय भगवन्नखिलवरद ! निगमनिधे ! ।
जय रुचिरचन्द्रशेखर ! जय मदनान्तक ! जय जगदादिगुरो ! (९)

(गमनमभिनीय)

नवीनेन कदम्बप्रसूनेन अवनद्धः सूर्यादिकिरणावरोधेन संवृद्धः यः अन्धकारः तेन गुरुः विशालत्वेन प्रतीयमानः निकुञ्जः लतादिपिहितोदरस्थानं यत्र तथाभूते गभीरगह्वरे दूरवरोह-गुहाया उद्गारः प्रवाहप्रवेशात् समुत्थितो योऽसौ तथाभूतेन गोदावार्याः तदभिधानसुप्रसिद्धनद्या रवेण निनादेन मुखरिताः शब्दायमानाः विशाला विस्तीर्णाः नीलाश्मानः नितम्बप्रदेशाः येषां तथोक्तान् दक्षिणारण्यभूधरान् दक्षिणस्यामवस्थितवनपर्वतान् भावयन्ति । एतत्पर्वत-प्रदेशदर्शनेन एतत्तदवदक्षिणारण्यपर्वतान् स्मारयतीत्यर्थः ।

अत्र सादृश्यवस्तुदर्शनेन सादृश्यवस्तुस्मरणात् स्मरणालङ्कारः । तल्लक्षणं यथा दर्पणे—"सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते" इति ।

(८) अयञ्चेति । मधुमती सिन्धुश्चेत्यनयोर्नद्योः सम्भेदं सङ्गमस्थलं पावयति अधिष्ठानेन पूतं करोतीति तथोक्तः, अपौरुषेया पुरुषेणासम्पादिता प्रतिष्ठा यस्य तथोक्तः अनादिप्रतिष्ठ इत्यर्थः, अयं भगवान् भवानीपतिः शिवः सुवर्णस्य बिन्दवः यत्र, स सुवर्ण-बिन्दुः इति इत्यनेन आख्यायते अभिधीयते । एतल्लिङ्गोपरि सुवर्णबिन्दूनां स्थाने स्थाने विद्यमानत्वात् "सुवर्णबिन्दु"रिति सान्वर्थनामधेयं प्रसिद्ध इत्यर्थः ।

अत्र भवानीपतिशब्देन भवान्याः पत्यन्तरप्रतीतिकारित्वात् "मृडयेऽस्तु भवानीश" इत्यत्रेव विरुद्धमतिकारितादोषः ।

(९) शिवं स्तौति—जयेति । हे भुवनभावन ! चतुर्दशभुवनोत्पत्तिहेतो ! तथाच मदनपरेरपि हितुत्वात् मा प्रभवि दया वितरेत्यभिप्रायः । अखिलानां समस्तभक्तानाम् वरं

যুক্ত গভীর গুহায় সমুত্থিত গোদাবরী নদীর শব্দে মুখরিত, তাদৃশ দক্ষিণারণ্য-বর্ত্তী পর্ব্বতসমূহ স্মরণ করাইতেছে।

(৮) মধুমতী ও সিন্ধুনদীর সঙ্গমস্থানের পবিত্রতাকারী অনাদিপ্রতিষ্ঠ এই ভগবান মহাদেব "সুবর্ণবিন্দু" নামে অভিহিত। (নমস্কার করিয়া)

(৯) হে দেব! চতুর্দ্দশ ভুবনোৎপত্তি হেতো! হে ভগবন্! হে সমস্তাভিলষিতবরদানকারিন্! হে বেদাদিশাস্ত্রনিচয়ের আশ্রয়! হে

अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरमयूरीमुक्तसंसक्तकेकः ।
शकुनिशवलनीड़ानोकहस्निग्धवर्ष्मा,
वितरति वृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥ (१०)

अपि च— दधति कुहरभाजां यत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।

अभिमतवितार्थं ददातीति तथोक्तः । ममाप्यभिमतवस्तु मुक्तिं दातुमर्हसीत्याशयः । त्रिगमाना वेदादिशास्त्राणां निधे । आधार । तथाच मम आत्मीयप्राणमपि देहीति भावः । रुचिरः मनोज्ञः चन्द्रः शेखरे चूडायां यस्य तथोक्त । मदनान्तक । कामविनाशक । तथाच ममापि कामभावं समूलं विनाशयेत्याशयः । आदिगुरुत्वञ्च सृष्ट्यादौ प्रणवोऽप्युपदिष्टत्वादिति बोध्यम् । तथाच मामप्युपदिशेत्याशयः ।

अत्र अभिमतविशेषणानां प्रयुक्तत्वात् परिकरालङ्कारः । आर्य्याजातिः ।

(१०) अयमिति । अभिनवैर्नूतनैः मेघैः जलधरैः श्यामलाः कृष्णवर्णाः उत्तुङ्गाः उन्नताः सानवः एकदेशा यस्य तथाभूतः, मदेन मत्ततया मुखराभिः शब्दं कुर्वतीभिः मयूरीभिः मुक्ताः परित्यक्ताः कृता इति यावत् संसक्ताः सम्मिलिताः केकाः स्वकीयशब्दाः (केका वाणी मयूरस्य॰ इत्यमरः) यत्र तथाभूतः, तथा शकुनिभिः नानावर्णपक्षिभिः शवलितैः कर्व्वुरितैः नीडानोकहैः कुलायवृक्षैः स्वावासतरुभिरिति यावत्, स्निग्धं वर्ष्म शरीरं यस्य तथाभूतः,एवं वृहन्तो विशालाः अश्मानः शिलाः यस्य तथाभूतः, अयं परिदृश्यमानः पर्व्वतः अक्ष्णोर्नेत्रयोः प्रीतिं सुखं वितरति यच्छति । रमणीयत्वमर्द्दश्यत्वादिति भावः । मालिनीवृत्तम् ।

(११) दधतीति । यत्र यस्मिन् पर्व्वते कुहरभाजां गह्वरवासिनां भल्लूकयूनां युवक-

মনোহর চন্দ্রচূড় ! হে কামবিনাশক ! হে জগদাদিগুরো ! (আমাদের অভিলাষ পূরণ করিয়া) তুমিই জয়লাভ কর ।

(১০) (গমনের অভিনয় করিয়া) যাহার সানু (প্রদেশ) নূতন মেঘের ন্যায় শ্যামবর্ণ ও উন্নত, মদমত্ত ময়ূরীগণ যাহাতে থাকিয়া কেকাধ্বনি করিতেছে, যাহার শরীর নানাবর্ণ পক্ষিবর্গ্ন রিত (পক্ষীর নিবাস বৃক্ষ দ্বারা স্নিগ্ধ) এবং যাহার প্রস্তরসমূহ অত্যন্ত বৃহৎ, তাদৃশ এই পরিদৃশ্যমান পর্ব্বত নেত্রের প্রীতি-বিতরণ করিতেছে ।

शिशिरकटुकषायः स्त्यायते शल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ (११)

[ऊर्द्ध्वमवलोक्य ।] कथं मध्याह्नः, तथाहि अत्र सम्प्रति
काश्मर्य्याः कृतमालमुद्गतदलं कोयष्टिकष्टीकते,
तीराश्मन्तकशिम्बिचुम्बितमुखा धावन्त्यपः पूर्णिकाः ।

मत्तकाना (मदातिरेकेण यौवन एव अनीहौपिलसमवासनसुखमाय उपमन्दमधीग इति मातुष्टलदोष:) अम्बूकृतानि सनिष्ठीवशब्दाः मत्तकानां स्वाभाविका फुत्कारशब्दा इत्यर्थः, (अम्बूकृतं सनिष्ठीवमित्यमरः) प्रतिरसितेन प्रतिध्वनिना गुरूणि स्थूलानि सन्ति स्त्यानं वृद्धिं दधति धारयन्ति। तथा शल्लकीनां गजप्रियवृक्षविशेषाणां शीतलस्पर्शः कटुः कटुरसः कषायः सुरभिश्च (कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्त्तिता इति हलायुधः) इभैर्गजैः दलिताः खण्डिताः विकीर्णाः यतस्ततः विक्षिप्ताश्च ये ग्रन्थयः सन्धिप्रदेशाः तेषां निष्यन्दस्य चरितरसस्य गन्धः स्त्यायते वृद्धिं प्राप्नोति, सर्वतः प्रसरतीत्यर्थः। अत्र गन्धे शिशिरत्वादिकमारोप्यनिर्देशोऽव-गन्तव्यम्।

अत्राम्बूकृतस्त्यानं प्रति 'प्रतिरसितगुरुत्वस्य हेतुत्वेनोपन्यासात् 'पदार्थहेतुकं' काव्यलिङ्ग-मलङ्कारः। मालिनीवृत्तम्।

अयञ्च श्लोको महावीरचरितोत्तररामचरितयोरप्युपनिबद्धः, परिचयात इति मन्तव्य कवेरात्मेति मन्तव्यम्।

(१२) काश्मर्य्या इति। कोयष्टिकः (कोंचा इति प्रसिद्धः) पक्षिविशेषः, काश्मर्य्याः गम्भारीपादपस्य (गम्भारी सर्वतोभद्रा काश्मरी मधुपर्णिकेत्यमरः) अग्रगतानि अचिर-प्रसृतानि दलानि पत्राणि यस्य तथाभूतं कृतमालं आरग्वधापरपर्य्यायं द्रुमविशेषं 'आरग्वधोऽथ सम्पाकः कृतमालस्तथा व्याधिघात इति अमरकोषः) टीकते गच्छति। आतपतप्तच्छायाभावाद्धि विरलपत्रं गाम्भारीतरुं परित्यज्य बहुनूतनपत्रावृतं कृतमालतरुं गच्छतीति भावः। तीराश्मन्तकानां

---

(১১) এই পর্ব্বতে গহ্বরবাসী ভল্লুক যুবকদিগের সনিষ্ঠীবনশব্দ (অর্থাৎ স্বাভাবিক থুৎকারশব্দ) প্রতিধ্বনি দ্বারা স্থূলতর হইয়া বৃদ্ধিলাভ করিতেছে। এবং শীতল কটু ও সুরভি গজকর্ত্তৃক দলিত ও ইতস্ততঃ বিক্ষিপ্ত শল্লকীর সন্ধিস্থানবিগলিত রসের গন্ধ বৃদ্ধি প্রাপ্ত হইতেছে।

(১২) (ঊর্দ্ধে অবলোকন করিয়া) এই যে মধ্যাহ্ন কাল উপস্থিত, অতএব সম্প্রতি—

दात्यूहैस्तिनिशस्य कोटरवति स्कन्धे निलीय स्थितम्,
वीरुन्नीडकपोतकूजितमनुक्रन्दन्त्यधः कुक्कुभाः ॥ (१२)
तद्भवतु माधवमकरन्दावन्विष्य, यथाप्रस्तुतं साधयामि । (१३)
इति निष्क्रान्ता (शुद्धविष्कम्भकः ।) (१४)

क्रौरस्थितवीरणानां (नागाचक्रेऽस्थिकाश्यामलजम्बौ वीरणेऽपि चेति धरणिः) शिखिषु शिखासु (शिखिः शिखा मयूरोऽपि इति विश्वः) पुच्छ्यं मदघ्राय संवद्धं मुखं यासां तथाभूताः पुलिंकाः नागाच्छिन्नीसंज्ञकपक्षिविशेषाः (नागाच्छिन्नातु पुलिंकेति विश्वः) अपो वारिणि धावन्ति दीव्यन्ताः अत्यन्तार्द्रमतिदुःखं अवमन्यैव मध्यतीरयं । दात्यूहैः कालकण्ठकादयपक्ष्यीश्वरविशेषैः (दात्यूहः कालकण्ठश्च इत्यमरः) तिनिशस्य अतिमुक्तकाख्य-वृक्षविशेषस्य (तिनिशे स्यन्दनो नेमी रथद्रुरतिमुक्तक इत्यमरः) कोटरवति पक्षस्थानीयकुल-च्छिद्रशालिनि स्कन्धे प्रकाण्डे (अस्त्री प्रकाण्डं स्कन्धः स्यान्मूलाच्छाखावधिस्तरोरित्यमरः) निलीय विशिष्य कोटरमध्ये लीनैर्भूत्वा स्थितम् । तथा कुक्कुभाः दात्यूहकाकृतिपक्षिविशेषाः अधः अधोदेशे अवतिष्ठमानाः वीरुन्नीडेषु लतावस्थितकुलायेषु ▮ कपोतानां कूजितं अव्यक्त-रवं अनुक्रन्दन्ति तमभावाऽनुकृत्य शब्दं कुर्वन्ति ।

अत्र प्रथमार्द्धे च्छेकानुप्रासः, चतुर्थ्यादौ वृत्त्यनुप्रासः, एवं सम्भावनतिद्वादशवपदार्थ्ये प्रति पदगतो कारणानुबन्धानात् समुच्चयालङ्कार इत्येतो परस्परनैरपेक्ष्येण सङ्कर । शार्दूल-विक्रीडितं वृत्तम् ।

(१३) प्रस्तुतं प्रस्ताचितं अनतिक्रम्य वर्त्तमानं यथा प्रस्तुतं परिसान्त्वनात्मा मावधानिक-मकरन्दसिद्ध्यर्थं, साधयामि सम्पादयामि ।

(१४) विषयाभावदाम्य "स्थान परिष्कर्ये"त्यादिना लक्षणदोषस्य "माधवमकरन्दा-

---

কোযষ্টিক নামক (কোড়া) পক্ষী (পত্রভৃঙ্গ) শাখায়ী বৃক্ষ হইতে পত্র-শাখী আরগ্বধ বৃক্ষ যাইতেছে। নাগাচ্ছিন্নীনামক পক্ষী বীরণের শিখায় মুখ সংলগ্ন করিয়া জলের দিকে ধাবিত হইতেছে। কালকণ্ঠক নামক পক্ষী তিনিশ বৃক্ষের কোটরযুক্ত কাণ্ডে বিলীন হইয়া অবস্থান করিতেছে। এবং কুক্কুভপক্ষী অধোদেশে থাকিয়া লতাবস্থিত নীড়নিবাসী কপোতদিগের অব্যক্ত ধ্বনির অনুসরণ করিয়া শব্দ করিতেছে।

(১৩) ভাল, তবে এখন মাধব ও মকরন্দের অন্বেষণ করিয়া প্রস্তাবিত কার্য্যের সম্পাদন করি, অর্থাৎ সান্ত্বনা করিবার জন্য তাহাদের নিকটেই যাই।

ततः प्रविशति माधवो मकरन्दश्च। (१३)

सकरुणं निश्वस्य।

मक। न यत्र प्रत्याशामनुपतति नो वा रहयति,
प्रविविक्षु चेतः प्रविशति च मोहान्धतमसम्।
अकिञ्चित्कुर्वाणाः पशव इव तस्या वयमहो
विधातुर्वामत्वाद्विपदि परिवर्त्तामह इमे॥ (१४)

बन्धिष्ये"त्यादिना। भाविकथायास्त च निदर्शनात् प्रश्नस्य सध्यमेकथानप्रयुक्तत्वादिति मन्तव्यम्।

(१४) न यत्रेति। चेत अस्माकं मनः (कर्त्तृ) यत्र विपदि प्रत्याशां मालतीप्राप्तिविषयिणीमाशां न अनुपतति न अधिगच्छति, अनेकान्वेषणेनापि वार्त्ताया अप्यनधिगमादिति भावः। नो वा रहयति मालतीप्राप्तिप्रत्याशां न वा परित्यजति, दुरतिक्रमात्तीव्रपक्षापातादिति भावः। (परन्तु) प्रविविक्षु मालतीलाभार्थं नतीव चञ्चलं सत् मोह एव किङ्कर्त्तव्यताविमूढत्वमेव अन्धं तमस्तं गाढतरान्धकारं तत् प्रविशति। किङ्कर्त्तव्यनिश्चयधारयितुं न पारयतीत्यर्थः। (अहो इति खेदे) इमे वयं विधातुर्दैवस्य वामत्वात् प्रातिकूल्यात् पशव इव (आहारनिद्रादिरूपमात्रधर्ममात्रशालित्वादिति भावः) तस्याः मालत्याः अकिञ्चित्कुर्वाणाः विपत्प्रतीकारानुरूपं किञ्चिदप्यकुर्वाणा इत्यर्थः, विपदि मालतीसम्भाव्यमानविपत्तौ परिवर्त्तामहे तिष्ठामः। तथाच दैवप्रातिकूल्यादेव मालत्याः किञ्चित् कर्त्तुं वयमसमर्थाः, न तु पुरुषकारविरहादिति भावः।

अत्र चेत इत्येककर्त्तृकारकेण अनुपतत्यादीनामनेकक्रियाणामन्वयाद्दीपकालङ्कारः, पशव इवेत्युपमालङ्कारश्च अनयोः परस्परनैरपेक्ष्येण संसृष्टिः। शिखरिणीवृत्तम्।

---

(১৪) সৌদামিনীর প্রস্থান। (এই অংশের নাম বিষ্কম্ভক)

(১৫) তৎপরে মাধব ও মকরন্দের প্রবেশ।

(১৬) মক। (সকরুণ নিশ্বাস ফেলিয়া) যে বিপদে আমাদের মন মালতীর প্রত্যাশা অবলম্বনও করিতে পারিতেছে না, একেবারে পরিত্যাগও করিতে পারিতেছে না, পরন্তু অত্যন্ত চঞ্চল হইয়া কিংকর্তব্যবিমূঢ়তারূপ গাঢ় অন্ধকারে প্রবিষ্ট হইতেছে। অহো দৈবপ্রতিকূলতাবশতঃ আমরা পশুর ন্যায় মালতীর কোনই উপকার করিতে না পারিয়া এই বিপদে অবস্থিত আছি।

माध। हा प्रिये मालति! क्वासि, कथमविज्ञाततत्त्वम् अद्भुततमं झटिति पर्य्यवसितासि, ननु अकरुणे! प्रसीद सम्भावय माम्। (१७)

प्रियमाधवे! किमसि मय्यवत्सला
ननु सोऽहमेव यमनन्दयत् पुरा।
अयमुद्गृहीतकमनीयकङ्कण-
स्तव मूर्त्तिमानिव महोत्सवः करः॥ (१८)

वयस्य मकरन्द! दुर्लभः पुनर्जगति तावतः स्नेहस्य सम्भवः। (१९)

---

(१७) माधेति। अविज्ञाततत्त्वं अनधिगतयाथार्थ्यं अथच अद्भुततमं आश्चर्य्यतमं यथा स्यात्तथा पर्य्यवसितासि विनाशितासि।

(१८) प्रियेति। प्रियः माधवो यस्यास्तथाभूते। मालति! मयि किं किमर्थं अवत्सला स्नेहविरहिता असि। निर्निमित्तं तवेदं स्नेहराहित्यमतीवायुक्तमिति भावः। तमेव स्नेहं आरादितुमाह—नन्विति। अहं स एव माधवः, पुरा पूर्व्वं नगरदेवतायतनात् कामन्दकीविहारिकोद्यानगमनकाले इत्यर्थः, आगृहीतं सम्यग् विधृतं कमनीयं मनोज्ञं कङ्कणं भूषणविशेषो येन तथाभूतः, मूर्त्तिमान् धृतविग्रहः महोत्सवः आनन्द इव तवायं करः पाणिः यं समनन्दयत् समतोषयत्। तथाभूतमपि दर्शनदानेन मम दुःखोत्पादनं सर्व्वथैव त्वया अकर्त्तव्यमिति भावः।

अत्र मूर्त्तिमान् महोत्सव इव कर इति वाच्योत्प्रेक्षालङ्कारः। मञ्जुभाषिणी वृत्तम्।

अस्य च श्लोकस्य द्वितीयार्द्धमविकलमुत्तररामचरितप्रथमाङ्केऽपि परिदृश्यत इत्यनुसन्धेयम्।

(१९) तावत इति तादृशपरिमितस्येत्यर्थः।

---

(১৭) মাধ। হা প্রিয়ে! মালতি! তুমি কোথায়? সহসা কিরূপে অবিজ্ঞাত ও আশ্চর্য্যভাবে বিনাশিত হইলে?

(১৮) অয়ি প্রিয়মাধবে! মালতি! তুমি আমার প্রতি স্নেহবর্জ্জিতা হইলে কেন? মনোহর কঙ্কণধারী মূর্ত্তিমান মহোৎসবপ্রায় তোমার এই পাণি পূর্ব্বে যাহাকে আনন্দিত করিয়াছিল, আমি সেই মাধব।

सरसकुसुमश्रामैरङ्गैरनङ्गमहाज्वर-
श्चिरमविरतोन्माथी सोढ़ः प्रतिक्षणदारुणः ।
तृणमिव ततः प्राणान्मोक्तुं मनो विधृतं तथा,
किमपरमतो निर्व्यूढ़ं यत्करार्पणसाहसम् ॥ (२०)

अपिच । मयि विगलितप्रत्याशत्वाद्विवाहविधेः पुरा,
विकलकरणैर्मे स्कन्देऽध्यथाविधुरैरिव ।

---

(२०) स्नेहस्यापरिमितत्वं समर्थयितुमाह—सरसेति । तया मालत्या सरसानि समधूनि अम्लानानीति यावत्, यानि कुसुमानि पुष्पाणि तद्वत्कान्तैः सुकुमारैः अङ्गैः शरीरैः, अविरतोन्माथी अनवरतोन्मथनकारी प्रतिक्षणदारुणः सर्वदातिभीषणः न तु साधारणज्वरवत् सविश्राम इत्यर्थः, अनङ्गमहाज्वरः कामजमहासन्तापः चिरं बहुकालं सोढः मदवाप्तिप्रत्याशया सह्यः कृतः । ततः तदनन्तरं नन्दनेन सह विवाहोद्योगे सति मदवाप्तिप्रत्याशाविनाशानन्तरमित्यर्थः, प्राणान् तृणमिव मोक्तुं परित्यक्तुं मनश्चित्तं विधृतं नियोजितम् । मरणं निश्चितमित्यर्थः । ततश्च यत्करार्पणसाहसं पाणावेव पाणिदानसाहसं निर्व्यूढं कुलकन्यया सत्या पित्राद्यनपेक्षया निर्व्वाहितं, अतः अपरं इतोऽधिकं किं स्नेहनिदर्शनं कथयामीति शेषः । अपरिमितस्नेहं विना पूर्व्वोक्तमेकमपि कुलकन्यया सम्पादयितुं न शक्येत इति सर्व्वथैव जगति तादृशस्नेहस्य सम्भवो दुर्लभ इति भावः ।

अत्र प्रथमपादे लुप्तोपमा, तृतीयपादे च श्रौतोपमालङ्कारः; द्वयमयोः परस्परनैरपेक्ष्येण च सङ्करः । हरिणीवृत्तम् ।

(२१) मयीति । हे सखे ! मकरन्द ! असौ मालती विवाहविधेः पुरा मया सह सम्बन्ध-

---

(১৯) বয়স্য মকরন্দ ! তাদৃশ অপরিমিত স্নেহের সম্ভব জগতে পুনর্বার দুর্লভ ।

(২০) অভিনব কুসুমের ন্যায় সুকুমার-অঙ্গবিশিষ্টা এই মালতী (আমার প্রাপ্তি প্রত্যাশায়) অবিরত উন্মথনকারী ও সর্ব্বদা অত্যন্ত ভীষণ কামজ্বর বহুকাল সহ্য করিয়াছিল । তৎপরে আমার প্রাপ্তি প্রত্যাশা তিরোহিত হইলে তৃণের ন্যায় প্রাণ পরিত্যাগ করিতে সঙ্কল্প করিয়াছিল । তৎপরে [illegible] স্বয়ংই পাণিদানরূপ সাহস নির্ব্বাহিত করিয়াছে, ইহা হইতে অধিক স্নেহের নিদর্শন কি বলিব ?

स्मरसि रुदितैः स्नेहाकूतं तथा व्यतनोदसा-
वहमपि यथाभूवं पीड़ातरङ्गितमानसः ॥ (२१)

[सावेगम्।] अहो नु खलु भोः! (२२)

दलति हृदयं गाढ़ोद्वेगं द्विधा तु न भिद्यते,
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्,
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ (२३)

विवाहानुष्ठानात् प्राक् मयि विसर्जितमन्यायत्वात् नन्दनेन सह विवाहावधारणेन मदवाप्ती हताशत्वात् मर्मच्छेदव्यथया हृदयविभाकरदपीड़या विधुरैः दुःखितैरिव विकलैः स्वस्वविषयग्रहणनिवृत्तैः स्वस्वैः इन्द्रियैः उपलक्षिता सती रुदितैः रोदनैः तदा तत्प्रकारं निरतिशयमित्यर्थः, स्नेहाकूतं मद्विषयकानुरागाभिप्रायं व्यतनोत् विस्तारितवती, यथा येन स्नेहाकूतेन अहमपि पीड़या मदीयव्यथानुभवजनितक्लेशेन तरङ्गितं चपलं मानसं चित्तं यस्य, तथाभूतः अभूवम् इति त्वं स्मरसि किमित्यर्थः। तथाच जयति साम्प्रतं इह तस्य सम्बन्धः सुदुर्लभ एवैतत् नास्ति वक्तव्यमिति भावः।

अत्र द्वितीयचरणे वाच्यानुक्तदोषाद्दुष्टम्। हरिणीवृत्तम्।

(२२) सावेगमिति, तत्तत्स्मरणजनिताभिनवशोकावेगेन सहितं यथा स्यात्तथेत्यर्थः। "अहो नु खलु भोः" इत्येकमेवाभिविषादसूचकमव्ययम्।

(२३) दलतीति। गाढ़ः दृढ़ उद्वेगः मालतीविरहजनितक्लेशः यत्र तथाभूतं हृदयं दलति विदीर्णं भवति, तु किन्तु द्विधा न भिद्यते द्विधाविभक्तं न भवति, तदाले दुःखावसानाभावादिति भावः। विकलः तद्विरहविह्वलः कायः शरीरं मोहं मूर्च्छां वहति लभते, किन्तु चेतना चैतन्यं न मुञ्चति चिराय न जहाति। तदालेऽपि पुनर्दुःखानुभवस्य सम्भवादिति भावः। अन्तर्दाहः विरहजनिताभ्यन्तरीणशोकसन्तापः तनुं देहं ज्वलयति सन्तापयति, किन्तु

---

(২১) হে সখে! আরও বলি, আমার সহিত গান্ধর্ব্ববিবাহ নিষ্পন্ন হইবার পূর্ব্বে (নন্দনের সহিত বিবাহাবধারণে) আমার প্রাপ্তিপ্রত্যাশায় বিগতরণতঃ মর্ম্মচ্ছেদ পীড়ায় দুঃখিত হইয়াই যেন স্ব স্ব বিষয় গ্রহণে বিমুখ ইন্দ্রিয়বিশিষ্টা এই মালতী রোদনদ্বারা সেইরূপ স্নেহাভিপ্রায় বিস্তার করিয়াছিল। যদ্দ্বারা আমিও তদীয় ব্যথাজনিতপীড়ায় চঞ্চলমনা হইয়াছিলাম, ইহা তোমার স্মরণ আছে কি?

(২৩) গাঢ় উদ্বেগশালী আমার হৃদয় বিদীর্ণ হইতেছে, কিন্তু দুইভাগে বিভক্ত হইতেছে না। তদ্বিরহবিহ্বল শরীর মূর্চ্ছা লাভ করিতেছে, কিন্তু একেবারে

मक। वयस्य माधव! निरवग्रहं दहति दैवमिव दारुणो विवस्वान्, दयश्च ते शरीरावस्था, तत् अस्य पद्मसरसः परिसरे मुहूर्त्तमास्यताम्। अत्र हि—(२४)

उच्चालबालकमलाकरमाकरन्द-
निष्यन्दसंवलितमांसलगन्धबन्धुः।

मत्सकाशात् भस्मीभूतां न करोति, तथात्वेऽपि दाहाभावेन जीवायां निर्वाणमत्वादिति भावः। तथा मर्मच्छेदी हृदयविदारणकारी विधिः दैवं प्रहरति प्रहारं करोति, किन्तु जीवितं जीवनं न छिनत्ति न विनाशयति, तथात्वेऽपि दुःखोपशमसम्भवादिति भावः। तथाच मरणं विना विरहदुःखनिवारणोपायो नास्ति, तन्मरणमपि मे न सम्पद्यत इत्याशयः।

अत्र विच्छिन्नत्वादिनानुपपत्तिर्दशावस्थाभिदाहादिपराणाम् मत्वेऽपि तिरोधितत्वचैतन्यं, परित्यागस्थीभूतत्वविनाशरूपकार्याभावात् चत्वारो विशेषोक्त्यलङ्कारानिरासा मिथो नैरपेक्ष्येण संसृष्टिः। वसन्ततिलकम्।

"सत्यं दाहगुणप्रत. यमः किंह इति भूत"इति दर्पणलक्षणादत्र विशेषोक्तिं विमृशेत्येवम्।

रहम्।

अयञ्च श्लोकः "गाढोद्वेगं दिधा तु मे" अत्र "गाढोद्वेगो दिधाम त्वि" इति ततान्यत्नेन परिवर्तित उत्तररामचरितेऽपि दृश्यत इत्यनुसन्धेयम्।

(२४) मकेति। दैवं पूर्वकर्मार्जितदुरदृष्टमिव दारुणः प्रचण्डकिरणत्वात् भीषणः विवस्वान् मध्याह्निकः सूर्यः निरवग्रहं निवृत्तिवर्जं यथा तथा दहति त्वां सन्तापयति। इयं शरीरावस्था क्लान्तिसमाक्रान्ता। पद्मसरसः पद्मबहुलसरोवरस्य परिसरे तीरे मुहूर्त्तं कियत्समयं व्याप्य आस्यतां उपविश्यताम्। अत्र दैवमिवेति पूर्णोपमालङ्कारः, निरवग्रहेत्यत्र तादृशधर्मस्य श्रौतत्वेन शाब्दीत्वोपमादोषः "यथोद्दण्डेन श्रौतता" मिति दर्पणवचनात्।

দৈবশু পরিত্যাগ করিতে পারিতেছে না। বিরহজনিতাত্যন্তীর শোকসন্তাপ শরীর সন্তাপিত করিতেছে, কিন্তু একেবারে ভস্মীভূত করিতেছে না। এবং হৃদয় বিদারণকারী বিধি প্রহার করিতেছে, কিন্তু একেবারে বিনাশিত করিতেছে না।

(২৪) মক। বয়স্য মাধব! দৈবের ন্যায় দারুণ সূর্য্য ও অপ্রতিহতে (তোমাকে) দগ্ধ করিতেছে। তোমার শরীরাবস্থাও ক্লান্তিযুক্ত, অতএব এই পদ্মবহুল সরোবরের তীরে কিয়ৎকাল উপবেশন কর, এইস্থানে—

त्वां प्रीणयिष्यति पुरःपरिवर्त्तमान-
कल्लोलशीकरतुषारजडः समीरः॥ (२५)

इति परिक्रम्योपविशतः। (२६)

मक। [स्वगतम्।] भवतु, एवं तावत् अन्यतः प्रक्षिपामि। [प्रकाशम्।] वयस्य माधव!। (२७)

---

(२५) उपवेशनप्रयोजनमाह—त्वामिति। उदञ्चितानि रविकिरणसम्पर्कवशादुन्मुखतया समुल्लसितानि नालानि येषां तथाभूता ये बालकमलाकराः अचिरविकचपद्मसमूहाः (आकरो निकरोत्पत्तिस्थानयोरिति तु वाचस्पतिः इति मेदिनीकारः) तेषां मकरन्दनिष्यन्देन मकरन्दसन्निस्रावेण रसक्षरणेनेति यावत्, संवलितः मिश्रितः यो मांसलगन्धः परिपुष्टसौरभं तेन बन्धुरितम्, तथा पुरः अग्रे परिवर्तमानाः दोदुल्यमानाः ये कल्लोलाः विशालतरोत्तरङ्गाः तेषां शीकरैः जलैः तुषारवत् हिमवत् जडः शीतलः (सुषीमः शिशिरो जडः। तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः इत्यमरः) समीरः पवनः त्वां प्रीणयिष्यति क्लान्तिनिवारणेन प्रीतं करिष्यति।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासौ शब्दालङ्कारौ, तथा आरोप्यमाणस्य बन्धुत्वस्य प्रकृतप्रीतकरणोपयोगित्वात् परिणामालङ्कारः, तुषारजडशब्दयोरापातमात्रेण शीतलार्थतया पौनरुक्त्यप्रतिभासनात् पर्यवसाने तु तुषारवत् हिमवत् जडः शीतल इत्यर्थत्वात् पुनरुक्तवदाभासालङ्कारः, अनयोरङ्गाङ्गिभावेन सङ्करः इति संक्षेपः। परिणामपुनरुक्तवदाभासलक्षणं दर्पणोक्तं यथा—

"विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा॥"
"आपाततो यदर्थस्य पौनरुक्त्यावभासनम्।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः॥" इति।

वसन्ततिलकावृत्तम्।

(२७) मकेति। एवं अनेन प्रकारेण मयामाधवाक्रोपचारादिनेति यावत्. अन्यतः

---

(২৫) উচ্ছ্রিত মৃণাল ও অচির প্রস্ফুটিত পদ্মসমূহের মকরন্দবিমিশ্রিত পরিপুষ্ট গন্ধদ্বারা বন্ধুস্বরূপ ও অগ্রে দোদুল্যমান কল্লোলকণাদ্বারা হিমের ন্যায় শীতল বায়ু তোমাকে প্রীত করিবে।

(২৬) (পরিক্রমণানন্তর উভয়ের উপবেশন)

एतस्मिन्मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः ।
बाष्पाम्भःपरिपतनोद्गमान्तराले
दृश्यन्तामविरहितश्रियो विभागाः ॥ (२८)

माधवः सोद्वेगमुत्तिष्ठति । (२९)

मक । कथं प्रतिपत्तिशून्यमुत्थाय अन्यतः प्रवृत्तः ।
[निःश्वस्योत्थाय च ।] सखे । प्रसीद । पश्य (३०)

मालतीव्यतिरिक्तविषयेऽपि, प्रियवयस्यं सञ्चारयामि । मालतीचिन्तायाः कथञ्चित् प्रत्यानये प्रियवयस्यमन्यमनस्कं करोमीत्यर्थः ।

(२८) एतस्मिन्निति । एतस्मिन् सरोवरे मदकलमल्लिकाक्षाणां मदमत्तहंसविशेषाणां पक्षैः पत्रैः, व्याधूतानि कम्पितानि स्फुरन्ति विकसन्ति उरुदण्डानि विशालनालानि पुण्डरीकाणि श्वेतपद्मानि येषु तथोक्ताः, अतएव अविरहितश्रियः अपरित्यक्तशोभाः विभागाः प्रदेशाः बाष्पाम्भसा अश्रुणा परिपतनोद्गमयोः चरणोत्पादयोः अन्तराले मध्ये एकस्य बाष्पाम्भसः परिपतनं अपरस्य चोद्गमः इत्यनयोर्मध्यसमये इत्यर्थः, (एतेनाविच्छिन्नाश्रुविसर्जनं ध्वनितम्) दृश्यन्ताम् कथञ्चिद्विनोदनायावलोक्यन्ताम् ।

अत्र दण्डपुण्डरीकेति व्यञ्जनानामनेकधा सादृश्यात् छेकानुप्रासोऽलङ्कारः । प्रहर्षिणी वृत्तम् ।

अयमपि श्लोकः "सन्दृष्टाः कुवलयिनो भुवो विभागाः" इति चतुर्थचरणमात्रेण कृतवैषम्य उत्तररामचरितप्रथमाङ्के विद्यत इत्यनुसन्धेयम् ।

(२९) सोद्वेगमिति, मकरन्दोक्तविनोदनोपदेश एवात्रोद्वेगहेतुः ।

(३०) कथमिति । प्रतिपत्त्या मदभिहितार्थस्यावबोधेन शून्यं असम्बद्धानप्रत्याहितम्

---

(২৭) মক । হউক, এইপ্রকার প্রিয় বয়স্যকে অন্য বিষয়ে সঞ্চালিত করি । বয়স্য মাধব ।

(২৮) এই সরোবরে মদমত্ত-হংসবিশেষের পাখাদ্বারা বিকম্পিত বিকসিত ও বৃহন্নাল শ্বেতপদ্মশালী এবং শোভাদ্বারা অবিরহিত প্রদেশসকল অশ্রুজলের নিপতন ও উদ্গমের মধ্যসময়ে অবলোকন কর ।

(২৯) (উদ্বেগের সহিত মাধবের উত্থান)

वानीरप्रसवैर्निकुञ्जसरितामासक्तवासं पयः,
पर्य्यन्तेषु च यूथिकासुमनसामुज्जृम्भितं जालकैः ।
उन्मीलत्कुटजप्रहासिषु गिरेरालम्ब्य सानूनिह,
प्राग्भागेषु शिखण्डिताण्डवविधौ मेघैर्वितानाय्यते ॥ (३१)

यदा स्वाचया सत्वाय अन्यतः प्रवृत्तः अन्यस्मिन् गन्तुमारब्धः । प्रसीद मां प्रति प्रसन्नो भव । सावहितं मदुक्तमाकर्णयेत्यर्थः ।

(३१) वानीरेति । इह कस्मिन् स्थाने निकुञ्जैः लतादिपिहितोदरस्थानैः समन्विताः सरितो नद्यः निकुञ्जसरितः (शाकपार्थिवादित्वान्मध्यमपदलोपी समासः) तासां पयो जलं वानीरप्रसवैः वेतसकुसुमैः (करणभूतैः) आसक्तः संलग्नः वासः सौरभं यस्मिन् तथाभूतं सत् वर्त्तत इति शेषः । पर्य्यन्तेषु च तासां नदीनां तटप्रान्तेषु च यूथिकासुमनसां जालकैः कोरकैः (जालकं क्लीबे कलिका कोरकः पुमानित्यमरः) उज्जृम्भितं विकसितं (भावे क्तः) । तथा मेघैः उन्मीलत्कुटजानां विकसत्कुटजकुसुमानां प्रहासिषु प्रकटहासवत्सु गिरेः प्राग्भागेषु ऊर्द्ध्वप्रदेशेषु (प्राग्भारेष्विति पाठे तु शिखरेष्वित्यर्थः) सानून् एकदेशान् आलम्ब्य आश्रयीकृत्य शिखण्डिताण्डवविधौ मयूरनृत्यव्यापारे वितानायते उपरिविस्तीर्णेन चन्द्रातपवदाचर्य्यते । एतत् सर्व्वं चित्तविनोदनार्थं पश्येत्यर्थः ।

अत्र कार्य्येण प्रकृते मेघे प्रकृष्टयुवकानां लास्यादिविशिष्टे सभास्थले नर्त्तकनृत्यानुष्ठाने उपरि विस्तारितस्य चन्द्रातपस्य व्यवहारसमारोपात् समासोक्तिरलङ्कारः, स च वितानायत इति क्यङ्गतोपमया सङ्कीर्य्यते । शार्दूलविक्रीडितं वृत्तम् ।

---

(৩০) মক। আবার কথিত বিষয়ে জ্ঞান না হইতেই উঠিয়া অন্যত্র গমন করিতে আরম্ভ করিলে কেন? (নিশ্বাস ফেলিয়া ও উঠিয়া) সখে! প্রসন্ন হও, দেখ—

(৩১) এই স্থানে নিকুঞ্জসমন্বিত নদীর জল বেতসপুষ্পের গন্ধযুক্ত হইয়া বর্ত্তমান আছে। নদীর তটপ্রদেশে যূথিকাকুসুমের কলিকাসকল বিকসিত হইয়াছে, এবং মেঘসকল বিকসিত কুটজপুষ্পের প্রকৃষ্ট হাস্যবিশিষ্ট পর্ব্বতের ঊর্দ্ধভাগে সানু অবলম্বন করিয়া ময়ূরদিগের নৃত্যানুষ্ঠানে চন্দ্রাতপের ন্যায় আচরণ করিতেছে।

अपिच।

> जृम्भाजर्जरडिम्बडम्बरघनश्रीमत्कदम्बद्रुमा
> शैलाभोगभुवो भवन्ति, ककुभः कादम्बिनीश्यामलाः।
> उद्यत्कन्दलकान्तकेतकभृतः कच्छाः सरित्स्रोतसा-
> माविर्भूतशिलीन्ध्रलोध्रकुसुमस्मेरा वनानां ततिः॥ (३२)

माध। सखे। पश्यामि, किन्तु दुरालोकरमणीयाः सम्प्रति अरण्यभूमयः तत्किमेतत्। [सास्रम्] अथवा किमन्यत्। (३३)

---

(३२) जृम्भेति। शैलाभोगभुवः पर्व्वतप्रान्तवर्त्तिविस्तृतभूमिभागाः जृम्भया विकाशेन (जृम्भा विकाशजृम्भयोरिति विश्वः) जर्जरस्य शिथिलदलस्य डिम्बस्य कुसुमगोलकस्य (डिम्बोऽस्त्रेऽपि च गोलके इति धरणिः) डम्बरेण समारम्भेण (डम्बरोऽस्त्री समारम्भ इति विश्वः) घनश्रीमन्तः निविडशोभाशालिनः कदम्बद्रुमाः नीपपादपाः यासु तथाभूताः भवन्ति। ककुभः दिशः कादम्बिन्या मेघमालया (कादम्बिनी मेघमाला कादम्बरी च कथ्यत इति शाश्वतः) श्यामलाः श्यामवर्णाः भवन्ति। सरित् स्रोतसां नदीप्रवाहाणां कच्छाः अनूपप्रदेशाः (जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध इत्यमरः) उद्यद्भिः उत्पद्यमानैः कन्दलैः नवाङ्कुरैः (कन्दलः कलहे कान्दे नवाग्राङ्कुरसङ्घयोरिति मेदिनीकारः) कान्तान् मनोहरान् केतकान् केतकीवृक्षान् बिभ्रति धारयन्तीति तथोक्ताः भवन्ति। तथा वनानां ततिः श्रेणी आविर्भूतैः उद्गतैः शिलीन्ध्रलोध्रकुसुमैः कदलीपुष्पलोध्रपुष्पैः (शिलीन्ध्रः कदलीपुष्पे कवकत्रिपुटकाख्ययोरिति विश्वः) स्मेरा हासयुक्ता भवति। मद्विनोदनार्थमेतान्यपि सर्व्वाणि पश्येत्यर्थः।

अत्र वर्षाकालवर्णनोपयुक्तत्वेन प्रस्तुतानां शैलाभोगभूप्रभृतीनामेकभवनक्रियाभिसम्बन्धात् तुल्ययोगितालङ्कारः। तस्य च स्वभावोक्त्यलङ्कारेण संसृष्टिः। शार्द्दूलविक्रीडितं वृत्तम्।

(३३) पश्यामीति, त्वदुक्तानि सर्व्वाण्येव तथाभूतान्यवलोकयामीत्यर्थः। सम्प्रति

---

(৩২) আরও দেখ। পর্ব্বতপ্রান্তবর্ত্তী বিস্তৃত ভূমিভাগ বিকাশ শিথিলদল কুসুমগোলোকের সমারম্ভে নিবিড় শোভাশালী কদম্বদ্রুম যুক্ত হইতেছে। দিক্‌সকল মেঘমালায় শ্যামবর্ণ হইতেছে। নদীপ্রবাহের জলপ্রায়প্রদেশ উৎপদ্যমান নবাঙ্কুরে রমণীয় কেতকীবৃক্ষ সকল ধারণ করিতেছে, এবং বনশ্রেণী সমুদ্গত কদলী ও লোধ্রপুষ্পদ্বারা হাস্যযুক্তা হইতেছে।

(৩৩) মাধ। সখে! তোমার কথিত সমস্তই আমি দেখিতেছি। কিন্তু

उत्फुल्लार्जुनसर्जवासितवहत्पौरस्त्यझञ्झानिल-
प्रेङ्खोलत्स्खलितेन्द्रनीलशकलस्निग्धाम्बुदश्रेणयः ।
धारासिक्तवसुन्धरासुरभयः प्राप्तास्त एवाधुना
घर्माम्भोविगमागमव्यतिकरश्रीवाहिनो वासराः ॥ (२४)

मालतीविरहानुभवकाले, दुरालोकाश्च ताः रमणीयाश्चेति तदोक्ताः रमणीया अपि कामोद्दीपकतया विरहिणो माद्दशो दुःखेनैवालोकनीया इत्यर्थः। समभ्यात् एतत् घनानिवर्हनानामेव पदार्थानामान्तरिक्षीद्दमीयालोकोदाहरणं किम्? किमर्थम्? सर्वाभिमत्य निम्नपुष्करणानुविधानेनैवेति भावः। अनुपमास्तेऽपि दुःखकरपदार्थानामेतेषां मदीयदुर्भाग्यत एव कमीयवर्धित्वाहाहयदुःखानुभवो दुष्परिहरणीय एवेति शोकोदयात् मानमाह—अथवेति। अन्यत् ममायासकरादपरं किं? किञ्चिदपि नास्तीत्यर्थः।

(२४) तदेव समर्थयमाह—उत्फुल्लेति। उत्फुल्लैः विकसितैः अर्जुनसर्जैः अर्जुनकुसुमनामककुसुमैः वासित सुरभीकृतः अतएव वहन् प्रवहन् पौरस्त्यः पूर्वदिक्प्रभवः यो झञ्झानिलविशेषः (झञ्झावृष्टिविशेषे स्यादिति मेदिनीकारः) तद्‌वेगसः अनिलः झञ्झानिल, प्रबलवायुरित्यर्थः, तस्य प्रेङ्खोलेन आन्दोलनेन स्खलिता विलुलिता इन्द्रनीलशकलवत् मरकतमणिखण्डवत् स्निग्धा अम्बुदश्रेणीकादिरूपः किंयेषु तथोक्ताः। धारया वर्षधारया सिक्ता प्लाविता या वसुन्धरा मेदिनी तथा सुरभयः सुगन्धाः। तथा घर्माम्भसोः ग्रीष्मवर्षयोर्यौ विगमागमौ अतीतलक्षणागमने तयोः, ग्रीष्मविगमस्य वर्षा आगमस्य चेत्यर्थः। व्यतिकरश्च सम्पर्केण या श्रीः शोभा तां वोढुं शीलं येषां ते तथोक्ताः त एव मालत्या सह विहरणसुखलाभाय ये पूर्वपरिकल्पितास्त एव वासराः दिवसाः प्राप्ताः अस्मिन् मालतीविरहसमये लब्धाः। तथाप्यानन्दकरं किं ममायासान्तिकरमिति भावः।

अत्र वर्षर्तुवर्णविशेषे वक्तव्ये तथा इति सामान्यवचनात् विशेषे अविशेषाख्यदोषः। द्वितीयपादे लुप्तोपमालङ्कारः। शार्दूलविक्रीडितं वृत्तम्।

এই বনভূমি বরণীয় হইলেও সম্প্রতি আমার দুরবলোকনীয়, অতএব আমি-বিরহার্ত এই সকলের উদাহরণ কেন? অথবা আমার অশান্তিকর ভিন্ন কি আছে?

(৩৪) যাহাতে বিকসিত অর্জ্জুন এবং শালকুসুমে সুগন্ধীকৃত ও প্রবহমান পূর্ব্বদিকের ঝঞ্ঝা বায়ুর আন্দোলনে মরকতমণিখণ্ডের ন্যায় মেঘশ্রেণী বিচ্যুত হইয়াছে, তাদৃশ ও বর্ষণসিক্ত মেদিনী দ্বারা সুগন্ধীকৃত এবং গ্রীষ্ম-বিগমের ও

हा प्रिये मालति! ।

तरुणतमालनीलबहुलोन्नमदम्बुधराः,
शिशिरसमीरणापधृतनूतनवारिकणाः ।
कथमवलोकयेयमधुना हरिहेतिमती-
र्मदकलनीलकण्ठकलहंसमुखराः ककुभः ॥ (३५)

मोहं नाटयति । (३६)

सखे! कोऽप्यतिदारुणो दशाविपाकः सम्प्रति वयस्यस्य। [सास्रम्।] मया पुनर्वज्रमयेन कोऽपि विनोद आरब्धः।

---

(३५) तरुणतमालवत् मोहनातिकृष्णवत् नीलाः श्यामवर्णाः, बहुलाः बहवः उन्नमन्तः उद्गच्छन्तश्च अम्बुधराः मेघाः यासु तथोक्ताः, शिशिरसमीरणैः शीतलपवनैः अपधृताः कम्पिताः नूतनवारिकणाः नवजलबिन्दवः यासु तथोक्ताः, हरिहेतिमतीः इन्द्रचापवतीः, मदा मदकल-नीलकण्ठानां मदमत्तमयूराणां कलहंसानां च (कलहंसाः कादम्बा इति विश्वः) मुखराः शब्दायमानाः ककुभः दिशः अधुना अस्मिन् मालतीविरहोपभोगकाले अहं केन प्रकारेण अवलोकयेयम् पश्येयम्। उद्दीपकतया कथमपि द्रष्टुं न शक्नोमीति भावः।

अत्रापि वाचकपदलुप्ता अभिधातव्ये हेतौ अलङ्कारः। "नर्दटक" नाम छन्दः। "यदि भवतो नजौ भजजलागुरु नर्दटकम्" इति तल्लक्षणम्।

एवं "कुसुमगीतकण्ठ मालति, उद्दीपकैः। शिवतातैः सुखकरैः प्रावृट्कालं प्रदर्श्य" इति विभावानुसारेण वर्षाकालवर्णनादिदं नाम काव्यवचनम्। यथोक्तं— "दिक्कालस्वरूपेण वर्णनादिदमुच्यते" इति।

(३६) मोहं मूर्च्छां विप्रलम्भजनितां मोहं नाटयति शरीरचेष्टादिनाभिनयति।

বর্ষা-সমাগমের সম্পর্কশালিত শোকাধায়ক সেই মদন দিবস (অর্থাৎ প্রিয়তমার সহিত বিহার করিবার জন্য মনোহারো মদিরেক্ষিত দিনগুলো) এই প্রিয়াবিরহকালে পতিত হইয়াছে।

(৩৫) হা প্রিয়ে মালতি! যাহাতে তরুণ তমালবৃক্ষের ন্যায় নীলবর্ণ বহুমেঘ উন্নত হইতেছে, শীতল বায়ু নূতন জলকণা বিকীর্ণ করিতেছে, বিদ্যুতের চাকচিক্য এবং ময়ূরকোলাহলে মুখরিত তাদৃশ দিকসকল সম্প্রতি আমি কিরূপে অবলোকন করিব?

(৩৬) (শোকজনিত পীড়ার অভিনয়)

[निःश्वस्य ।] एवं पर्य्यवसितप्रायैव नो माधवं प्रति प्रत्याशा । [सभयं विलोक्य ।] कथं प्रमुग्ध एव ? । [आकाशे ।] सखि मालति ! किमपरं । निरनुक्रोशासि । (३७)

अपहस्तितबान्धवे त्वया विहितं साहसमस्य दृष्णया ।
तदिहानपराधिनि प्रिये सखि ! कोऽयं करुणोज्झितक्रमः ॥ (३८)

---

(३७) नवेति । कोऽपि अनिर्वचनीयः, अतिदारुणो अतिभीषणः, दशाविपाकः अवस्थापरिणतिः । वज्रमयेन वज्रवत्कठिनहृदयेनेत्यर्थः, मयास्येदृगवस्थाशालस्य-मरणादिति भावः । कोऽपि अतीवानुचितः विनोदः शोकनिवारणोपायः । (शोकोद्दीपक-पदार्थानामेव शोकनिवारणोपायत्वेन प्रदर्शनादनौचित्यमिति मन्तव्यम्) पर्य्यवसितप्रायैव परि-समाप्तप्रायैव । अतःपरं जीवनधारणस्यासम्भवत्वादिति भावः । प्रमुग्ध एव अचेतन एव । किमपर-मिति कथयामीति शेषः, अतःपरं यद्वदेत् तद् सर्व्वमेवावक्तव्यमिति भावः । निरनुक्रोशासि यः सञ्जीवनतेरपेक्षेण ग्रस्यान्तरेसे त्वा दर्शितवान्, तस्य अनपत्यदशायां समुपस्थितायां-मप्यनागमनात् सर्व्वथैव निर्दयासि । "तत्र मोहं गते शोकाद्द्युति"रिति वचनादत्र "द्युति"-नाम विमर्शसन्धेरङ्गम् ।

(३८) अपेति । अपगतौ हस्तौ आधिपत्यं येषां ते अपहस्ताः, अपहस्ताः कृताः अपहस्तिताः (कारोत्यर्थप्रतिपादकापहस्तशब्दात् कार्म्मणि क्तः) अपहस्तिताः अनपेक्षाप्रदर्शनादिनाधिपत्यमुक्ताः कृताः बान्धवाः पित्रादयो यया तथाभूते ! सखि ! मालति ! त्वया अस्य माधवस्य कृपया प्रति-पालनया साहसं विहितं स्वयमेवात्मार्पणात् साहसमनुष्ठितम् । तस्मात् अनपराधिनि अपराधशून्ये एव अस्मिन् प्रिये माधवे करुणया दयया उज्झितः विरहितः अयं अभिमतसम-

---

(৩৭) মক ! সম্প্রতি বয়স্ত মাধবের অবস্থাপরিণাম অনির্ব্বচনীয় ও অতিভীষণ। (অশ্রু বিসর্জ্জন করিতে করিতে) বজ্রের স্থায় কঠিন হৃদয় আমি আবার অনুচিত শোক নিবারণের উপায় অবলম্বন করিয়াছি। (নিশ্বাস ত্যাগ করিয়া) মাধবের প্রতি আমাদের প্রত্যাশা এই প্রকারে পরিসমাপ্তপ্রায়। (ভয়ের সহিত অবলোকন করিয়া) একি একেবারে অচেতনই যে হইয়াছে। (ঊর্দ্ধে অবলোকন করিয়া) সখি ! মালতি ! আর কি বলিব ? তুমি অত্যন্ত নির্দ্দয়া হইয়াছ।

(৩৮) সখি মালতি ! তুমি ইহারই প্রাপ্তিলোভে পিত্রাদি বান্ধবগণের

कथमद्यापि नोच्छ्वसिति, हन्त मुषितोऽस्मि दैवेन । (३९)

मातर्मातर्दलति हृदयं, ध्वंसते देहबन्धः,
शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि ।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा,
विष्वङ्मोहः स्थगयति, कथं मन्दभाग्यः करोमि ॥ (४०)

अनुगमनेऽपि सर्वेषामर्थवत्त्वात् अतः तत्र अवसरात् कः कौतुकम् । कर्मदैवाप्तनीयेन इति भावः ।

समासन्नावसरवैषु विभावादि यत्नार्धनिर्देश्यव्यवहारादिनुभावदशीकृतात् वागादसारत्वादुक्तनाय अनुतर्निभितवविलापनात्हात् । तल्लक्षणं यथा दर्पणे—

विभावेन विना चेतु कार्योत्पत्तिर्यदुच्यते ।
तदानुकूलनिमित्तात् सा क्रिया परिकीर्तिता ॥ इति ।

सुन्दरीयम् ।

(३९) कथमिति । अद्यापि अधुनापि, नोच्छ्वसिति चेतनां न भजति, मुषितोऽस्मि मालती-लाभधनापहरणेन चौरितोऽस्मि ।

(४०) अधुनैव विरहः कामन्दकीं सम्बोधयति—मातर्मातरिति, वित्तरं विकलितः । मम हृदयं दलति विदीर्णं भवति । दलनैव मनस्य मालत्यास्ते हृदयस्थत्वादर्शनेनेति हेतुः । देहबन्धः शरीरसन्धिः ध्वंसते मुच्यते । जगत् भुवनं शून्यं वस्तुरहितमिव मन्ये अनुभवामि । तथा अविरता विच्छेदरहिता ज्वाला यस्मात् तादृशं यथा स्यात्तथा अन्तर्मध्ये ज्वलामि दग्धो भवामि । विधुरः समन्तात् आकुलः अन्तरात्मा सीदन् अवसादमानमनाः मज्जतीति अन्धं तमसीवान्धे तमसि अन्धकारे मज्जतीव निमग्न इव भवतीव । तदा मोहः अज्ञानं विष्वक् सर्वतः स्थगयति इन्द्रियव्यापारं रोधयति । तस्मात् मन्दभाग्यः अहं कथं किं करोमि । किमपि प्रतीकारोपायमनुष्ठातुं न शक्नोमीति भावः ।

আমিনতা মৃত্যু কহিবা বন্ধু আত্মার্পণরূপ অতি সাধন করিয়াছি। তবে এখন এই অনপরাধী প্রিয় মাধবে করুণার্দ্র হইয়া এই ব্যবহার কিরূপ?

(৩৯) কেন এখনও সংজ্ঞাপ্রাপ্ত হইল না? হায়! দৈব আমার সর্বস্ব হরণ করিয়াছে।

(৪০) মাতঃ! কামন্দকি! (মাধবের এই অবস্থা দর্শনে) আমার হৃদয় বিদীর্ণ হইতেছে, শরীরবন্ধন শিথিল হইতেছে। এই জগৎ যেন শূন্য

कष्टं भोः कष्टम् । (४१)

बन्धुताहृदयकौमुदीमहो, मालतीनयनपूर्णचन्द्रमाः ।

सोऽयमद्य मकरन्दनन्दनो, जीवलोकतिलकः प्रलीयते ॥ (४२)

हा वयस्य माधव !

गात्रेषु चन्दनरसो हृदि शारदेन्दु-

रानन्द एव हृदये, मम यस्त्वमासीः ।

अत्र मूल्यं मन्ये इत्यभावोत्प्रेक्षा, मज्जतीवान्तरात्मेति वाच्यक्रियोत्प्रेक्षा, तथा "मन्दभाग्यः किं करोमी"ति वाक्यार्थं प्रति पूर्ववर्त्तिवाक्यार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गञ्चालङ्कार इत्येतेषामङ्गाङ्गिभावेन सङ्करः । मन्दाक्रान्ताछन्दः ।

अयमपि श्लोकः "हा हा देवि ! स्फुटति हृदयं ध्वंसते देहबन्ध" इति प्रथमचरणेन ज्ञातवैषम्य उत्तररामचरितस्य तृतीयाङ्के परिलक्ष्यत इत्यनुसन्धेयम् ।

(४१) कष्टं दुःखं "भो" इति तदातिशय्यद्योतकमव्ययम् । विषादे एव द्विरुक्तिः ।

(४२) बन्ध्विति । बन्धुताया: बन्धुसमूहस्य (ग्रामजनेत्यादिना समूहार्थे तल्) हृदये मनसि कौमुदीमहः उत्सवस्वरूपः, मालतीनयनयोः पूर्णचन्द्रमा उत्सवीभूतस्वरूपः, मालतीनयनयोः पूर्णचन्द्रमा मालतीमानन्दयत्वात् पूर्णिमाचन्द्रस्वरूपः, मकरन्दस्य मम नन्दनः आनन्दवर्द्धनः तथा जीवलोकस्य संसारिसमूहस्य तिलकः भूषणविशेषस्वरूपः अयं मत्पुरोवर्त्ती स लौकिकादिभिः प्रसिद्धः माधवः अद्य प्रलीयते प्रियतमाविरहदुःखेन म्रियते । अहो अतःपरं किं विनाशकारणमिति भावः ।

अत्र निरङ्गमालारूपकालङ्कारः । एवं "यः सामान्यगुणोद्रेकः समुच्चयनिश्चयो मतः" इति लक्षणात् तुल्ययोगिता नाम नाट्यलक्षणम् । रथोद्धताछन्दः ।

मনে করিতেছি। অবিশ্রান্ত সন্তাপের মধ্যে দগ্ধ হইতেছি। ব্যাকুল অন্তরাত্মা অতিশয় অবসন্ন হইয়া যেন গাঢ় অন্ধকারে নিমজ্জিত হইতেছে, অতএব মন্দভাগ্য আমি কি করিব?

(৪১) অহো কষ্ট অহো কষ্ট!!!

(৪২) বান্ধবগণের হৃদয়ের জ্যোৎস্নার উৎসবস্বরূপ, মালতী নয়নের পূর্ণচন্দ্রস্বরূপ, জীবলোকের তিলকস্বরূপ, ও মকরন্দের (আমার) আনন্দবর্দ্ধন এই পুরোবর্ত্তী সর্বজনপ্রসিদ্ধ মাধব (প্রিয়তমাবিরহে) বিলীন হইতেছে।

तत्त्वां निकामकमनीयमकाण्ड एव
कालेन जीवितमिवाहरता हतोऽस्मि ॥ (४३)

स्पृशन्। (४४)

मकरन्द ! वितर स्मितोज्ज्वलां दृशमतिदारुण ! देहि मे गिरम् ।
सुहृदमनुरक्तचेतसं प्रियमकरन्द कथं न मन्यसे ॥ (४५)

---

(४३) हा येति। हा वत्स माधव ! यस्त्वं (परिष्वज्यमानः) मम गात्रेषु चन्दनरस इव मदङ्गस्य हृदयानुवेदनसुखरूप आसीः (स्पर्शेन शीतलस्पर्शत्वादिति भावः) तथा (आलोक्यमानः) इति मम नयने शारदेन्दुः शरत्कालीनचन्द्रः आसीः (चक्षुषा आह्लादजनकत्वादिति भावः) तथा (परिचिन्त्यमानः) हृदये ममान्तःकरणे आनन्द एवासीः (न हि कदाचिदप्यनानन्द इति सुखमय एव त्वं, अत एव कालिदासे निषधाच्छादोषः) तं तथाभूतं निकामकमनीयं सततमेव रमणीयं जीवितमिव मम जीवनमिव स्थितं त्वां अकाण्डे एव अहरता अपहरता कालेन कृतान्तेन हतोऽस्मि अहमपि विनाशितोऽस्मि। माधवविरहितस्य जीवितम् एव ममापि मरणस्यावश्यम्भावादिति भावः।

अत्रापि मालारूपकालङ्कारः, जीवितमिवेत्युपमया चैतयोः परस्परनैरपेक्ष्यात् संसृष्टिः। प्रथमार्धे चन्दनशीतांशुचन्द्रानन्दाभिधानात् रूपकत्वादोषः। वसन्ततिलकावृत्तम्।

(४४) स्पृशन्निति माधवकलेवरमिति शेषः।

(४५) मकरन्देति। हे मकरन्द ! इत्यभिनिवेशेऽपि आर्द्रव्याकुलतयापि च। स्मितेन ईषद्धास्येन उज्ज्वला शोभमाना इमां दृष्टिं वितर अर्पय, पूर्ववत् स्मितपूर्वकं मामपि दृष्टिनिक्षेपं कुरु इत्यर्थः। हे अतिदारुण ! तवापरकाले मम जीवननाशसम्भावनया अत्यन्तपरितापदायकत्वादतिदारुण, स्मितोज्ज्वलां गिरं प्रतिवचनं मे मह्यं देहि। पूर्ववदेव मया सार्धं स्मितपूर्वाभिभाषणं विधेहीत्यर्थः। हे प्रियमकरन्द ! (प्रियः मकरन्दः यस्य

---

(৪৩) হা বৎস মাধব! যে তুমি আমার গাত্রে চন্দনরসস্বরূপ, নয়নে শারদচন্দ্রস্বরূপ ও হৃদয়ে সর্ব্বদাই আনন্দস্বরূপ ছিলে, পরমরমণীয় আমার জীবনতুল্য সেই তোমাকে হরণ করিয়া কৃতান্ত আমাকেও বিনাশিত করিয়াছে।

(৪৪) (মাধবের শরীর স্পর্শ করিতে করিতে)

(৪৫) হে মকরন্দ! ঈষৎ হাস্যোজ্জ্বল দৃষ্টি নিক্ষেপ কর। হে অতি

माधवः संज्ञां लभते।

मक। [सोच्छ्वासम्।] अयमचिरधौतराजपट्टरुचिरमांसलच्छविर्नवजलधरः तोयशीकरासारेण मे वयस्यं जीवयति, दिष्ट्या जगदुच्छ्वसितं तावत्। (४६)

माध। तत्कथमत्र विपिने प्रियावार्त्ताहरं करोमि। [विलोक्य।] साधु, साधु। (४७)

तथाभूत!) सहचरं सखायं मां कथं किमर्थं अनुरक्तचेतसं त्वां प्रति प्रणयानुरागयुक्तमानसं न मन्यसे नाङ्गीकरोषि? मदङ्गीकारे चैवमौदासीन्यमप्रत्युत्तरप्रदानञ्च सम्भवेदिति भावः।

अपरवक्त्रं छन्दः। तल्लक्षणन्तु—"अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ जरौ" इति।

(४६) सोच्छ्वासमिति, उच्छ्वासेन माधवस्य श्वासाभावदर्शनजनितानन्दोदयेन सह यथा स्यात्तथेत्यर्थः। अचिरधौतः सद्यः परिष्कृतः यो राजपट्टः श्यामवर्णमणिविशेषः तद्वत् रुचिरा रमणीया मांसला परिपुष्टा च छविः कान्तिर्यस्य तथाभूतः नवजलधरः, नूतनमेघः तोयशीकरासारेण अम्बुकणधारासम्पातेन, जीवयति चैतन्यमापादितवान्, (अतीतकालीनेऽपि वर्त्तमाना) दिष्ट्या मदीयसौभाग्येन, जगत् भुवनं उच्छ्वसितं माधवस्य प्राणाभिमोक्षात् प्राणं। अन्यथा माधवेन सहैव जगत् यदोच्छ्वासविरोऽभविष्यदिति भावः।

(४७) तत् कथं—केन प्रकारेण, प्रियायाः मालत्याः, वार्त्ताहरं दूतं करोमि। चक्षुः पातातिपातात् प्रियायाः सकाशे सम्प्रति मत्कुशलवार्त्तामेव यथायथं किञ्चित् विपिने तदुपयुक्तलोकाभावात् कं प्रेषयामीति भावः। विलोक्येति मेघमित्यादिः। तस्यैव दौत्यं सम्भाव्य कृतार्थं इवाह—साधु साध्विति।

याचन! আমার হাস্যবিমিশ্রিত প্রতিবচন প্রদান কর। হে প্রিয় মকরন্দ! আমাকে অনুরক্তচিত্ত মনে করিতেছ না কেন?

(মাধবের সংজ্ঞালাভ)

(৪৬) মক। (আনন্দোদ্রেকের সহিত) অচিরপরিষ্কৃত রাজপট্টকের (নীলবর্ণ মণিবিশেষের) ন্যায় মনোহর ও পরিপুষ্ট কান্তিশালী এই নূতন মেঘ জলবিন্দুধারাসম্পাত দ্বারা আমার প্রিয় বয়স্যকে জীবিত করিয়াছে। আমার সৌভাগ্যক্রমেই জগৎ আনন্দিত হইল।

फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनतनुतरङ्गामुत्तरेण स्रवन्तीम् ।
उपचितघनमाला-मेदुरापिच्छनीलः,
श्रयति शिखरमद्रेर्नूतनस्तोयवाहः ॥ (४८)

(सहर्षमुत्थाय [illegible]) । (४९)

हा स्निग्ध ! प्रियसहचरी विद्युदालिङ्गति त्वाम् ?
चातकैर्नृत्यप्रणयसुलभा[illegible] वा भजन्ते ? ।

---

(४८) फलेति । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] अद्रेः [illegible] [illegible] [illegible] [illegible] [illegible] ।

अत्र [illegible] । मालिनीवृत्तम् ।

(४९) [illegible] [illegible] । [illegible] ।

(५०) हा स्निग्धेति । हे [illegible] ! [illegible] ! प्रियसहचरी विद्युत् [illegible] त्वां आलिङ्गति कच्चित् किं ([illegible]) [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] विद्युदपि त्वां परिरभ्य [illegible]

---

(৪৭) হায়! তবে এখন কি প্রকারে এই বিপিনে প্রিয়তমার নিকটে দূত প্রেরণ করি? (মেঘ অবলোকন করিয়া) সাধু সাধু।

(৪৮) ফলভরের পরিপাকবশতঃ শ্যামবর্ণ জম্বুকুঞ্জ হইতে নিপতিত [illegible] নদীর উত্তর দিকে [illegible] [illegible] [illegible] সৌন্দর্য্য নূতন মেঘ পর্ব্বতের শিখর অবলম্বন করিতেছে।

(৪৯) (সাদরে উঠিয়া ও ঊর্দ্ধমুখে কৃতাঞ্জলি হইয়া)

(৫০) হে [illegible]! প্রিয় সহচরী বিদ্যুৎ তোমাকে আলিঙ্গন করে কি? চাতকগণ [illegible] প্রীতিপূর্ব্বক [illegible] হইয়া তোমার ভজনা

पौरस्त्यो वा सुखयति मरुत् साधु संवाहनाभिः ?
विष्वग्विभ्रत्सुरपतिधनुर्लक्ष्म लक्ष्मीं तनोति ॥ (५०)
[आकर्ण्य ।] अयि ! प्रतिरवभरितकन्दरानन्दितोत्कण्ठनील-
कण्ठकेकानुवर्त्तिना मन्द्रहुङ्कृतेन, माननुमन्यसे, यावदर्थये।
त्वन् जीमूत ! (५१)

आशयः। विरहित्वादेव प्रथमं प्रियाप्रियजनविषयकः प्रश्नः। तथाऽऽदेवेन उभयोरेव प्रियाप्रियजन-
त्वा व्यज्यते। आविर्भूतैः नवबसन्तोत्पन्नैः प्रथमैन मौल्या मुकुला: मधुनात्याः मालत्या वा
। भज्यसे सेवसे कच्चित् ? किं? मकरन्दो यथा मा विहाय स्वामिनमधिनिहृदयेऽस्थाय मां-
।या मालका अपि मा विहाय गता वैदाशयः। एतेन समतौव मकरन्दसन्निधानेच्छा,
।मुखवर्त्तिनीऽपि मकरन्दस्यादर्शनेनौन्मादावस्था च व्यज्यते। पौरस्त्यः पूर्वदिग्भवः (यद्यात्मतो
पूर्वत एव वायोः प्रायश वहनात् पौरस्त्य इति स्वरूपविशेषणम्) मरुत् पवनो वा संवाहनाभिः
सम्यक् प्रेरणाभिः (हस्तपदमर्दनादिभिश्च) साधु सम्यक् यथा तथा सुखयति कच्चित् ?
त्वामानन्दितं करोति किं ? यथा मकरन्दः सम्प्रति मां विहायान्यत्र भ्रमति, तथा वायुरपि
त्वां परित्यज्य गतो वैदाशय.। एतेन मकरन्दस्य अनुपस्थितेऽपि व्यज्यते। विष्वक् सर्वतः
लक्ष्मीं प्रियं बिभ्रत् धारयत् नानारत्नखचितत्वेनातीव मनोहरमित्यर्थः, सुरपतिधनुरिन्द्रधनुः
लक्ष्म तव चिह्नं तनोति विस्तारयति कच्चित् किम्? यथा नानाभरणादिकमिदानीं
मत्पार्श्वे न निहितं तिष्ठति, तथा नानारत्नाभरणमूलमिन्द्रधनुर्विंशत्यं तिष्ठति वैदाशयः। एतेन
मानरत्नाद्यभावेऽपि सुष्यत धन्याधानस्थलेन नानाविधेच्छया एव समस्त इति विभावनीयम्।
अत्र मेघविद्युतोर्नायिकानायकत्वस्य च नायकगतविशेषव्यवहारसमारोपात् समासोक्ति-
र्मालायां च मालती मधुकरव्यवहारसमारोपात् संवाहकस्वरूपस्य च पवने भृत्यव्यवहारसमारोपात्
चिह्नविस्तारस्वरूपस्य चेन्द्रधनुषि भृत्यव्यवहारसमारोपाच्च प्रस्तारः समासोक्त्यलङ्कारः,
तत्रसर्वैरिति रूपैकानुप्रासश्च प्रत्यासत्तौ द्वयोः परस्परनैरपेक्ष्यात् संसृष्टिः। मन्दा-
क्रान्ता वृत्तम्।
(५१) आकर्ण्येति। प्रतिरवभरितासु प्रतिध्वनिपूर्णासु कन्दरासु गुहासु (पर्वतस्थितासु

করে ? পূর্বদিক্-প্রভব বায়ু সম্যক্ পরিচালনা দ্বারা তোমাকে সুখী ক-
রি? এবং সর্বতোভাবে শোভাশ্রী ইন্দ্রধনু তোমার সৌন্দর্যচিহ্ন বিস্তা
করে কি ?

दैवात् पश्येर्जगति विचरन्निच्छया मत्प्रियां चेत्
आश्वास्यादौ तदनु कथयेर्माधवीयामवस्थाम् ।
आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः,
प्राणत्राणं कथमपि करोत्यायताक्ष्याः स एकः ॥ (५२)

[illegible]) [illegible] ... इति ।

(५२) [illegible] निदिदर्शयि—दैवादिति [illegible] । हे मेघ ! [illegible] ... मत्प्रियां चेत् ... ([illegible]) [illegible] ... आश्वास्य ... तदनु [illegible] माधवीयां ... ([illegible]) [illegible] —आशेति । [illegible] ... "[illegible]" [illegible] —प्राणेति । [illegible] ... स एकः [illegible] ... करोति । [illegible] ... भावः ।

---

(৫১) (প্রবেশ করিয়া) অহো !! প্রতিধ্বনিপূর্ণ গুহাবর্তিত আনন্দিত ও উৎকণ্ঠিত ময়ূরগণের মনোজ্ঞ কেকাশব্দানুসারী 'হুঁ' ইত্যাকার শব্দ দ্বারা আমার [illegible] মেঘ আমাকে নিজের বন্ধুত্ব বলিবার অনুমতি দিতেছে। অতএব ইহাই প্রার্থনা করি। ভগবন্! বারিদ!

(৫২) তুমি স্বেচ্ছায় জগতে বিচরণ করিতে করিতে যদি দৈবাৎ আমার প্রিয়তমাকে দেখ, তবে প্রথমে আমার অবস্থাটি বৃত্তান্ত দ্বারা তাহাকে আশ্বাস

[सहर्षम् ।] अहो ! प्रचलितः, तदन्यत्र सञ्चर मि[परिक्रामति] । (५३)

मक । [सोद्वेगम् ।] कथमिदानीमुन्मादोपरागो माधवेन्दुमास्कन्दति, हा तात ! हा अम्ब ! भगवति ! परित्रायस्व, परित्रायस्व । पश्य माधवावस्थाम् । (५४)

अत्र हेतोरर्थवाक्यीकार्यस्य चतुर्थवाक्योक्तकारणेन समर्थनादर्थान्तरन्यासोऽलङ्कारः । मन्दाक्रान्ता वृत्तम् ।

एतत्श्लोकद्वितीयार्धस्यानुरूपश्लोकार्धं यथा मेघदूते —

"आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ॥"

(५३) सहर्षमिति । एतत्पद्यार्थेनानन्तरमेव मेघस्य सञ्चलनदर्शनेन "मदीयदौत्यं कर्तुमिवायं प्रचलती"ति परिकल्पनमेवात्र हर्षहेतुर्बोध्यः । प्रचलित इति मालत्यै मदवस्थां कथयितुमिति शेषः । तस्मात् प्रार्थितकार्यस्य सम्पादनादिति यावत्, अन्यत्र सञ्चरामि, इतोऽन्यत्र स्थाने गच्छामि । (परिक्रामति अन्यत्र गमनाय पादविक्षेपं करोति)।

(५४) कथमिति । उन्मादः विरहजनितोन्मादावस्था एव उपरागः राहुग्रासः माधव एव इन्दुश्चन्द्रः तं आस्कन्दति अभिभवति । अन्यथा अचेतनं मेघमुद्दिश्यैवं दौत्यप्रार्थनस्यासम्भवादिति भावः । विपत्काले पित्रोः सम्बोधनम् स्वाभाविकमिति तत्सम्बोधनम् । विपत्प्रतीकाराय भगवतीति समधिकतमाहात्म्यायाः कामन्दक्याः सम्बोधनम् । परित्रायस्व परित्रायस्वेत्यतिविषादे द्विरुक्तिः, मामिति शेषः, क्वचित् "मां" इत्यपि पाठः । माधवं प्रकृतिस्थं विधाय मां परिरक्षेत्यर्थः । अत्रोन्मादे राहुग्रासारोपादेव माधवे चन्द्रत्वारोपेण अश्लिष्टपदघटितपरम्परितरूपकालङ्कारः ।

যুক্ত করিয়া তৎপরে মাধবের (আমার) এই বিরহাবস্থা বলিও। কিন্তু বলিতে বলিতে আবার প্রাপ্তিপ্রত্যাশারূপ সূত্র একেবারে উচ্ছেদিত করিও না। কারণ কেবল সেই প্রাপ্তিপ্রত্যাশাসূত্রই অতিকষ্টে তাহার জীবন রক্ষা করিতেছে।

(৫৩) (হর্ষের সহিত) অহো!! মালতীকে আমার অবস্থা জানাইবার জন্য যাইতেছে, অতএব আমি অন্যত্র গমন করি। (পরিক্রমণ)

(৫৪) মক। (উদ্বেগের সহিত) কেন সম্প্রতি উন্মাদরূপ রাহুগ্রাস মাধব-

माध। धिक् प्रमादः। (५५)

नवेषु लोध्रप्रसवेषु कान्तिर्दृशः कुरङ्गेषु गतं गजेषु।

लतासु नम्रत्वमिति प्रमथ्य, व्यक्तं विभक्ता विपिने प्रिया मे ॥ (५६)

हा प्रिये मालति! [इति मूर्च्छति।] (५७)

---

(५५) माधेति। निर्भर्त्सनार्थे प्रयोगे धिक्शब्दः। प्रमादः अनवधानता, अस्माक-मिति शेषः। अस्माकमनवधाने सति अस्मदनवधानवशादेव मालत्या विभावस्यासम्भवादिति भावः।

(५६) अनवधानतायाः फलं दर्शयति—नवेष्विति। नवेषु अचिरविकसितेषु लोध्रप्रसवेषु लोध्रस्य कुसुमेषु कान्तिः तस्या गौरत्वं दृश्यत इति शेषः। कुरङ्गेषु मृगेषु दृशः, तस्या-श्चञ्चलावलोकनानि दृश्यन्त इति शेषः। गजेषु करिषु गतं तस्या मन्थरगमनं, तथा लतासु नीरन्ध्रं नम्रत्वं तस्या आननमनसमावत्वं दृश्यत इति शेषः। इति हेतोः विपिने अस्मिन् वने प्रमथ्य अकृत्वा मे मम प्रिया मालती व्यक्तं स्पष्टं यथा स्यात्तथा विभक्ता लोध्रप्रसवादिभिर्विभज्य नीता। अन्यथा लोध्रप्रसवादिषु तत्कान्त्यादेर्दर्शनासम्भवादिति भावः।

अत्र दृश्यत इत्यादि क्रियापदाना लोध्रप्रसवादिभिरपि अपुंवदस्य अभावेऽपि न न्यून-पदत्वदोषः, एतादृशस्थले क्रियापदानां पदाध्याहारस्य सुधियामनुवेद्यत्वादिति समाधेय-मीयम्।

अत्र प्रयोज्यमानकृष्णेन माधवेन लोध्रप्रसवादिकान्त्यादिषु मालतीकान्त्याद्यभेदावधारणात् प्राप्त्यार्थे प्रामाधिन न विदर्भणावहारः, परन्तु भ्रमामन्दलोकत्वे भ्रमभ्रान्तताद्याक्रियोत्-प्रेक्षालङ्कार इति। उपेन्द्रवज्रा वृत्तम्। सह्यदेशोपजातिवृत्तम्।

(५७) उत्कण्ठातिशयपरिकम्पनेन मालत्या मरणासन्नतामाविष्करोति—"हा प्रिये मालती"ति। इति इत्यर्थेन, मूर्च्छति मूर्च्छां प्राप्नोति। एतद्रूपेण मरणावस्थारम्भेऽपि मूर्च्छायामपि हेतुः।

মণ চন্দ্রকে অভিভূত করিয়াছে? হা পিতঃ! হা মাতঃ! ভগবতি কামন্দকি! আমাকে রক্ষা কর, রক্ষা কর। মাধবের অবস্থা নিবারণ কর।

(৫৫) মাধ। আমাদিগকে ধিক্! আমাদের কি অনবধানতা!

(৫৬) নূতন লোধ্রকুসুমে প্রিয়তমার কান্তি, হরিণীতে প্রিয়তমার চঞ্চল অবলোকন, হস্তীতে প্রিয়তমার মন্থর গমন ও লতাতে প্রিয়তমার নম্রতা পরিদৃষ্ট হইতেছে। অতএব মনে হয়, ইহারাই আমার প্রিয়তমাকে এই অবস্থা ভাবিয়া বিভাগ করিয়া নিয়াছে।

(৫৭) হা প্রিয়ে! মালতি! (এই কথা বলিয়া মাধবের মূর্চ্ছা)

मक । सुहृदि गुणनिवासे प्रेयसि प्राणनाथे
कथमिव सहपांसुक्रीडनप्रौढसख्ये ।
प्रियजनविरहाधिव्याधिखेदं दधाने,
हतहृदय! विदीर्य्य त्वं द्विधा न प्रयासि ? (५८)

माध । [आश्वस्योत्थाय ।] सुलभानुकारः खलु जगति वेधसो निर्म्माणविशेषः, भवतु एवं तावत् । [उच्चैः ।] अयमहं भोः, प्रणिपत्य भूधरारण्यचारिणः सत्त्वान् विज्ञापयामि मुहूर्त्तमवधानदानेन मामनुगृह्णन्तु भवन्तः । (५९)

---

(५८) सुहृदीति । गुणनिवासे विद्याविनयादिसर्व्वसद्गुणाश्रये प्रेयसि प्रेयाया स्नेहे प्राणनाथे प्राणानां नियन्तरि (येन विना प्राणधारणमेवासम्भवं तथाभूते इति भावः) तथा सह, पांशुक्रीडनात् मिलित्वा धूलिखेलनात् प्रभृतिमारभ्य, प्रौढं दृढभावेन सञ्जातं सख्यं बन्धुता यस्मिन् तथाभूते सुहृदि मित्रे अस्मिन् माधवे प्रियजनस्य प्रियतमायाः मालत्याः विरहेण विश्लेषेण य आधिः मानसी व्यथा (पुंस्याधिर्म्मानसीव्यथेत्यमरः) स एव व्याधिः रोगः तस्य खेदं तज्जनितक्लेशं दधाने धारयति सति हे हतहृदय! कुण्ठितचित्त! त्वं द्विधा विदीर्य्य कथमिव (इवशब्दो वाक्यालङ्कारे) किमर्थं न प्रयासि न गच्छसि । ईदृगवस्थायां मां विहाय तव गमनमेव सर्व्वथानुचितमिति भावः ।

अत्र माधवीयदुःखाया अनुयनौचित्यप्रतिपादनाभिप्रायेण विशेषणानां प्रयुक्तत्वात् परिकराऽलङ्कारः । मालिनीछन्दः ॥

(५९) माधेति । आश्वस्य विषण्णतामपनीय सदसीव स्वस्थचित्तः सन् आत्मानं सान्त्वयन्नुवाच । वेधसः प्रजापतेः निर्म्माणविशेषः सृष्टिप्रकारः सुलभः अनुकारः अनुकरणं साम्यं येन तादृशः, विविधनिर्म्मितवस्तूनामितरेषामपि सादृश्यं प्रायश एव दृश्यत इत्यर्थः । तथाच लोकु-

---

(৫৮) মক। চিন্তাবিনাশ্রিতগুণের আধার প্রিয়তমে প্রাণের নিয়ন্তা ও মিলিত হইয়া ধূলিখেলা হইতে দৃঢ় সৌহার্দ্দশালী মিত্র মাধব প্রিয়জনের (মালতীর) বিরহজনিত মনোবাধারূপ ব্যাধিতে অতিশয় যাতনানুভব করিয়াও হে কুণ্ঠিতচিত্ত! তুমি দ্বিধাবিদীর্ণ হইয়া যাইতেছ না কেন ?

(৫৯) মাধ। (আশ্বস্ত হইয়া উঠিয়া) বিধাতার নির্ম্মাণপ্রকার প্রায়শঃই সুলভমাধুর্য্য। সুতরাং লোকবৃত্তস্বভাবানিত্তে মালতীর তাহাদির সাদৃশ্যই

भवद्भिः सर्वाङ्गप्रकृतिरमणीया कुलवधू-
रिहस्थैर्दृष्टा, वा विदितमथवास्याः किमभवत्।
वयोऽवस्थां तस्याः शृणुत, सुहृदो! यत्र मदनः,
प्रगल्भव्यापारश्चरति हृदि मुग्धश्च वपुषि ॥ (६०)

कुसुमकान्त्यादिषु मालतीकान्त्यादीनां साहश्यादेव मे मालतीविप्रलम्भो जात इति भावः। नैव, एवं तावद्भवतु, लोध्रकुसुमकान्त्यादिषु मालतीकान्त्यादिसादृश्यमेव भवतु, तथाच सा जीवत्वियम्। सर्वं शिवं कथयतीति शिवः। भूधरारण्यचारिणः शैलकान्तारविहारिणः सत्त्वान् प्राणिनः। अवधानदानेन मद्वचनाकर्णने चित्तप्रणिधानवितरणेन।

(६०) विलापमेव कथयति—भवद्भिरिति। भूधरस्थैः एतत्पर्वतवनावस्थितैः (अनेन विशेषणेन सत्त्वानां मालतीदर्शनज्ञानयोर्योग्यता सूचिता) भवद्भिः सत्त्वैः सर्वाङ्गेषु करचरणाद्यवयवेषु प्रकृत्या स्वभावेन रमणीया रम्या (अलङ्कारासम्पादितसौन्दर्य्येत्याशयः) कुलवधूः काचित् कुलललना (वारनारीकुलभवावस्थादिदोषरहितेत्याशयः) दृष्टा वा? चाक्षुषप्रत्यक्षविषयीकृता किम्? अथवा न दृष्टा चेत्तदा, अस्याः कुलवध्वाः किमभवत् जीवनं मरणं अन्यं नामरूपं वा किं सर्वं तत् विदितं? प्रामाणिकवचनादि परिज्ञातं, ननु तस्याः कीदृशी वयोवस्था इत्याकाङ्क्षायामाह—यत्र इति। मे सुहृदः। मदीयसाङ्गवर्षविज्ञापनया सञ्जातसौहार्दाः भूधरारण्यचारिणः प्राणिनः। तस्याः मदभिलाषविषयीभूतायाः कुलवध्वाः वयोवस्थां शृणुत। यत्र यस्यां वयोवस्थायां मदनः कामः प्रगल्भव्यापारः प्रौढोद्योगः सन् हृदि मनसि चरति, वपुषि शरीरे च मुग्धः हावभावप्रकाशादिना अप्रौढः सन् चरति। एतेन तस्याः प्रथमयौवनावस्था सूचितेति मन्तव्यम्।

"अध्यर्धमात्रभैक्षाकीः प्रश्नार्थोऽन्येषु अत"मिति वचनादत्र प्रश्नार्थाभावः। एवं यच्छब्दस्योत्तरवाक्यगततया तच्छब्दापेक्षाविरहात् वाक्यगतविधेयाविमर्शदोषः। शिखरिणी वृत्तम्।

হইবে। (উচ্চৈঃস্বরে) এই আমি প্রণিপাত করিয়া পর্ব্বতারণ্যচারী প্রাণীদিগকে জানাইতেছি যে, আপনারা মুহূর্ত্তকাল আমার বাক্যশ্রবণে মনোযোগ দিয়া আমাকে অনুগৃহীত করুন।

(৬০) এই পর্ব্বতারণ্যাবস্থিত আপনারা সর্ব্বাঙ্গে স্বভাবরমণীয়া কোনও এক কুলবধূ দেখিয়াছেন কি? অথবা তাহার কি হইয়াছে, তাহা জানিয়াছেন কি? হে সুহৃদ্গণ! তাহার বয়োবস্থা শ্রবণ করুন। যে বয়োবস্থায় কাম

कष्टं भो! कष्टम्। (६१)

केकाभिर्नीलकण्ठस्तिरयति वचनं ताण्डवादुच्छिखण्डः,
कान्तामन्तःप्रमोदादभिसरति मदभ्रान्ततारश्चकोरः।
गोलाङ्गूलः कपोलं छुरयति रजसा कौसुमेन प्रियायाः,
किं याचे तत्र यत्र ध्रुवमनवसरग्रस्त एवार्थिभावः॥ (६२)

---

(६१) भो इति विषादद्योतकमव्ययं, कष्टं दुःखं, तस्य चातिशये द्विरुक्तिः। सर्वेषामाकाङ्क्षणमेव दुःखहेतुः।

(६२) सर्वेषामात्मकार्यव्यग्रत्वमाह—केकाभिरिति। नीलकण्ठो मयूरः ताण्डवात् उद्धतनृत्यहेतोः उच्छिखण्डः ऊर्ध्वीकृतबर्हभारः सन् केकाभिः स्वजातिप्रसिद्धैः शब्दैः वचनं मदुक्तं वाक्यं तिरयति आच्छादयति। तथाच दीर्घतरेण स्वशब्देनाभिभवान्मद्वाक्यं न प्रतीतोऽयमर्थः। मदेन कामजनितया भ्रान्ते घूर्णिते तारे तारके यस्य तादृशश्चकोरः चकोरनामकः पक्षिविशेषः अन्तःप्रमोदात् अन्तःकरणोपचितहर्षात् कान्तां स्वभार्यां चकोरीं अभिसरति अभिगच्छति। तथाच तदासक्तचित्ततया नायमपि मद्वाक्यं शृणोतीति भावः। तथा गोरिव लाङ्गूलं यस्य स गोलाङ्गूलः प्लवगः (प्लवङ्गकीशप्लवगगोलाङ्गूलकपीश्वराः इत्यमरमाला) कौसुमेन पुष्पसम्बन्धिना रजसा परागेण प्रियायाः स्वकान्तायाः कपोलं गण्डं छुरयति चित्रयति। सुतरामयमपि तन्मनस्कतया मम वचनं नाकर्णयतीति भावः। अतएव किं कार्यं याचे एतेषां समीपे प्रियतमावृत्तान्तवार्त्तामर्थये। मद्वचस एतावन्मात्रकैरेभिरश्रवणादिति भावः। तथाच अर्थिभावः मम याचकत्वं यत्र तत्र अर्थात् सर्वत्र ध्रुवं निश्चितं अनवसरग्रस्त एव अनवकाशाक्रान्त एव। सर्वेषामेव स्वस्वाभिलषितसाधनव्यग्रत्वात् कुत्रापि मत्प्रार्थनावकाशो नास्तीति भावः।

अत्र वृत्त्यनुप्रासच्छेकानुप्रासौ शब्दालङ्कारौ, सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासश्चार्थालङ्कार इत्येषां मिथोऽपेक्षाविरहात् संसृष्टिः। स्रग्धरावृत्तम्।

"ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते" इति लक्षणात् प्रतिषेधो नाम विमर्शसन्ध्यङ्गम्।

প্রৌঢ়োদ্যোগ হইয়া হৃদয়ে ও মনোহর হইয়া শরীরে বিচরণ করে।

(৬১) আহা কষ্ট, আহা কষ্ট !!

(৬২) ময়ূরগণ উদ্ধত নৃত্যবশতঃ বর্হভার ঊর্দ্ধীকৃত করিয়া কেকাশব্দ দ্বারা আমার বাক্যকে আচ্ছাদিত করিতেছে। মদঘূর্ণিততারক চকোর পক্ষী

अयञ्च—दन्तच्छदारुणिमरञ्जितकान्तदन्त-
मुन्नमय्य चुम्बति वलीवदनः प्रियायाः।
काम्पिल्लक-प्रसवपाटलगण्डपालि-
पाकारुणस्फुटितदाडिमकान्ति वक्त्रम्॥ (६३)

एषः प्रियतमास्कन्धविश्रान्तकरो रोहिणानोकहस्कन्धविश्रान्त-
कन्धरः करी। कथमत्राप्यनवसरः। (६४)

---

(६३) दन्तेति। अयञ्च वलीवदनः वानरः दन्तच्छदयोः ओष्ठाधरयोः अरुणिमा आरुण्येन रक्तवर्णेनेति यावत्, रञ्जिता रक्तीकृता कान्ता मनोरमाः दन्ता दशना यत्र तथाभूतं, काम्पिल्ल एव काम्पिल्लकः (स्वार्थे कः) रोचनी (सन्ता रोचनीति ख्यातः) काम्पिल्लः कर्कश-च्छदी रक्ताङ्गी रोचनीत्यपीत्यमरः) तस्य प्रसवम् फलवत् पाटली गण्डपाली कपोलप्रान्तौ यस्य तत्तथाभूतं, तथा पाकेन पक्वतारूप्यपरिणामेन अरुणं रक्तवर्णं स्फुटितं बीजोद्घाटेन द्विधाभूतं यद्दाडिमं तस्मात् उद्भव फलं तस्य कान्तिरिव कान्तिर्यस्य तत्तथाभूतं प्रियायाः वानर्याः वक्त्रं वदनं उन्नमय्य हस्ताभ्यां किञ्चिदुत्तोल्य चुम्बति। तदावास सर्वत्रापि मदीयवाञ्छावसरो नास्तीति भावः।

अत्र दन्तच्छदयोरनुप्रासो लुप्तोपमा चालङ्कार इति तेषां परस्परनैरपेक्ष्येणास्य संसृष्टिः। वसन्ततिलका वृत्तम्॥

(६४) एष इति। प्रियतमायाः स्वकान्तायाः करिण्याः स्कन्धे विश्रान्तः निश्चलावस्थितः करः शुण्डो यस्य तथाभूतः, तथा रोहिणानोकहस्य वटपादपस्य स्कन्धे प्रकाण्डदेशे विश्रान्ता समर्पिता कन्धरा ग्रीवा यस्य तथाभूतः, एष करी हस्ती वर्तते इति शेषः। अथाच नियोजनेन-

---

হর্ষিতান্তঃকরণা কান্তার অভিনন্দন করিতেছে। বানর পুষ্পপরাগ দ্বারা প্রিয়ার কপোল চিত্রিত করিতেছে। অতএব কিরূপে যাচ্ঞা করিব? নিশ্চয় সর্ব্বত্রই আমার যাচকত্ব অনবসরগ্রস্ত।

(৬৩) এই আর একটি বানর ওষ্ঠ ও অধরের রক্তিমা দ্বারা যাহার মনোহর দন্ত অনুরঞ্জিত। যাহার কপোলপ্রান্ত কাম্পিল্লফলের ন্যায় পাটলবর্ণ এবং যাহার কান্তি পক্বতারুণ ও দ্বিধাবিভক্ত দাড়িম্বফলের তুল্য, প্রিয়তমার তাদৃশ বদন উত্তোলিত করিয়া চুম্বন করিতেছে।

(৬৪) যাহার শুণ্ড প্রিয়তমার স্কন্ধে নিশ্চলরূপে অবস্থিত ও যাহার গ্রীবা

कण्डूकुट्मलितेक्षणां सहचरीं दन्तस्य कोट्या लिखन् ।
पर्यायच्यतिकीर्णकर्णपवनैराह्लादिभिर्वीजयन् ।
लब्धार्द्धैर्नवशल्लकीकिसलयैरस्याः स्थितिं कल्पयन्,
धन्यो वन्यमतङ्गजः परिचयप्रागल्भ्यमभ्यस्यति ॥ (६५)

(अन्यतो विलोक्य) अयमपि ।

नास्तर्वेत्स्यति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितम्,
नास्वादात् सरसः करोति कवलान् आवर्जितैः शैवलैः ।

मध्यर्थेऽपि द्रष्टव्यः । विशेषतो निरूपयाह—अयमिति । अत्रापि कस्मिन् वरिष्ठेऽपि अनवसरः मत्प्रार्थनाया अवकाशः ।

(६५) अनवसरमेव समर्थयितुमाह—कण्डूति । धन्यः परमसौभाग्यशाली (अन्यथा ईदृक्प्रियानुवर्त्तनासम्भवादिति भावः) अयं वन्यमतङ्गजः आरण्यहस्ती, दन्तस्य कोट्या अग्रभागेन, लिखन् । कण्डूयनेन कुट्मलिते मुकुलिते निमीलिते इति यावत्, ईक्षणे नयने यस्याः तथाभूतां सहचरीं प्रियतमां करिणीं आलिखन् मन्दं मन्दं कण्डूयन्, आह्लादिभिः आनन्दसम्पादकैः पर्यायेण क्रमेण व्यतिकीर्णयोः परिचालितयोः कर्णयोः पवनैः मरुद्भिः वीजयन् वीजितां सम्पादयन्, तथा लब्धार्द्धैः स्वयमभिलषितार्द्धैः नवैः नूतनैः शल्लकीनां गजप्रियवृक्षविशेषाणां किसलयैः पल्लवैः अस्याः करिण्याः स्थितिं वृत्तिं अवस्थानमिति यावत्, कल्पयन् सम्पादयन् परिचयस्य प्रणयस्य प्रागल्भ्यं सम्पृक्ततां अभ्यस्यति पुनः पुनराविष्करोति । तथाहि कान्तानुरागनियन्त्रितान्तःकरणस्यास्य सकाशे कथमपि मम प्रार्थनावसरो नास्तीति भावः ।

अत्र स्वभावोक्तिरलङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

(६६) नास्तरिति । जलदस्य मेघस्य निस्वनः या ध्वनिः तानिः ध्वनिविशिष्टेषु सत्सु, तथा यो

मদন্তুঃখের প্রস্তাবেদনে অবস্থিত তাদৃশ এই হস্তী বর্ত্তমান (সুতরাং ইহাকেই প্রশ্ন করি) এ কি এই হস্তীর নিকটেও আমার প্রশ্নের অবকাশ নাই।

(৬৫) পরম সৌভাগ্যশালী এই বনহস্তী কণ্ডূয়ননিমীলিতনয়না সহচরীকে দন্তের অগ্রভাগ দ্বারা ঈষৎ কণ্ডূয়ন করিতে করিতে পর্য্যায়ক্রমে বিকিপ্ত কর্ণের আহ্লাদজনক বায়ুদ্বারা বীজিত করিতে করিতে ও অর্দ্ধভুক্ত শল্লকীপল্লব দ্বারা প্রিয়তমার আহার সম্পাদন করিতে করিতে প্রণয়ের উৎকর্ষ অভ্যাস করিতেছে।

दानज्यानिविषादमूकमधुपव्यासङ्गदीनाननो,

नूनं प्राणसमावियोगविधुरस्तम्बेरमस्ताम्यति ॥ (६६)

अलमनेनायासितेन अन्यतः सञ्चरामि। [विलोक्य।] एष सानन्दसहचरीसमाकर्ण्यमानमधुरगम्भीरकण्ठगर्जितध्वनिः अपरो मत्तमातङ्गयूथपालः, प्रत्यग्रविकसितकदम्बसङ्घातसुरभिशीतलामोद-

---

विषादः दुःखं तेन मूकानां शब्दरहितानां मधुपानां भ्रमराणां व्यासङ्गेन भाविमदोन्मादप्रत्याशया तत्कृतेन संसर्गेण दीनं मलिनं आननं यस्य तथाभूतः, अयन्तु स्तम्बेरमः करी, जलदेषु वारिदेषु घनेषु गर्जत्सु सत्सु घनसम्बन्धे आनन्दं निरतिशयगम्भीरं उद्गर्जितं उद्गर्जनं न पुष्णाति समयान्तर इव न करोति। तथा आसन्नात् निकटवर्त्तिनः सरसः सरोवरात् आवर्जितैः आहृतैः शैवलैः शैवालैः कवलान् ग्रासान् न करोति। अत एव नूनं अहं प्राणसमायाः प्राणप्रतिमायाः हस्तिन्याः वियोगेन विरहेण विधुरं विकलः सन् ताम्यति तापमनुभवति। प्रियतमावियोगेन विनैतद्विषयवैमुख्यमसम्भव इति भावः।

अत्र काव्यलिङ्गक्रियोत्प्रेक्षालङ्कारयोः सङ्करः। शार्दूलविक्रीडितं वृत्तम्।

(६७) अलमिति। आयासितेन मालतीवार्त्ताप्रश्नोद्वेजितेन कान्तारपरिचिन्तना-कालमानया विरहिणः विषयान्तरसञ्चारोद्वेजिता अद्येदुरित्यनयाऽलमेव प्रश्नावलिनि भावः। सानन्दया सुरतसम्भावनया सहर्षया सहचर्या स्वकान्तया करिण्या समाकर्ण्यमानः मधुरः गम्भीरश्च कण्ठगर्जितध्वनिर्यस्य तथाभूतः, मत्तमातङ्गयूथपालः मत्तहस्तिसमूहस्य प्रभुः, प्रत्यग्रविकसितानां अचिरप्रस्फुटितानां कदम्बानां नीपपुष्पाणां सङ्घातस्य समूहस्य सुरभि शीतलामोदेन मनोज्ञ-शीतलगन्धेन बहुलं यथा स्यात्तथा सम्वलितं समन्वितः यो गण्डकपोलाभ्यां स्थूलगण्डाभ्यां निष्यन्दः मदजलधारं निष्यन्दितमदजलनिर्झरः, तेन कर्द्दमितौ कपोलपालीकृतौ अत एव

---

(৬৬) (অন্য দিকে অবলোকন করিয়া) মদজলের অপ্রাপ্তি প্রযুক্ত দুঃখে নিঃশব্দ ভ্রমরগণের সংসর্গে মলিনবদন এই হস্তী মেঘে গর্জ্জন করিলে ও তন্মধ্যে গম্ভীর উদ্‌গর্জ্জন করিতেছে না ও নিকটবর্ত্তী সরোবর হইতে আনীত শৈবালদ্বারা গ্রাস করিতেছে না, অতএব আমার মনে হয়, প্রাণপ্রতিম প্রিয়তমার বিরহে ক্ষীণ হইয়াই সন্তাপ ভোগ করিতেছে।

(৬৭) ইহাকে আয়াসিত করা বৃথা। অন্যদিকে সঞ্চরণ করি। (অবলোকন করিয়া) যাহার মধুর ও গম্ভীর কণ্ঠগর্জিত ধ্বনি হর্ষযুক্তা সহচরী শ্রবণ করিতেছে, এবং যাহার গণ্ডদেশ অচির-প্রস্ফুটিত কদম্বপুষ্পসমূহের

मदजलसंवलितमांसलकपोलनिष्यन्द-कर्दमितकषायकरटः, समुद्दलित-कमलिनीखण्डविप्रकीर्णपर्णकमलकेसरमृणालकन्दकोमलाङ्कुरमाहरन्, अनवरतप्रवृत्तकमनीयकर्णतालताण्डव-प्रबल-जर्जरितजलतरङ्गवितत-नीहारं समुत्त्रस्तकुररसारसं सरोऽवगाह्य, विहरति। भवतु एव-माभाषे। महाभाग! नागपते! श्लाघ्ययौवनः खल्वसि, कान्तानु-वृत्तिचातुर्य्यमपि अस्ति भवतः। [सापवादम्।] (६०)

कषायौ सुरभी (सुरभौ च कषायः स्यादिति मान्तः) करटौ गण्डदेशौ यस्य तथाभूतः, समुद्दलितायाः समुन्मूलितायाः कमलिन्याः पङ्कजलतायाः, खण्डे खण्डशो विप्रकीर्णानि विक्षिप्तानि पर्णानि दलानि यस्य तथाभूतस्य कमलस्य पद्मस्य केसरञ्च मृणालञ्च कन्दोमूलञ्च कोमलाङ्कुरञ्च तत्समाहारः (समाहारद्वन्द्वादेकवचनम्) आहरन् भक्षणार्थ-मादधानः। अनवरतं अविरामं यथा स्यात्तथा प्रवृत्तं उद्भूतं कमनीयं मनोहरं यत् कर्णयोः तालताण्डवं तालवद्वादनव्यापारः (ताण्डवो नृत्तक्रियामाने मध्यमाङ्गुलिविकल्पित इत्यमरमाला) तेन प्रबलाः अत्यधिकाः जर्जरिताः चूर्णीकृताश्च ये जलतरङ्गास्तेभ्यः विततः विस्तृतः विस्तृत-रूपेण निपतिता इति यावत्, नीहाराः नीहारवज्जलबिन्दवो यत्र तथाभूतं, तथा समुत्त्रस्ता भय-भयादिव भीताः कुररः सारसाश्च पक्षिविशेषाः यत्र तथाभूतं सरः सरोवरं विहरति सञ्चीड्य विहरति। सुखप्रवृत्तोऽयमाभाषणयोग्य इत्यभिप्रेत्याह—भवत्विति। एवं यथावक्ष्यमाणप्रकारं आभाषे आलपामि। श्लाघ्यं प्रियाविरहविरहात् प्रशस्तं यौवनं यस्य तादृशः। एतेन आत्मनो-विरहादात्मनो यौवनस्याश्लाघ्यत्वं ध्वनितम्। कान्तायाः भार्य्यायाः अनुवृत्तिचातुर्य्यमपि अनुसरण-नैपुण्यमपि। सापवादमिति। अपवादेन अनुवृत्तिचातुर्य्यैकस्यपदीयदर्शनेन सहितं यथा स्यात्तथेत्यर्थः।

মনোজ্ঞ শীতলগন্ধ দ্বারা বহুলরূপে মিশ্রিত স্থূল গণ্ডস্থল হইতে মদ জল যাহা কর্দমাক্ত হইতেছে, তাদৃশ এই নবরতিযুক্ত গজপতি, সমুন্মূলিত পদ্মিনীর খণ্ডন কালে যাহার দলসমূহ ইতস্ততঃ বিক্ষেপবশে ব্যবহিত হইয়াছে, তাদৃশ পদ্মের কেশর মৃণাল কন্দমূল ও কমলাঙ্কুর ভক্ষণার্থ আহরণ করিতে করিতে যাহাতে অবিশ্রান্তরূপে সমুৎপন্ন মনোহর তালদণ্ড কর্ণের উদ্ধত নৃত্য দ্বারা সঙ্কলিত ও চূর্ণীকৃত জলতরঙ্গ হইতে বিস্তৃতরূপে নীহারের ন্যায় জলবিন্দু পড়িতেছে এবং যাহাতে কুরর ও সারস পক্ষিগণ এই হস্তি ভয়ে সন্ত্রস্ত, তাদৃশ সরোবরে বিহার

लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः,
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्न स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ (६८)

---

(६८) अस्यैतत्सर्वं दर्शयितुमाह—लीलेति। लीलया यदृच्छया उत्खाताः उद्धृता ये मृणालकाण्डाः विसदण्डास्तेषां कवलाय ग्रासाय (ग्रहीतु) छेदेषु खण्डेषु करिणीवदनविवरार्पितेष्वित्यर्थः, पुष्यद्भिः विकसद्भिः पुष्करैः पद्मैः वासितस्य सुरभितस्य पयसः जलस्य गण्डूषाणां संक्रान्तयः निषेकाः सम्पादिताः अनुष्ठिताः। करिणीकवलितमृणालखण्डेषु निजवदनपूरितं जलं प्रदत्तमित्यर्थः। तथा शीकरिणा जलबिन्दुमता करेण शुण्डादण्डेन सेकः करिणीशरीरोपरि सेचनं कामं पर्याप्तं यथा स्यात्तथा विहितः सम्पादितः। पुनः किन्तु विरामे सेकविरामे स्नेहात् प्रणयात् अनरालम् अकुटिलं सरलमिति यावत्, नालं यस्य तथाभूतं यत् नलिनीपत्रं पद्मपत्रं तदेव आतपत्रं छत्रं न धृतं, आतपनिवारणाय शुण्डादण्डेन करिणीशरीरोपरि नोत्तोलितमित्यर्थः। तदावाभ्यामेवानयोर्लीलायामायोजितेन अस्यानुरागोऽद्यैकस्य जातमिति भावः।

अत्र लीलादीक्रियाद्वारा नलिनीपत्रातपत्रमिति निरूपणेन प्रतीयते। छेकानुप्रासवृत्त्यनुप्रासौ च शब्दालङ्काराविति तयोरपि संसृष्टिः। शार्दूलविक्रीडितं वृत्तम्।

अनुर्वेधरस्त्रे नैवायं यदि लीलावश्यावेष जनवैमल्योऽयमपि शीघ्र अनयोरालम्बितलीलायोऽपि इत्यत्र तथ्यमुपक्षेपम्।

করিতেছে। হউক এইরূপ আলাপ বটে, হে ভাগ্যশালি নাগপতে! তুমি মধ্যযৌবন হইয়াছ। তোমার কামপ্রবৃত্তি চাতুর্য্যও আছে। (দোষ প্রদর্শনের সহিত)

(৬৮) যদৃচ্ছাক্রমে উৎপাটিত মৃণালদণ্ডের কবলিত খণ্ডে বিকসিত পদ্ম সুবাসিত জলের গণ্ডূষ নিক্ষেপ সম্পাদিত হইয়াছে। জলকণাযুক্ত শুণ্ডাদণ্ড-দ্বারা করিণীর গাত্রোপরি সেকও পর্য্যাপ্তরূপে বিহিত হইয়াছে। কিন্তু সেই সেকের বিরামকালে স্নেহবশতঃ আতপ নিবারণের জন্য অবক্রনালনলিনীপত্ররূপ ছত্র শুণ্ডাদ্বারা করিণীর গাত্রোপরি বিধৃত হয় নাই।

कथमवधीरणानीरसं व्रजति। हन्त मूढ़ एवास्मिन् वनेचरे वयस्यमकरन्दोचितं व्यवहरामि, हा वयस्य! (६९)

धिगुच्छ्वसितवैशसं मम यदित्थमेकाकिनो,
धिगेव रमणीयतां त्वदनुभावभावादृते।
त्वया सह न यस्तया च दिवसः स विध्वंसताम्
प्रमोदमृगतृष्णिकां धिगपरत्र या जायते॥ (७०)

---

(६९) कथमिति। अवधीरणया अवज्ञया प्रत्येव भावानभिव्यञ्जनया नीरसं निष्प्रणयं यथा स्यात्तथा व्रजति गच्छति, स मकरन्दयुवकविरिति शेषः। वयस्मिन्निति इत्यादि हन्तेति—अत एवास्य करणं नाम विमर्शसन्ध्यङ्गम्। तल्लक्षणं दर्पणोक्तं यथा—"...तदाहुर्व्यादानं पुनः। कार्यार्थनपरामादेः करणं खलु यद्भवेत्" इति।

(७०) धिगिति। एकाकिनो मम इत्थमेवम्प्रकारं यत् उच्छ्वसितवैशसं जीवनरूपं दुःखं तत् धिक्। मालतीमकरन्दयोरुभयोर्विरहावस्थायामपि यज्जीवामि तदतीव दुरन्तफलमिति भावः। तथा एकाकिनो मम त्वदाभाविनः सुखसाधनत्वाभावान्निष्प्रयोजनोत्पादिनः रमणीयवस्त्वनुभवात् पुष्पलतादिमनोहरपदार्थसाक्षात्करणानि च धिगेव। यो दिवसः त्वया मकरन्देन तया मालत्या च सह न युवयोर्विरहदशायां यो दिवस उत्पन्न इत्यर्थः, स विध्वंसतां विनश्यतु। तादृशदिवसस्य मम समतीव दुःखातिपातजनकत्वादिति भावः। प्रमोदः आनन्द एव मृगतृष्णिका मरुमरीचिका मिथ्यामूलत्वात् मरीचिकात्वमपि धिक्। या प्रमोदमृगतृष्णिका अपरत्र युवाभ्यामन्यत्र पदार्थे जायते उत्पद्यते। त्वां मालतीञ्चाविहाय यः प्रमोद उत्पद्यते स एव यथार्थः, इतरस्तु प्रमोदाभास इति भावः।

---

(৬৯) একি কেন অবজ্ঞায় নিষ্প্রণয় ভাবে যাইতেছে? অহো!! মূঢ় এই বনেচর ও বয়স্য মকরন্দের উপযুক্ত ব্যবহার করিতেছে, হা প্রিয়বয়স্য মকরন্দ!!

(৭০) একাকি আমার এই প্রকারে জীবনরূপ দুঃখে ধিক্। এবং একাকি আমার নিষ্প্রয়োজনীয় রমণীয় বস্তুর অনুভবেও ধিক্। যেই দিন তোমার ও মালতীর বিরহ অবস্থায় উৎপন্ন আমার সেই দিন বিধ্বস্ত হউক। আমার সেই প্রমোদমরীচিকায়ও ধিক্, যাহা তোমাদের অতিরিক্ত বিষয়-সম্বন্ধে জন্মিয়া থাকে।

मक। अये! उन्मादमोहान्तरितोऽपि सम्प्रति अयं मां प्रति अप्रतिकूलः, यतः कुतश्चिद्व्यञ्जकात् प्रबुद्ध एवास्य सहजस्नेहसंस्कारः। तत् असंविहितमेव मां मन्यते। [पुरः स्थित्वा] एष पार्श्वचर एव ते मकरन्दो मन्दभाग्यः। (৩১)

माध। प्रियवयस्य! सम्भावय, परिष्वजस्व मां, प्रियान्तु मालतीं प्रति निराशः परिश्रान्तोऽस्मि। [इति मूर्च्छति]। (৩২)

मक। एवं सम्भावयामि जीवितेश्वरम्। [विलोक्य सकरुणम्।]

अत्र एकस्यैव चित्तवृत्तेः पुनःपुनरवस्थान्तरनीतत्वादुद्दीपः। एवं जीवनस्य रमणीयमहार्थानुभवाय चिन्तनं प्रति एकाविवस्वदर्थस्य हेतुत्वात् महार्थहेतुकं काव्यलिङ्गम्, प्रतीपदभङ्गश्लेषेति निरुद्धैकवाक्यतयाऽलङ्कार द्वयोरप्यस्य परस्परमेलनं स्यात् संसृष्टिः। वृत्तम्। तथाच द्वितीयचरणकाव्यस्याद्य अन्यथाऽपि यतिभङ्गदोषः अङ्गनीयः स्वरसन्धि-स्थले तद्दोषाभावोऽङ्गीकारादिति छन्दोमञ्जर्यामनुसन्धेयम्।

(৩১) मकेति। उन्मादात् कामोन्मादात् यो मोहः तेन अन्तरितोऽपि अभिभूतोऽपि, अयं माधवः, अप्रतिकूलः अविपरीतबुद्धिः। सहजस्नेहसंस्कारः आजन्मसिद्धस्नेहविषयिणी भावना, कुतश्चित् अनिर्वचनीयात् व्यञ्जकात् उद्बोधकात् प्रबुद्ध एव जाग्रत् इव एव तादृशस्नेह-विषयस्मृतिजनक एवेति यावत्। असंविहितम् उन्मादजनितमोहाद्धेतोः। मन्दभाग्यः हतभागधेयः, त्वदीयेदृशावस्थाप्रत्यक्षीकरणादिति भावः।

(৩২) माधेति। सम्भावय दर्शनप्रदानादिना रक्ष।

(৩৩) मकेति। सम्भावयामि आलिङ्गनप्रदानादिना रक्षे, जीवितेश्वरम् प्राणतोऽव

---

(৩১) মক। অহো মাধব কামোন্মাদজনিত মোহে অভিভূত হইয়াও প্রতি অপ্রতিকূল। সহজ স্নেহ সংস্কার অনির্বচনীয় উদ্বোধক বশতঃ উন্মেষিতই থাকে। অতএব আমাকে অসন্নিহিত মনে করিতেছে। (সম্মুখে থাকিয়া) মন্দভাগ্য এই মকরন্দ তোমার পার্শ্বেই বিচরণ করিতেছে।

(৩২) মাধ। প্রিয় বয়স্য! দর্শনপ্রদানাদিদ্বারা আমাকে রক্ষা কর। প্রিয়া মালতীর প্রতি নিরাশ হইয়া আমি নিতান্ত পরিশ্রান্ত হইয়াছি। (মূর্চ্ছা)

(৩৩) মক। এইরূপে আলিঙ্গন প্রদানাদি দ্বারা জীবননিয়ন্তা মাধবকে

हा कष्ट ! आविर्भूतमत्परिष्वङ्गोत्कण्ठ एव निश्चेतनः संवृत्तः, तत्-किमिदानीमाशाव्यसनेन । सर्वथैव मे नास्ति वयस्य इति परिच्छेदो युक्तः (७३)। हा वयस्य !।

यत्स्नेहसंज्वरवता हृदयेन नित्य-
माबद्धवेपथु विनापि निमित्तयोगात् ।
त्वद्व्यापदो गणयतो भयमन्वभावि
तत्सर्वमेकपद एव मम प्रयातम् ॥ (७४)

चेतनाप्रदत्वाज्जीवनरक्षितारम्। आविर्भूता सञ्जाता मत्परिष्वङ्गस्य ममालिङ्गनस्य उत्कण्ठा औत्सुक्यं यस्य तथाभूत एव सन् निश्चेतनः चैतन्यरहितः मूर्च्छां प्राप्त इति यावत्, तत्तस्मात् इदानीं जीवितेशायां "मम जीवनं न नश्यती"ति प्रत्याशाया व्यसनेन आसक्त्या अलं व्यर्थं। कुत इत्याकाङ्क्षायामाह—सर्वथेति। परिच्छेदः निर्णयः। पुनःपुनरेवं मूर्च्छालाभात् तन्निवारणोपायभूतस्य मालतीलाभस्य असम्भवादिति भावः।

"कार्य्यात्ययोपगमनं विरोधनमितिस्मृत"मिति लक्षणादत्र विरोधनं नाम विमर्शसन्ध्यङ्गम्। एवं जीवितेशत्वमदयन्तं खेदास्पदत्वेन जीवनरक्षितृत्वस्य बाधकत्वादवाचकत्वदोषः।

(७४) यदिति। खेदस्वरवता—आत्मसम्भवनिबन्धनसन्तापशालिना हृदयेन मदीय-विवेकेन निमित्तयोगाद्विनापि विपत्तिकारणसम्पर्काभावेऽपि नित्यं सर्वदा त्वयि आपदो गणयता "स्नेहः पापशङ्की" इति न्यायात् तद्विषयिणीर्विपदो भावयता सता आबद्धवेपथु विधृत-कम्पनं यथा स्यात्तथा यत् भयं अन्वभावि अनुभूतं प्रकटितमिति यावत्, मम तत्सर्वं भयं एकपद एव तत्क्षण एव तवाभावक्षण एवेति यावत् (तत्क्षणैकपदे तुल्ये इति हलायुधः) प्रयातं विनष्टम्। तवाभावे पुनस्तद्विषयकभयासम्भवादिति भावः।

अत्र भयनिमित्ताभावेऽपि भयोत्पादाद्विभावनालङ्कारः। वसन्ततिलकावृत्तम्।

দুঃখ কষ্ট। (নিরীক্ষণ করিয়া করুণার সহিত) হা !! আমার আলিঙ্গনোৎ-কণ্ঠা আবির্ভূত হওয়ার পরেই প্রিয়বয়স্য অচৈতন্য হইয়াছে, তবে আর এখন ইহার জীবনাশা ব্যসনে ফল কি? আমার বয়স্য নাই এইরূপ নির্ণয়ই সর্ব-প্রকারে যুক্ত। হা বয়স্য !!

(৭৪) বাৎসল্য নিবন্ধন সন্তাপশালি আমার চিত্ত বিপত্তি কারণ সম্পর্ক ব্যতিরেকেও সর্বদা তোমার বিপদ চিন্তা করিতে করিতে সকম্পে যে ভয়

सखे! वरं तावन्त एवातिक्रान्ता मुहूर्त्ताः तथाविधमपि भवन्तं येषु चेतयमानमनुभूतवानस्मि, इदानीं तु—(७५)

भारः, कायो, जीवितं वज्रकीलं
काष्ठाः शून्या निष्फलानीन्द्रियाणि।
कष्टः कालो मां प्रति त्वत्प्रयाणे,
ध्मान्तालोकः सर्वतो जीवलोकः॥ (७६)

---

(১১) (সকরুণ স্নেহমিশ্রিত বিরূপতার সহিত) সম্প্রতি (একেবারে) নিরাশ হইয়াছি।

(১২) যাহার বদন অকারণে ঈষৎ হাস্যযুক্ত সুতরাং মনোহর, এবং (ভূতাদিভয়নিবারণের জন্য) যাহার শিখায় ও ললাটে শ্বেতসর্ষপ সমর্পিত, ক্রোড়শায়ী ও স্তন্যপায়ী তোমার তাদৃশ পুত্র ভাগ্যবিপর্যয়বশতঃ আমি দেখিলাম না।

लव। भगवदि! पसीद, णीसहह्मि सम्पदं जीविदुव्वहणे, ता इमादो गिरिसिहरादो अत्ताणअं अवधुणिअ णिव्वुदा भविस्सं, तधा मे भअवदी आसिप्पसादं करेदु, जेण जम्मन्तरेवि पिअसहीं पेक्खिस्सम्! (क)

काम। ननु लवङ्गिके! कामन्दक्यापि नातः परं वत्सा-वियोगेन जीवितव्यं, समस्तायमुत्कण्ठावेग आवयोः। किञ्च—(१३)

सङ्गमः कर्मणां भेदाद्यदि न स्यात नाम सः।
आत्मनस्तु परित्यागे, सन्तापोपरमः फलम्॥ (१४)

(क) भगवति! प्रसीद, निःसहास्मि साम्प्रतं जीवितोद्वहने, तदस्माद्गिरिशिखरादात्मानम् अवधूय निर्वृता भविष्यामि, तथा मे भगवती आशीःप्रसादं करोतु, येन जन्मान्तरेऽपि प्रियसखीं प्रेक्षिष्ये।

(क) लवेति। प्रसीद मत्प्रार्थनीयमरणाशीर्वादयोः अनुमोदनप्रदानाभ्यां प्रसन्ना भव। निःसहा अक्षमा। आत्मानं स्वकीयशरीरं। निर्वृता सुखिनी इति सखीवियोगदुःखानुभवात् मुक्ता।

(१३) कामेति। आवयोः तव मम च अयं उत्कण्ठावेगः जन्मान्तरे मालतीदर्शनोत्सुकतावेगः समः तुल्यः। यथा च परलोके मालतीदर्शनार्थं तवैव ममापि मरणं सर्वथा समुचितमिति भावः। मरणोचिते युक्त्यन्तरमभिधातुमाह—किञ्चेति।

(१४) सङ्गम इति। यदि कर्मणां पूर्वानुष्ठितक्रियाणां भेदात् सुकृतदुष्कृतवैषम्यात् परलोके मालतीसङ्गमानुकूलसमाचाराभावादिति यावत्, सङ्गमः, परलोके अस्माकं मध्ये कस्यचित् कर्मणो यावत् समागमः स्वेच्छया न स्यात् न भवेत्, तदा स सङ्गमः न

(ঙ) লব। ভগবতি! তুমি প্রসন্না হও। সম্প্রতি আমি জীবনধারণে অসমর্থা হইয়াছি, অতএব এই পর্ব্বতশিখর হইতে শরীর বিনিপাতিত করিয়া আমি সুখী হইব, এবং ভগবতী আমাকে সেইরূপ আশীঃপ্রসাদ করুন যেন জন্মান্তরে ও আমি প্রিয়সখীকে দেখিতে পাই।

(১৩) কাম। অয়ি লবঙ্গিকে! কামন্দকীরও অতঃপর মালতীর বিয়োগে জীবিত থাকা উচিত নহে। কারণ মালতীদর্শনোৎকণ্ঠার আবেগ তোমার ও আমার উভয়েরই তুল্য। আরও দেখ—

लव। जहा तुम्हे आणवेध (च)। [उत्तिष्ठति।]

काम। [सदयं वीक्ष्य।] वत्से मदयन्तिके! (१४)

मद। किं आणवेध अम्म सहीहोदुत्ति, ता जाव अव-हिदह्मि। (छ)

(च) यथा युष्माकमाज्ञा।

(छ) किमाज्ञापयथ भगवती सखी भवेति तद्यावत् अवहितास्मि।

[illegible] इति भावः। [illegible] एतदेव [illegible]— [illegible]। [illegible] इति [illegible] मालतीशोकानल[illegible]दाहस्य उपरमः उपशमः [illegible] यदि [illegible] स्यादिति भावः। [illegible]

कामन्दकाः [illegible] मालतीं [illegible] मदयन्तिकां [illegible] इति भवन्ति।

(च) उत्तिष्ठतीति [illegible] इति भावः।

(१४) [illegible] कामन्दकी [illegible] इति। "[illegible]" इति [illegible]।

(छ) भगवती मां [illegible] मालती[illegible] कामन्दकी[illegible]—किमिति। [illegible] अवहिता सावधाना।

---

(১৪) পূর্ব্বাশ্রিত বর্গের। [illegible] বৈধব্য বশতঃ যদি আমাদের পরলোকে ও মালতীর সহিত সম্মেলন না হয়, তবে তাহা না হউক, কিন্তু প্রাণের পরিত্যাগে মালতী শোকানল সন্তাপের উপশমরূপ ফল হইবেই।

(চ) লব। আপনি যেরূপ আজ্ঞা করিলেন, তাহাই হউক। (উঠিল)

(১৪) কাম। (দয়ার সহিত দেখিয়া) বৎসে মদয়ন্তিকে!

(ছ) মদ। মরণ বিষয়ে তুমিই অগ্রগামিনী হও এই আজ্ঞা করিতেছেন কি? তবে আমি সে বিষয়ে সাবধানা হইতেছি।

लव। सहि! पसीद, विरम एत्तो अत्तणो वावादणादो, मा एदं जणं विसुमरेसि। (ज)

मद। [सकोपमिव।] अवेहि, णहि दे वसंवदा। (झ)

काम। [स्वगतम्।] हन्त! निश्चितं वराक्या। (१६)

मद। [स्वगतम्।] णाह मअरन्द! णमो दे! (ञ)

(ज) सखि! प्रसीद, विरम एतस्मादात्मनो व्यापादनात्। मैनं जनं विस्मारयिष्यसि।

(झ) अपेहि, नाहि ते वशंवदा।

(ञ) नाथ मकरन्द! नमस्ते।

"भगवति! प्रसीद" इत्यादिव एतद्वाक्यसन्दर्भे मरणरूपकार्यस्य वर्जनीयत्वोपदर्शनात् "उपन्यासस्तु कार्याणां स्वदन"मिति लक्षणेन उपन्यासं नाम निर्वहणसन्ध्यङ्गम्।

(ज) मधुर्निर्घोषवत्या मदयन्तिकामकरन्दयोः अनुरक्तया मदयन्तिकया पुनरपि मरणाभ्युद्यतया सख्या लवङ्गिका मदयन्तिकां निवारयितुमाह—सखीति। एतत् जनं मत्सदृशं जनं कामिति यावत्, मा विस्मारयिष्यसि न विस्मर।

(झ) सकोपमिवेति, मरणाभिलाषरूपेण कोपहेतुः। अपेहीति दूरमपसर। अहं हि तव वशंवदा अधीना न अस्मि। तेन त्वद्वाक्यं प्रतिपालयामीति भावः। तदाच नाहं मरणादिरतिविहीना इति ध्वनिः।

(१६) कामेति। वराका दीनका मदयन्तिका निश्चितं किञ्चिदप्यावश्यकं मरण-मध्यवसितम्। अधाधावतोः इत्यत्र सर्वासामिवानुकरणीय इति भावः।

(ञ) मदीदिक्ष धयनीतया तदनुमतिमन्तरेण मदिनामनवगमय्यानि नद्योऽप्रमनादे कन्यानपेऽपि तन्मकरन्दागमादेव मकरन्दस्य नामस्मरणादिना। मदीयदीव वस्तुत "भदवती कि संन्य" इति मायनेन नमस्कारस्य सम्पत्ते चेतुरिति मन्तव्यम्।

(ज) লব। সখি! প্রসন্না হও, এই আত্মবিনাশ হইতে তুমি বিরতা হও। আমাকে বিস্মৃতা হইও না।

(झ) মদ। (যেন কোপের সহিত) তুমি দূরে যাও, আমি তোমার অধীনা নহি।

(১৬) কাম। (স্বগত) এই দীনা মরণবিষয়ে নিশ্চয় করিয়াছে।

(ঞ) মদ। (স্বগত) নাথ মকরন্দ! তোমার উদ্দেশে নমস্কার করি।

रति। भअवदि! अअं क्खु महुमदोत्तोत्तसन्दाणिदपविट्ट-मेहलो महीहरविडङ्को। (८)

काम। कृतमिदानीं प्रस्तुतान्तरायेण। (१७) [सर्वाः पतितुमिच्छन्ति।]

[नेपथ्ये] आश्चर्यमाश्चर्यम्!!

व्यतिकर इव भीमस्तामसो वैद्युतश्च,
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः। (१८)

काम। [विलोक्य। साद्भुतहर्षम्।]

कथमिह मम वत्सस्तत्किमेतत्—

(८) भगवति! अयमेव मधुमतोद्धतसन्दानितपतितमेखलो महीधरविटङ्कः।

(८) अयमिति। मधुमती नदविशेषा कापिशदी, तस्याः स्रोतसा सन्दानिता सम्बद्धा मेखला नितम्बप्रदेशः स. तथाभूतः, महीधरस्य पर्वतस्य विटङ्कः कपोतपालिका (कपोतपालिकाधारविटङ्कं पुंनपुंसकमित्यमरः) तद्वदुन्नतदेश इत्यर्थः। तथा चात्रादिवात्मानं पातयित्वा वयं त्रियामहे इति भावः।

(१७) कृतमिति। प्रस्तुतस्य प्रस्तावितमरणस्य अन्तरायेण कालहरणविघ्नरूपविघ्नेन। अलम्। इदानीमेवास्माकं पतित्वा देहं सद्यस्त्यक्तव्यम् इति भावः। "विमर्शो व्यसनारब्ध कर्म्मादिप्रकरणम्" इति लक्षणात् विमर्शो नाम नाट्यालङ्कारः।

(१८) नेपथ्ये इति। आकस्मिकमिदमाश्चर्यम् मकरन्द एव पूर्व्ववदस्याद्भुतस्थितं तेजःपुञ्जं सद्भयभवस्थानवलोकायस्थोऽभिवतः पूर्व्वपठितमेव श्लोकार्द्धं पुनः पठति व्यतिकर— इति। अस्य व्याख्या पूर्व्वमेव कृता।

(৮) রতি। ভগবতি! মধুমতী নদীর স্রোতঃসম্বদ্ধ এই সেই পর্ব্বতের কপোতপালিকা। (কপোতপালিকার ন্যায় উচ্চ প্রদেশ)

(১৭) কাম। তবে এখন প্রস্তাবিত মরণের কালবিলম্বরূপ বিঘ্নে প্রয়োজন নাই। (সকলে পতিত হইবার ইচ্ছা করিল)

(১৮) (নেপথ্যে) আশ্চর্য্য আশ্চর্য্য!! ক্ষণকাল দর্শনশক্তির নিরোধকারী ভয়ঙ্কর কোনও তেজঃপুঞ্জ অন্ধকার ও বিদ্যুৎসম্পর্কের ন্যায় উৎপন্ন হইয়াই শান্ত হইল।

[प्रविश्य मकरन्दः ।]—किमन्यत्,
प्रभवति हि महिम्ना स्वेन योगीश्वरीयम् (१९)
[नेपथ्ये ।] कथमतिदारुणो जनसंमर्द्दो वर्त्तते ? (२०)
मालत्यपायमधिगम्य विरक्तचेताः,
सांसारिकेषु विषयेषु च जीवितेषु ।

---

(१९) विलोक्येति, दृष्टमवलोक्य मकरन्दं सहसोपस्थितमाश्चर्यं तेजोजातञ्च निरीक्ष्येत्यर्थः । साद्भुतहर्षे आश्चर्यानन्दाभ्यां सह यथा स्यात्तथा आहेति शेषः ।

कथमिति । इह अस्मिन् स्थाने मम वयस्यः मकरन्दः कथं केन प्रयोजनेन सहसा उपस्थित इति शेषः । तस्य माधवसहचारित्वस्यैव स्वाभाविकत्वादिति भावः । तदेतत् परिलक्षितं तेजोजातं किं ? किन्निमित्तकम् ?

मकरन्दः सहसा प्रविश्य परिश्रुतमाधववचनं "तत् किमेत"दिति कामन्दकीप्रश्नस्योत्तरं ददाति—किमन्यदिति । अन्यत् किं न किमपि, इयं हि मदवलोकिता काचित् योगीश्वरी प्रकृष्टयोगसम्पत्शालिनी योगिनी स्वेन महिम्ना स्वकीययोगमाहात्म्येन प्रभवति । तथाच तस्या एवेदं तेजोजातं पूर्व्वमप्येतादृशं तदीयतेजो मया परिलक्षितत्वादिति भावः । अतएव "निर्णयः पुनः अनुभूतार्थकथन"मिति लक्षणात् निर्णयो नाम निर्व्वहणसन्धेरङ्गम् ।

सहसा तादृशालौकिकतेजःप्रदर्शनेन चकिता एव प्रथमं पश्चात् किञ्चिदपीषत् मकरन्ददर्शनेन च सञ्जातस्वात्मावगतिप्रायमाधवः सौदामिनीदर्शनमवगत्य सद्य एव च मालतीमाधवकामन्दक्यो निरीक्ष्य सर्व्वाः पतनाद्विरता इति विभावनीयम् ।

(२०) नेपथ्य इति । अज्ञाततत्त्वः कश्चिदागन्तुकः जनबाहुल्यमालोक्य पृच्छति—कथमिति । अति दारुणः अति महान् जनसम्मर्द्दः लोकसङ्घर्षः ।

(२१) विदिततत्त्वः कश्चिद्दुःखाभिभूतवनेचरः पूर्व्वोक्तप्रश्नस्योत्तरमाह—मालत्येति । "अथ वनेचरवचनादनन्तर"मिति वचनान्माधवमालत्योर्विवाहं वनेचरोक्तं समर्थयतीति

---

(১৯) কাম। (অবলোকন করিয়া আশ্চর্য্য ও হর্ষের সহিত) আমার বয়স্য মকরন্দ এস্থানে হঠাৎ আসিল কি প্রয়োজনে ? এই তেজঃপুঞ্জেরই বা হেতু কি ? (মকরন্দ প্রবেশ করিয়া) অন্য আর কি হেতু হইবে ? এই যোগীশ্বরীই স্বীয় যোগপ্রভাবে এই তেজঃপুঞ্জ বিস্তার করিয়াছেন।

(২০) (নেপথ্যে) অতি দারুণ জনসম্মর্দ্দ বর্ত্তমান কেন ?

(২১) অমাত্য ভূরিবসু মালতীর বিনাশ অবগত হওয়ার পরে সাংসারিক-

निक्षिप्य वह्निपतनाय सुवर्णबिन्दु-
मभ्येति भूरिवसुरित्यधुना हताः स्मः ॥ (२१)

मदयन्तिका । लवङ्गिके ! झत्ति मालदीमाहवाणं संदंसणमहूसवो झत्ति अब्भाहिदं अ (ठ) ।

कामन्दकीमकरन्दौ । [सहर्षम् ।] हा धिक् कष्टम् । आश्चर्य-माश्चर्यम् ॥ (२२)

(ठ) झटिति मालतीमाधवयोः सन्दर्शनमहोत्सवो झटिति अभ्याहितश्च ।

विभावनीयम् । भूरिवसुः अमात्यो मालतीपिता मालत्या मरणं पूर्व्वमदयन्तयानुमितमिदाय अधिगम्य लोकपरम्परया परिज्ञाय साधारिकेषु विषये धनसम्पदादिषु जीवितेषु धारणायोग्येषु च (धारणाभिरासा मनुष्यानुभवम्) निरपेक्षतः उपरतकामनः सन् मत्रिपदमथ परमार्थ-कामनवर्षाय निक्षिप्य स्थिरीकृत्य सुवर्णबिन्दुं सदाशिवमिव अभि लक्षीकृत्य एति आगच्छति । इत्यनुमितमस्माभिरित्य पताकास्थानेन कर्तुं स्थिरीकृतमस्माभिरर्थः । अत एतैः अधुना वयं हताः स्मः नितरां हता भवामः । परमकारुणिकत्वमालम्ब्य अमात्ये मालाविनाशकरत्वादि-सम्भवतीति भावः । तथाच तद्दर्शनार्थमागतानामेव लोकानामेव सम्यक् दर्शयन् । वसन्ततिलकावृत्तम् ।

(ठ) दूरादागच्छन्तौ मालतीमाधवौ समीक्ष्य "मालदीमाह"मित्यादि प्रीतश्च विस्मयं पुनःपुनः-वादेनैवेति मदयन्तिकालवङ्गिके आहतुर्झटितीति । झटिति अकस्मात्, अभ्याहितं महत्प्रीतिः ।

(२२) सहर्षमिति । मालतीमाधवसन्दर्शनमेव हर्षहेतुः । भूरिवसुमरणोद्योगं स्मृत्वाह—धिक् कष्टमिति । दृष्टीरविस्मयोदयविषादविस्मयौ युगपदुपस्थितदर्शनादाह— आश्चर्यमाश्चर्यमिति ।

বিরহে ও জীবনধারণে নিরস্ত চিত্ত হইয়া অনলপ্রবেশ নিশ্চয় করিয়া সুবর্ণবিন্দু-নামক মহাদেব লক্ষ্য করিয়া আসিতেছেন। অতএব সম্প্রতি আমরাও হত হইলাম।

(ঠ) মদয়ন্তিকা ও লবঙ্গিকা। অকস্মাৎ মালতী ও মাধবের দর্শন-মহোৎসব ও অকস্মাৎ মহাপ্রীতি উপস্থিত হইল।

(২২) কামন্দকী ও মকরন্দ (হর্ষের সহিত) কষ্ট ধিক্। কি আশ্চর্য্য!!

किमयमसितचन्दनरसच्छटासारयुगपदवपातः ।
अनङ्गस्य लिङ्गकलितः किमयमनभ्रः सुधावर्षः ॥ (२३)
सञ्जीवनौषधिविषव्यतिकरमालोकतिमिरसम्भेदम्,
अद्य विधिरयनियमधरमयूखसंवलनमनुकुरुते ॥ (२४)

---

(२३) किमिति। अयं भूरिवसुकन्याप्रवेशोत्सवदर्शनेन सह मालतीमाधवावलोकः असितः कृष्णः एव यदापि तदा चन्दनरसानां छटासारः तेषां आसारः निरन्तरवृष्टिः तस्य युगपत् एककाले अवपातः निपतनं किं? तथा अयं वह्निस्फुलिङ्गेन वह्निकणेन कलितः संयुक्तः अनभ्रः मेघरहितः सुधावर्षः अमृतवर्षणं किं भवतीति शेषः।

अत्र भूरिवसुकन्याप्रवेशोत्सवदर्शनस्य असितचन्दनरसच्छटात्वं वह्निस्फुलिङ्गसम्पन्नत्वञ्च, तथा मालतीमाधवावलोकस्य चन्दनरसच्छटात्वं सुधावर्षत्वञ्च ध्वन्यते।

यथा असितचन्दनरसच्छटैकदा निपतने एकदैव दुःसहवैरस्यनिरतिशयसुखयोरनुभवो भवेत्, तथा भूरिवसुकन्याप्रवेशोत्सवमालतीमाधवावलोकयोरेकदोपस्थितत्वेन एकदैव दुःसहवैरस्यनिरतिशयसुखयोरनुभवो भवति। यथा वा वह्निस्फुलिङ्गसंयुक्तसुधावर्षे सति एकदैव दाहः शैत्यञ्चानुभूयते, तथैव भूरिवसुकन्याप्रवेशोत्सवमालतीमाधवावलोकयोरेकदोपस्थितत्वेन एकदैव निरतिशयः सन्तापः सुखञ्चानुभूयत इति सन्देहालङ्कारौ।

अत्र मन्ये उपनीये उपमानयोः संसृष्टौ सन्देहालङ्कारः। एवं "संसृष्टौ मानवलस्य मात्रे स्यादयनिश्चय" इति लक्षणादत्र सन्देहो नाम नाट्यालङ्कारः। आर्याजातिः।

(२४) सञ्जीवनीति। विधिः भूरिवसुकन्याप्रवेशोत्सवमालतीमाधवावलोकयोरेकदा सम्पादको विधाता, अद्य सञ्जीवनौषधिविषयोर्व्यतिकरं सम्पर्कं आलोकतिमिरयोः प्रकाशान्धकारयोः सम्भेदं मीलनं तथा अयनियमधरमयूखयोः राहुचन्द्रकिरणयोः संवलनं मिश्रीभावं अनुकुरुते अनुकरोतीव। सञ्जीवनौषधिविषव्यतिकरादिवदेकदोत्पन्नभूरिवसुकन्याप्रवेशोत्सवमालतीमाधवावलोकनयोरपि एकदैव सुखदुःखरूपविरुद्धफलदायकत्वादिति भावः।

---

(২৩) ভূরিবসুর কন্যাপ্রবেশোৎসবের সহিত এই মালতীমাধবের অবলোকন কি অসিত ও চন্দনরসচ্ছটার ধারা একত্রে নিপতনস্বরূপ কিংবা বহ্নিকণাসংযুক্ত মেঘরহিত অমৃতবর্ষণস্বরূপ?

(২৪) ভূরিবসুর কন্যাপ্রবেশোৎসবের ও মালতীমাধবের সন্দর্শন এক সময়ে সম্পাদন করিয়া বিধাতা আজ সঞ্জীবনৌষধ ও বিষসংযোগের প্রভাব ও অন্ধকার সম্মেলনের এবং রাহু ও চন্দ্রকিরণ মিশ্রণের অনুকরণ করিতেছেন।

[नेपथ्ये।] हा ताद! विरम, दंसणूसुअह्मि दे वअणकमलस्स, पसीद, सम्भावेहि मं। कहं मम कारणादो समत्थलोआलोआन्तरालविक्खादणिम्मलकुलेकमङ्गलपदीवभूदं अत्ताणअं परिच्चअसि, अह मए भणज्जाए णिरणुक्कोसा तुह्मे त्ति सम्भाविदं आसि (ङ)।

चारु। हा वत्से!

(ङ) हा तात! विरम, दर्शनोत्सुकास्मि ते वदनकमलस्य प्रसीद सम्भावय माम्। कथं मम कारणात् समस्तलोकालोकान्तरालविख्यातनिर्मलकुलैकमङ्गलप्रदीपभूतमात्मानं परित्यजसि, अथ पुनः मयार्यया निरनुक्रोशा यूयमिति सम्भावितमासीत्।

"कामिनमपि साध्यासुमत्यैव कल्पते"ति तद्वचनात् [illegible] नाम नाट्यलक्षणम्। [illegible] विरमा [illegible] प्रवीणतापत्तिमेव [illegible] आर्य्याजातिः।

(ङ) चाण्डालेन सह [illegible] "आयुष्मन्" इति [illegible] प्रवीति— हा तातेति। विरम [illegible] प्रसीद [illegible] प्रसन्नो भव। [illegible] [illegible] प्रदीपभूतं [illegible] [illegible] [illegible] [illegible] एवं [illegible] निर्दया [illegible] [illegible] [illegible] [illegible]। [illegible] निरनुक्रोशाः निर्दया इति [illegible] [illegible]। [illegible] [illegible] [illegible] [illegible] इति भावः। अत एव "[illegible] परिभाषण"मिति लक्षणात् परिभाषणं नाम [illegible]।

(ঙ) (নেপথ্যে) হা পিতঃ! তুমি [illegible] হইতে বিরত হও। আমি তোমার মুখপদ্মের দর্শনে উৎসুক হইয়াছি। (জীবনসংরক্ষণে) প্রসন্ন হও। দর্শনপ্রদানে আমাকে উজ্জীবিত কর। কেন বৃথা আমার জন্য সমস্ত লোকালোক নামক পর্ব্বতের অন্তরাল প্রদেশে (সমস্ত পৃথিবীমণ্ডলে) প্রসিদ্ধ ও নির্ম্মল বংশের অদ্বিতীয় মঙ্গলপ্রদীপস্বরূপ স্বকীয় শরীর পরিত্যাগ করিতেছ? অতি নিষ্ঠুর আমি আবার তোমাকেই নির্দ্দয় বলিয়া অনুমান করিয়াছিলাম।

जन्मान्तरादिव पुनः कथमपि लब्धासि यावदयमपरः ।
उपराग इव शशिकलां कवलयितुमुपस्थितोऽनर्थः ॥ (२५)

लव । हा प्रियसखि ! (ढ)

ततः प्रविशति प्रमुग्धां मालतीं धारयन् माधवः । (२६)

माध । कष्टं भोः कष्टम् !
एषा प्रवासं कथमप्यतीत्य, याता पुनः संशयमन्यथैव ।
को नाम पाकाभिमुखस्य जन्तुर्द्वाराणि दैवस्य पिधातुमीष्टे ॥ (२७)

(ढ) हा प्रियसखि !

---

(२५) जन्मेति । हा मनस्वि ! मालति ! त्वं जन्मान्तरादिव पुनर्लाभसम्भावनाविरहात् परलोकादिव कथमपि अतिक्रान्ते च यावत् पुनर्लब्धासि प्राप्तासि तावदेव अयमपरः त्वत्पितुरनलप्रवेशोद्यमरूपः अनर्थः विपत्तिः उपरागो राहुवत् (उपरागो राहुग्रस्तार्कचन्द्रयोः । विरागे दुर्नये राहाविति हैमः) शशिकला चन्द्रकलामिव त्वां कवलयितुं ग्रसितुं उपस्थितः उपगतः । तदास्माकं भाग्यमेवातिमन्दमिति भाव ।

अत्रोत्प्रेक्षोपमालङ्कारयोरङ्गाङ्गिभावेन सङ्करः । आर्य्या जातिः ।

(२६) लव इति । प्रमुग्धां पितुरनलप्रवेशोद्यमाकर्णनजनितशोकेन प्राप्तमोहाम् ।

(२७) एषेति । एषा मालती प्रवासं कपालकुण्डलाकर्षिततया जीवितसंशयकारिणीं विदेशवसतिं कथमपि अतिक्रम्य च अतीत्य सौदामिनीकरुणया अतिवाह्य पुनः अन्यथैव अन्यप्रकारेण पितुरनलप्रवेशोद्यमेन संशयं जीवितसन्देहं याता प्राप्ता । तथाहि को नाम जन्तुः प्राणी पाकाभिमुखस्य परिणामफलदानोद्यतस्य दैवस्य नियतेः द्वाराणि बहिर्गमनपथान्

---

(২৫) কাম। হা বৎসে! মালতি! জন্মান্তর হইতেই যেন অতি কষ্টে যেই তুমি পুনরায় পরিপ্রাপ্ত হইলে অমনিই তোমার পিতার অগ্নিপ্রবেশোদ্যম রূপ অপর এই অনর্থরাহু যেমন শশিকলাকে গ্রাস করিতে উপস্থিত হয়, সেইরূপ তোমাকে গ্রাস করিতে উপস্থিত হইল।

(ঢ) লব। হা প্রিয়সখি।

(২৬) (মূর্চ্ছিতা মালতীকে ধারণ করিতে করিতে মাধবের প্রবেশ)

(২৭) মাধ। অহো কি কষ্ট-কি কষ্ট!! এই মালতী অতি কষ্টে কোনরূপ বিদেশবসতি অতিক্রম করিয়া পুনরায় অন্যপ্রকারে জীবনসংশয় প্রাপ্ত হইল।

मक। [सहसोपसृत्य माधवं प्रति।] सखे! अथ सा योगिनी क? (२८)

माध। श्रीपर्वतादिहाहं सत्वरमयतं तयैव सह सद्यः।
कल्पयनैनेत्ववचनादनन्तरं तां न पश्यामि॥ (२९)

कामन्दकीमकरन्दौ। [सप्रणयमाकाशे।] महाभागे! पुनस्त्वयेत्र किमर्थमन्तर्हितासि। (३०)

विधातुं व्याघातयितुं इष्टेः समर्थति न कोऽपीत्यर्थः। तथाकल्पितशाठ्या मे दुःखदस्पर्शेति भावः।

पत्रावलम्बेः सालाक्षेण विशिष्टदर्शनदपत्याधीनत्वेनासावाद्विभावेन सहरः। स्रग्धराप्रयम्।

(२८) सहसोपसृत्य माधवसमनन्तरवैवेन अत्युत्तमीरत्नुमनस्य सा यदात्मन्यवदर्शितेत्यर्थः। क पुन वदानीं वर्तत इति शेषः।

(२९) श्रीपर्वतादिति। अहं तया योगिन्यैव सह श्रीपर्वतात् सत्वरमायातात् इह अस्मिन् प्रदेशे सत्वरं अतिद्रुतं अवस्थितमाचेतीति यावत्, आगतम् आगतः, तस्य वचनं कल्याणि पत् सविशत्य यास्यामि सम्यग्गिरमश्च वचनं "कल्याणाय" मित्यादिवाक्यं तस्मात् तदनन्तरमेव, अतः तत्क्षणात् अवस्थिता अन्तर्हिता सा योगिनीं न पश्यामि। "कल्याणाय"मित्यादि वाक्यश्रवणाय्येव सा कुत्र गतेति नावलोकयामीति भवद्भावलोकनमिति भावः।

अत्र एताद्दशिवतस्य यत्र इत्येकत्वादनस्य पूर्वार्द्धे एतमाहृत्यांशस्येवत्यदीयः। पत्रावलम्बितं दर्शनस्य न दृश्यतीयमि यदि हेतुत्वात् पदार्थहेतुकवाक्यलिङ्गमलङ्कारः। आर्याजातिः।

কোন প্রাণী পরিণামস্বরূপোদ্যত নিয়তির দ্বার আচ্ছাদন করিতে সমর্থ হয়? (কোন প্রাণীই নহে)।

(২৮) মক। (সহসা মাধবের নিকটে উপস্থিত হইয়া মাধবের প্রতি) সখে! সেই যোগিনী কোথায়?

(২৯) মাধ। সেই যোগিনীর সহিতেই অতি সত্বর শ্রীপর্বত হইতে এই প্রদেশে আসিয়াছিলাম। কিন্তু হন্তোরের বক্ষণ বাক্য শ্রবণের পর তৎক্ষণাৎ আর তাঁহাকে দেখিলাম না।

मदयन्तिकालवङ्गिके। सहि मालदि! णं भणामि मालदिति, [सोत्कण्ठम्।] भअवदि परित्ताहि, चिरणिरुद्धणीसासणिच्चलं से हिअअं! हा अणाह! हा पिअसहि! दुवेवि तुह्मे परप्परावसाणस्स कारणं जादा (ण)।

काम। हा वत्से मालति! (२१)

माध। हा प्रिये! (२२)

मक। हा प्रियसखि! [सर्वे मोहमुपगम्य संज्ञां लभन्ते।] (२३)

(ण) सखि मालति! ननु भणामि सखि मालतीति। भगवति। परित्रायस्व, चिरनिरुद्धनिश्वासनिश्चलमस्या हृदयम्। हा अनाथ! हा प्रियसखि! द्वावपि युवां परस्परावसानस्य कारणजातौ।

---

(२०) पुनस्त्रायस्वेति अपायदुःखात्परित्रायस्व परिरक्षिता मालतीं पुनः विपत्तेः रक्षेत्यर्थः।

(ण) सखि मालति! इति सम्बोधनेनोत्तरमलाभात् अन्यासक्तं चेतः सम्भाव्य किञ्चिदुच्चैराह—भणामि। चिरनिरुद्धेन मोहवशात् बहुकालावरुद्धेन निश्वासेन स्पन्दरहितम्। परस्परावसानस्य अन्योऽन्यविनाशस्य कारणं हेतुर्भावौ। (अहेतुविशेषभावमुक्ति क्रियया अहेतुवतस्यिह संख्यामाविलनियमात्र विविधवाचकबारदेवन्दनतलिङ्गसंख्यामातिवमिति मन्तव्यम्) माधवः शोकेन मृत्योपरमन्वमवेमीयमानस्य मालत्याशवीन च माधवा मूर्च्छावाप्तदिति भावः।

---

(৩০) কামন্দকী ও মকরন্দ। (প্রণয়ের সহিত আলাপে) বৎসে মালতি! পুনরায় রক্ষা কর। অন্তর্হিতা হইলে কেন?

(ণ) মদয়ন্তিকা ও লবঙ্গিকা। সখি মালতি! মালতি বলিয়া আমি ডাকিতেছি, তথাপি উত্তর দিতেছ না? (উৎকণ্ঠার সহিত) ভগবতি! রক্ষা কর। বহুকাল নিশ্বাস নিরুদ্ধ হওয়ায় এই মালতীর হৃদয় নিস্পন্দ হইয়াছে। হা অনাথ! হা প্রিয়সখি! তোমরা উভয়েই পরস্পরের মরণের কারণ হইলে।

(৩১) মাধ। হা বৎসে! মালতী!

काम। [ऊर्द्ध्वमवलोक्य।] तत्किमेव झटिति पाट्यमानादिव अम्बुदात् अम्बुनिवहः परिस्रवन् अस्मान् प्रीणयति। (२४)

माध। [सोच्छ्वासम्।] अये! प्रत्यापन्नचेतना मालती। तथाहि अस्याः—(२५)

भवति विततश्वासा नासा, प्रणुन्नपयोधरं
हृदयमपि च स्निग्धं चक्षुर्निजप्रकृतौ स्थितम्।

---

(२१) सर्वे कामन्दक्यादयः मोहमुपगम्य मालतीशोकेन मूर्च्छां लब्ध्वा संज्ञां चेतनां लभन्ते। एतच्चैतल्लाभेऽपि सौदामिनीकृतपातादिवर्षणमेव हेतुरिति यथाक्रमकामन्दकी-वाक्यान्वयम्।

(२२) कामेति। पाट्यमानादिव विदार्यमाणादिव (पतनीस्रुक्सवस्रवत्त्वादसंभावितम-मिति मन्तव्यम्।) अम्बुदात् मेघात्, परिस्रवन् परिपतन्।

(२३) सोच्छ्वासमिति, उच्छ्वसिन मालतीचेतनालाभविनिमित्तचोपरक्तेन सह यथा स्यात्तथेत्यर्थः। प्रत्यापन्नचेतना लब्धचेतना। अस्याः मालत्याः।

(२४) भवतीति। नासा नासिका विततः बहुकालस्तम्भरोगपरम्परासंविमुक्तिमापन्नः श्वासः निःश्वासवायुर्यत्र तादृशी भवति। हृदयं वक्षोऽपि प्रणुन्नौ श्वासप्रश्वासवशादाकम्पितौ पयोधरौ स्तनौ यत्र तादृशं भवति। चक्षुः नेत्रञ्च स्निग्धं प्रसन्नं सत् निजप्रकृतौ स्वीयस्वभावे स्थितं भवति। मूर्च्छाकाले तु नैतादृशमासीदिति भावः। वदनं तत्क्षणात् वदनं मुखं मूर्च्छा-च्छेदात् नीहारघनात्तैतीः अतः प्रारब्धे दिवाप्रत्यिकाले प्रातःकाल इव यावत् श्रिया नैसर्गिक-

---

(৩৩) সব। হা প্রিয়সখি। (সকলে মূর্চ্ছা প্রাপ্ত হইয়া পুনর্ব্বার চৈতন্যলাভ করিল)

(৩৪) কাম। (উর্দ্ধে অবলোকন করিয়া) তবে এ কি? কাহারও দ্বারা যেন অকস্মাৎ বিদার্য্যমাণ জলধর হইতে জলসমূহ নিপতিত হইয়া আমাদিগকে প্রীত করিতেছে।

(৩৫) মাধ। (ঔৎসুক্যের সহিত) অয়ি! মালতী চৈতন্য লাভ করিয়াছে, কেন না ইহার—

(৩৬) নাসিকা বিস্তৃত শ্বাসযুক্ত হইতেছে। হৃদয় ও পয়োধর (শ্বাস-প্রশ্বাসবশে) আকম্পিত হইতেছে, চক্ষুও স্নিগ্ধ হইয়া প্রকৃতিস্থ হইয়াছে।

तदनुवदनं मूर्च्छाच्छेदात् प्रसादि विराजते
परिगतमिव प्रारब्धोऽङ्कः श्रिया सरसीरुहम् ॥ (३६)

[नेपथ्ये।] अविगणय्य नृपं सहनन्दनं चरणयोर्नतमग्निमुखे पतन्।
सपदि भूरिवसुर्विनिवर्त्तितो मम गिरा गुरुसम्मदविस्मयः ॥ (३७

[माधवमकरन्दौ। कर्णं दत्त्वा सविस्मयम्।]

भगवति! दिष्ट्या वर्द्धसे।

श्रीलक्ष्म्या परिगतः प्रारब्धः [illegible] सरसीरुहं पद्मकमिव प्रसादि प्रसन्नतायुक्तं सत् विराजते दीप्यते। तथा चैतैश्चिह्नैः मालत्याः मूर्च्छापगमेन चैतन्यमनुमीयत इति भावः।

अत्र प्रकृतिमन्देनैव [illegible] दोषः। [illegible] मालत्यादीनां [illegible] [illegible] इति ध्येयम्।

(३७) पुनरावर्त्तयति [illegible] अविगणय्येति। भूरिवसुः मालतीपिता [illegible] पादयोर्निपतितं नन्देन [illegible] सहनन्दनं नृपं नरपतिं अविगणय्य [illegible] अग्निमुखे [illegible] सपदि तत्क्षणात् मम गिरा "जीवति कल्याणी मालतीति वह्नौ न प्रविश" इति मम वचनेन [illegible] निवर्त्तितः [illegible] मालत्याः [illegible] भवतीति भावः।

"गर्भीकृतचित्रं वाक्य"मिति [illegible] इति ध्येयम्।

তৎপরে মূর্চ্ছাচ্ছেদবশতঃ মুখও প্রাতঃকালে স্বাভাবিক শ্রীসংযুক্ত পদ্মের ন্যায় প্রসন্ন হইয়া শোভা পাইতেছে।

(৩৭) (নেপথ্যে) ভূরিবসু অনল প্রবেশ নিবারণের জন্য চরণে নিপতিত নন্দনের সহিত রাজাকেও গণনা না করিয়া অগ্নিমুখে পতিত হইতে "মালতী বাঁচিয়া আছে সুতরাং বহ্নিতে প্রবেশ করিও না" এইরূপ আমার বাক্য দ্বারা অত্যন্ত হর্ষ ও আশ্চর্যযুক্ত হইয়া তৎক্ষণাৎ বহ্নিপ্রবেশ হইতে নিবারিত হইয়াছে।

सा योगिन्यम्बरतो विघटितजलदा मुपैत्यर्यं यस्याः ।
वागन्तजलासारो जलदजलासारमतिमिति ॥ (३८)

काम । प्रियं नः प्रियम् ।

माल । दिट्ठिया चिरस्स पच्चुज्जीविदह्मि (त) ।

काम । [सहर्षं सवाष्पञ्च ।] एह्येहि पुत्रि ! (४०)

(त) दिष्ट्या चिरस्य प्रत्युज्जीवितास्मि ।

---

(३८) सेति । सा मालत्युद्धारकर्त्री योगिनी विघटित‌ अपवारितः जलदो मेघो यया तादृशी सती अम्बरात् आकाशात् अभ्युदेति अस्मान् प्रत्यागच्छति । यस्याः योगिन्याः वयं किञ्चित् प्राप्तकार्यं: वागन्तजलासार "अतिमयय्यो" त्यादिवचनपीयूषधाराभिः जलदजलासारं वारिदधारासम्पात अतिशेते अभिभवमुदयसम्पादने अतिक्रम्य वर्त्तते । अनेनैवासार विनिर्गतासामानादिति भावः ।

"धारासम्पात आसार" इत्यमरोक्ता आसारशब्दे नैवाभिप्रेतार्थसिद्धौ जलजलदजलशब्दयोरापि बिन्दीनामाधिक पदत्वदोषः । वागमृतेति निरङ्गरूपकालङ्कारः, एवं अतिशेते इत्यनेनोपमेयस्योपमानाद्धिक्यवर्णनाद्व्यतिरेकाालङ्कारश्च, इत्यनयोरङ्गाङ्गिभावेन सङ्करः । आर्य्याजातिः ।

(३९) प्रियं नः प्रियमिति कृरिसतोऽयं क्रियविशेषणसमष्टावसतीव प्रियमित्यर्थः । प्रियत्वातिशयद्योतनाय द्विरुक्तिः ।

(त) मालतीति । चिरस्य बहुकालात् परतः प्रत्युज्जीवितास्मि—जीवनमवाप्तास्मि । अघनतः कपालकुण्डलाकवलितया मायविरहैव ततः पितृजनप्रवेशयवन्ती च बहुकालं यतवत्यैवासं, अधुना समस्तदुःखावसानात् पुनर्लब्धजीवनास्मीति भावः । अतएव "समयी दुःखनियोग" मिति सम्पादनं समयीनाम निर्व्वहणमङ्गमुक्तम् ।

---

(৩৮) মাধব ও মকরন্দ। (ঊর্দ্ধে অবলোকন করিয়া) ভগবতি ! ভাগ্যবশতঃ বৃদ্ধিলাভ করিয়াছ। সেই যোগিনী মেঘ অপসারিত করিয়া আকাশ হইতে আমাদিগকে লক্ষ্য করিয়া আসিতেছে। যাহার এই বাক্যরূপ অমৃতের জলধারাসম্পাতে বারির বারিধারা সম্পাতকেও অতিক্রম করিয়া বর্ত্তমান।

(৩৯) কাম। দুহিতৃর বহ্নিপ্রবেশ নিবর্ত্তন আমাদের অত্যন্ত প্রিয়।

(ত) মাল। ভাগ্যক্রমে বহুদিন পরে আমি প্রত্যুজ্জীবিত হইলাম !

माल । कथं भगवती ? । [इति पादयोः पतति ।] (घ)

काम । [उत्थाप्यालिङ्गय मूर्ध्न्याघ्राय ।]

जीव जीवितसमाय जीवितं देहि, जीवतु सुखमनय ते ।

चन्द्रकैस्तुहिनसङ्गशीतलैः पुत्रि ! मां प्रियसखीञ्च जीवय ॥ (४१)

माध । वयस्य मकरन्द ! सम्प्रति उपादेयो जीवलोकः संवृत्तः ।(४२

मक । [सहर्षम् ।] एवमेतत् । (४३)

(घ) कथं भगवती ? ।

---

(४१) जीवेति । हे पुत्रि ! कल्याणरूपे मालति ! त्वं जीव चिरकालं यावत् धारय । जीवितसमाय जीवितेशाय प्रियतमायैतस्मै जीवितं जीवनं देहि स्वजीवनदानेन समर्पय । तथा ते तव सुखमनयः चिरदिनसुखमनः जीवतु । तथा हिमसम्पर्कैः हिम- संसर्गात् शैत्ययुक्तैः तव चन्द्रकैः शरीरावयवैः मां प्रियसखीं सर्वाङ्गेनाथ जीवय । आलिङ्गन- दानेनोज्जीवितां कुरु । तव जीवनात्मकदर्शने जीवनानि अस्मदादीनां एवं सर्वे सम्यक् जीवन् जीवनात् पुनर्जीविता इव संवृत्ता इति भावः । एतेन सखि सर्वेषामेवाहोरात्रे इति चन्द्रमा उक्तवान्: ।

अत्र जीवितसमायेत्यादौ उपमालङ्कारः । रथोद्धता वृत्तम् ।

(४२) सम्प्रतीति । उपादेयः लिप्सितव्यो जीवलोकः संसारः । प्रियतमया मालत्या लाभात् चिरस्य मरणचिन्तायापीति भावः । अत्र एव "अहर्षं दण्डायितः" इति उक्तवान् मकरन्दस्य नाट्यालङ्कारः ।

(४३) एवमेतदिति । एतत् अनुक्तिमस्तिनाथं एवं, यथार्थमेवेत्यर्थः । इतोऽपि कालोऽधुना- नायासेनदर्शितमिति भावः ।

---

(৪০) কাম। (হর্ষ ও আনন্দাশ্রুবিসর্জনের সহিত) পুত্রি ! এস এস।

(ঘ) মাল। একি ভগবতী ? (চরণে নিপতিত হইলেন)।

(৪১) কাম। (উঠাইয়া আলিঙ্গন ও মস্তকে আঘ্রাণ করিয়া) হে পুত্রি ! মালতি ! তুমি জীবিত থাক। প্রাণতুল্য মাধবের জীবন দান কর। তোমার প্রিয়ার্হ স্বজনগণও জীবিত হউক, এবং হিমসংস্পর্শবৎ শীতল অঙ্গ দ্বারা আমাকে এবং প্রিয়সখী সহচরীকেও বাঁচাও।

.(৪২) মাধ। বয়স্য মকরন্দ ! সম্প্রতি আমার জীবলোক সত্যই উপাদেয় হইয়াছে।

मदयन्तिकालवङ्गिके। पियसहि! मणोरहातिक्कन्तदंसणे!
सम्भावेहि अम्हे परिस्सङ्गेण (द)।

मालती। हा पियसहिओ! [उभे आलिङ्गति।] (ध)

कामन्दकी। वत्सौ! किमेतत्। (४४)

माधवमकरन्दौ। भगवति!

कपालकुण्डलाकोपदुर्जातजनितापदः।
वयमप्युद्धृताः सख्याः निर्बन्धेनार्थितानया॥ (४५)

(द) मनोरथातिक्रान्तदर्शने! सम्भावयावाम् परिष्वङ्गेन।

(ध) हा प्रियसख्यौ!

(द) मदेति। मनोरथमपि अतिक्रान्तं दर्शनं यस्यास्तत्सम्बुद्धौ। यदेतस्या विपत्तिरुपा- [illegible] इति भावः। परिष्वङ्गेन आलिङ्गनेन, सम्भावय सम्मानय।

(ध) उभे मदयन्तिकालवङ्गिके।

(४४) वत्सेति। वत्सौ। माधवमकरन्दौ! एतत् मालत्या सह [illegible] पुनरा- [illegible] किं किमिदम्? [illegible] मालत्या [illegible] प्रति प्रश्नोऽयमिति मन्तव्यम्।

(४५) कपालेति। [illegible] कपालकुण्डलायाः कोपात् [illegible] (दुर्जातं व्यसने [illegible] इत्यमरः) [illegible] विपदः [illegible] मालतीमाधवमकरन्दाः [illegible] [illegible] भगवतीति [illegible] मन्तव्यम्।

(৪৩) মদ। (হর্ষে অধীর) আহা প্রিয় ।

(৪৪) কাম। বৎস! মালতীর সহিত এবং পুনরায় আপনাদের মধ্যে কি ?

(৪৫) মাধব এবং মকরন্দ। ভগবতি! কপালকুণ্ডলার কোপপ্রযুক্ত দারুণবিপদে আমাদের মৃত্যুপর্যন্ত ঘটিয়াছিল। কিন্তু এই মালতীর আগ্রহ সহকারে আমাদিগকে সেই সেই বিপদ হইতে উদ্ধার করিয়াছেন।

काम। कथमघोरघण्टवधविजृम्भितमेतत्। (४६)

मद। लवङ्गिके! आश्चर्य्यं! पुनरुत्तदारुणस्य परिणामरमणीअं विहिणो विलसिदं। (न)

प्रविश्य सौदामिनी। [उपसृत्य।]

भगवति! स एव वश्चिरन्तनोऽन्तेवासिजनः प्रणमति। (४७)

काम। अये! भद्रा सौदामिनी? (४८)

माधवमकरन्दौ। [सविस्मयम्।] कथमियं भगवत्याः पक्षपातस्थानम् आद्या शिष्या सौदामिनी। तत्सर्वमधुना सङ्गच्छते। (४९)

(न) आश्चर्य्यम्! पुनरुक्तदारुणस्य परिणामरमणीयं विधेर्विलसितम्।

---

(४६) कामेति। अथ कथं शब्दो विस्मये। एतत् मालत्यपहरणं अघोरघण्टस्य कपालकुण्डलागुरोः कापालिकस्य यो वधः माधवेन व्यापादनं तस्य विजृम्भितं फलं। कपालकुण्डलयैव वधप्रतिशोधनार्थं माधवजीवनमूला मालत्यपहृतेति महदाश्चर्य्यमिति भावः।

(न) मदेति। पुनरुक्तदारुणस्य द्विगुणितनिर्दयस्य निरतिशयदयारहितस्येति यावत्, विधेः दैवस्य विलसितं आचरणं परिणामरमणीयं मालत्याः पुनर्लाभसम्पादनेन चरमे मनोहरं जातं। तथाच मालतीवियोगसम्पादकत्वेन दारुणोऽपि विधिः पुनःसम्मिलनसम्पादक इति शोभनश्च इति भावः।

(४७) प्रविश्येति। उपसृत्य कामन्दकीसमीपे समेत्य। चिरन्तनः पुराणः अन्तेवासिजनः शिष्यजनः वो युष्मान् प्रणमति नमस्करोतीति। तथाच "गीतिः शास्त्रेषु वर्त्तन"मिति वचनादत्र गुरुनमस्कारस्य शास्त्रीयत्वेनात्र गीतिर्नाम नाट्यालङ्कारः।

(४८) कामेति। अये इति विस्मये। भद्रा मङ्गलास्पदा।

---

(৪৬) কাম। কি আশ্চর্য্য!! এই মালতীর অপহরণ অঘোরঘণ্টবধেরই প্রতিফল।

(ন) মদ। লবঙ্গিকে। আশ্চর্য্য (এই যে) নিরতিশয় নির্দ্দয় বিধাতার ব্যবহার পরিণামে রমণীয় হইল।

(৪৭) সৌদামিনী (প্রবিষ্ট হইয়া কামন্দকীর সমীপে যাইয়া) ভগবতি! এই সেই তোমার পুরাতন শিষ্য প্রণাম করিতেছে।

(৪৮) কাম। একি মঙ্গলাস্পদা সৌদামিনী?

काम। एह्येहि भूरिजनजीवितदानपुण्य-

सम्भारसारिणि! चिरादसि हन्त दृष्टा।

दत्तप्रमोदमपि नन्दय मे शरीर-

मालिङ्ग्य सौहृदनिधे! विरम प्रणामात्॥ (५०)

अपि च—नन्द्या त्वमेव जगतः स्म कृतोपशिवि-

रेवंविधैर्विलसितैरतिशोभितासि।

---

(४९) मातेति। आश्चर्य्यञ्च अत्र शब्दः। भगवत्याः कामन्दक्याः चरणपादस्य परम-धैर्य्यस्य ... पाद ... मालतीमाधवादि ... भवति। ... इत्यादि भावः।

(५०) एह्येहीति। भूरिजनानां ... जीवितदानेन ... हन्त हर्षे ... दत्तः प्रमोदो ... शरीरं ... आलिङ्ग्य नन्दय ... हे सौहृदनिधे! ... नमस्कारात् विरम विरता भव। ... समस्तजनस्य ...

(५१) नन्द्या ... इत्यादि ...

(४९) माधव ও মকরন্দ। (বিস্ময়ের সহিত) আহা এই গৌরবিনী ভগবতী কামন্দকীর পদপাতের মাত্রা প্রথম শিখা। অতএব মালতীর উদ্ধার প্রভৃতি সবই সম্প্রতি ইহার পক্ষে সম্ভব হইয়াছে।

(৫০) কাম। সখি! বহু লোকের জীবনদানরূপ পুণ্যসমূহ-ধারিণী! সৌদামিনি! এস এস, আহা বহুদিন পরে তোমায় দেখিলাম। আমার শরীরকে হর্ষ দাও। আনন্দিত করিলেও আলিঙ্গন করিয়া পুনরায় আনন্দিত কর। হে সৌহার্দ্দনিধি! তুমি প্রণাম হইতে বিরত হও।

यस्याः पुरा परिचयप्रतिबद्धबीज-
मुद्भूतभूरिफलशालि विजृम्भितं ते ॥ (५१)

मदयन्तिकालवङ्गिके। इयं सा अज्जा सौदामिनी। (प)

माल। बाढ़ं इमाए क्खु भअवदीसंबन्धपक्खवादिणीए णिब-

(प) इयं सा आर्या सौदामिनी।

निःस्वार्थं मालत्युद्धारादिरूपैः बोधिसत्त्वं प्राणत्यागेनापि परोपकारं कर्तुं कृतसङ्कल्पं बुद्ध-विशेषं अतिक्रान्तैः वर्त्तमाने विलसितैः आचरणैः स्पृहणीया मादृशामप्याकाङ्क्षणीया सिद्धिः मन्त्रार्थसिद्धिर्यस्यास्तादृशी त्वमेव जगतः सर्वलोकानां वन्द्या वन्दनीया नमस्कारयोग्या। तथाच सर्वजननमस्कारयोग्यायास्तव मन्नमस्कारमप्यनुचितमिव मन्ये इति भावः। यस्यास्ते तव पुरा विद्याग्रहणकाले परिचयः निबिडप्रणयात्मकेनासक्तिः स एव प्रतिबद्धं उत्पन्नं बीजं यस्य तथाभूतं इदं विजृम्भितं चेष्टितं मालत्युद्धाराद्याचरणं मिति यावत्। उद्भूतैः उत्पन्नैः भूरिभिः बहुभिः फलैः माधवलवङ्गिकादीनां जीवनरक्षणरूपैः शालते शोभते इति तथोक्तं अभूदिति शेषः। विद्याग्रहणकालसम्बद्धा मयि त्वयाप्रदर्शितप्रणयैव मालत्युद्धाररूपकार्य्यस्य बीजं तेन च मालत्युद्धाररूपकार्य्येण मालतीमाधवयोर्जीवनविसर्जनोद्यतयोः माधवादीनां जीवन-रक्षणरूपं प्रचुरतरफलं सम्पादितमिति त्वदीयनिःस्वार्थपरोपकारिता सर्व्वैरेवाभिनन्दनीया वन्द-नीयेति सरलार्थभावार्थौ।

अत्र विजृम्भिते श्लिष्टविशेषणसाम्येन प्रवर्त्तमानः शाखाद्यङ्कुरादिविशिष्टफलशालित्वादि-व्यवहारसमारोपात् समासोक्तिरलङ्कारः। "प्रकृतादनुवर्णनं प्रस्तुति"रिति ;लक्षणादनुहलि-गोत नाट्यालङ्कारः। वसन्ततिलकावृत्तम्।

(प) मदेति। इयं परिहसमाना, आर्या सौदामिनी सा? या बकुलमालामादाय माधवान्तिकमागता सा किमित्यर्थः।

---

(৫১) আরও দেখ। বোধিসত্ত্ব নামক বুদ্ধবিশেষেরও অতিক্রমণকারী এরূপ (নিঃস্বার্থভাবে মালতীর উদ্ধারাদিরূপ) ব্যবহার দ্বারা যাহার মন্ত্রার্থসিদ্ধি আমাদের ও স্পৃহণীয়, তাদৃশ তুমিই জগতের বন্দনীয়া। সেই তোমার পূর্ব্ব পরিচয়রূপ অঙ্কুরিত বীজজন্য মালতীর উদ্ধাররূপ আচরণ মাধবাদির জীবনরক্ষারূপ সমুৎপন্ন বহুফলশালী হইয়াছে।

(প) মদয়ন্তিকা ও লবঙ্গিকা। এই আর্য্যা সৌদামিনীই কি তিনি?

भक्किअ कावालकुण्डलादो अत्तणो आवसधं उवणीअ मं भअवदी-णिव्विसेसं समस्सासिदह्मि, किञ्च केसराबलीसाहिण्णाणहत्थाए इह आअच्छिअ, सव्वे तुह्मे सम्भाविदा मरणादो, सा एसा जीविदप्पदाइणी सोदामिणी (फ) ।

मदयन्तिकालवङ्गिके । सुप्पसस्सा णो कणिट्ठा भअवदी । (ब)

(फ) भगवा खलु भगवतीनिर्विशेषमातृपालिका, निर्मत्‍स्य कपालकुण्डलातोऽस्मत् आत्मप्र-सुपनीय मां भगवतीनिर्विशेषं समाश्वासिताम्मि, किञ्च केसरावलीसाभिज्ञानहस्तया इहागत्य सर्वं यूयं सम्भाविता मरणात्, सैषा जीवितप्रदायिनी सौदामिनी ।

(ब) सुप्रसन्ना नः कनिष्ठा भगवती ।

(फ) भक्तिति । कार्वे भवद्ध (भवस्व समयोर्वादनिदि इत्यादुथः) इयं देवैवार्थः । भगवत्या कामन्दकया सम्बन्धेन स्नेहसम्पर्केण पक्षपातिन्या मदुपकारिण्या, निर्मत्‍स्य निरस्य, आत्मीयं भवनं, भगवतीनिर्विशेषं कामन्दकीतुल्यं यथा स्यात्तथा । न केवलं ममापि ... कर्मश्रेणिमकरोदित्याह—किञ्चेति । केसरावल्या बकुलकुसुमग्रन्थना अभिज्ञानः 'अभिज्ञानेन' चिह्नेन सह वर्तमानः बकुलमालारूपाभिज्ञानयुक्त इति यावत्, हस्तो यस्यास्तादृशया अनया ; सर्वे यूयं कामन्दकीमदयन्तिकालवङ्गिकामाधवमकरन्दप्रभृतयः यूयं मरणात् सम्भाविताः समाश्वासिताः प्रतिनिवर्तिता इति यावत् । अत्र बकुलमालाप्रदर्शनेन तावत् कामन्दक्यादीनां जीवनरक्षणेऽपि माधवमकरन्दजीवनरक्षणद्वारेण तासामपि जीवन-रक्षणं कृतं, अन्यथा माधवमकरन्दशोकेनापि तासां मरणसम्भवादिति मन्तव्यम् ।

(ब) मदेति । कनिष्ठा भगवती सौदामिनी, कनिष्ठभगिनी कामन्दक्याश्चेति बोध्यम् । नः अस्मान् प्रति सुप्रसन्ना अनुग्रहयुक्ता । अस्मास्वेव सौदामिन्याः प्रसादोऽभूदिति भावः ।

(ফ) মাল। অবশ্য, ইনিই ভগবতীর মত হওতঃ আমার পক্ষপাতিনী হইয়া কপালকুণ্ডলাকে তিরস্কার করতঃ আমাকে নিজের আশ্রমে নিয়া ভগবতীর ন্যায় আশ্বাসিত করিয়াছেন। পরন্তু বকুলমালারূপ অভিজ্ঞান হস্তে এইস্থানে আসিয়া তোমাদের সকলকে মরণ হইতে রক্ষা করিয়াছেন। এই সেই জীবনদায়িনী সৌদামিনী।

(ব) মদয়ন্তিকা ও লবঙ্গিকা। কনিষ্ঠা ভগবতী (এই সৌদামিনী) আমাদের প্রতি অত্যন্ত আগ্রহযুক্ত।

माधवमकरन्दौ । अहो नु खलु भोः ! ! (५२)

अपि चिन्तामणिश्चिन्तापरिश्रममपेक्षते ।
इदं त्वचिन्तितं मन्ये कृतमाश्चर्यमार्यया ॥ (५३)

सौदा । [स्वगतम् ।] हन्त ! लज्जयति मामेवं सौजन्य-मेषाम् । [प्रकाशम् ।] भगवति ! एतत्प्रहृष्टनन्दनाभिनन्दितेन राज्ञा पद्मावतीश्वरेण भूरिवसोः प्रत्यक्षमभिलिख्य पत्रम् आयुष्मतो माधवस्य प्रेषितम् । [इति पत्रमर्पयति ।] (५४)

---

(५२) अहो नु खलु भोरिति हर्षाश्चर्यद्योतकमेकमेवाव्ययम् ।

(५३) अपीति । चिन्तामणिरपि प्रार्थकस्य चिन्तानुसारेण फलप्रदो मणिविशेषोऽपि चिन्ता परिश्रमं प्रार्थकस्य चिन्तारूपं परिश्रमं अपेक्षते फलदानविषये प्रतीक्षते । नु किन्तु आर्यया श्रेष्ठया अनया सौदामिन्या अचिन्तितं अस्माभिरभावितं मालत्यादीनामस्माकं परिरक्षण-रूपमचिन्तितकार्यमित्यर्थः, कृतं सम्पादितम्, इदं आश्चर्यं मन्ये ।

अत्रोपमेयभूताया सौदामिन्या उपमानाच्चिन्तामणेराधिक्यवर्णनेन व्यतिरेकालङ्कारः, स च श्लेषानुप्राणितेन संसृज्यते । तेन च सौदामिन्याः समतीव 'दयावतीत्वरूपं वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ।

(५४) सौदेति । एतेषां कामन्दक्यादीनां सौजन्य प्रसादात्, मां अत्यन्तं निरतिशयं लज्जयति लज्जायुक्तां करोति । आत्मप्रशंसाश्रवणे सज्जनानां लज्जायाः स्वाभाविकत्वादिति भावः । प्रहृष्टेन भूरिवसोरनल्पवैभवनिवारणात् सन्तुष्टेन नन्दनेन अभिनन्दितः परमभाग्य-शालितया प्रशंसितः तेन । माधवस्येति समीपे इति शेषः ।

(৫২।৫৩) মাধব ও মকরন্দ। অহো কি আশ্চর্য্য!! চিন্তামণিও ফলদান করিতে যাচকের চিন্তারূপ পরিশ্রম অপেক্ষা করিয়া থাকে। কিন্তু এই মাননীয়া যোগিনী আমাদের অচিন্তিত বিষয় সম্পন্ন করিয়াছেন, অতএব ইহা আশ্চর্য্য মনে করিতেছি।

(৫৪) সৌদা। (স্বগত) অহো! ইহাদিগের সৌজন্য আমাকে অত্যন্ত লজ্জিত করিতেছে। (প্রকাশ্যে) ভগবতি! হর্ষযুক্ত নন্দন কর্ত্তৃক প্রশংসিত রাজা পদ্মাবতীশ্বর ভূরিবসুর সমক্ষে এই পত্র লিখিয়া দীর্ঘজীবী মাধবের সমীপে পাঠাইয়াছেন। (পত্র অর্পণ করিল)

काम। [गृहीत्वा वाचयति।] स्वस्त्यस्तु वः परमेश्वरः समाज्ञापयति। यथा—(५५)

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्वये च त्वयि
प्रत्यस्तव्यसने महीयसि परं प्रीतोऽस्मि जामातरि।
सेनेयं मदयन्तिकाथ भवतः प्रीतैव तव प्रेयसे
मित्राय प्रथमानुरागघटितान्यस्माभिरुत्सृज्यते॥ (५६)

---

(५५) कामेति। गृहीत्वा सौदामिनीहस्तात् पत्रमादाय वाचयति (वाचनमात्रं दृष्टीनाम-कालमात्रोऽपम्) पठति। वो युष्माकं स्वस्ति शुभं भवतु। परमेश्वरः नरेश्वरः पद्मावतीश्वर इति यावत्, समाज्ञापयति सम्यगवबोधयति।

(५६) श्लाघ्यानां प्रशंसनीयानां गुणिनां सौन्दर्यशास्त्रज्ञानादिसद्गुणसम्पन्नानां धुरि अग्रे स्थितवति वर्त्तमाने, श्रेष्ठान्वये उच्चवंशसम्भूते, प्रत्यस्त परमसौभाग्येनापनिरस्तं व्यसनं विपद् यस्य तथाभूते (एतेनातीव शुभादृष्टशालित्वं सूचितम्) महीयसि महाकुलादिनाद्-गादिमाहात्म्येनापि महति त्वयि जामातरि कन्यायाः स्वामिन्याः मालत्याः स्वामिनि सति परं अत्यन्तं प्रीतः सन्तुष्टः अस्मि भवामि। जामातरि मादृशोऽयत्ना सर्वेषामेव त्वयि सद्भावादिति भावः। ततः किमित्याकाङ्क्षायामाह—सेनेति। तेन हेतुना भवतः प्रीत्यै तव सन्तुष्ट्यै तव प्रेयसे प्रियतमाय मित्राय सुहृदे मकरन्दाय प्रथमं पूर्व्वं अनुरागेण आसक्तिविशेषेण घटितापि संयोजिता-मपि इयं मदयन्तिका अस्माभिः अद्य उत्सृज्यते समर्प्यते।

अत्र प्रीतिरूपकार्य्ये प्रति गुणिनां धुरि स्थितवत्त्वादीनामनेककारणानामुपन्यासात् समुच्चयोऽ-लङ्कारः। तथाहतस्य मन्दनाथ मालतीदानानन्तरमपरस्यानुचितस्यानेन मार्जनात् "परिहार इति प्रोक्तः कृतानुचितमार्जन"मिति लक्षणेन परिहारो नाम नाट्यालङ्कारश्च। तथा "मानदानादि-भाषण" मिति लक्षणात् भाषणं नाम निर्वहणसन्ध्यङ्गम्। शार्दूलविक्रीडितं वृत्तम्।

---

(৫৫) কাম। (পত্র গ্রহণ করিয়া পড়িতে লাগিল) তোমাদের মঙ্গল হউক, পদ্মাবতীশ্বর জানাইতেছেন যে,

(৫৬) প্রশংসনীয় গুণিদিগের অগ্রবর্তী শ্রেষ্ঠ বংশজাত অস্তমিতব্যসন ও মহান্ তুমি জামাতা হওয়ায় অত্যন্ত সন্তুষ্ট হইয়াছি। অতএব তোমার প্রীতির জন্য তোমার প্রিয় সুহৃৎ মকরন্দে এই মদয়ন্তিকা প্রথমে অনুরাগ কর্তৃক সংযোজিতা হইলেও অদ্য আমা কর্তৃক সমর্পিতা হইতেছে।

[माधवमुद्दिश्य ।] वत्स ! श्रूयताम् । (५७)

माध । श्रुतमिदानीं सर्वथा कृतार्थोऽस्मि । (५८)

माल । दिट्ठिआ दाणिं अवहदं णो हिअअस्स आसङ्कासल्लं । (भ)

लव । सम्पदं णिरवसेसं माहवसिरिणो मालदीए अ समं फलिदा मणोरहा । (म)

मक । [पुरोऽवलोक्य ।] कथमवलोकितावुद्धरचिते कलहंसकेन सह सप्रमोदं स्खलन्तावित एवागच्छतः । (५९)

(भ) दिष्ट्या इदानीमपहृतं नो हृदयस्याशङ्काशल्यम् ।

(म) साम्प्रतं निरवशेषं श्रीमाधवस्य मालत्याश्च समं फलिता मनोरथाः ।

---

(५७) श्रूयतामिति भवे विनिश्चितं वाक्यजातमाकर्ण्यतामित्यर्थः । एतेन सर्वविषयाशङ्काविगमात् कामन्दक्याः सुमहान् हर्षः सूच्यते ।

(५८) माधेति । सर्वथा सर्वप्रकारेण कृतार्थः सम्पादितप्रयोजनः अस्मि । राज्ञामनुमोदनेन सर्वाशङ्कानिवृत्तेरिति भावः ।

(भ) मालेति । शङ्काशल्यं राजक्रोधाशङ्कात्मकं शल्यं ।

(म) लवेति । निरवशेषं शेषरहितं यथा स्यात्तथा, समं युगपत्, मनोरथाः चित्ताभिलाषाः फलिताः सञ्जातफलाः । मकरन्दोऽत्र मदयन्तिकालाभस्यापि राज्ञा अनुमोदनेन सर्वाशङ्कानिवृत्तेरिति भावः । प्राकृते श्रीशब्दस्य पूर्वनिपातनियमाभावात् "माहवसिरिणो" इति मार्ग्यं माधवार्थं । संस्कृते पूर्वनिपातनियमात् "श्रीमाधवस्ये"ति तदनुवादः कृत इति मन्तव्यम् ।

"आनन्दो वाञ्छितागमः" इति लक्षणात् "वत्स ! श्रूयता"मित्यादिसन्दर्भे आनन्दो नाम निर्वहणसन्ध्यङ्गम् ।

(५९) मकेति । पुरः अग्रतः । कर्णमन्दोऽत्र हर्षशीलकः । स प्रमोदः प्रमोदः

---

(৫৭) (মাধবকে উদ্দেশ করিয়া) বৎস। শ্রবণ কর।

(৫৮) মাধ। শুনিয়াছি, এখন সর্ব্বপ্রকারেই কৃতার্থ হইলাম।

(ভ) মাল। সৌভাগ্যবশতঃ সম্প্রতি আমাদের হৃদয়ের আশঙ্কারূপ শেল বিনষ্ট হইল।

(ম) লব। সম্প্রতি মালতীর সহিত শ্রীযুক্ত মাধবের মনোরথ নিঃশেষরূপে সফল হইল

ततः प्रविशतोऽवलोकिताबुद्धरक्षिते, कलहंसश्च। विविधं नृत्यं कृत्वा सर्वे सप्रश्रयं सप्रणामं कामन्दकीं प्रति— जअदु भअवदि कज्जणिव्वाहिणि। [माधवं प्रति।] जअदु मअरन्दणन्दण! माहव पुण्णचन्द! दिट्ठिआ वड्ढसि। (ग)

सर्वे सर्वं पश्यन्ति नृत्यन्ति। (१०)

सर्वे। को वा एत्तिअं परिपुरिदसव्वप्पआरमहूसवे ण णच्चदि! (१)

(ग) जय भगवति कार्यनिर्वाहिणि। जय मकरन्दनन्दन। माधवपूर्णचन्द्र! दिष्ट्या वर्द्धसे।

(१) को वा एतस्मिन् परिपूरितसर्वप्रकारमहोत्सवे न नृत्यति।

आनन्दो यस्मिन् तद्यथा स्यात्तथा नृत्यन्तौ नाट्यं कुर्वन्तौ, एत एव अस्मिन् स्थान एव।

(ग) तत इति। सर्वे अवलोकिताबुद्धरक्षिताकलहंसाः। कार्याणां निर्वाहे नायकः यस्याः तथाभूते! अनन्यमूर्तिस्मृत्यापि माधवेन सह मालत्या विवाहसम्पादनरूपकार्येण कामन्दकीं प्रति आत्मार्पणात् कामन्दक्या च सुनिपुणं तत्सम्पादनात् कामन्दक्याः सार्थकमिदम् सम्बोधनं कृतमिति मन्तव्यम्। मकरन्दानन्दन। मकरन्दस्यानन्दसम्पादक! अत्यन्तीव सौभाग्यादिति भावः। पूर्णचन्द्र! पूर्णचन्द्रवदाह्लादकेत्यर्थः।

(१०) सर्वमिति। सर्वे कामन्दकादयः। सविस्मयं सहासं यथा स्यात्तथा पश्यन्ति अवलोकिताबुद्धरक्षिताकलहंसानां नृत्यमवलोकयन्ति।

(१) सर्व इति। परिपूरितः सम्पादितः सर्वप्रकारः सर्वविधः महोत्सवः आनन्दः

---

(৮) মক। (অগ্রে অবলোকন করিয়া) একি অবলোকিতা ও বুদ্ধরক্ষিতা কলহংসের সহিত অত্যন্ত আমোদ সহকারে নৃত্য করিতে করিতে এই স্থানেই আসিতেছে।

(৯) (তৎপরে অবলোকিতা বুদ্ধরক্ষিতা ও কলহংসের প্রবেশ) (বিবিধ নৃত্য করিয়া) সকলে। (সবিনয়ে প্রণয় করতঃ প্রণাম সহকারে কামন্দকীর প্রতি) ভগবতি! কার্য্যভারনির্ব্বাহিণি! তোমার জয় হউক। (মাধবের প্রতি) হে মকরন্দানন্দজনক মাধবপূর্ণচন্দ্র! তুমিও সৌভাগ্যবশতঃ বৃদ্ধি লাভ করিতেছ।

(১০) (কামন্দকী প্রভৃতি সকলে হাস্যের সহিত অবলোকিতা বুদ্ধরক্ষিতা ও কলহংসের নৃত্য দেখিতে লাগিল)।

काम। एवमेतत्, अस्ति वा कुतश्चिदेवम्भूतं विचित्ररमणीयोज्ज्वलं प्रकरणम् (६१)

सौदा। इदमत्र रमणीयान्तरं। यदमात्ययोर्भूरिवसुदेवरातयोश्चिरात्पूर्णोऽयमितरेतरापत्यसम्बन्धान्मनोरथः। (६२)

माल। [स्वगतम्।] कहंविअ। (ल)

(ल) कथमिव ?

यस्मिन् तथाभूते काले इत्यर्थः। को वा न नृत्यति ? अपि तु सर्व्व एवेत्यर्थः। एतेनात्यरक्तस्यापि नृत्येच्छा भवतीति ध्वनितम्।

(६१) कामिति। एवमेतदिति यथा त्वं वदसि तथैवेत्यर्थः। सर्व्वेषामेवात्र नृत्येच्छा जायत एवेति भावः। कुतश्चित् कुत्रचित् एवम्भूतं एवम्प्रकारं विचित्रं अद्भुतं रमणीयं मनोरमं उज्ज्वलं दीप्तिमत् दोषलेशरहितमित्यर्थः। (अत्र तृतीयस्य विशेष्यत्वविवक्षया तेन सह द्वितीयस्य कर्म्मधारयं कृत्वा पुनस्तेन समस्तेन सह प्रथमस्य कर्म्मधारयः बोद्धव्यः) प्रकरणं इत्याख्यानमिति, अस्ति वा ? वाकारोऽत्र प्रश्ने, अस्ति किमित्यर्थः, नास्त्येवेति भावः। यदत्र एवम्भूतं भवभूतिविरचितमालतीमाधवतुल्यं विचित्रं अद्भुतघटनावलीसन्निवेशेनाश्चर्यं अतएव रमणीयं मनोहरं उज्ज्वलं रसालङ्कारादिभिर्दीप्तिमत् प्रकरणं यथोक्तलक्षणो रूपकविशेषः कुतश्चित् भवभूतिरन्यस्मात् कवितः (अमुद्भूतं) अस्ति किं ? अपितु नास्तीत्यर्थो ध्वन्यते।

(६२) सौदेति। रमणीयान्तरं मनोरमापरवृत्तान्तः। किमित्याकाङ्क्षायामाह— यदिति। इतरेतरापत्ययोः अन्योऽन्यसन्तानयोः सम्बन्धात् विवाहरूपसम्बन्धात् मनोरथः मनोऽभिलाषः चिरात् बहुकालानन्तरं पूर्णः दैवप्रसादात्सिद्धः। एतेन च सौदामिनीवचनसन्निवेशेन "तदैव चास्मात् सौदामिनीसमक्षमनयोर्भूरिवसुदेवरातयोर्वृत्तेयं प्रतिज्ञा अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य इति" सुखसन्धौ सूचितमिदानीं निर्व्वहणसन्धौ प्रतिसंहृतमिति मन्तव्यं।

(য) নব। এই পরিপূরিত নর্মপ্রকার মহোৎসবসময়ে কে বা নৃত্য না করে।

(৬১) কাম। ইহা ঠিক। এবম্বিধ আশ্চর্য্য মনোহর ও নির্দোষ বৃত্তান্তাবলী কোথায় আছে কি ?

(৬২) সৌদা। এ বিষয়ে অপর রমণীয় বৃত্তান্ত এই যে, অমাত্য ভূরিবসু ও দেবরাতের পরস্পরের সন্তান মালতীমাধবের বিবাহরূপ সম্পর্ক হওয়ায় বহুদিনের পরে মনোরথ পূর্ণ হইল।

माधवमकरन्दौ सकौतुकम्। भगवति! अन्यथा वस्तुवृत्तमन्यथा वचन मार्य्यायाः। (ञ)

लव। [जनान्तिकम्।] अज्जवदि! किं एत्थ पडिवज्जिदव्वं। (ट)

काम। [स्वगतम्।] सम्प्रति मदयन्तिकासम्बन्धात् नन्दनोपग्रहात् प्रत्यस्तभयाः खलु वयम्। [प्रकाशम्।] वत्सौ! न खलु मन्यथा वस्तुतत्त्वं, यतः मावकावस्थायामस्मत् सौदामिनीप्रत्यक्षमनयो-

---

(ञ) भगवति! किमत्र प्रतिपत्तव्यम्?

(ञ) कथमिति पूर्वौ मनोरथ इति शेषः। प्रिया मदनार्पणमेव स्थिरीकरणा-दैतयाश्चानयोर्विवाहसम्बन्धात् कथं तयोर्मनोभिलाषः पूर्वो भवितुमर्हतीति भावः।

(६१) भगवति। वस्तु एतद्विवाहसम्बन्धः अन्यथा अन्यप्रकारेण भूरिवसोरनुमत्या नन्दनग्रीहं दुहितानुरागीय भवत्या अनुमत्यैव वैपरीत्यं, वृत्तं निष्पन्नं। आर्य्यायाः कामन्दक्याः सौदामिन्यास्तु वचनं "कृतमन्ययो"रित्यादि वाक्यं अन्यथा तदन्यप्रकारेण अविपरीतभावेनेति यावत्, वृत्तं उत्पन्नं। तथाहि भूरिवसुः नन्दनेन सहैव मालतीविवाहनिष्पादनं स्थिरीकृतवान्, सौदामिनी तु पुनस्तस्य भूरिवसुदेवरातयोरन्योन्यसम्बन्धाभिप्रायं कथितवतीति, तथाविवाहनिष्पत्तिः सौदामिनीवचनयोर्वैलक्षण्यमिति भावः।

(ट) भगवति। अत्र—माधवमकरन्दयोर्विवाहे किं प्रतिपत्तव्यं भवत्या किमुत्तरं प्रदेयम्। एतेन मदयन्तिकाया अपि मकरन्देन सहविवाहसम्बन्धः समुद्दिष्ट इति व्यज्यते।

(६४) कामेति। मदयन्तिकासम्बन्धात् माधवपरमसुहृदा मकरन्देन सह मदयन्तिका-विवाहसम्बन्धहेतोः नन्दनोपग्रहात् नन्दनकर्तृकात्मदपकारचेष्टनात् प्रत्यस्तभयाः प्रत्यस्तानि दूरी-भूतानि भयानि यैः तादृशाः वयम्। वत्सौ! भवन्तौ न खलु अन्यथा वस्तुतत्त्वम्, यतः बाल्यावस्थायामस्मत्सौदामिनीप्रत्यक्षमनयोः-

---

(ञ) लव। (স্বগত) কি প্রকারে?

(৬০) মাধব ও মকরন্দ। (কৌতুকের সহিত) ভগবতি! এই বিবাহ-সম্বন্ধ অন্যপ্রকারে নিষ্পন্ন হইয়াছে, আর্য্যা সৌদামিনীর বাক্য অন্যরূপ।

(ট) লব। (জনান্তিকে) ভগবতি! মাধব ও মকরন্দের প্রশ্নবিষয়ে আপনার কি বক্তব্য?

(৬৪) কাম। (স্বগত) সম্প্রতি মাধবের পরম সুহৃৎ মকরন্দের সহিত মদয়ন্তিকার সম্বন্ধ হওয়ায় নন্দন কর্তৃক আমাদের অপকার চেষ্টার আশঙ্কা

द्वयोरेवं प्रतिज्ञा "अवश्यमावाभ्यामपत्यसम्बन्धः कर्त्तव्य" इति, प्रधानप्रकृतिकोपस्त्वेवं परिहृतः। (६४)

सूचीकृतानाम् इत्यादि। मालतीमाधवकारणद्वाभ्याम्, अधुना पुनरिच्छन्नपि नन्दनः मदयन्तिकानुरोधाद्वक्तामपकारं कर्त्तुं न शक्नुयादिति तादृशमहानिर्व्वृतिः सम्पादिता इत्यत्र हेतुभेदोऽपि नातिवर्तितव्य इति भावः। "अन्यथा वस्तुवृत्त"मित्यादि माधवमकरन्दयोः प्रश्नोत्तरमभिधाय माधवमकरन्दौ सम्बोधयति—इत्याहेति। वस्तु मालतीमाधवयोरेतद्विवाहसम्बन्धः, न खलु नैव, अन्यथा अन्यप्रकारेण भूरिवसुदेवरातसमिन्नेनेति यावत्, वृत्तं निष्पन्नं। इममर्थं समर्थयितुमाह—यत इति। यो गुरुसुखान् शास्त्राणि अधीते स छात्रः, तदवस्थायां पठद्दशायामिति यावत्, अस्मत्सौदामिनीप्रत्यक्षं अस्माकं सौदामिन्याश्च समक्षं अनयोः भूरिवसुदेवरातयोः इत्थं सन्धा। तथाच सौदामिन्या यथाकालं यथार्थमुक्तं "यदनयोरित्याद्यभिहितमिति भावः। ननु च कथममात्यो नन्दनाय मालतीं दातुमङ्गीकृत्य तद्विवाहोद्योगं कृतवानित्याकाङ्क्षायामाह—प्रधानेति। "अमात्याः प्रकृतयः राष्ट्रदुर्गबलानि च"ति सप्तविधासु प्रकृतिषु मध्ये, प्रधानप्रकृतेः स्वामिनः राज्ञ इति यावत् (राज्ञः प्राधान्यञ्च सर्व्वनियन्तृत्वादिति मन्तव्यम्) कोपः क्रोधोत्पादप्रसङ्ग एव अनेन प्रकारेण राजानुरोधान्नन्दनाय मालतीप्रदानाङ्गीकरणेनेति यावत्, परिहृतः निवारितः। तथाच राज्ञा कृतस्य नन्दनाय मालतीप्रदानानुरोधस्य सर्व्वथोपेक्षाया राज्ञः क्रोधो दुष्परिहर इति मन्यमानेनामात्येन प्रकाश्यमानेन तदनुरोधपालनमङ्गीकृत्य विवाहोद्योगः कृतः, गुप्तभावेन च माधवेन सह मालत्या विवाहः सम्पादयितुमहं नियुक्ता, एवञ्च परस्परानुरागवशादेव मालतीमाधवयोर्व्विवाहः सुकृतः, विवाहितायाश्चान्यस्मै प्रदानं लोकशास्त्रविरुद्धमिति मन्यमानस्य राज्ञः क्रोधो न जनिष्यत, अभिप्रेतसिद्धिश्च भविष्यतीत्यमात्याशयः। अहमपि तदनुसारेण यथानियोगं सर्व्वं सम्पादितवतीति युवाभ्यामवगन्तव्यमिति भावार्थः।

"पूर्व्ववाक्यन्तु विज्ञेयं यथोक्तार्थोपदर्शन"मिति लक्षणादेव पूर्व्ववाक्यं नाम निर्व्वहणसन्ध्यङ्गम्।

অপগত হইয়াছে। (প্রকাশ্যে) বৎস মাধব ও মকরন্দ! এই বিবাহসম্বন্ধ অন্যপ্রকারে নিষ্পন্ন হয় নাই, যেহেতু পাঠ্যাবস্থাতেই আমার ও সৌদামিনীর সমক্ষে ভূরিবসু ও দেবরাতের প্রতিজ্ঞা হইয়াছিল যে, "অবশ্যই আমরা পরস্পরের অপত্যের বিবাহ সম্বন্ধ করিব"। ভূরিবসু যে রাজানুরোধে নন্দনের সহিত মালতীর বিবাহ দিতে সম্মত হইয়াছিলেন, তদ্দ্বারা রাজার ক্রোধোৎপাদের অবসর নিবারিত হইয়াছে।

(ग) षष्ठो उक्तरथम् ।

(ग) माधवेति । षष्ठो रुदात्यर्थे । सम्भरणं मोपन । [illegible]
[illegible] ।

(६३) माधवेति । विश्वकारिण्यः विप्रलम्भकारिण्याः, पचय प्रजापतिः परित्यान्य-
[illegible] एव कन्याभिन्न परमी मङ्गलविधायिन्यः महतां विचा-
[illegible] । [illegible]
नीतीनां [illegible] । उदाहि—[illegible] परिपालितः [illegible]
[illegible] विप्रलम्भकारिण्यः पचय राज्ञा सह [illegible]
[illegible] ।

(६६) वहिति । [illegible] , यत्-
[illegible] प्रथिव पूर्व्वमेव हस्ते
[illegible] तव कल्याणं पुत्रो: पुत्रयो: पूर्व्वकर्ष्याज्जित-
[illegible], मदुपकर्षेण मम मधार्थ च, [illegible]
[illegible] विषयाणि विपाके । एवं तत् मधश्च: तव एतस-

(ঘ) মাধ। কি আশ্চর্য্য শোভন !!

(৬৫) মাধব ও মকরন্দ। কি আশ্চর্য্য!! বিপ্রলম্ভকারিণী বিধাতৃ-
অভিপ্রায়ও চেয়ে কল্যাণকারিণী মহৎদিগের নীতি অবশ্যই জয় লাভ করে।

(৬৬) কাম। বৎস মাধব! যাঁহারা তোমাদের বিবাহবন্ধন সেই
মাধব পূর্ব্বেই আমাদের অভিপ্রায়ের বিষয়ীভূত হইয়াছিল, তোমাদের পুত্র,
আমার গুরু ও আমার প্রিয়া সৌদামিনী এবং অবলোকিতার ক্লেশের ফলস্বরূপ।